RIVANDRUM SANSKRIT SERIES.

No. LI.

THE

NÂMALINGÂNUSÂSANA

OF

AMARASIMHA

With the two commentaries, **Amarakosodghatana** of

KSHÎRASVÂMIN

and **Tîkâsarvasva** of

VANDYAGHATÎYA-SARVÂNANDA

EDITED BY

T. GANAPATI SÂSTRÎ

Curator of the Department for the publication of Sanskrit Manuscripts Trivandrum.

Part III - 2nd Kanda, 7 - 10 Vargas.

PUBLISHED UNDER THE AUTHORITY OF THE GOVERNMENT OF HIS HIGHNESS THE MAHARAJAH OF TRAVANCORE.

TRIVANDRUM:
PRINTED BY THE SUPERINTENDENT, GOVERNMENT PRESS.
1917.

अनन्तशयनसंस्कृतग्रन्थावलिः।

ग्रन्थाङ्कः ५१.

श्रीमदमरसिंहविरचितं

नामलिङ्गानुशासनं

क्षीरस्वामिप्रणीतया अमरकोशोद्घाटनाख्यया व्याख्यया
वन्द्यघटीयसर्वानन्दप्रणीतया टीकासर्वस्वाख्यया व्याख्यया च
समेतं

संस्कृतग्रन्थप्रकाशनकार्याध्यक्षेण
त. गणपतिशास्त्रिणा
संशोधितम्।

तृतीयः सम्पुटः— द्वितीयकाण्डे ७—१० वर्गाः।

तच्च
अनन्तशयने
महामहिमश्रीमूलकरामवर्मकुलशेखरमहाराजशासनेन
राजकीयमुद्रणयन्त्रालये तदध्यक्षेण
मुद्रयित्वा प्रकाशितम्।

[illegible] ग्रन्थकर्तारः

द्वितीयं काण्डम् ।

II. *refers to the second part and* III. *to the third part of this work.*

[illegible]स्मृता ग्रन्थकर्तारः ।

द्वितीयं काण्डम् ।

टीकासर्वस्वस्मृता ग्रन्थाः ।

द्वितीयं काण्डम् ।

॥ श्रीः ॥

श्रीमदमरसिंहविरचितं

नामलिङ्गानुशासनं

क्षीरस्वामिप्रणीतया अमरकोशोद्घाटनाख्यया व्याख्यया

वन्द्यघटीयश्रीसर्वानन्दप्रणीतया टीकासर्वस्वा

व्याख्यया च समेतम् ।

द्वितीयं काण्डम् ।

अथ ब्रह्मवर्गः ।

सन्ततिर्गोत्रजननकुलान्यभिजनान्वयौ ।
वंशोऽन्ववायः सन्तानः

क्षीर० — सन्तन्यतेऽनया सन्ततिः । गूयते, जन्यते, कुल्यते, चानेन । अन्वीयतेऽन्वयः । वश्यते जन्यते वंशः । अन्ववैत्यन्ववायः ॥

टीका० — सन्ततिनवकं वंशे । तनोतेः क्तिच् । सन्ततिः । गोत्रादयः प्रागुक्ताः । एतिरन्ववपूर्वः । ततः 'एरच्' (३. ३ ५६) । अन्ववायः । कल्पवृक्षे सन्तान उक्तः ॥

---

१. 'वि' ख. पाठः.

G. P. T. 1347. 500. 23-7-15.

वर्णाः स्युर्ब्राह्मणादयः ॥ १ ॥

क्षीर० — व्रियन्ते वर्ण्यन्ते वा वर्णाः ॥

टीका० — ब्राह्मणक्षत्रियवैश्यशूद्रा वर्णाः । 'वृ वरणे' । 'कृपृवृ—'(उ० २. १०)इत्यादिना नः ॥

विप्रक्षत्रियविट्शूद्राश्चातुर्वर्ण्यमिति स्मृताः ।

क्षीर० — चत्वार एव वर्णाश्चातुर्वर्ण्यम् । स्वार्थे ष्यञ् ॥

राजबीजी राजवंश्यः

क्षीर० — राजबीजमस्यास्ति राजबीजी । राजवंशे साधुर्भवो वा राजवंश्यः ॥

टीका० — राजबीजिद्वयं राजवंशे । मत्वर्थ इनिः । राजबीजी । भवार्थे दिगादियति राजवंश्यः ॥

बीज्यस्तु कुलसम्भवः ॥ २ ॥

क्षीर० — बीजे साधुर्भवो वा । यथा सूर्यबीज्यो रामः । य(त्प्र? प्प)करणे 'अन्येभ्योऽपि दृश्यते' (५. २. १२०) ॥

टीका० — यस्यकस्यचित् कुले भूतो बीज्यः । 'यत्प्रकरणे अन्यत्रापि दृश्यते' इति यत् (?) ॥

महाकुलकुलीनार्यसभ्यसज्जनसाधवः ।

क्षीर० — कुलस्यापत्यं कुलीनः । आरात् पापकेभ्यः कर्मभ्यो यात आर्यः । अरणीयो गम्यो वा । सभायां साधुः सभ्यः । संश्चासौ जनः सज्जं नयते वा सज्जनः । साध्नोति परकार्यं साधुः । आमुष्यायणोऽमुष्यपुत्रश्च ॥

टीका० — माहाकुलषट्कं **कुलीने** । महाकुलस्यापत्यं माहाकुलः । 'महाकुलादञ्खञौ' (४. १. १४१) । एवं वृद्धः । महत् कुलमस्येति बहुव्रीहौ अवृद्धोऽपि । अपत्यार्थे 'कुलात् खः' (४. १. १३९) । कुलीनः । आर्यो दीर्घादिः । अर्तेः 'ऋहलोर्ण्यत्' (४. १. १२४) । सभायां साधुरुपयुक्तः सभ्यः । 'सभाया यः' (४. ४. १०५) इति यः । साधेः 'कृवापाजि'—(उ० १. १) इत्यादिना उणि साधुः ॥

ब्रह्मचारी गृही वानप्रस्थो भिक्षुः

क्षीर० —

"ब्रह्म वेदो[1] ब्रह्म तपो ब्रह्म ज्ञानं च शाश्वतम्[2]"।

तच्चरत्यर्जयत्यवश्यं ब्रह्मचारी। 'व्रते' (३. २. ८०) णिनिः। वर्णी। गृही। **गृहस्थो गृहमेधी ज्येष्ठाश्रमी । प्रतिष्ठन्तेऽस्मिन् प्रस्थः । वनप्रस्थे भवो वानप्रस्थो वैखानसाख्यः । भिक्षते तच्छीलो भिक्षुर्यतिः । 'सनाशंसभिक्ष उः' (३. २. १६८) ॥**

टीका० — ब्रह्मचारिचतुष्कं प्रत्येकं **स्वनामप्रसिद्धे** । वेदाध्ययनार्थं ब्रह्म व्रतं चरतीति ब्रह्मचारी । गृहं भार्या, तद्योगाद् गृही । द्वौ नान्तौ । वनप्रस्थे वनैकदेशे भवोऽवस्थाता वा वानप्रस्थः । शेषेऽण् । गृहीतकाषायदण्डो भिक्षुः । 'भिक्ष याच्ञायाम्' । 'सनाशंसभिक्ष उः' (३. २. १६८) ॥

चतुष्टये ॥ ३ ॥

आश्रमोऽस्त्री

क्षीर० — **अस्मिंश्चतुष्के आश्राम्यन्ति तपस्यन्त्यस्मिन्नित्याश्रमं प्रत्येकं वर्तते ॥**

टीका० — **ब्रह्मचार्यादिचतुष्टये** आश्रमः । 'श्रमु तपसि खेदे च' । 'हलश्च' (३. ३. १२१) इति घञ् । 'नोदात्तोपदेश—'(७. ३. ३४) इत्यादिना वृद्ध्यभावः ॥

---

१. 'दा' क. ग. घ. ङ. पाठः. २. 'म् । 'व्रते' णिनिः । ब्रह्मचारी व' क. पाठः.

द्विजात्यग्रजन्मभूदेवबाडवाः ।

विप्रश्च ब्राह्मणः

क्षीर० —

"मातुरग्रे विजननं द्वितीयं मौञ्जिबन्धनात्"

इति द्विजातिः। अग्रे आदौ अग्रान्मुखाद् वा जन्मास्याग्रजन्मा। यच्छ्रुतिः— 'ब्राह्मणोऽस्य मुखमासीत्'। वाडेव इवात्मृसः। विशेषेण पूरयति विप्रो विपाति विपति वा। 'विप क्षेपे'। ब्रह्मणोऽपत्यं ब्राह्मणः॥

टीका० — द्विजातिषट्कं ब्राह्मणे। देहोत्पत्तिसंस्कारोत्पत्तिलक्षणे द्वे जाती जन्मनी अस्येति द्विजातिः। जातिपरत्वाच्छब्दस्य 'जात्यन्ताच्छ बन्धुनि' (५. ४. ९) इति छो न भवति। ब्रह्मणो मुखे अग्रे जन्मास्येत्यग्रजन्मा। नान्तः। वडवा ब्राह्मणी। तथा च—

"वडवा कुम्भदास्यश्च स्त्रीविशेषो द्विजाङ्गना"

इति रभसः। तत्र भवा बाडवाः। शेषेऽण्। 'प्रा पूरणे'। 'आतश्चोपसर्गे' (३. १. १३६)। कः। विप्रः। ब्रह्मणोऽपत्यं ब्राह्मणः। 'तस्यापत्यम्' (४. १. ९२) इत्यण्॥

असौ षट्कर्मा यागादिभिर्युतः ॥ ४ ॥

क्षीर० — षट् कर्माणि ब्राह्मणस्य। अध्ययनमध्यापनं यजनं याजनं दानं प्रतिग्रहश्च ॥

टीका० —

"यजनं याजनं दानं विशिष्टाच्च प्रतिग्रहः।
अध्यापनमध्ययनं विप्रकर्म प्रकीर्तितम् ॥"

इत्येतैः षड्भिर्युक्ते विप्रे षट्कर्मा ॥

विद्वान् विपश्चिद् दोषज्ञः सन् सुधीः कोविदो बुधः ।
धीरो मनीषी ज्ञः प्राज्ञः सङ्ख्यावान् पण्डितः कविः ॥ ५ ॥
धीमान् सूरिः कृती कृष्टिर्लब्धवर्णो विचक्षणः ।

क्षीर० — वेत्ति विद्वान्। 'विदेः शतुर्वसुः' (७. १. ३६)। विपश्चंश्चेतयते विपश्चित्। दोषान् जानाति ज्ञात्वा जह्यादिति दोषज्ञः।

सन् विद्यमानः, उत्तम इत्यर्थः। अन्ये त्वसत्कल्पाः। सुध्यायति सुधीः। 'अन्येभ्योऽपि दृश्यते' (३. २. १७८) इति क्विप् सम्प्रसारणं च। ओकः स्थानं वेत्ति कोविदः, 'कुङ् शब्दे' अस्माद् वा। धियमीरयति धीरः। मनस ईष्टे मनीषास्त्यस्य वा मनीषी। जानातीति ज्ञः। 'इगुपध–' (३. १. १३५) इति कः। ज्ञ एव प्राज्ञः। 'प्रज्ञादिभ्यश्च' (५. ४. ३८) इत्यण्। प्रज्ञास्त्यस्य वा। 'प्रज्ञाश्रद्धा–' (५. २. १०१) इति णः। सम्यक् ख्यानं ज्ञानमस्य सङ्ख्यावान्। सङ्ख्या विचारणा वा। पण्डते विजानाति पण्डितः। 'पडि गतौ'। सर्वे गत्यर्था ज्ञानार्था इति पण्डा धीः सञ्जातास्य वा। कवते वर्णयति कविः। कवितापि। सुवति सूरिः। कृतमस्यास्ति कृती कृतकृत्यः। कर्षति विविक्ते कृष्टिः। लब्धं वर्णनं प्रसिद्धिर्येन लब्धवर्णः। विचष्टे विचक्षणः॥

दूरदर्शी दीर्घदर्शी

क्षीर० — अप्रत्यक्षमूहत इत्यर्थः॥

टीका० — विद्वदादिद्वाविंशकं[1] पण्डिते। 'विदेः शतुर्वसुः' (७. १. ३६) इति शत्रन्ताद् वस्वादेशविकल्पे विद्वान्। विप्रकृष्टं चिनोतीति विपश्चित्। पृषोदरादिः। शोभनं ध्यायतीति सुधीः। किन्नाम वेत्तीति कोविदः। पृषोदरादिः। बुधज्ञयोरिगुपधलक्षणः कः। बुधो ज्ञश्च। व्रीह्यादित्वादिनिः। मनीषी। प्रज्ञायोगात् प्राज्ञः। 'प्रज्ञाश्रद्धार्चावृत्तिभ्यो णः' (५. २. १०१) इति मत्वर्थे णः। सङ्ख्या विचारणा, तद्वान् सङ्ख्यावान्। पण्डा बुद्धिर्जातास्मिन्निति पण्डितः। तारकादित्वादितच्। 'षूञ् प्राणिप्रसवे'। 'षूञः क्रिः' (उ० ४. ६५)। सूरिः, दन्त्यादिः। अभिधानमालायामिन्नन्तोऽपि सूरी। कृतं ज्ञातमनेनेति कृती। 'इष्टादिभ्यश्च' (५. २. ८८) इतीनिः। कर्षति निष्कर्षतीति कृष्टिः। बाहुलकः क्तिन्। 'अन्येभ्योऽपि दृश्यते' इति वा क्तिन्। 'स्त्र्याकर्षे ना बुधे कृष्टिः' इति रुद्रः। लब्धो वर्णः स्तुतिर्येन स लब्धवर्णः। विचक्षण इति 'अनुदात्तेतश्च हलादेः' (३. २. १४९) इति कर्तरि युच्। 'असनयोश्च प्रतिषेधो वक्तव्यः'(वा० २. ४. ५४) इति चक्षिङः ख्याञादेशप्रतिषेधः। देशकालविप्रकृष्टानर्थान् यो बुद्ध्या पश्यति, तत्र दूरदर्शिद्वयमिति केचित्॥

---

१. 'शतिकं' ञ. पाठः.

श्रोत्रियच्छान्दसौ समौ ॥ ६ ॥

क्षीर० — 'श्रोत्रियंश्छन्दोऽधीते' (५. २. ८४)। श्रोत्राभ्यां कृतकर्मेति । छन्दोऽधीते छान्दसः।

"मीमांसको जैमिनीयो वेदान्ती ब्रह्मवादिनि ।
वैशेषिकः स्यादौलूक्यः सौगतः शून्यवादिनि ।
नैयायिकस्त्वाक्षपादः स्यात् स्याद्वादिक आर्हतः।
चार्वाकलोकायतिकौ सत्कार्यौ साङ्ख्यकापिलौ" ॥

टीका० — छन्दोध्येतरि श्रोत्रियद्वयम् । छन्दोऽधीत इति श्रोत्रियः। 'श्रोत्रियंश्छन्दोऽधीते (५. २. ८४) इति श्रोत्रियन्निपात्यते छन्दोऽधीत इत्येतस्मिन्नर्थे । नकारः स्वरार्थः। छन्दश्शब्दस्य वा श्रोत्रभावो घन्प्रत्ययश्च । 'तदधीते तद् वेद' (४. २. ५९) इत्यणि छान्दसः ॥

उपाध्यायोऽध्यापकः

क्षीर० — उपेत्याधीयतेऽस्मादुपाध्यायः। 'इङश्च' (३. ३. २१) इति घञ् ॥

टीका० — वेदादिपाठयितर्युपाध्यायद्वयम् । उपेत्याधीयतेऽस्मादित्युपाध्यायः। 'इङश्च' (३. ३. २१) इति घञ् ॥

अथ स्यान्निषेकादिकृद् गुरुः ।

क्षीर० — गृणात्युपदिशति गुरुः। यन्मनुः —

"निषेकादीनि कर्माणि यः करोति यथाविधि ।
सम्भावयति चान्नेन स विप्रो गुरुरुच्यते" ॥

निषेको गर्भाधानविधिः। आदिशब्दात् पुंसवनसीमन्तोन्नयनजातकर्मनामकरणान्नप्राशनचौडोपनयनादीनि ॥

टीका० — निषेको गर्भाधानं, तत्कारिणि पितरि गुरुः। गिरतेः 'कृग्रोरुच्च' (उ० १. २४) इति कुप्रत्ययः उकारश्चान्तादेशः। 'उरण् रपरः' (१. १. ५१)। आदिना सीमन्तोन्नयनादि ॥

मन्त्रव्याख्याकृदाचार्यः

क्षीर० — आचरणीयः सेव्य आचार्यः । आचारं ग्राहयतीति नैरुक्ताः । मन्त्रकृद् वेदाध्यापनात् । विशिष्टाख्याकृदुपनीय[1] द्विजत्वापादनात् । यदाह[2] —

"उपनीय तु यः शिष्यं वेदमध्यापयेद्[3] द्विजः ।
सकल्पं सरहस्यं च तमाचार्यं प्रचक्षते" ॥

टीका० — मन्त्रो वेदः, तस्योपनयनपूर्वकं प्रतिपादयिता आचार्यः ।

"उपनीय तु यः पूर्वं वेदमध्यापयेद् द्विजः ।
साङ्गं च सरहस्यं च तमाचार्यं विदुर्बुधाः ॥"

इति मनुः । अन्यत्रोपचारात् ॥

आदेष्टा त्वध्वरे व्रती ॥ ७ ॥

यष्टा च यजमानश्च[4]

क्षीर० — स्वाम्येनादिशत्यादेष्टा । आदिष्टीति पाठे आदिष्टमनेनेति इष्टादित्वादिनिः । क्तस्येन्विषयस्य कर्मण्युपसङ्ख्यानात् सप्तमी । व्रती सनियमः । यजते यजमानः । 'पूङ्यजोः शानन्' (३. २. १२८) ॥

टीका० — अध्वरे अध्वरविषये आदेष्टा अध्वरस्वामी, तत्र व्रतित्रिकम् । यजमानश्चेति चकारान्तः पाठः साधुः । तथा च रभसः —

"मन्त्रव्याख्याकृदाचार्य आदेष्टा त्वध्वरे व्रती ।
यष्टा च यजमानश्च याजको देवचारकः ॥
दीक्षितः सोमपीती"

इति । क्वचित् त्वन्तः पाठः । तदा च सोमयागयष्टरि यजमानदीक्षिताविति योजना ।

"सोमवत्यध्वरे यष्टा यजमानोऽपि[5] दीक्षितः"

---

१. 'नयनेन द्वि' ख. पाठः. २. 'हुः' ख. पाठः. ३. 'न्नरः।' ग. पाठः. ४. 'नोऽथ स्वा' ख. ग. पाठः. ५. 'थ' क. ञ. पाठः.

इत्यमरमालापि। व्रतयोगाद् व्रती नान्तः। यजेः तृच्। यष्टा। 'पूङ्यजोः शानन्' (३. २. १२८)। यजमानः॥

स सोमवति दीक्षितः।

क्षीर०—स व्रती सोमवत्यध्वरे दीक्षिताख्यः दीक्षा सञ्जातास्येति। सोमवानग्निष्टोमादिः क्रतुः। यद् गौतमः—'अग्निष्टोमोऽत्यग्निष्टोम उक्थ्यः षोडशी वाजपेयोऽतिरात्रोऽप्तोर्याम इति सप्त सोमसंस्थाः'॥

टीका०—स यजमानः सोमवत्यध्वरे दीक्षिताख्यः। 'दीक्ष मौण्ड्येज्योपनयनादौ'। क्तः॥

इज्याशीलो यायजूकः

क्षीर०—यजनमिज्या। 'व्रजयजोर्भावे क्यप्' (३. ३. ९८)। अत्यर्थं यजते[२] तच्छीलो यायजूकः। 'यजजपदशां यङः' (३. २. १६६) इत्यूकः॥

टीका०—पुनः पुनर्यागकरणशीलो यायजूकः। 'यजजपदशां यङः' (३. २. १६६) इति यङन्तादूकप्रत्ययः॥

यज्वा तु विधिनेष्टवान्॥ ८॥

क्षीर०—'सुयजोर्ङ्वनिप्' (३. २. १०३)॥

टीका०—विधिना यथाशास्त्रं निर्वर्तितयागो यज्वा॥

स गीष्पतीष्ट्या स्थपतिः

क्षीर०—स यज्वा बृहस्पतिमेधेन हेतुना। स्थापयतीति स्थपतिः॥

---

१. 'मः क्र' ख. पाठः. २. 'ति' क. ग. घ. ङ. पाठः.

टीका० — स यज्वा बृहस्पतिसवनाम्ना यागेनेष्टवान् स्थपतिः ॥

सोमपीथी तु सोमपः ।

क्षीर० — पानं पीथः । 'पातॄतुदि —' (उ० २. ७) इति थक् । 'घुमास्था —' (६. ४. ६६) इतीत्वम् । सोमपीतीति प्राच्याः पेठुः । सर्वदाऽयं, दीक्षितस्तु तत्कालम् ॥

टीका० — सोमपीतिद्वयं सोमलतारसपायिनि । सोमः पीतोऽनेनेति 'इष्टादिभ्यश्च' (५. २. ८८) इतीनिः ॥

सर्ववेदाः स येनेष्टो यागः सर्वस्वदक्षिणः ॥ ९ ॥

क्षीर० — सर्वं विन्दत्यस्मात् सर्ववेदाः, असुन् ॥

टीका० — विश्वजिदादियागः सर्वस्वदक्षिणः, तद्याजी सर्ववेदाः, सर्वं सर्वस्वं वेदयति लम्भयति ऋत्विज इति । 'विदॢ लाभे' । ण्यन्तादसुन् ॥

अनूचानः प्रवचने साङ्गेऽधीती

क्षीर० — अनूक्तवान् । 'उपेयिवाननाश्वाननूचानश्च' (३.२.१०९) इति कानचि साधुः । प्रोच्यते प्रवचनं वेदः । अधीतमनेनाधीती । इष्टादित्वादिनिः । 'क्तस्येन्विषयस्य —'(वा० २. ३. ३६) इति सप्तमी ॥

टीका० — प्रवचने वेदे सशिक्षाद्यङ्गषट्के कृताध्ययने अनूचानः । 'उपेयिवाननाश्वाननूचानश्च' (३. २. १०९) इति निपातितः । प्रवचन इति 'क्तस्येन्विषयस्य कर्मण्युपसङ्ख्यानम्' (वा० २. ३. ३६) इति सप्तमी ॥

गुरोस्तु यः ।

लब्धानुज्ञः समावृत्तः

क्षीर० — अधीत्य गुर्वाज्ञया गुरुगृहाद् यः समावर्तते स समावृत्तः स्नातकाख्यः ।

"गुरुगेहादनावृत्तः स्नातको हि न कथ्यते" ॥

टीका०—अधीतवेदो गृहमावस्तुं गुरोः सकाशाद् गृहीतानुज्ञः समावृत्तः। वृतेः क्तः॥

सुत्वा त्वभिषवे कृते॥ १०॥

क्षीर०—सुनोति सुत्वा। 'सुयजोर्ङ्वनिप्' (३. २. १०३)। अभिषवः सोमकुट्टनसन्धानम्॥

टीका०—अभिषवः स्नानमात्रं प्रस्तावाद् यागसम्बन्धिस्नानं यः कृतवान्, स सुत्वा। नान्तः। 'सुयजोर्ङ्वनिप्' (३. २. १०३)॥

छात्रान्तेवासिनौ शिष्ये

क्षीर०—छत्रमिव शीलमस्य छात्रः। 'छत्रादिभ्यो णः'(४. ४. ६२)। छत्रेण गुरुसेवा लक्ष्यते। गुरोरन्ते वसत्यवश्यमन्तेवासी। 'शयवासवासिषु—'(६. ३. १८) इति सप्तम्या अलुक्। शासनीयः शिष्यः॥

टीका०—छात्रद्वयं शिष्ये। गुरुच्छिद्रावरणशीलश्छात्रः। 'छत्रादिभ्यो णः' (४. ४. ६२)। अन्ते समीपे वस्तुं शीलमस्येत्यन्तेवासी। ताच्छीलिको णिनिः। 'शयवासवासिष्वकालाद्' (६. ३. १८) इति सप्तम्यंलुग्विकल्पे अन्तेवासी च। प्रत्ययान्तरविषयश्चायं धातुः। तथा च भारविः—'वसन्निवान्ते विनयेन जिष्णुः'(स०३. श्लो० २४) इति। वसिसमानार्थधातुप्रयोगोऽप्यस्मिन् दृश्यते। तथा च— 'मृगास्तमुपासते गुरुमिवान्तसदः' इति। 'शासु अनुशिष्टौ'। 'एतिस्तुशास्वृदृजुषः क्यप्' (३. १. १०९)। 'शास इदङ्हलोः' (६. ४. ३४) इतीत्वम्। 'शासिवसिघसीनां च' (८. ३. ६०) इति षत्वम्। शिष्यः॥

शैक्षाः प्राथमकल्पिकाः।

क्षीर०—शिक्षायां भवाः शैक्षाः। प्रथमकल्प आद्यारम्भः प्रयोजनमेषां प्राथमकल्पिकाः॥

---

१. 'सी' क. ख. ङ. च. छ. पाठः. २. 'ते' क. ख. पाठः.

टीका० — प्रथमवेदपाठके शैक्षद्वयम्। शिक्षासाहचर्याद् ग्रन्थोऽपि शिक्षा। 'तदधीते—' (४. २. ५९) इत्यण्। प्रथमकल्पं प्रथमशिक्षणीयमधीयत इति प्राथमकल्पिकाः। उक्थादित्वाट्ठक्॥

एकब्रह्मव्रताचारा मिथः सब्रह्मचारिणः॥ ११॥

क्षीर० — तुल्यवेदास्तुल्यव्रतास्तुल्याचाराश्चान्योन्यं समानं ब्रह्म चरन्ति सब्रह्मचारिणः।

"ब्रह्म वेदो ब्रह्म तपो ब्रह्म ज्ञानं च शाश्वतम्"

इति। एकस्मिन् वेदे व्रतमाचरन्ति वा। 'व्रते' (३.२.८०) इति णिनिः। 'चरणे ब्रह्मचारिणि' (६.३.८६) इति समानस्य सभावः॥

टीका० — एकस्माद् गुरोरेकं वेदमध्येतुमेकं ब्रह्म व्रतमाचरन्तोऽन्योन्यं सब्रह्मचारिण इत्युच्यन्ते। ब्रह्म वेदस्तदध्ययनार्थं व्रतमपि ब्रह्म। समानं ब्रह्मचरन्तीति सब्रह्मचारिणः। 'व्रते' (३. २. ८०) इति णिनिः। 'चरणे ब्रह्मचारिणि' (६. ३. ८६) इति सभावः॥

सतीर्थ्यास्त्वेकगुरवः

क्षीर० — 'समानतीर्थे वासी' (४.४.१०७) इति यत्। 'तीर्थे ये' (६.३.८७) इति सत्वम्। तरन्त्यनेन विद्यां तीर्थं गुरुः॥

टीका० — एकगुरुका वेदविषयेऽन्यविषये च सतीर्थ्याः। पावनहेतुत्वात् तीर्थमिव तीर्थं गुरुः। 'समानतीर्थे वासी' (४. ४. १०७) इति यः। 'तीर्थे ये' (६. ३. ८७) इति सभावः॥

चितवानग्निमग्निचित्।

क्षीर० — आहिताग्निः। 'अग्नौ चेः' (३.२.९१)। क्विप्॥

टीका० — चिताग्निर्द्विजोऽग्निचित्। 'अग्नौ चेः' (३. २. ९१) इति क्विप्॥

पारम्पर्योपदेशः स्यादैतिह्यमितिहाव्ययम् ॥ १२ ॥

क्षीर० — इत्येवं किलेति मुखपारम्पर्यमितिह । ततः स्वार्थे पक्षे 'अनन्तावसथेतिहभेषजाञ्ञ्यः' (५. ४. २३) ॥

टीका० — उपदेशपरम्परायामैतिह्यद्वयम् । अस्मिन् वृक्षे यक्षोऽस्तीत्युदाहरणम् । इतिहशब्दोऽव्ययसमुदायः । ततः स्वार्थे 'अनन्तावसथेतिहभेषजाञ्ञ्यः' (५. ४. २३) ॥

उपज्ञा ज्ञानमाद्यं स्याद्

क्षीर० — उपज्ञायत इत्युपज्ञा, इदंप्रथमतया ज्ञानम् । चन्द्रस्योपज्ञा चन्द्रोपज्ञं[१] व्याकरणम् ॥

टीका० — विनोपदेशेन ज्ञानमुपज्ञा । यथा वाल्मीकेः श्लोकज्ञानम् ॥

ज्ञात्वारम्भ उपक्रमः ।

क्षीर० — उपज्ञाय आरम्भणमुपक्रमः । यत् कात्यः — 'यस्मात् प्रवृत्त आरम्भः स 'उपक्रमः' । नन्दस्योपक्रमः । नन्दोपक्रमाणि मानानि । 'उपज्ञोपक्रमं तदाद्याचिख्यासायाम्' (२. ४. २१) इति नपुंसकत्वम् ॥

टीका० — एतदित्थं सिध्यतीत्युपायज्ञानपूर्वक आरम्भ उपक्रमः ॥

यज्ञः सवोऽध्वरो यागः सप्ततन्तुर्मखः क्रतुः ॥ १३ ॥

क्षीर०[२] — इज्यते यज्ञः । 'यजयाच —' (३. ३. ९०) इति नङ् । सूयते सोमोऽस्मिन् सवः । अध्वानं रात्यध्वरः । न ध्वरति वा । 'ध्वृ हूर्छने'[३] । सप्तभिश्छन्दोभिस्तन्यत इति[४] सप्ततन्तुः । मखति धर्मं मखः । क्रियते क्रतुः ॥

---

१. 'ज्ञसंज्ञकं व्या' ङ. पाठः २. 'मा', ३. 'ने । सप्ततन्तुः । 'सप्तभि', ४. 'ति । म' ख. पाठः.

टीका० — यज्ञसप्तकं यागे । 'यजयाचयतविच्छप्रच्छरक्षो नङ्' (३. ३. ९०) । यज्ञः । सुनोतेः 'ऋदोरप्' (३. ३. ५७) । सवः । स्वस्सम्बन्धिनमध्वानं रातीत्यध्वरः । मखिर्गत्यर्थः । दण्डकम् । अच् । मखः । 'सोमयागेष्वेव क्रतुशब्दोऽन्यत्रोपचारादि'ति जयादित्यः ॥

पाठो होमश्चातिथीनां सपर्या तर्पणं बलिः ।
एते पञ्च महायज्ञा ब्रह्मयज्ञादिनामकाः ॥ १४ ॥

क्षीर० — स्वाध्यायो ब्रह्मयज्ञः, होमो देवयज्ञः, नृयज्ञोऽतिथिपूजनं, तर्पणं श्राद्धाख्यं पितृयज्ञः, बलिर्भूतयज्ञः । यन्मनुः —

"स्वाध्यायो[2] ब्रह्मयज्ञः स्यात् पितृयज्ञस्तु तर्पणम् ।
होमो दैवो बलिर्भौतो नृयज्ञोऽतिथिपूजनम्" ॥

टीका० — एतैः पाठादिभिः पञ्चभिर्ब्रह्मयज्ञादिनामकैः पञ्च महायज्ञाः स्युः । सपर्या पूजा ।

"स्वा[3]ध्यायो ब्रह्मयज्ञः स्यात् पितृयज्ञस्तु तर्पणम् ।
होमो दैवो बलिर्भौतो नृयज्ञोऽतिथिपूजनम् ॥"

इति स्मृतिः ॥

समज्या परिषद् गोष्ठी सभासमितिसंसदः ।
आस्थानी क्लीब आस्थानं स्त्रीनपुंसकयोः सदः ॥ १५ ॥

क्षीर० — समजन्ति मिलन्त्यस्यां समज्या । 'संज्ञायां समज —' (३. ३. ९९) इति क्यप् । परिसीदन्त्यस्यां परिषत् । पर्षच्च । गावो नानोक्तयस्तिष्ठन्त्यस्यां गोष्ठी । सह भान्त्यस्यां सभा । संयन्त्यस्यां समितिः । संसीदन्त्यस्यां संसत् । आतिष्ठन्त्यस्यामास्थानी । सीदन्त्यस्मिन् सदः । असुन् ॥

---

१. '॰वं' ग. पाठः. २. 'यः स्यात् । अध्यापनं ब्रह्मयज्ञः पि' ख. पाठः. ३. 'अध्ययनं ब्रह्मयज्ञः पि' ख. ङ. छ. झ. ट. पाठः. ४. 'ज्ञ', ५. 'त् । गा', ६. 'अभिति' ख. पाठः.

टीका० — समज्यानवकं सभासामान्ये। कीर्तौ समज्योक्ता। परितः सीदन्त्यस्यामिति परिषत्। सम्पदादिः। 'सदिरप्रतेः' (८. ३. ६६) इति षत्वम्।

"आस्थानं संसदास्थानी परिषत्पर्षदौ समे"

इति रभसः। गावः कथास्तिष्ठन्त्यस्यामिति गोष्ठी। गोष्ठवत् सर्वम्। सद्भिर्भातीति सभा। भया दीप्त्या सह वर्तत इति वा। संयन्ति मिलन्त्यस्यामिति समितिः। बाहुलकः क्तिन्। अकर्तरि च कारके वा। सम्पदादिक्विपि संसद् दान्ता। आगत्य तिष्ठन्त्यस्यामित्यास्थानी। आस्थानं च। अधिकरणे ल्युट्। सीदन्त्यस्यामिति सदः। असुन्। स्त्रियां सदाः सदसौ सदसः॥

प्राग्वंशः प्राग्घविर्गेहात्

क्षीर० — वंशः कुलं स्थूणा वा। प्राग् वंशोऽत्र प्राग्वंशः पत्नी-[1]शालाख्यः। प्राग्घविर्गेहाद्[2] अग्निशालाया आद्यो भागः॥

टीका० — यत्र गृहे हव्यादिकं स्थाप्यते ततः पूर्वं सदस्यादीनां गृहं प्राग्वंशः॥

सदस्या विधिदर्शिनः।

क्षीर० — सदसि साधव ऊनाधिकजागरूका ऋत्विग्भेदाः सदस्याः॥

टीका० — विधेर्न्यूनातिरिक्ततानिरीक्षणतत्परे सदस्यद्वयम्। सदसि साधुरुपकारकः सदस्यः। 'तत्र साधुः' (४. ४. ९८) इति यत्॥

सभासदः सभास्तारा: सभ्याः सामाजिकाश्च ते॥१६॥

क्षीर० — सभायां सीदन्ति सभासदः। सभां स्तृण्वन्ति सभास्ताराः। समाजं समवयन्ति सामाजिकाः। 'समवायान् समवैति' (४. ४.

---

१. 'त्नि' घ. पाठः. २. 'त् पत्नीशालाख्यात्। अ' ख. घ. ङ. पाठः.

४३) इति ठक् । पारिषद्याः पारिषदाः सभाशूराश्च ॥

टीका० — सभासदादिचतुष्कं सभाया आरम्भके । सम्पदादिक्विपि सभासत् । सभां स्तृणन्ति छादयन्तीति सभास्ताराः । 'कर्मण्यण्' (३. २. १)। सदस्यवत् सभ्यः । 'समवायान् समवैति (४. ४. ४३) इति समजशब्दाट्टकि सामाजिकः ॥

अध्वर्यूद्गातृहोतारो यजुःसामर्ग्विदः क्रमात् ।

क्षीर० — ऋत्विज इत्येव । अध्वरं याति न ध्वरति वा अध्वर्युर्नाम ऋत्विक् । स यजुर्वित् कठः स्यात् । उद्गायक उद्गाता छन्दोगः स्यात् । होता बह्वृचः स्यात् ॥

टीका० — अध्वर्युत्रयं यथाक्रमं यजुर्वेदादिवेदिषु । अध्वरमिच्छतीत्यध्वर्युः । 'क्याच्छन्दसि' (३. २. १७०) इत्युः । 'कव्यध्वरपृतनस्यर्चि लोपः' (७. ४. ३९) इति 'अलोन्त्यस्य' (१. १. ५२) इति नियमेन रेफात् परस्याकारस्य लोपः । तृचि उद्गाता । होतेति 'तृन्विधावृत्विक्षु चानुपसर्गस्येति वक्तव्यम्' (वा० ३. २. १३५) इति तृन् ॥

आग्नीध्राद्या धनैर्वार्या ऋत्विजो याजकाश्च ते ॥ १७ ॥

क्षीर० — अग्नीनिन्धेऽग्नीत् । तस्य शरणमाग्नीध्रः । 'अग्नीधः शरणे रण् भष्त्वं च' (वा० ४. ३. १२०) इति रण् । आद्यशब्दात् पोतृप्रशास्तृब्राह्मणाच्छंस्यच्छावाकग्रावस्तुद्ब्रह्ममैत्रावरुणप्रतिप्रस्थातृप्रतिहर्तृनेष्टृनेतृसुब्रह्मण्याः । इत्थं ससदस्याः सप्तदश ऋत्विजः । 'एतिस्तुशास्वृ—' (३. १. १०९) इति वृञो ग्रहणाद् वृङो व्रियन्त इति वार्याः । 'ऋहलोर्ण्यत्' (३. १. १२४) । 'वृताः कुर्वन्ति ये यज्ञमृत्विजस्त' इति कात्यः । ऋतौ यजति । 'ऋत्विग्दधृग्—' (३. २. ५९) इति साधुः ॥

टीका० — आग्नीध्राद्याः षोडश यज्ञस्वामिना धनैर्वरणीया याजकादिद्वयवाच्याः । ते च ब्रह्मा, उद्गाता, होता, अध्वर्युः, ब्राह्मणाच्छंसी, प्रस्तोता, मैत्रावरुणः, प्रतिप्रस्थाता, पोता, प्रतिहर्ता, अच्छा-

वाकः, नेष्टा, आग्नीध्रः, सुब्रह्मण्यः, ग्रावस्तुद्, उन्नेता चेति षोडश प्रकाराः। अग्निमिन्धयतीति रक्। आग्नीध्रः। वृणातेः ण्यति वार्याः। ऋत्विगादिसूत्रेण ऋत्विग् जान्तो निपातितः। ण्वुलि याजकाः॥

वेदिः परिष्कृता भूमिः

क्षीर०—विदन्त्येनां वेदिः। परिष्कृता चातुरश्र्येण भूषिता। यागार्थं परिष्कृतां त्वाह॥

टीका०—यागार्थं संस्कृता भूमिर्वेदिः। ङीषि वेदी च॥

समे स्थण्डिलचत्वरे।

क्षीर०—तिष्ठन्त्यस्मिन् स्थण्डिलम्। चत्यते चत्वरम्। यागार्थं संस्कृता भूः॥

टीका०—यागार्थं संस्कृतभूमौ स्थण्डिलद्वयम्। प्राङ्गणे चत्वरमुक्तम्॥

चषालो यूपकटकः

क्षीर०—तक्ष्णा कारितो यूपाग्रे कटकाकृतिः। चष्यत उत्कीर्यत इति चषालः॥

टीक०—खादिरादिकं पशुबन्धनकाष्ठं यूपः। तन्मूर्ध्नि काष्ठमयो डमरुकाकृतिश्चषालः। 'चष भक्षणे'। मूर्धन्यषः। 'सानसिवर्णसितण्डुलाङ्कुशचषालेल्वलपल्वल—' (उ० ४. १०९) इत्यादिना आलः। अर्धर्चगणपठितत्वात् क्लीबेऽपि॥

कुम्बा सुगहना वृतिः॥ १८॥

क्षीर०—'कुबि आच्छादने'। 'चिन्तिपूजि—' (३. ३. १०५) इत्यङ्। व्रियतेऽनया वृतिः। यज्ञवाटे वेणिका॥

---

१. 'चतुरश्रेण', २. 'चा' ग. पाठः. ३. 'धर्णसिपर्ण' ञ. पाठः. ४. 'व'

टीका० — यागभूमौ वृतिर्वेष्टनिका या सा कुम्बा । 'कुबिच्छादने' चुरादिणिच् । 'चिन्तिपूजिकथिकुम्बिचर्चश्च' (३. ३. १०५) इत्यङ् ॥

यूपाग्रे तर्म

क्षीर० — **तरत्यनेन यूपं तर्म ॥**

टीका० — **यूपाग्रे** तर्म । तरतेः मनिन् । वेदविदां तर्मेति पाठात् तर्भेति पाठो लिपिदोषजः । 'उतृदिर् हिंसानादरयोः' । मनिन् ॥

निर्मन्थ्यदारुणि त्वरणिर्द्वयोः ।

क्षीर० — **निर्मथनीयं दारु, यतोऽग्निर्जन्यते । इयर्त्यग्निर्यतः सोऽरणिः ॥**

टीका० — यत् काष्ठं काष्ठान्तरेणाग्न्युत्पादनार्थं घृष्यते सा अरणिः । अर्तेः अशनिवद् अनिः ॥

दक्षिणाग्निर्गार्हपत्याहवनीयौ त्रयोऽग्नयः ॥ १९ ॥

क्षीर० — **दक्षिणेऽग्निर्दक्षिणाग्निः । गृहपतिना संयुक्तो गार्हपत्यः । 'गृहपतिना संयुक्ते ञ्यः' (४. ४. ९०) । आहोतव्य आहवनीयः ॥**

टीका० — दक्षिणाग्नित्रयं पृथक् पृथक् **स्वनामप्रसिद्धेऽग्नित्रये** । दक्षिणोऽग्निर्दक्षिणाग्निः । 'गृहपतिना संयुक्ते ञ्यः' (४. ४. ९०) इति ञ्यः । गार्हपत्यः । अनीयरि आहवनीयः ॥

अग्नित्रयमिदं त्रेता

क्षीर० — **त्रीणि इतां प्राप्ता त्रेता । पृषोदरादित्वादेत्वम् ॥**

टीका० — **इदं श्रौताग्नित्रयमेकोक्त्या** त्रेतोच्यते । त्राणं त्राः सदा सन्धुक्षणम् । त्राम् इता प्राप्ता त्रेता स्त्रियाम् ॥

---

१. 'तदेमर्मीति' ख. ग. पाठः. २. 'दानयोः' ख. पाठः. ३. 'तो निर्मथ्य जन्य' ख. घ. पाठः. ४. 'कु' ख. पाठः. ५. 'ता त्रे' ख. पाठः.

प्रणीतः संस्कृतोऽनलः ।

क्षीर० —प्रणयनं मन्त्रादिना संस्कारैः प्रादुष्करणम् ॥

टीका० —मन्त्रेण संस्कृतोऽग्निः प्रणीतः ॥

समूह्यपरिचाय्योपचाय्या अग्नौ प्रयोगिणः ॥ २० ॥

क्षीर० —'अग्नौ परिचाय्योपचाय्यसमूह्याः' (३. १. १३१) इति निपात्यन्ते। समूह्यते ढौक्यत इत्यग्निः समूह्यः। परिचीयते परिचाय्यः। उपचीयते उपचाय्यः। इत्यग्निनामधेयानि प्रयोगविषयाणि ॥

टीका० —समूह्यादयस्त्रयो[2] यागवह्नौ। प्रयोगिणः, प्रयोक्तव्या इत्यर्थः। नान्यत्र, यज्ञादिविषये निपातनाद् 'अग्नौ परिचाय्योपचाय्यसमूह्याः' (३. १. १३१) इत्यनेन। 'ऊह वितर्के'। ण्यत्। समूह्यो दीर्घमध्यः। एवं परिपूर्वाच्चिनोतेर्ण्यदायादेशौ। परिचाय्यः। उपपूर्वादुपचाय्यः ॥

यो गार्हपत्यादानीय दक्षिणाग्निः प्रणीयते ।
तस्मिन्नानाय्यः

क्षीर० —'आनाय्योऽनित्ये' (३. १. १२७) इति साधुः। आनीयते आनाय्यः। प्रणीयते दक्षिणाग्नित्वेन संस्क्रियते[3] ॥

टीका० —उत्तरस्थाद् गार्हपत्याद् योऽग्निः प्रणीयते आरोप्यते स आनाय्यः। 'आनाय्योऽनित्ये' (३. १. १२७) इत्यनेनाङ्पूर्वान्नयतेः पूर्ववद् ण्यदायादेशौ। एतद(रुच्याऽनित्यम्) ॥

अथाग्नायी स्वाहा च हुतभुक्प्रिया ॥ २१ ॥

क्षीर० —'वृषाकप्यग्निकुसित—' (४. १. ३७) इति ङीप्प्रसङ्गेऽैत्वम्। सुष्ठ्वाहूयते स्वाहा, स्वाहास्त्यस्या वा ॥

टीका० —अग्नायीत्रयमग्निभार्यायाम्। अग्निशब्दाद् 'वृषाकप्यग्नि-

१. 'रुन्तन्यत' ग. घ. ङ. पाठः. २. 'यो व' ख. पाठः. ३. 'ते प्रणाय्यः ॥' ग. पाठः.

कुसितकुसिदानामुदात्तः' (४. १. ३७) इति ङीप् ऐकारश्चान्तादेशः । अग्नायी । सुष्ठु आहूयन्ते देवा अनयेति स्वाहा । पृषोदरादिः ॥

ऋक् सामिधेनी धाय्या च या स्यादग्निसमिन्धनी ।

क्षीर० — समिधामाधानी सामिधेनी । 'समिधामाधाने (षे)ण्यण्' (वा० ४. ३. १२०) । धीयतेऽनया धाय्या । 'पाय्यसान्नाय्य—'(३. १. १२९) इति साधुः ॥

टीका० — अग्निसमिन्धनेऽग्निज्वलने या ऋक् पठ्यते तत्र सामिधेनीद्वयम् । 'समिधामाधाने षेण्यण् वक्तव्यः' (वा० ४. ३. १२०) इति तस्येदमर्थे षेण्यण् । षित्वाद् ङीप् । 'हलस्तद्धितस्य' (६. ४. १५०) इति यलोपः । सामिधेनी । 'पाय्यसान्नाय्यनिकाय्यधाय्या मानहविर्निवाससामिधेनीषु' (३. १. १२९) इत्यनेन धाञो ण्यदायादेशाभ्यां धाय्या निपातिता ॥

गायत्रीप्रमुखं छन्दः

क्षीर० — गायन्तं[1] त्रायते गायत्री । गायत्र्युष्णिगनुष्टुब्बृहतीपङ्क्तित्रिष्टुब्जगत्यतिजगतिशक्वर्यतीशक्वर्यष्ट्यत्यष्टिधृत्यतिधृतिकृतिप्रकृत्याकृतिविकृतिसङ्कृत्यभिकृत्युत्कृत्याख्यं षडक्षरादारभ्य षड्विंशत्यक्षरं यावत् । छन्दति छन्दोऽक्षरनियमात्मकं, गुरुलघुनियमात्मकं तु वृत्तं तनुमध्यादि ॥

टीका० — गायत्रीप्रमुखं गायत्र्याद्यं छन्दश्शब्दवाच्यम् । आदिनोष्णिगनुष्टुब्बृहतीपङ्क्त्यादीनां ग्रहणम् ।

"क्रात् का हरेर्नृता कस्य मूर्धवर्गग्रहः कथम् ।
ऋक्षत्रिक्ष+चाष्टौ(?) स्युर्वर्णाः पादेष्वनुष्टुभि ॥"

इति विदग्धे द्विरुकारवाननुष्टुब् भान्ता च । तत्र षडक्षरा गायत्री, ततो यथाक्रममेकैकाक्षरवृद्ध्या क्रमादुष्णिगादीनां पादाः । गायन्तं त्रायत इति गायत्री । गौरादिः । 'चदि आह्लादने' । 'चन्देरादेश्च छः' (उ० ४. २२०) इत्यसुन् आदेश्च छः । छन्दः ॥

---

1. 'क' ग. पाठः.

स्रुवस्तु विशेषविधिनैव पुमानुक्तः । ध्रुव उक्तः, ततष्टाप् । उपपूर्वाद् भृञः क्विप्, उपभृत् । 'हुवः श्लुवच्च' (उ० २. ६३) इति क्विप्, दीर्घत्वं श्लुवच्च । 'श्लौ' (६. १. १०) इति द्विर्वचनम्, 'कुहोः —' (७. ४. ६२) इति चुत्वादि, जुहूः । 'स्रु गतौ' । 'स्रुवः कन्' (उ० २. ६४) इति कन् । उवङ्, स्रुवः । 'चिक् च' (उ० २. ६५) इति स्रुवश्चिक्प्रत्ययः इकारककारावनुबन्धौ । 'चोः कुः' (८. २. ३०) कुत्वम् । स्रुक् । स्रिविधातोः क्विप् । 'ज्वरत्वर—' (६. ४. २०) इत्यूठि स्रूरित्यपि भ्रूशब्दसमाना बोद्धव्या ॥

उपाकृतः पशुरसौ योऽभिमन्त्र्य क्रतौ हतः ॥ २७ ॥

क्षीर० — उपामन्त्र्य क्रियते हन्यते स्मोपाकृतः ॥

टीका० — मन्त्रेण पवित्रीकृत्य शस्त्रहतमात्रे पशावुपाकृतः । 'कृञ् हिंसायाम्' । स्वादिः । क्तः । 'यद्युपाकृतः पशुः पलायेदि'ति जीवत्यपि ताडितमात्रेऽपि ॥

परम्पराकं शमनं प्रोक्षणं तत्र यो वधः ।

क्षीर० — परं परमकति परम्पराकम् । शसनमिति तु युक्तः पाठः । 'शसु हिंसायाम्'[२] । प्रोक्षणं लक्षणया वधः, प्रोक्ष्य हि यज्ञे पशुर्हन्यते ॥

टीका० — परम्पराकत्रयं यागार्थपशुहनने । शमेर्ल्युट् । शमनम् । 'उक्ष सेचने' । ल्युट् । प्रोक्षणम् ॥

वाच्यलिङ्गाः प्रमीतोपसम्पन्नप्रोक्षिता हते ॥ २८ ॥

क्षीर० — यज्ञ इति शेषः । 'मीङ् हिंसायाम्' । उपसम्पद्यत उपसम्पन्नः । प्रोक्ष्यतेऽम्भसेति प्रोक्षितः । प्रमीतादयोऽर्थवल्लिङ्गास्त्रयः शब्दा हते वर्तन्ते ॥

---

१. 'ति चिक्' ञ. पाठः. २. 'रस्पर' क. ग. घ. पाठः.

---

† 'कः' इति मुद्रितोणादिपाठः ।

टीका० — यागार्थं मारितं पश्वादौ प्रमीतत्रयम् । 'मीङ् हिंसायाम्' । क्तः । प्रमीतः । पदेः क्तः । उपसम्पन्नः ॥

सान्नाय्यं हविः

क्षीर० — सन्नीयते । 'पाय्यसान्नाय्य—' (३. १. १२९) इति साधुः । हूयते हविः ॥

टीका० — हविरित्यनेन दधिपयोरूपं हविर्ग्राह्यम् । तत्र सान्नाय्यम् । 'पाय्यसान्नाय्य —' (३. १. १२९) इत्यादिना संपूर्वान्नयतेर्ण्यदायादेशौ दीर्घत्वं च निपात्यते, ततः स्वार्थे(बा)ण् । हविरिति इसिप्रत्ययान्तं क्लीबे च ॥

अग्नौ तु हुतं त्रिषु वषट्कृतम् ।

क्षीर० — वषण्मन्त्रलिङ्गेन हुतं वषट्कृतम् । अर्थवाहिलिङ्गम् ॥

टीका० — अग्नौ हुते द्रव्ये वषट्कृतम् ॥

दीक्षान्तोऽवभृथो यज्ञे

क्षीर० — अवभ्रियते पूर्यतेऽनेनावभृथः ॥

टीका० — दीक्षान्तद्वयं प्रधानयागसमापको न्यूनाधिकदोषनिरासाय (यत्?यः) क्रियते तत्र । 'दीक्षान्तावभृथौ समौ' इति रभसः । प्रधानयागो दीक्षा, तस्यान्तो दीक्षान्तः । 'अवे भृञः' (उ० २. ३) इति क्थन् । अवभृथः ॥

तत्कर्मार्हं तु यज्ञियम् ॥ २७ ॥

त्रिषु

क्षीर० — यज्ञकर्मार्हति यज्ञियम् । 'यज्ञर्त्विग्भ्यां घखञौ' (५. १. ७१) । 'तत्कर्मार्हती'त्युपसङ्ख्यानात् ॥

टीका० — यज्ञकर्मार्हे वस्तुनि यज्ञियम् । 'यज्ञर्त्विग्भ्यां घखञौ' (५. १. ७१) इति घः । तच्छब्देन यज्ञः परामृश्यते । स्त्रियां यज्ञिया भूमिः ॥

अथ क्रतुकर्मेष्टं

क्षीर० — इज्यते स्मेष्टं यागादि । यदाह —

"एकाग्निकर्म हवनं त्रेतायां यच्च हूयते ।
अन्तर्वेद्यां च यद् दानमिष्टं तदभिधीयते" ॥

टीका० — क्रतुकर्म यत् तदिष्टम् । यजेः क्तः । वच्यादिसम्प्रसारणम् ॥

पूर्तं खातादिकर्मणि ।

क्षीर० — पिपर्ति पूर्तम् । 'न ध्याख्यापॄमूर्छिमदाम्' (८. २. ५७) इति निष्ठानत्वाभावः । खातं वाप्यादि । यदाह —

"वापीकूपतटाकानि देवतायतनानि च ।
अन्नप्रदानमारामः पूर्तं मर्त्याः प्रचक्षते ॥"

टीका० — खातं पुष्करिणी । आदिना देवकुलादि । एतत् पूर्ताख्यम् । तदुक्तं —

"पुष्करिण्यः सभा वापी देवस्यायतनानि च ।
आरामश्च विशेषेण पूर्तं कर्म विनिर्दिशेत् ॥"

इति । 'पॄ पालनपूरणयोः' । क्तः । 'उदोष्ठ्यपूर्वस्य' (७. १. १०२) इत्युत्वम् । 'हलि च' (८. २. ७७) इति दीर्घः । 'न ध्याख्यापॄमूर्छिमदाम्' (८. २. ५७) इति निष्ठानत्वप्रतिषेधः ॥

अमृतं विघसो यज्ञशेषभोजनशेषयोः ॥ २८ ॥

क्षीर० — न म्रियते न नश्यत्यमृतम् । यज्ञशिष्टमदनम् । विशिष्टमदनं विघसः । भुक्तशिष्टम् । 'उपसर्गेऽदः' (३. ३. ५९) इत्यप् । 'घञपोश्च' (२. ४. ३८) इति घस्लादेशः । यन्मनुः —

"विघसाशी भवेन्नित्यं नित्यं चामृतभोजनः ।
विघसो भुक्तशिष्टं स्याद् यज्ञशिष्टमथामृतम्" ॥

टीका०—यथाक्रमं यज्ञशेषे दधिघृतादावमृतं, देवतातिथ्यादीनां भुक्तशेषे विघसः। दन्त्यसः। अमृतमुक्तम्। विपूर्वाददेः 'उपसर्गेऽदः' (३. ३. ५९) इत्यप्। 'घञपोश्च' (२. ४. ३८) इति घस्लादेशः॥

त्यागो विहापितं दानमुत्सर्जनविसर्जने।
विश्राणनं वितरणं स्पर्शनं प्रतिपादनम्॥ २९॥

प्रदेशनं निर्वपणमपवर्जनमंहतिः।

क्षीर०—स्वत उपसर्गवशाच्चैते दानार्थाः। स्पर्शनं तूपचाराद् दानं, पुच्छादौ गवादिकं स्पृष्ट्वा हि दीयते। 'ओहाक् त्यागे'। 'श्रण दाने'। अंहतेंऽहतिः। उपसर्गाद्यपि॥

टीका०—त्यागत्रयोदशकं दाने। त्यजतेर्घञ्। त्यागः। विपूर्वाज्जहातेः स्वार्थे हेतुमण्णिच्। 'अर्तिह्री—' (७. ३. ३६) इत्यादिना पुगागमः। 'नपुंसके भावे क्तः' (३. ३. ११४)। 'निष्ठायां सेटि' (६. ४. ५२) इति णिलोपः। विहापितम्। दानादयस्तु 'डुदाञ् दाने'। 'सृज विसर्गे'। 'श्रण दाने'। तालव्यादिः। चुरादिः। 'तॄ प्लवनतरणयोः'। 'स्पृश संस्पर्शे'। 'पद गतौ'। णिच्। 'दिश अतिसर्जने'। 'डुवप् बीजतन्तुसन्ताने'। 'वृजी वर्जने'। एभ्यो ल्युट्। हन्ति दुर्निमित्तमंहतिः। 'हन्तेरंह च' (उ० ४. ६३) इत्यतिरंहादेशश्च॥

मृतार्थे तदहे दानं त्रिषु स्यादौर्ध्वदेहिकम्॥ ३०॥

क्षीर०—तदहे प्रेतदिने मृतमुद्दिश्य दानं पिण्डोदकादि। ऊर्ध्वं देहाद् भवमौर्ध्वदेहिकम्। 'ऊर्ध्वं दमाद् देहाच्च' (वा० ४. ३. ६०) इति ठञ्। अनुशतिकादित्वादुभयपदवृद्धिमाहुः॥

टीका०—मृतार्थे यदहर्दानं मृताहःप्रभृति पिण्डादिदानं, तदौर्ध्वदेहिकम्। ऊर्ध्वदेहे भवमित्यर्थे 'ऊर्ध्वदेहाच्चेति वक्तव्यम्' (वा० ४. ३. ६०) इति ठञ्। वकारवत्वादिकं नाम्नोक्तावुक्तम् (?)॥

---

१. 'दौ द्विपग' क. ग. घ. ङ. पाठः. २. 'ञ्। ना' ङ. छ. पाठः.

द्वयम्। 'षणु दाने'। 'धात्वादेः षः सः' (६. १. ६४)। *'सनिकषि —' (उ० ४. १४१) इत्यादिना इः। अन्वेषणावदध्येषणा॥

याच्ञाभिषस्तिर्याचनार्थना॥ ३२॥

क्षीर० — याचनं याच्ञा। 'यजयाच —' (३. ३. ९०) इति नङ्। 'ण्यासश्रन्थ—' (३. ३. १०७) इति बाहुलकाद् युच्। अभिषसनमभिषस्तिः। 'षस स्वप्ने'॥

टीका० — प्रार्थनामात्रे याच्ञाचतुष्कम्। 'यजयाच—' (३. ३. ९०) इत्यादिना नङ्। याच्ञा। 'शंसु स्तुतौ याचने च'। बाहुलकः क्तिन्। अभिशस्तिः। 'टुयाचृ याच्ञायाम्'। ल्युट्। याचना। 'अर्थ उपयाच्ञायाम्'। चुरादिः। 'ण्यासश्रन्थो युच्' (३. ३. १०७)। अर्थना॥

षट् तु त्रिषु

क्षीर० — आगन्त्वन्ताः षट् त्रिलिङ्गाः स्युरिति॥

टीका० — आगन्तुपर्यन्ताः परे त्रिषु॥

अर्घ्यमर्घार्थे

क्षीर० — वारिणीत्येव। 'पादार्घाभ्यां च' (५. ४. २५) इति यत्॥

टीका० — अर्घः पूजाविधिः। तदर्थे पुष्पदूर्वादावर्घ्यम्। 'पादार्घाभ्यां च' (५. ४. २५) इति यत्॥

पाद्यं पादाय वारिणि।

टीका० — अभ्यागतादेः पादप्रक्षालनाय दीयमानजले पाद्यम्। अर्घ्यवद् यत्॥

क्रमादातिथ्यातिथेये अवतिथ्यर्थेऽत्र साधुनि॥ ३३॥

* 'खनिकषि—' इति मुद्रितोणादिपाठः.

क्षीर० — अतिथये इदमातिथ्यम्। $‘अतिथेर्ण्यः’ (५. ४. २६)। अतिथौ साध्वातिथेयम्। ‘पथ्यतिथि —’ (४. ४. १०४) इति ढञ्। कात्यस्त्वाह—

“आवेशिकं विपश्चिद्भिरातिथ्यमभिधीयते” ॥

टीका० — अतिथ्यर्थे भक्तादौ अतिथौ साधुनि कर्मादौ यथाक्रममेकैकमातिथ्यद्वयम्। $‘अतिथेर्ण्यः’ (५. ४. २६) इति ण्यः। आतिथ्यम्। ‘पथ्यतिथिवसतिस्वपतेर्ढञ्’ (४. ४. १०४)। आतिथेयम्। स्त्रियामातिथेयी ॥

स्युरावेशिक आगन्तुरतिथिर्ना गृहागते।

क्षीर० — अवेशे अप्रतिवेशे भव आवेशिकः।

“नैकग्रामीणमतिथिं विप्रं साङ्गतिकं तथा”

इति स्मृतेः। नास्ति तिथिरस्यातिथिः[1]। ‘अत सातत्यगमने’। अतति सततं गच्छति वा। यत् स्मृतिः—

“अध्वनीनोऽतिथिः प्राघूर्णिकः प्राहुणिकः[2] स्मृतः।
आगते स्वगृहं तस्मिन्नभ्युत्थानं तु गौरवम्” ॥

टीका० — गृहादागते मानुषविशेषे आवेशिकत्रयम्। आवेशाद् गृहादागत इति ‘तत आगत’ (४. ३. ७४) इति ढञ्। सेतुवदागन्तुः।

“अनित्यं हि स्थितो यस्मात् तस्मादतिथिरुच्यते”

इति मनुः। ‘अत सातत्यगमने’। ‘ऋतन्यञ्जि—’(उ० ४. २) इत्यादिना इथिन्। अतिथिः। ‘अतिथिर्द्वयोरि’ति त्रिकाण्डशेषः। स्त्रियामतिथी ॥

पूजा नमस्यापचितिः सपर्यार्चार्हणाः समाः ॥ ३४ ॥

[क्षी]र० — ‘नमोवरिवश्चित्रङः क्यच्’ (३. १. १९) इति नमसः

---

१. ‘थिः। अतति’, २. ‘कोऽपि च।’ ख. पाठः.

$ ‘अतिथेर्ञ्यः’ इति मुद्रिताष्टाध्यायीपाठः।

पूजायां क्यच्। 'अ प्रत्ययात्' (३. ३. १०२)। अपचयनमपचितिः। 'अपचितश्च' (७. २. ३०) इत्यत्र 'क्तिनि नित्यं चिभावोऽनिट्त्वं (च) वक्तव्यम्' इति। सपरे साधुः सपर्या, सह पर्यायेण क्रमेण वर्तते वा ॥

टीका० — पूजाषट्कं **पूजायाम्**। पूजयतेः 'चिन्तिपूजि —' (३. ३. १०५) इत्यादिना अङ्। पूजा। नमःशब्दाद् 'नमोवरिवश्चित्रङः क्यच्' (३. १. १९), 'नमसः पूजायाम्' (वा० ३. १. १९) इति वचनात्। 'अ प्रत्ययात्' (३. ३. १०२) इत्यकारप्रत्ययः। नमस्या। 'चायृ पूजानिशामनयोः'। 'क्तिनि नित्यं चिभावो वक्तव्यः' (वा० ७. २. ३०)। अपचितिः। सपरशब्दस्य कण्ड्वादिपाठाद् यक्। सपर्या दन्त्यादिः। 'अर्च पूजायाम्'। 'गुरोश्च हलः' (३. ३. १०३) इत्यः। अर्चा। 'अर्ह पूजायाम्'। युच्। अर्हणा ॥

वरिवस्या तु शुश्रूषा परिचर्याप्युपासनम्।

क्षीर० — 'वरिवसः परिचर्यायां' (वा० ३. १. १९)। क्यच्। शुश्रूषा गुरुसेवा लक्षणया[१] वृत्त्या। परिचरणं परिचर्या। 'परिचर्यापरिसर्यामृगयाटाट्यादीनामुपसङ्ख्यानम्' (वा० ३. ३. १०१)। 'परिचर्या तु पर्येष्टिरि'ति भागुरिः। परिव्रज्या तपस्या रुद्राङ्कुशो विशाखिका ॥

टीका० — वरिवस्याचतुष्कमुपासने। वरिवश्शब्दादव्ययाद् नमस्यावत् क्यजादिः। 'परिचर्यापरिसर्यामृगयाटाट्यानामुपसङ्ख्यानम्' (३. ३. १०१) इत्यतः शप्रत्ययान्ता(त्?) परिचर्या निपात्यते। श्रृणोतेः सनन्तादप्रत्यये शुश्रूषा। आस्तेर्ल्युट्। उपासनम् ॥

व्रज्याटाट्या पर्यटनं

---

१. 'चा', २. 'त्र चायेः क्ति', ३. 'या। प' ख. पाठः. ४. 'स' ख. ङ. छ. ट. पाठः. ५. 'तिता। शृ' ज. पाठः.

क्षीर० — व्रजनं व्रज्या। 'व्रजयजोर्भावे क्यप्'। (३. ३. ९८)। कुटिलमटनमट्टाट्या। सूचिसूत्रिमूत्र्यट्यर्त्यशूर्णोतीनामुपसङ्ख्यानाद् यङन्तादप्रत्ययः। यन्मनुः—

"तौर्यत्रिकमटाट्या च कामजो दशको गुणः"।

स्त्रीत्वं च नीवारवेन्येतिवत्(?)। एवं 'गदमदचर—' (३. १. १००) इति चर्या॥

टीका० — भिक्षाद्यर्थं सदाटने व्रज्यात्रयम्। 'व्रजयजोर्भावे क्यप्' (३. ३. ९८)। व्रज्या। परिचर्यावदटाट्या निपातिता। 'अटाट्या पर्यटनं भ्रमः' इति रत्नमाला॥

चर्या त्वीर्यापथस्थितिः॥ ३९॥

क्षीर० — ईर्यापथे ध्यानमौनादिके सुबोधमार्गाख्ये भिक्षुवृत्ते स्थितिरनुष्ठानम्। 'चर्या त्वीर्या विदुर्बुधाः' इति मुनिः॥

टीका० — यतीनां गतिस्थितिनिषद्याशयनीयानीर्यासंज्ञानि। तस्मिन्नीर्यावर्त्मनि स्थितिश्चर्या। 'गदमदचरयमश्चानुपसर्गे' (३. १. १००) इति भावे यत्॥

उपस्पर्शस्त्वाचमनम्

क्षीर० — उपस्पृश्यन्तेऽद्भिः खान्यत्रोपस्पर्शः। आचम्यतेऽम्भोऽत्राचमनम्॥

टीका० — उपस्पर्शद्वयमाचमने। 'चमु अदने'। ल्युट्। आचमनम्॥

अथ मौनमभाषणम्।

---

१. 'कं वृथाटाट्या का' ग. घ. ङ. पाठः. २. 'क' क. ग. घ. ङ. पाठः. ३. 'थे' ख. पाठः. ४. 'सम्यग् बो' ग. घ. ङ. पाठः.

क्षीर०—मुनेर्भावः कर्म वा मौनम्। 'इगन्ताच्च लघुपूर्वात्' (५. १. १३१)। अण्॥*

टीका०—मौनद्वयं मौने। मुनेः कर्म मौनम्। 'इगन्ताच्च लघुपूर्वात्' (५. १. १३१) इत्यण्॥

आनुपूर्वी स्त्रियां वावृत्परिपाटी अनुक्रमः॥ ३६॥
पर्यायश्च

क्षीर०—पूर्वानुक्रमेणानुपूर्वं[2], तस्य भाव[3] आनुपूर्वी। ष्यञः ाद् वा स्त्रीत्वम्। आवर्तनमावृत्। सम्पदादिक्विबन्तः। परिपाटनं परिपाटिः। इञ्। आवृत्परिपाट्योर्द्वन्द्वात् स्त्रीत्वम्। पर्ययणं पर्यायः। 'परावनुपात्यय इणः' (३. ३. ३८) इति घञ्॥

टीका०—आनुपूर्वीपञ्चकमनुक्रमे। अनुपूर्वस्य भाव आनुपूर्वी। ष्यञ्। षित्त्वाद् ङीप्। 'हलस्तद्धितस्य' (६. ४. १५०) इति यलोपः। पक्षेऽभाषण-साहचर्यादानुपूर्व्यं योपधम्। नीवृदिवावृद् दर्घादिः। 'अट पट गतौ'। घञ्। ङीषि परिपाटी। 'परावनुपात्यय इणः' (३. ३. ३८) इति घञ्। पर्यायः॥

अतिपातस्तु विपर्यय[4] उपात्ययः[5]।

क्षीर०—विपर्ययः क्रमोल्लङ्घनम्। अतिक्रमश्च॥

टीका०—अतिपातत्रयं व्यतिक्रमे। भावे घञ्। अतिपातः। एतेरेरचि पर्ययोपात्ययौ॥

---

१. 'यामात्र' ख. घ. पाठः. २. 'मणमनु' ग. घ. ङ. पाठः. ३. 'दि। प' ख. पाठः. ४. 'स्यात् प', ५. 'यः। क' ख. पाठः.

---

* इतः परं—

"प्राचेतसस्त्वादिकविः स्यान्मैत्रावरुणिश्च सः।
वाल्मीकिश्चाथ गाधेयो विश्वामित्रश्च कौशिकः।
व्यासो द्वैपायनः पाराशर्यः सत्यवतीसुतः॥"

इति व्याख्यापुस्तकमर्धत्रयमधिकं दृश्यते।

नियमो व्रतमस्त्री तच्चोपवासादि पुण्यकम् ॥ ३७ ॥

क्षीर० — व्रज्यतेऽन्नादि अत्रेति[1] व्रतम् । उपवासादि कृच्छ्रचान्द्रायणादि पुण्यैकपर्यायम्[2] । 'संज्ञायां कन्' (५. ३. ७५) ॥

टीका० — शास्त्रविहिते नियमे व्रतम् । तच्च व्रतमुपवासादिलक्षणं पुण्यकमुच्यते । आदिशब्दाद(क्षैः?क्षा)रादि ॥

औपवस्त्रं तूपवासः

क्षीर० — उपवस्ता प्राप्तोऽस्यौपवस्त्रम् । 'उपवस्त्रादिभ्यः' इत्यण् । उपवस्तस्येदमौपवस्तमित्येके । 'वसु स्तम्भे' । क्तः । उपवस्तुरिदमन्नाद्यमिति (वा) । यत् स्मृतिः —

"माषान् मधु मसूरांश्च वर्जयेदौपवस्त्रके" ॥

टीका० — उपवस्तद्वयमुपवासे । 'वसु स्तम्भे' । क्तः । उपवस्तम् ॥

विवेकः पृथगात्मता ।

क्षीर० — प्रकृतिपुरुषपृथग्ज्ञानं विवेकः । भावानां पृथक्स्वरूपत्वमित्येके । 'विचिर् पृथग्भावे' ॥

टीका० — प्रकृतिपुरुषयोर्विभागेन ज्ञानं विवेकः ॥

स्याद् ब्रह्मवर्चसं वृत्ताध्ययनर्द्धिः

क्षीर० — ब्रह्मणस्तपःस्वाध्यायादेर्वर्चस्तेजो ब्रह्मवर्चसम् । 'ब्रह्महस्तिभ्यां वर्चसः' (५. ४. ७८) इत्यच् ॥

टीका० — वृत्तस्य वेदाध्ययनस्य या सम्पत्तिर्गुणोत्कर्षस्तद्[4] ब्रह्मवर्चसम् । 'ब्रह्महस्तिभ्यां वर्चसः' (५. ४. ७८) इत्यच् समासान्तः ॥

अथाञ्जलिः ॥ ३८ ॥

---

१. 'य' क. पाठः. २. 'ण्यप' ख. पाठः. ३. 'का' ज. पाठः. ४. 'र्षप्रभावस्त' ख. ज. पाठः.

पाठे ब्रह्माञ्जलिः

क्षीर० — ब्रह्मणे वेदायाञ्जलिः ।

"संहत्य हस्तावध्येयं स हि ब्रह्माञ्जलिः स्मृतः" ॥

टीका० — सामवेदपाठे योऽञ्जलिः स्वरविभागार्थं क्रियते, स ब्रह्माञ्जलिः ॥

पाठे विप्रुषो ब्रह्मबिन्दवः ।

क्षीर० — वेदपाठे आस्यनिर्गता जलकणा ब्रह्मबिन्दवः ॥

टीका० — वेदपाठे निस्सृताः श्लेष्मबिन्दवो ब्रह्मबिन्दव इत्युच्यन्ते ॥

ध्यानयोगासने ब्रह्मासनं

क्षीर० — ध्यानयोगयोरास्यतेऽनेनासनम् । ध्यानमेकाग्रतया चिन्तनम् । यथाह —

"तत्र प्रत्ययैकतानता ध्यानं, योगश्चित्तवृत्तिनिरोधः" ॥

टीका० — ध्यानयोगयोरासने ऊर्ध्वपादस्वस्तिकपद्मासनादौ ब्रह्मासनम् । निराकारज्ञानभावनं ध्यानं, साकारज्ञानभावनं योगः ॥

कल्पे विधिक्रमौ ॥ ३९ ॥

क्षीर० — कल्प्यते, विधीयते, क्रम्यते चानेन विनियोगशास्त्रेणेति ॥

टीका० — वादके विधाने कल्पत्रयम् । त्रयमपि प्रागेव साधितम् ॥

मुख्यः स्यात् प्रथमः कल्पः

क्षीर० — आद्यो विधिरित्यर्थः ॥

---

१. 'प्रचि' ग. पाठः.

टीका० — शास्त्रविहितः प्रथमः कल्पो मुख्यः, यो व्रीह्यादियागः। मुखमिव मुख्यः। 'शाखादिभ्यो (यत्) (यः) (५. ३. १०३)॥

अनुकल्पस्तु ततोऽधमः।

क्षीर० — मुख्याभावे प्रतिनिधिसंज्ञः॥

टीका० — तदभावे किञ्चिदधमे नीवारादौ यागेऽनुकल्पः॥

संस्कारपूर्वं ग्रहणं स्यादुपाकरणं श्रुतेः॥ ४०॥

क्षीर० — उपाक्रियतेऽनेनेत्युपाकरणं, वेदपाठारम्भे विशिष्टो विधिः। 'रोहिण्यां छन्दांस्युपाकुर्याद्' इति हि श्रुतिः॥

टीका० — संस्कारो वटुकरणं, तत्पूर्वकं श्रुतेर्वेदस्य ग्रहणमुपाकरणम्॥

समे तु पादग्रहणमभिवादनमित्युभे।

क्षीर० —

"वामेन वामः स्प्रष्टव्यो दक्षिणेन तु दक्षिणः"

इति पादोपसङ्ग्रहणम्[1]। अभिवादयते आशिषं कारयतेऽनेना[3]भिवादनम्। अत एवाभिवाद्य उपसङ्ग्राह्यः॥

टीका० — पादग्रहणद्वयमभिवादने॥

भिक्षुः परिव्राट् कर्मन्दी पाराशर्यपि मस्करी॥ ४१॥
तपस्वी तापसः पारिकाङ्क्षी

क्षीर० — भिक्षते भिक्षुः। 'सनाशंसभिक्ष उः' (३. २. १६८) परिवर्ज्यते सर्वं सन्न्यस्य व्रजति परिव्राट्। 'परौ व्रजेः षः पदान्ते' (उ० २. ६२) इति क्विप् षत्वं च। कर्मन्देन पाराशर्येण च प्रोक्तं भिक्षुसूत्रमधीते। 'कर्मन्दकृशाश्वादिनिः'। (४. ३. १११) 'पाराशर्यशिलालिभ्यां भिक्षुनटसूत्रयोः' (४. ३. ११०)। णिनिः। माँ कृषत कर्माणि

---

१. 'र्यां' ख. पाठः. २. 'म्। अभिवादनम अभि', ३. 'न। अत' ख. पाठः.
४. 'साकृतिक' ख. पाठः.

मुक्तिर्वः[1] श्रेयसीति मस्करी । 'मस्करमस्करिणौ वेणुपरिव्राजकयोः' (६. १. १५४) इति साधुः । तपोऽस्यास्ति । 'तपस्सहस्राभ्यां विनीनी' (५. २. १०२) । 'अण् च' (५. २. १०३) । 'अन्येषामपि—'(६. ३. १३७) इति दीर्घात् पारिकाङ्क्षी ॥

टीका० — भिक्षुपञ्चकं चतुर्थाश्रमिणि भिक्षौ । 'सनाशंसभिक्ष उः' (३. २. १६८) इत्युः । 'परौ व्रजेः षश्च पदान्ते' (उ० २. ६२) इति क्विब् दीर्घश्च धातोः षश्चान्तादेशः पदान्ते । परिव्राड् जान्तः । कर्मन्दर्षिप्रोक्तसूत्रमधीत इति कर्मन्दी । 'कर्मन्दकृशाश्वादिनिः' (४. ३. १११) इतीनिः । ततः 'तदधीते—'(४. २. ५९) इत्यण् । तस्य 'प्रोक्ताल्लुक्' (४.२.६४) । पाराशर्यप्रोक्तसूत्रमधीते पाराशरी, तालव्यवान् । 'पाराशर्यशिलालिभ्यां भिक्षुनटसूत्रयोः' (४. ३. ११०) इति णिनिः । पूर्ववदण्लुकौ । 'मस्करमस्करिणौ वेणुपरिव्राजकयोः' (६. १. १५४) इति निपातनान्मस्करी । तपस्वित्रयं तपोधने । 'तपस्सहस्राभ्यां विनीनी' (५. २. १०२) इति विनिः । तपस्वी । मत्वर्थे 'अण् च' (५. २. १०३) इत्यण् । तापसः । परं ब्रह्मज्ञानं काङ्क्षत इति पारिकाङ्क्षी । आवश्यको णिनिः । पृषोदरादित्वात् पूर्वपदाकारस्येत्वं पकाराकारस्य च दीर्घत्वम् ॥

वाचंयमो मुनिः ।

क्षीर० — वाचं यच्छति मौनेनास्ते वाचंयमः । 'वाचि यमो व्रते' (३. २. ४०) इति खच् । मन्यते मुनिः । भिक्षुपर्यायावेतावित्येके ॥

टीका० — वाचंयमद्वयं मौनव्रतिनि । 'वाचि यमो व्रते' (३. २. ४०) इति खच् । 'मनेरुच्च' (उ० ४. १२४) इति किः । मुनिः ॥

तपःक्लेशसहो दान्तः

क्षीर० — तपःक्लेशादनुद्विग्नः[2] । 'वा दान्तशान्त—'(७. २. २७) इति साधुः ॥

---

१. 'र्वां'. २. 'वियोगः । वा' ख. पाठः,

टीका० — सत्यपि तपःक्लेशेऽनुद्विग्नो दान्तः। 'वा दान्तशान्त —' (७. २. २७) इत्यादिना इड्विकल्पः॥

वर्णिनो ब्रह्मचारिणः॥ ४२॥

क्षीर० — वर्णोऽस्यास्ति वर्णी। 'वर्णाद् ब्रह्मचारिणि'(५. २. १३४) इतीनिः। ब्रह्म चरति तच्छीलो ब्रह्मचारी॥

टीका० — वर्णिद्वयं ब्रह्मचारिणि। 'वर्णाद् ब्रह्मचारिणि' (५. २. १३४) इतीनिः। वर्णी॥

ऋषयः सत्यवचसः

क्षीर० — दर्शनादृषिरविसंवादिवाक्॥

टीका० — ऋषिद्वयमृषौ। ज्ञानस्य पारगमनादृषिः। 'ऋषी गतौ'। 'इगुपधात् कित्' (उ० ४. १२१) इति किः। स्त्रियामृषी च॥

स्नातकस्त्वाप्लुतो व्रती।

क्षीर० — 'स्नात वेदसमाप्तौ' (ग० ५. ४. २९) इति यावादित्वात् कन्। यो व्रतवान् तीर्थेष्वाप्लवते स्नातीत्याप्लुतः सः, स्नातकः। यत् स्मृतिः —

"गुरवे तु वरं दत्त्वा स्नायाद् वा तदनुज्ञया।
वेदं व्रतानि वा पारं नी[1]त्वाप्युभयमेव वा"॥
(याज्ञ० अध्या० १. श्लो० ५१)

टीका० — समाप्तवेदाध्ययनानन्तरं यः स्नानशील आश्रमान्तरं गच्छति तत्र स्नातकद्वयं। 'पुण्यस्नातवेदसमाप्तौ' (ग० ५. ४. २९) इति यावादिगणपाठात् कन्॥

ये निर्जितेन्द्रियग्रामा यति[2]नो यतयश्च ते॥ ४३॥

क्षीर० — यत[3]ं यमनमस्यास्ति यती[4]। यच्छत्युपरमति यतिः॥

१. 'तीर्त्वाप्यु' क. ख. पाठः. २. 'मि', ३. 'मः', ४. 'मी।' ग. ङ. पाठः.

टीका० — निर्जितेन्द्रियगणे वसिष्ठादौ यतिद्वयम् । यतम् इन्द्रियसंयमोऽस्यास्तीति यती, इन्नन्तः। 'यती प्रयत्ने'। 'इन्' (उ० ४. ११९) इति इन्। यतिः ॥

यः स्थण्डिले व्रतवशाच्छेते स्थण्डिलशाय्यसौ ।
स्थाण्डिलश्च

क्षीर०— आद्यस्य 'व्रते' (३. २. ८०) इति णिनिः। परस्य 'स्थण्डिलाच्छयितरि व्रते' (४. २. १५) इत्यण् ॥

टीका० — व्रतकाम्यया स्थण्डिले शयितरि स्थण्डिलशायिद्वयम् । 'व्रते' (३. २. ८०) इति णिनिः। स्थण्डिलशायी। 'स्थण्डिलाच्छयितरि व्रते' (४. २. १५) इत्यणि स्थाण्डिलः ॥

अथ विरजस्तमसः स्युर्द्वयातिगाः ॥ ४४ ॥

क्षीर० — विगते रजस्तमसी येभ्यः, सात्त्विका इत्यर्थः । द्वयमतिगच्छन्ति अतिक्रामन्ति द्वयातिगाः ॥

टीका० —रजस्तमःशून्याः केवलसत्त्वस्था द्वयातिगा उच्यन्ते । 'अन्येभ्योऽपि —' (वा०३. २. १०१) इति डः ॥

पवित्रः प्रयतः पूतः

क्षीर० — पूयतेऽनेन पवित्रः। प्रयतते प्रयच्छत्युपरमति वा प्रयतः। शुचिः पुण्यः पावनश्च ॥

टीका० — शुचिपुरुषादौ पवित्रत्रयम् । 'अशित्रादिभ्य इत्रोत्रौ' (उ० ४. १७४) इति इत्रः । पवित्रः । 'पूङश्च' (७. २. ३१) इतीड्विकल्पेन पवित इत्यपि ॥

पाषण्डाः सर्वलिङ्गिनः ।

क्षीर० — पाषाणं[1] नन्दन्ति पाषण्डाः । वेदबाह्यव्रताः । सर्वलि-

१. 'नणति पा' ग, ङ. पाठः.

ङ्गिनः क्षपणकाद्याः, सर्वाणि लिङ्गानि सन्त्येषाम् । भग्नव्रता इत्येके । आहुश्च —

"नानाव्रतधरा नानावेषाः पाषण्डिनो मताः" ॥

टीका० — वेद[1]व्यवहारबाह्ये कापालिकक्षपणकादौ पाषण्डद्वयम् । पाषण्डो मूर्धन्यषः । सर्वेषामाश्रमाणां लिङ्गं भजन्त इति सर्वलिङ्गिनः ॥

पालाशो दण्ड आषाढो व्रते

क्षीर० — आषाढासु जात आषाढः । 'विशाखाषाढादण् मन्थदण्डयोः' (५. १. ११०)। यदाहुः— 'आषाढो व्रतिनां दण्डः' ॥

टीका० — व्रतिनां पलाशकृतो दण्ड आषाढः । 'विशाखाषाढादण् मन्थदण्डयोः' (५. १. ११०) इत्यण् ॥

राम्भस्तु वैणवः ॥ ४५ ॥

क्षीर० — व्रते दण्ड इत्येव । रम्भा वेणुपर्यायः ॥

टीका० — वैणवे दण्डे राम्भः । रम्भशब्देन वंशो बोध्यते । ततोऽण् ॥

अस्त्री कमण्डलुः कुण्डी

क्षीर० — कं जलमण्डे मध्ये लाति कमण्डलुः । कुण्डाद् 'जानपदकुण्ड—' (४. १. ४२) इत्यमत्रे ङीप् ॥

टीका० — मृण्मयादिजलाधारे कमण्डलुद्वयम् । कुण्डेरच् । कुण्डी । गौरादिः ॥

व्रतिनामासनं बृसी ।

क्षीर० — ब्रुवन्तोऽस्यां सीदन्ति बृसी ॥

टीका० — व्रतिनां सलाङ्गूल आसने बृसी । 'गण्डूषा मञ्जूषा

---

१. 'यदा व्य' ग., 'दयाव्य' ख. ग. ट. पाठः.

वृषी'ति मूर्धन्ये लिङ्गकारिका । 'वसा तसी बृसी मांसी'ति दन्त्यान्ते चन्द्रगोमी ॥

अजिनं चर्म कृत्तिः स्त्री

क्षीर० — अज्यते क्षिप्यतेऽजिनम् । चरति चर्म । कृत्यते कृत्तिः ॥

टीका० — अजिनत्रयं चर्मणि । 'अज गतिक्षेपणयोः' । 'अजेरज च' (उ० २. ५०) इतीनच् । वीभावबाधनार्थमजादेशः । चरतेर्मनिन् । चर्म, नान्तम् । 'कृती छेदने' । क्तिन् । कृत्तिः ॥

भैक्षं भिक्षाकदम्बकम् ॥ ४६ ॥

क्षीर० — 'भिक्षादिभ्योऽण्' (४. २. ३८) ॥

टीका० — भिक्षासमूहे भैक्षम् । 'भिक्षादिभ्योऽण्' (४. २. ३८) ॥

स्वाध्यायः स्याज्जपः

क्षीर० — स्वस्य वेदस्याध्ययनं स्वाध्यायः । 'इङश्च' (३. ३. २१) इति घञ् । जपनं जपः । 'व्यधजपोरनुपसर्गे' (३. ३. ६१) इत्यप् ॥

टीका० — आवृत्त्या वेदाध्ययने स्वाध्यायद्वयम् । सुआङ्पूर्वाद् ध्यायतेर्घञ् । स्वाध्यायः । 'व्यधजपोरनुपसर्गे' (३. ३. ६१) इत्यप् । जपः । बाहुलकाद् घञि जाप इत्यपि रक्षितः ॥

सुत्याभिषवः सवनं च सा ।

क्षीर० — सोमं सुन्वन्त्यद्भिः परिवासयन्त्यस्यां सुत्या । 'संज्ञायां समज —' इति क्यप् । अभिषवणमभिषवः । 'उपसर्गात् सुनोति —' (८. ३. ६५) इति षत्वम् ॥

टीका० — सुत्यात्रयं स्नाने सोमलतानिर्दलने च । 'संज्ञायां स-

मज—' (३. ३. ९९) इत्यादिना क्यप्। सुत्या। ऋदोरपि उपसर्गादिना षत्वे अभिषवो मूर्धन्यषः॥

सर्वैनसामपध्वंसि जप्यं त्रिष्वघमर्षणम्॥ ४७॥

क्षीर०—अघं मृष्यते शोध्यतेऽनेनाघमर्षणम् अब्दैवत्यो वा **मन्त्रस्तज्जपो वा। त्रिरात्रोपवासादिस्तूपचारात्॥**

टीका०—सर्वपापापनोदि यज्जपनीयं, तदघमर्षणम्। अघमर्षणो मन्त्रः, अघमर्षणी ऋक्॥

दर्शश्च पौर्णमासश्च यागौ पक्षान्तयोः पृथक्।

क्षीर०—अमावास्या दर्शः, दृश्यते चन्द्रोऽत्रेति। यागस्तूपचारात्। पूर्णिमायां पौर्णमासः, पूर्णो माश्चन्द्रस्तत्र भवः॥

टीका०—अमावास्यायागो दर्शाख्यः। पौर्णमासीयागः पौर्णमासाख्यः। पृथगिति भिन्नौ न पर्यायौ॥

शरीरसाधनापेक्षं नित्यं यत् कर्म तद् यमः॥ ४८॥

क्षीर०—शरीरमात्रेणैव यत् क्रियते, तद् यम्यतेऽनेन चित्तं **यमः। 'यमः समुपनिविषु च'** (३. ३. ६३) इत्यप्। आह च—

"अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहा यमाः" (पात०सू० २. ३०)॥

टीका०—शरीरमात्रसाध्यं यद्, न बाह्यसाध्यं नित्यं यावज्जीवम् अहिंसासत्यादि तद् यमः॥

नियमस्तु स यत् कर्मानित्यमागन्तुसाधनम्।

क्षीर०—आगन्तु बाह्यं मृज्जलादि साधनं यत्र, तदेव कृत्रिमं

कर्म नियमः । यदाह—

"शौचसन्तोषतपस्स्वाध्याये[1]श्वरप्रणिधाना[2]नि नियमाः" (पात० सू० २. ३२) ॥

"शैव और्ध्वस्रोतसिकः सिद्धान्ती शौचमार्गिकः ।
पञ्चार्थिकः पाशुपतो लौ[3]कुलोऽथ महाव्रती ॥
कपाली सोमसिद्धान्ती तान्त्रिकः स्याद् विशेषदृक् ।
यामलो द्वयमार्गी स्यात् त्रिकभेदी षडर्धि[4]कः ॥
पूर्वाम्नायी महामा[5]र्गी भैरवी दक्षिणागमः ।
शाक्तो वामस्रोतसिकः कौल आन्व[6]यिको मतः ॥
एकान्वयः सात्त्वतश्च वैष्णवः पाञ्चरात्रिकः ।
रक्ताम्बरो भदन्तश्च शाक्यः श्रमणवन्दकौ ॥
भिक्षुः श्वेतः श्वेतपटः क्षपणर्षिर्दिगम्बरः ।
नग्नाटः श्रावका[7]श्रीकौ नि[8]र्ग्रन्थो जीवजीवकौ ॥
क्षौरं तु भ[9]द्राकरणं मुण्डनं वपनं त्रिषु ।
कक्ष्यापुटीच कौ[10]पीनं शाटी वस्त्रीति लक्ष्यतः" ॥

टीका०—आगन्तुकदेवोत्थापनादिनिमित्तमुपवासादिर्नियमः ॥

उपवीतं यज्ञसूत्रं प्रोद्धृते दक्षिणे करे ॥ ४९ ॥

क्षीर०—उपवीयते आव्रियते स्मोपवीतम् । दक्षिणपाणौ प्रोद्धृते यदुपवीयते तद् यज्ञार्थं सूत्रमुपवीतम् ॥

टीका०—दक्षिणकरे प्रोद्धृते वामस्कन्धनिक्षिप्तं यज्ञसूत्रमुपवीताख्यम् ॥

प्राचीनावीतमन्यस्मिन्

क्षीर०—यज्ञसूत्रमित्येव । वामे करे प्रोद्धृते प्राचीनावीतम् । प्रा-

१. 'यत्र', २. 'नि । उपवासादिकं यमः । दानादिकं नियमः । 'यमाः शैव' ख. पाठः. ३. 'लो', ४. 'र्थि' घ. पाठः. ५. 'र्गो', ६. 'द्र' ग. घ. पाठः. ७. 'श्री', ८. 'भिक्षुकौ' ग. घ, पाठः. ९. 'भाद्रक', १०, 'ली' ख, पाठः,

गेव प्राचीनम् । 'विभाषाञ्चेरदिक्स्त्रियाम्' (५. ४. ८) इति खः । आवीयते स्मावीतम् ॥

टीका० — श्राद्धकालेऽन्यस्मिन् वामे करे उद्धृते दक्षिणस्कन्धे निक्षिप्ते प्राचीनावीतम् ॥

निवीतं कण्ठलम्बितम् ।

क्षीर० — यज्ञसूत्रमित्येव । अनुद्धृतयोरुभयोरपि कण्ठे यल्लम्बते, तद् नियतं वीयतेऽस्मिन् निवीतम् । यन्मनुः—

"प्रोद्धृते[1] दक्षिणे पाणावुपवीत्युच्यते द्विजः ।
सव्ये प्राचीनमावीती निवीती कण्ठसज्जने" ॥
(अध्या० २. श्लो० ६३)

टीका० — यज्ञसूत्रं कण्ठादृजुलम्बितं तदेव निवीतम् ॥

अङ्गुल्यग्रे तीर्थं दैवं

क्षीर० — देवेभ्यस्तीर्यते दीयतेऽनेन तीर्थम् ॥

टीका० — अङ्गुलीनामग्रे दैवं तीर्थम् । देवस्येदं दैवम् । तेनैव तर्पणविधानात् ॥

स्वल्पाङ्गुल्योर्मूले कायम् ॥ ५० ॥

क्षीर० — स्वल्पा कनिष्ठाङ्गुलिः । द्वित्वम् अङ्गुलिमध्येन प्रजापतिभ्यो जलदानाम्नानात् । कः प्रजापतिर्देवतास्य कायम् । 'कस्येत्' (४. २. २५) इत्यण् इत्वं च ॥

टीका० — कनिष्ठानामिकयोर्मध्ये प्राजापत्यं तीर्थम् । को ब्रह्मा देवतास्येति कायम् । 'सास्य देवता' (४. २. २४) इत्यण् । 'कस्येत्' (४. २. २५) इति इकारः । तस्य च वृद्ध्यायादेशौ ॥

१. 'उ' ग. घ. ङ. पाठः.

मध्येऽङ्गुष्ठाङ्गुल्योः पित्र्यं

क्षीर०—अङ्गुलिस्तर्जन्यत्र। [1]पितरो देवतास्य पित्र्यं तीर्थम्। 'वा-य्वृतुपित्रुषसो यत्' (४. २. ३१)॥

टीका०—अङ्गुष्ठप्रदेशिन्योर्मूले पैत्रं, पितृदेवत्यम्॥

मूले त्वङ्गुष्ठस्य ब्राह्मम्।

क्षीर०—ब्रह्मा देवतास्य ब्राह्मं तीर्थम्। 'ब्राह्मोऽजातौ' (६. ४. १७१) इति साधुः। यद् याज्ञवल्क्यः—

"कनिष्ठातर्जन्यङ्गुष्ठमूलान्यग्रं करस्य च।
प्रजापतिपितृब्रह्मदेवतीर्थान्यनुक्रमात्॥"
(अध्या० १. श्लो० १९)

करमध्ये सौम्यं त्वाहुः॥

टीका०—अङ्गुष्ठमूले ब्राह्मम्। ब्रह्मदेवत्यम्। विद्युन्माला नामेयं सर्वगुरुरनुष्टुप्॥

स्याद् ब्रह्मभूयं ब्रह्मत्वं ब्रह्मसायुज्यमित्यपि॥५१॥

क्षीर०—ब्रह्मणो ज्ञानस्य भवनं ब्रह्मभूयम्। ब्रह्मणैकार्थ्यं, मोक्ष इत्यर्थः। 'भुवो भावे' (३. १. १०७) इति क्यप्। सह युनक्ति सयुक्, तस्य भावः सायुज्यम्॥

टीका०—ब्रह्मभूयत्रिकं ब्रह्मभवने। 'भुवो भावे' (३. १. १०७)। क्यप्। ब्रह्मभूयम्। 'तस्य भावस्त्वतलौ' (५. १. ११९)। ब्रह्मत्वम्। 'सम्बन्धि-[2]गुणवान् सयुक्' इति त्रिकाण्डशेषः। अतो ब्रह्मसम्बन्धि ब्रह्मसायुज्यम्। ष्यञ्॥

देवभूयादिकं तद्वत्

क्षीर०—तद्वदिति देवत्वं देवसायुज्यं च। आदिशब्दान्मूर्ध-भूयादिः॥

१. 'वा' ख. पाठः. २. 'न्धी गु' क. ख. घ. च. पाठः.

टीका० — एवं देवभवने देवभूयं देवत्वं देवसायुज्यमित्यपि बोद्धव्यम् ॥

कृच्छ्रं सान्तपनादिकम् ।

क्षीर० — कृन्तति पापं कृच्छ्रं नाम तपः । सन्तपने[1]भवं सान्तपनम् । यत् स्मृतिः —

"त्र्यहं सायं त्र्यहं प्रातस्त्र्यहमद्यादयाचितम् ।
त्र्यहं परं च नाश्नीयात् कृच्छ्रं सान्तपनं स्मृतम्" ॥

आदिना पराकादि ॥

टीका० — सान्तपनचान्द्रायणादि कृच्छ्राख्यम् । कष्टे कृच्छ्रमुक्तम् ॥

सन्न्यासवत्यनशने पुमान् प्रायः

क्षीर० — सन्न्यसनं सर्वत्यागो मरणाध्यवसायः । पुमानिति-प्रायस्यो[2]सन्तत्वं मा विज्ञायीति । यल्लक्ष्यं — 'प्रायोपवेशनमतिर्नृपतिर्बभूव' (रघु० स० ८. श्लो० ९४) ॥

टीका० — सन्न्यस्तोऽहमिति प्रतिज्ञां कृत्वा यदभोजनं स प्रायः । 'प्रायोपवेशनमतिर्नृपतिर्बभूव' (स० ८. श्लो० ९४) इति रघावदन्तः ॥

अथ वीरहा ॥ ५२ ॥

नष्टाग्निः

क्षीर० — वीरयते वीरोऽग्निः । तमुपेक्षया हन्ति ॥

टीका० — उत्सन्नाग्नौ पुरुषे वीरहा नान्तः । वीरोऽग्निः । हन्तेः क्विप् ॥

कुहना दम्भान्मिथ्येर्यापथकल्पना ।

क्षीर० — ईर्यापथाख्यस्य भिक्षुव्रतस्य दम्भेन परविस्मापनार्थं मिथ्याकल्पना कुहना । 'कुह विस्मापने' । अस्माद् युच् । अर्थलिप्सया विज्ञानदर्शनं वा कुहना[3]ख्या । शाश्वतस्त्वाह —

---

१. 'ने' ख. ग. घ. ङ. पाठः. २. 'स्य शान्त', ३. 'का' ख. पाठः.

"ईर्ष्यालुर्दम्भचर्या च कुहनः कुहना क्रमात्" ॥

टीका०—अन्नलिप्सया मिथ्यामार्गाश्रयणे कुहना । 'कुह विस्मापने' । चुरादिः । युच् ॥

व्रात्यः संस्कारहीनः स्याद्

क्षीर०—व्रते साधुः कालोऽस्य व्रात्यः । प्रायश्चित्तार्हः । संस्कारोऽत्रोपनयनम् । यत् स्मृतिः—

"सावित्रीपतिता व्रात्या व्रात्यस्तोमादृते क्रतोः" ।
(याज्ञ० अध्या० १. श्लो० ३८)

व्रते साधुरित्येके । पृथग्व्यपदेशो[1] नेत्यर्थः ॥

टीका०—अष्टादशसंस्कारहीनो व्रात्यः ॥

अस्वाध्यायो निराकृतिः ॥ ५३ ॥

क्षीर०—निराक्रियते वेदहीनत्वान्निराकृतिः । आकृतेर्जातेर्वा निष्क्रान्तः । यत् स्मृतिः—

"अनधीत्य तु यो वेदानन्यत्र कुरुते श्रमम् ।
स जीवन्नेव शूद्रत्वमाशु गच्छति सान्वयः" ॥
(मनु० अध्या० २. श्लो० १६८)

टीका०—वेदपाठशून्ये अस्वाध्यायद्वयम् । निराकृतिः पुमान् । बाहुलकः क्तिच् ॥

धर्मध्वजी लिङ्गवृत्तिः

क्षीर०—धर्मो ध्वजश्चिह्नमिवास्त्यस्य धर्मध्वजी । लिङ्गाज्जटादेर्वृत्तिर्जीविकास्य । भिक्षिष्य इत्यस्य जटा इति यावत् ॥

टीका०—वर्तनार्थमेव जटादिधारणं यस्य तत्र धर्मध्वजिद्वयम् । धर्मध्वजी नान्तः । लिङ्गेन जटादिना वृत्तिर्वर्तनं यस्य स लिङ्गवृत्तिः ॥

---

१. 'शोऽनर्थः' ख. पाठः.

अवकीर्णी क्षतव्रतः।

क्षीर०— अव अन्तरे कीर्णं रेतोऽस्त्यस्यावकीर्णी। यत् स्मृतिः—

"ब्रह्मचार्यवकीर्णी स्यात् कामतस्तु स्त्रियं व्रजन्" ॥

टीका० — स्त्र्यभिगमनादिना नष्टव्रतोऽवकीर्णी । 'इष्टादिभ्यश्च' (९. २. ८८) इतीनिः ॥

सुप्ते यस्मिन्नस्तमेति सुप्ते यस्मिन्नुदेति च ॥ ५४ ॥
अंशुमानभिनिर्मुक्ताभ्युदितौ तौ यथाक्रमम्।

क्षीर० — अभिभूय निर्मुक्तोऽस्तमितोऽर्कोऽस्याभिनिर्मुक्तः। अभिभूयोदितोऽर्कोऽस्याभ्युदितः ॥

टीका० — सुप्ते यस्मिन् द्विजे रविरस्तमेति सोऽभिनिर्मुक्तः, सुप्ते यस्मिन् रविरुदेति सोऽभ्युदितः ॥

परिवेत्तानुजोऽनूढे ज्येष्ठे दारपरिग्रहात् ॥ ५५ ॥

क्षीर० — ज्येष्ठे भ्रातर्यकृतविवाहे कनिष्ठो विवाहाद्धेतोः परिवर्ज्य विन्दति परिवेत्ता। यत् स्मृतिः—

"येऽग्रजेष्वकलत्रेषु कुर्वते दारसङ्ग्रहम्।
ज्ञेयास्ते परिवेत्तारः परिवित्तिस्तु पूर्वजः" ॥

उपलक्षणं चैतद्, यतोऽग्निहोत्रव्रतादावपि परिवेदनस्य व्यवहारोऽस्ति ॥

टीका० — अकृतविवाहे ज्येष्ठभ्रातरि कनीयान् भ्राता परिवेत्ता ॥

परिवित्तिस्तु तज्ज्यायान्

क्षीर० — तस्य ज्यायानग्रजः । परिवर्ज्य यं विन्दति स परिवित्तिः ॥

टीका० — तस्य परिवेत्तुर्ज्यायान् भ्राता परिवित्तिः । बाहुलकात् क्तिच् ॥

विवाहोपयमौ समौ ।

तथा परिणयोद्वाहोपयामाः पाणिपीडनम् ॥ ५६ ॥

क्षीर० — विवहनं विवाहः । उपयमनमुपयमः । 'यमः समुपनिविषु च' (३. ३. ६३) इति पक्षेऽप् ॥

टीका० — विवाहषट्कं विवाहे । विवाहोद्वाहयोर्घञ् । 'यमः समुपनिविषु च' (३. ३. ६३) इति पक्षेऽप् । उपयमः । घञि उपयामः । नयतेः एरचि परिणयः ॥

व्यवायो ग्राम्यधर्मो मैथुनं निधुवनं रतम् ।

क्षीर० — व्यवयनं व्यवायः । मिथुनस्य स्त्रीपुंसयोरिदं मैथुनम् । निधूयन्तेऽङ्गान्यस्मिन् निधुवनम् । रमणं रतम् । रतिः सुरतं मोहनं सम्प्रयोगो याभोऽपि ॥

टीका० — व्यवायचतुष्कं रतौ । इणः एरचि व्यवायः । ग्राम्याणां धर्म आचारो ग्राम्यधर्मः । 'धू विधूनने' । ल्युट् । निधुवनम् ॥

त्रिवर्गो धर्मकामार्थैः

क्षीर० — धर्माद्यैस्त्रिभिस्त्रिसङ्ख्यो वर्गः ॥

टीका० — धर्मार्थकामास्त्रिवर्गाख्याः ॥

चतुर्वर्गः समोक्षकैः ॥ ५७ ॥

क्षीर० — धर्मार्थकामैरित्येव ॥

टीका० — धर्मार्थकाममोक्षाश्चतुर्वर्गाख्याः ॥

२ बलैस्तैश्चतुर्भद्रं

क्षीर० — चतुर्णां भद्राणां समाहारश्चतुर्भद्रम् । पात्रादि । तैर्धर्मकामार्थैः । यत् कात्यः —

---

१. 'विक्रिय' ख. पाठः. २. 'म् । तै' ग. घ. ङ. पाठः.

"आहुश्चत्वारि भद्राणि बलं धर्मं सुखं धनम्" ॥

टीका० — धर्मादिभिश्चतुर्भिः सबलैर्बलवद्भिश्चतुर्भद्रमुच्यते ॥

जन्याः स्निग्धा वरस्य ये ॥ ५७½ ॥

क्षीर० — जनीं वधूं वहति । 'संज्ञायां जन्याः' (४. ४. ८२) इति साधुः । जामातुर्वयस्याः । जनीवोढारोऽपि । यल्लक्ष्यं — 'यातेति जन्यानवदत् कुमारी' (रघु० स० ६. श्लो० ३०) ॥

इति ब्रह्मवर्गः ।

टीका० — ये वरस्य जामातुर्वयस्याः स्निग्धाः ते जन्या इत्युच्यन्ते । जनीं वधूं वहन्तीति 'संज्ञायां जन्याः' (४. ४. ८२) इति यत् ॥

इति ब्रह्मवर्गः ॥

अथ क्षत्रियवर्गः ।

मूर्धाभिषिक्तो राजन्यो बाहुजः क्षत्रियो विराट् ।

क्षीर० — मूर्धस्याभिषिच्यते[1] मूर्धाभिषिक्तः । मूर्धावसिक्तोऽपि । राज्ञोऽपत्यं राजन्यः । 'राजश्वशुराद् यत्' (४. १. १३७) इत्यत्र 'राज्ञोऽपत्ये जातिग्रहणम्' । हिरण्यगर्भबाहुभ्यां[2] जातो बाहुजः । यच्छ्रुतिः — 'बाहू राजन्यः कृतः' । क्षत्रस्यापत्यं जातिः क्षत्रियः । 'क्षत्राद् घः' (४. १. १३८) । क्षत्रं च क्षतत्राणात् ॥

टीका० — मूर्धाभिषिक्तपञ्चकं क्षत्रिये । राज्यारोपणकाले मूर्ध्न्यभिषिक्तो मूर्धाभिषिक्तः[3] । क्तः । प्रथमः क्षत्रियः । तत्प्रभवतया अनभिषिक्ता अपि मूर्धाभिषिक्ताख्याः । यथा ब्रह्मबाहुजस्य वंश्याश्च बाहुजाः । राजा क्षत्रियः, तस्यापत्यं राजन्यः । 'राजश्वशुराद् यत्' (४. १. १३७) । 'ये चाभावकर्मणोः'

---

१. 'धाभि' ग. घ. ङ. पाठः. २. 'र्भाद् बा' ग. घ. ङ. पाठः. ३. 'क्तः । प्र' ख. ग. घ. ङ. ञ. पाठः.

(६. ४. १६८) इति प्रकृतिभावः । 'राजेरन्यः' (उ० ३. १००) इत्युणादिः । तत्र 'राजृ दीप्तावि'त्यतोऽन्यप्रत्ययः । ब्रह्मणो बाहोर्जातो बाहुजः । अपत्ये 'क्षत्राद् घः' (४. १. १३८) । क्षत्रियः । तेन क्षत्त्रोऽप्यस्य नामेत्युक्तम् । अतितेजस्वितया विशेषेण राजते दीप्यत इति विराट् । 'सत्सूद्विष —' (३. २. ६१) इत्यादिना क्विप् ॥

राज्ञि राट्पार्थिवक्ष्माभृन्नृपभूपमहीक्षितः ॥ १ ॥

क्षीर० — राजते राट् । व्रश्चादिना षः । 'झलां जशोऽन्ते' (८.२. ३९) इति डत्वम् । 'वावसाने' (८. ४. ५६) । चर्त्वम् । पृथिव्या राजा पार्थिवः । 'सर्वभूमिपृथिवीभ्यामणञौ' (५. १. ४१) । मह्यां क्षियत्यधिवसति महीक्षित् ॥

टीका० — जनपुरपरिपालनाधिकृते क्षत्रियेऽन्यस्मिन्नपि तत्कर्मकारिणि राजसप्तकम् । सम्यग्या राजतीति राजा । नान्तः । 'कनिन् युवृषितक्षिराजिधन्वद्युप्रतिदिवः' (उ० १. १६२) इति कनिन् । 'सत्सूद्विष—' (३. २. ६१) इत्यादिना क्विप् । राट् । जान्तः । पृथिव्या ईश्वरः पार्थिवः । 'तस्येश्वरः' (५. १. ४२) इत्यण् । क्ष्मां भुनक्ति पालयतीति क्ष्माभुक् । जान्तः । नॄन् पातीति नृपः । आतोऽनुपसर्गे कः' (३. २. ३) 'क्षि निवासगत्योः' । धातूनामनेकार्थत्वान्महीमधिगतवानिति महीक्षित् । क्विबन्तः ॥

राजा तु प्रणताशेषसामन्तः स्यादधीश्वरः ।

क्षीर० — अध्युपरीष्टे तच्छीलोऽधीश्वरः ॥

टीका० — प्रणता अशेषाः सामन्ता यत्र सोऽधीश्वराख्यः । समन्तः संलग्नोऽन्तो यस्याः सा समन्ता, स्वविषयानन्तरा भूमिः । संशब्द एवात्र संसक्तार्थः । समन्ताया इमे सामन्ताः, अनन्तरा राजानः ।

"नयविक्रमसंस्कृतप्रतापैरपि सामन्तनृपैः प्रयाच्यमानः"

इति जातकमालायामनन्तरराजेषूक्तम् ॥

चक्रवर्ती सार्वभौमः

क्षीर० — नृपचक्रे राजचक्रे वर्तते, स्वाम्येन चक्रं राष्ट्रं वर्तयति वा चक्रवर्ती। सर्वस्या भूमेरीश्वरः सार्वभौमः। अनुशतिकादित्वादुभयपदवृद्धिः। अत्राहुः—

"रामो दाशरथी रावणारिकाकुत्स्थराघवाः।
सौमित्रिर्लक्ष्मणो लङ्कापतिपौलस्त्यरावणाः॥
दशास्योऽथेन्द्रजिन्मेघनादो मण्डोदरीसुतः।
आञ्जनेयस्तु हनुमान् मारुतिर्मारुतात्मजः॥
किष्किन्धाधिपसुग्रीवौ द्वौ जटायुजटायुषौ।
अजातशत्रुः शल्यारिर्धर्मपुत्रो युधिष्ठिरः॥
राधेयोऽङ्गाधिपः कर्णो भीमसेनो हिडिम्बभित्।
मारुतिः कीचकारातिर्बकवैरी वृकोदरः॥
धनञ्जयोऽर्जुनः पार्थो विजयः शक्रनन्दनः।
गाण्डीवी फल्गुनः सव्यसाची मध्यमपाण्डवः॥
जिष्णुः किरीटी बीभत्सुः श्वेतवाजी कपिध्वजः।
पृथा तु कुन्ती कृष्णा तु पाञ्चाली याज्ञसेन्यपि॥
द्रौपदी विक्रमादित्यः साहसाङ्कः शकान्तकः।
शूद्रकस्त्वग्निमित्राख्यो[1] हालः स्यात् सालवाहनः॥
वैरोचनो बलिः कार्तवीर्यार्जुनः सहस्रदोः"॥

टीका० — समस्तभूम्यधिपतौ राजनि चक्रवर्तिद्वयम्। पुण्योपनतेन चक्रेण वर्तते चेष्टते असाधुदमनिकां राजवृत्तिमनुतिष्ठतीति चक्रवर्ती। णिन्यन्तः। सर्वभूमेरीश्वरः सार्वभौमः। पार्थिववदण्। 'अनुशतिकादीनां च' (७. ३. २०) इत्युभयपदवृद्धिः॥

नृपोऽन्यो मण्डलेश्वरः॥ २॥

क्षीर० — अन्यो भूम्येकदेशेशो नृपः॥

---

१. 'पमित्रो ना हा' ग. घ. पाठः.

टीका० — अन्योऽसार्वभौमो मण्डलेश्वरः ॥

येनेष्टं राजसूयेन मण्डलस्येश्वरश्च यः।
शास्ति यश्चाज्ञया राज्ञः स सम्राड्

क्षीर० —इज्यते स्मेष्टम्। मण्डलस्य द्वादशराजकस्य। समुदितं लक्षणं चैतत्। सम्यग् राजति सम्राट्। 'मो राजि समः क्वौ' (८. ३. २५) इति मस्य मः ॥

टीका० — राजसूयनाम्ना यागेन येनेष्टं स सम्राट्। राजसूयाधिकारश्चासार्वभौमस्य न भवति। सार्वभौमः सकलमण्डलपालनात् सकलराजमण्डलशासनाद् वा भवतीति सार्वभौमप्रकारद्वयं प्रदर्शयति — 'मण्डलस्येश्वरश्च यः। शास्ति यश्चाज्ञया राज्ञ' इति। एतेन राजसूयाधिकारिणि चाधिकारितामात्रेणापि सम्राट्छब्दो वर्तत इत्युक्तं भवति। वोपालितेन सार्वभौममनभिसन्धाय द्वयमेव सम्राट्त्वेन निबद्धम्। यो राजसूययाजी सर्वावनिराट् स सम्राट्। मण्डलेश्वरश्च य इति यो हिमवत्समुद्राभ्यन्तरे सहस्रयोजनपरिमाणस्य भूमण्डलस्येश्वरः पालयिता सोऽपि सम्राट्। शास्ति यश्चाज्ञया राज्ञ इति यो हिमवत्समुद्राभ्यन्तरवर्तिनो राज्ञो विधेयीकरोति सोऽपि सम्राडित्युक्तम्। प्रेत्य देवेष्विह चातिविलक्षणतया राजसु मध्ये सम्यग् राजते इति सम्राट्। क्विप्। 'मो राजि समः क्वौ' (८. ३. २५) इति मकारस्य मकारोऽनुस्वारनिवृत्त्यर्थः ॥

अथ राजकम् ॥ ३ ॥

राजन्यकं च नृपतिक्षत्रियाणां गणे क्रमात्।

क्षीर० — राज्ञां समूहो राजकम्। राजन्यानां समूहो राजन्यकम्। 'गोत्रोक्षोष्ट्र—' (४. २. ३९) इति वुञ् ॥

टीका० — नृपतिसमूहे राजकं क्षत्रियसमूहे राजन्यकम्। 'गोत्रोक्षोष्ट्रोरभ्रराजराजन्य—' (४. २. ३९) इत्यादिनोभयत्र समूहे वुञ्। 'प्रकृत्याके राजन्यमनुष्ययुवान इति वक्तव्यम्' (वा० ६. ४. १६३) इति प्रकृतिभावाद् 'आपत्यस्य च तद्धितेऽनाति' (६. ४. १५१) इति राजन्यके यलोपो न भवति ॥

मन्त्री धीसचिवोऽमात्यः

क्षीर० —मन्त्रं कर्तव्यावधारणमस्त्यस्य मन्त्री । धिया सचति समन्वेति धीसचिवः । अमा सह समीपे वा भवोऽमात्यः । 'अव्ययात् त्यप्' (४. २. १०४) । सामवायिकोऽपि ॥

टीका० —मन्त्रित्रयं **मन्त्रिणि** । इतिकर्तव्यतावधारणं मन्त्रः, तद्योगादिनिः । मन्त्री । धीप्रधानः सचिवो धीसचिवः । 'सचिवः सहायोऽमात्य' इति दन्त्यादावजयः । अमाशब्दः सहार्थे निपातितः । मन्त्रेणामा सह भवतीत्यमात्यः । 'अव्ययात् त्यप्' (४. २. १०४) । अन्येष्वपि सचिवेष्वमात्यशब्दो वर्तते ॥

अन्ये कर्मसचिवास्ततः ॥ ४ ॥

क्षीर०—ततो मन्त्रिणोऽन्येऽमात्याः कर्मसहाया नियोग्याख्याः ॥

टीका० —धीसचिवादन्येऽक्षपटलादयः कर्मोपयुक्तत्वात् कर्मसचिवाख्याः ॥

महामात्राः प्रधानानि

क्षीर० —अमात्या इत्येव । महती मात्रा परिच्छद एषां महामात्राः । प्रदधाति प्रधानम्, आविष्टलिङ्गम् ॥

टीका० —नापकृष्टा न चोत्कृष्टा मध्यमाधिकरणव्यवस्थिता राजसहायाः सेनापतिगणस्थिरादयो महामात्राः ।

"महामात्रः प्रधाने स्यात् तथा हस्तिपकाधिपे"

इति धरणिः । महती मात्रा परिच्छेद एषामिति महामात्राः । अत एव प्रधानानि । रूपभेदात् क्लीबम् । 'महामात्रः प्रधानः स्याद्' इति पुंस्काण्डे वोपालितः ॥

---

१. 'ध्यः । सा' ख. पाठः. २. 'च्छे' अ. पाठः.

पुरोधास्तु पुरोहितः ।

क्षीर० — पुरो धीयते हिनोति वा पुरोहितः । सौवस्तिकोऽपि ॥

टीका० — पुरोधाद्वयं पुरोहिते । दृष्टादृष्टफलेषु कर्मसु पुरो धीयत इति पुरोधाः । पुरोहितश्च । 'पुरसि च' (उ० ४. २३२) इति धाञोऽसुन् । एवं पुरोधाः सान्तः । धाञः क्तः । 'दधातेर्हिः' (७. ४. ४२) । पुरोहितः ॥

द्रष्टरि व्यवहाराणां प्राड्विवाकाक्षदर्शकौ ॥ ५ ॥

क्षीर० — द्रष्टा निर्णेता । व्यवहारः ऋणादानादिन्यायः । यत् स्मृतिः —

"वि नानार्थेऽव सन्देहे हरणं हार उच्यते ।
नानासन्देहहरणाद् व्यवहारः प्रकीर्तितः" ॥

पृच्छतीति प्राट् । 'क्विब्वचि—' (उ० २. ६०) इति दीर्घोऽसम्प्रसारणं च । प्राट् चासौ विविधवाचकः प्राड्विवाकः । अक्षाण्यायमुखानि[1] रूपाण्यवपश्यत्यक्षदर्शकः । धर्माधिकरणिक[2] आक्षपटलिकश्च ॥

टीका० — व्यवहाराणामृणा[3]दानदायादीनां द्र[4]ष्टरि धर्माधिकरणिकादौ प्राड्विवाकद्वयम् । तदुक्तं —

"विवादानुगतं पृष्ट्वा पूर्ववाक्यं प्रयत्नतः ।
विचारयति येनादौ प्राड्विवाकस्ततः स्मृतः" ॥

पृच्छतीति प्राट् 'क्विब्वचिप्रच्छि—' (उ० २. ६०) इत्यादिना क्विब् दीर्घश्च । विवक्ती[5]ति विवाकः । बहुलवचनात् कर्तरि घञ् । विवक्ति तमिति वा विवाकः । कर्मणि घञ् । ततः कर्मधारयः । तुलादिपरीक्षायां यः कृतोपवासो व्याप्रियते, सोऽपि प्राड्विवाकः । अक्षान् व्यवहारान् पश्यतीत्यक्षदर्शकः । ण्वुल् ॥

---

१. 'नि द्रव्याणि वा प' ख. पाठः. २. 'अ' ग. घ. ङ. पाठः. ३. 'ण' ख. पाठः. ४. 'दि' ग. पाठः. ५. 'स्कमि' ङ. छ. पाठः.

प्रतीहारे द्वारपालद्वाःस्थद्वाःस्थितदर्शकाः ।

क्षीर० — प्रतिह्रियते वार्यतेऽनेन प्रतीहारः । द्वारि तिष्ठति द्वाःस्थः । द्वारि स्थितं दर्शयत्यावेदयति । द्वे संज्ञे इत्येके । द्वाःस्थित एव हि दर्शयति । द्वाःस्थोपस्थितदर्शका इत्येके पेठुः । दण्डी दौवारिको वेत्री उत्सारकश्च ॥

टीका० — प्रतीहारपञ्चकं प्रतीहारे । प्रतिराभिमुख्ये । राज्ञोऽभिमुखं जनान् हरति नयति प्रापयतीति प्रतीहारः । 'ज्वलितिकसन्तेभ्यो णः' (३. १. १४०) । 'अन्येषामपि — ' (६. ३. १३७) इति दीर्घः । दीर्घत्वं न भवतीत्यपरे । तथा च नाममाला —

"बुधकुलजावभिजातौ प्रतिहारौ द्वारपालकद्वारौ"

इति । द्वारं पालयतीत्यण् । द्वारपालः । द्वारि तिष्ठतीति द्वाःस्थः । 'सुपि स्थः' (३. २. ४) इति कः । द्वारि स्थितो द्वाःस्थितः । दर्शयति जनानिति दर्शकः । समस्त एवेत्यन्यः । क्वचिद् द्वाःस्थोपदर्शक इति पाठः ॥

रक्षिवर्गस्त्वनीकस्थः

क्षीर० — अङ्गरक्षिबृन्दम् । अनीके तिष्ठत्यनीकस्थः । 'राजशिक्षाविचक्षणा'विति शाश्वतः ॥

टीका० — रक्षिवर्गद्वयमङ्गरक्षे । अनीकेन बृन्देन तिष्ठतीत्यनीकस्थः ॥

अथाध्यक्षाधिकृतौ समौ ॥ ६ ॥

क्षीर० — अधिकृतोऽक्षेष्वायमुखेष्वध्यक्षः, अध्यक्ष्णोति वा । 'अक्षू व्याप्तौ' । अधिकान्यक्षाणीन्द्रियाण्यस्य वा । अधिक्रियत उपरि नियुज्यते[2] स्माधिकृतः[3] ॥

---

१. 'पयु', २. 'तेऽधि' ख. पाठः. ३. 'स्मादधि' ग. पाठः.

टीका० —सामान्येन यो यत्राधिकृतस्तत्राध्यक्षद्वयम् । 'अक्षू व्याप्तौ' । पचादिः । अध्यक्षः । करोतेः क्तः । अधिकृतः ॥

स्थायुकोऽधिकृतो ग्रामे

क्षीर० — तिष्ठति तच्छीलः स्थायुकः । 'लषपतपद —' (३. २. १५४) इत्युकञ् ॥

टीका० — एकग्रामाधिकृतः स्थायुकः । 'लषपत —' (३. २. १५४) इत्यादिनोकञ् । 'आतो युक् चिण्कृतोः' (७. ३. ३३) इति युक् । स्थायुकः ॥

गोपो ग्रामेषु भूरिषु ।

क्षीर० — अधिकृत इत्येव । गां भुवं पाति, गोपायति वा गोपः ॥

टीका० — बहुषु ग्रामेष्वधिकृतो गोपः । गां पातीति 'आतश्चोपसर्गे' (३. १. १३६) इति कः ॥

भौरिकः कनकाध्यक्षः

क्षीर० — भूरिणि हेम्नि नियुक्तो भौरिकः । हैरिक इति पाठे हिरण्ये नियुक्तः ॥

टीका० — सुवर्णाधिकृते भौरिकः । भूरि सुवर्णम् । तथा च धरणिः — 'भूरि प्राज्यसुवर्णयोः' इति । तत्राधिकृत इति ठक् ॥

रूप्याध्यक्षस्तु नैष्किकः ॥ ७ ॥

क्षीर० — रूपमाहतमस्य रूप्यं दीनारादिः । 'रूपादाहतप्रशंसयोर्यप्' (५. २. १२०) । निष्के दीनारादौ नियुक्तो नैष्किकः, टङ्कपतिः ॥

---

१. 'क् ॥ गो' ग. पाठः. २. 'र्गे कः' क. ख. पाठः.

टीका० — रूप्याधिकृते नैष्किकः। पूर्ववट्ठक् ॥

अन्तःपुरेष्वधिकृतः स्यादन्तर्वंशिको जनः।

क्षीर० — 'अन्तःपूर्वपदाट्ठञ्' (४.३.६०)। जनः कुब्जवामनादिसमुदायः ॥

टीका० — बृहदुपकारिकादावन्तःपुराधिकृते जनेऽन्तर्वंशिकः। 'अन्तःपूर्वपदाट्ठञ्' (४. ३. ६०)। संज्ञापूर्वकत्वान्न वृद्धिः ॥

सौविदल्लाः कञ्चुकिनः स्थापत्याः सौविदाश्च ते ॥ ८ ॥

क्षीर० — सुविदन्तं विवाहं जानन्तं लान्ति सुविदल्ला ऊढाः स्त्रियः, तत्र भवाः सौविदल्लाः। कञ्चुकं विनीतवेषार्थमस्त्येषाम्। स्त्रियो व्यवस्थायां स्थापयन्ति स्थापत्याः। यद्वा तिष्ठत्यस्मिन् वा स्थः। घञर्थे कः। स्थश्चासौ पतिश्चेति स्थपतिः, तत्र भवा इति 'दित्यदित्यादित्यपत्युत्तरपदाण्ण्यः' (४. १. ८५)। सुविदस्योद्वहत इमे सौविदाः ॥

टीका० — सौविदल्लचतुष्कं कञ्चुकिनि। सत्रयं दन्त्यम्। कञ्चुकं चोलस्तद्योगादिनिः। कञ्चुकी। स्थपतिः कञ्चुकी। स एव स्थापत्यः। स्वार्थे ष्यञ् ॥

शण्ढो वर्षवरस्तुल्यौ

क्षीर० — शाम्यति शण्ढः। अत एवान्तःपुरपालकः। वर्षं रेतःसेकं वृणोत्याच्छादयति वर्षवरः। 'वृष शक्तिप्रबन्धे' वा[3] ॥

टीका० — मुष्कशून्योऽन्यो वा स्त्रीस्वभावो महल्लकस्तत्र षण्डद्वयम्। तदुक्तं —

---

१. 'म्। कुतश्चित् स्त्रीव्य' ग. पाठः. २. 'रः शा', ३. 'वा ॥ तुल्याः द्वे' ख. पाठः.

द्विड्विपक्षाहितामित्रदस्युशात्रवशत्रवः ।
अभिमातिपरारातिप्रत्यर्थिपरिपन्थिनः ॥ १० ॥

क्षीर० — रेपयति रिपुः । 'रेपृ गतौ' । समानं पतत्येकार्थाभिनिवेशित्वात् सपत्नः । इयर्त्यरिः । द्वेष्टि द्विषन् । 'द्विषोऽमित्रे' (३. २. १३१) इति शता । द्वेष्टि तच्छीलो द्वेषणः । 'क्रुधमण्डार्थेभ्यश्च' (३. २. १५१) । युच् । दुष्टं हृदयमस्य दुर्हृत् । 'सुहृद्दुर्हृदौ मित्रामित्रयोः' (५. ४. १५०) इति साधुः । विरुद्धः पक्षो विपक्षः । अमत्यमित्रः । शातयति शत्रुः । 'प्रज्ञादिभ्यश्च' (५. ४. ३८) इति पक्षेऽण् । शात्रवः । अभिमन्यतेऽभिमातिः । प्रियते परः । 'पृङ् व्यायामे' । इयर्त्यरातिः । प्रतीपमर्थयते प्रत्यर्थी । परिपन्थयति परिपन्थी । 'छन्दसि परिपन्थिपरिपरिणौ पर्यवस्थातरि' (५. २. ८९) इति साधुः । प्रत्यवस्थाता प्रत्यनीकः परिपन्थकोऽपि ॥

टीका० — रिपूनविंशतिकं शत्रौ । रपत्यकीर्तिमिति रिपुः । 'रप लप व्यक्तायां वाचि' । 'रपेरिच्चोपधायाः' (उ० १. २६) इति कुः । वैरं विरोधः, तद्योगाद् वैरी इन्नन्तः । सपत्नशब्दोऽव्युत्पन्न इति केचित् । सपत्नीवत् सपत्नोऽपि । दुःख हेतुत्वात् । सपत्नीशब्दाद् इवार्थे 'व्यन् सपत्ने' (४. १. १४९) इति निपातनादकारप्रत्ययः । ईकारलोप इत्यपरः । अर्तेः 'अच इः' (उ० ४. १४०) । अरिः । 'द्विषोऽमित्रे' (३. २. १३१) इति शतृप्रत्ययः । द्विषन् । द्वेषणो नन्द्यादिल्युडन्तः । दुष्टं हृदयमस्येति दुर्हृत् । 'सुहृद्दुर्हृदौ मित्रामित्रयोः' (५. ४. १५०) इति निपातनाद् हृद्भावः । द्विड् मूर्धन्यषान्तः । 'सत्सूद्विष —' (३. २. ६१) इत्यादिना क्विप् । विरुद्धः पक्षोऽस्येति विपक्षः । न हितोऽहितः । 'अम गत्यादिषु' । 'अमेर्द्विषति चित्' (उ० ४. १७५) इति इत्रः । अमित्रः । ना । एकतकारश्च ।

"स्यातामित्रौ मित्रे च सहजप्राकृतावपि" (स० २. श्लो० ३६)

इति माघः । चौरे दस्युरुक्तः । शातयतीति शत्रुः । जन्वादिः । शत्रुरेव शात्रवः । प्रज्ञादिः । यातेः क्तिच् । अभियातिः । 'द्वेष्यभियातिरमित्रः' इति रत्नकोशोऽपि ।

---

१. 'मा' ग. पाठः.

अभिघा(ती)तिपाठे अभिमुखं हन्तीति आवश्यके णिनिः। 'पॄ पालनपूरणयोः'। 'ऋदोरप्' (३. ३. ५७)। परः। अर्तेर्बाहुलक आतिः, अरातिः। प्रतीपमर्थनं प्रत्यर्थः, तद्योगादिनिः, प्रत्यर्थी। 'छन्दसि परिपन्थिपरिपरिणौ पर्यवस्थातरि' (५. २. ८९) इति निपातनात् परिपन्थी नान्तः। छान्दसा अपि भाषायां प्रयुज्यन्ते॥

स्निग्धो वयस्यः सवयाः

क्षीर० — स्निह्यति। वयसा तुल्यो वयस्यः। 'नौवयोधर्म—' (४. ४. ९१) इति यत्। समानं वयोऽस्य सवयाः॥

टीका० — वयस्यत्रयं तुल्यवयसि। वयसा तुल्यो वयस्यः। 'नौवयोधर्म—' (४. ४. ९१) इत्यादिना यत्। स्निहेः क्तः। स्निग्धः। समानं वयोऽस्येति सवयाः। सान्तः। 'ज्योतिर्जनपद—' (६. ३. ८५) इत्यादिना सभावः॥

अथ मित्रं सखा सुहृत्।

क्षीर० — मेद्यति स्निह्यति मित्रम्। समानं ख्याति सखा। 'समाने ख्यश्च स चोदात्तः' (उ० ४. १३८) इतीन् डिच्च यलोपश्च॥

टीका० — मित्रत्रयं मित्रे। सूर्ये मित्रं उक्तः। स पुमान्। 'अयमाविष्टलिङ्गः। 'इदं मित्रमयं मित्र' इति वात्स्यायने। स्त्रियां मित्रेति पाठः। समानः ख्यातः सखा। 'ख्या प्रकथने'। 'समाने ख्यः स चोदात्तः' (उ० ४. १३८) इति डः, टिलोपः, समानस्य च सभावः। 'अनङ् सौ' (७. १. ९३) इत्यनङ्। दुर्हृद्वत् सुहृत्॥

सख्यं साप्तपदीनं स्याद्

क्षीर० — सख्युर्भावः सख्यम्। 'सख्युर्यः' (५. १. १२६)। सप्त पदानि क्रमात् सुप्तिङन्तानि व्याप्नोति साप्तपदीनम्। 'साप्तपदीनं सख्यम्'

---

१. 'त्रशब्द उ' ञ. पाठः. २. 'नवाप्तो' ग. घ. ङ. पाठः.

(५. २. २२) इति साधुः। तद्योगात् सखापि साप्तपदीनः। सौहृदं सौहार्दं मैत्री सौहृदय्यमजर्यं च ॥

टीका० — सख्यद्वयं मैत्र्याम्। सख्युर्भावः सख्यम्। 'सख्युर्यः' (५. १. १२६) इति यः। 'साप्तपदीनं सख्यम्' (५. २. २२) इति निपातनात् साप्तपदीनम् ॥

अनुरोधोऽनुवर्तनम् ॥ १२ ॥

क्षीर० — इच्छानुवर्तनमित्यर्थः। 'अनौ रुध कामे' ॥

टीका० — अनुरोधद्वयमानुकूल्ये। 'रुधिर् आवरणे'। 'वृतु वर्तने'। घञ्ल्युटौ ॥

यथार्हवर्णः प्रणिधिरपसर्पश्चरः स्पशः।
चारश्च गूढपुरुषश्च

क्षीर० — देशकालोचितो वर्ण आकारो जातिवर्णनं वास्य यथार्हवर्णः। प्रकर्षेण गुप्तो निधीयते परेषु प्रणिधिः। अपच्छन्नः सर्पत्यपसर्पः। चरति चरः चारश्च। ज्वलादित्वाण्णो वा। स्पशति बाधते परान् स्पशः ॥

टीका० — यथार्हवर्णसप्तकं चरे। वणिक्कृषीवलभिक्षुकादिरूपस्थायिनि चरे आद्यं नामद्वयमिति केचित्। वर्णः प्रकारः। यथा येन वर्णेन प्रकारेण परचक्रं ज्ञातुं शक्नोति तत्प्रकारवानित्यर्थः। निधिवत् प्रणिधिः। अपकृष्टं सर्पतीत्यपसर्पः। चरति जानाति परबलमिति चरः। अच्। 'स्पश बाधनस्पर्शनयोः'। पचाद्यच्। स्पशस्तालव्यान्तो रेफशून्यश्च। प्रज्ञाद्यणि चारः। गूढः पुरुषो गूढपुरुषः ॥

आप्तप्रत्ययितौ समौ ॥ १३ ॥

क्षीर० — आप्यते स्माप्तः अविसंवादिवाक्। प्रत्ययो[1] विश्वासः सञ्जातोऽत्र प्रत्ययितः ॥

---

१. 'य आशंसा सञ्जातास्य प्र' ग. पाठः.

टीका० — आप्तद्वयं सभ्ये। आप्नोतेः क्तः। आप्तः। तारकादित्वादितच्। प्रत्ययितः॥

सांवत्सरो ज्यौतिषिको दैवज्ञगणकावपि।
स्युर्मौहूर्तिकमौहूर्तज्ञानिकार्तान्तिका अपि॥ १४॥

क्षीर० — संवत्सरः कालोपलक्षणं[1], तद् वेद सांवत्सरः। 'तदधीते तद् वेद' (४. २. ५९) इत्यण्। ज्योतींषि ग्रहादीन् वेद ज्यौतिषिकः। 'क्रतूक्थादिसूत्रान्ताट्ठक्' (४. २. ६०)। दैवं पूर्वकृतं कर्म जानाति दैवज्ञः। मुहूर्तं वेद मौहूर्तिकः। क्रतूक्थादित्वाट्ठग् वा। कालादिज्ञानमस्यास्ति इति ज्ञानी। कृतान्तं वेद कार्तान्तिकः॥

टीका० — सांवत्सराष्टकं ज्यौतिषिके। 'तदधीते तद् वेद' (४. २. ५९) इत्यणि सांवत्सरः। ज्योतिरधिकृत्य कृतो ग्रन्थो ज्योतिषम्। 'अधिकृत्य कृते ग्रन्थे' (४. ३. ८७) इत्यण्। संज्ञापूर्वकत्वाद् वृद्ध्यभावः। ततः 'क्रतूक्थादिसूत्रान्ताट्ठक्' (४. २. ६०) इत्युक्थादित्वात् 'तदधीते तद् वेद' (४. २. ५९) इत्यर्थे ठक्। ज्यौतिषिकः। एवं मौहूर्तिकः। क्वचिदपवादविषयेऽप्युत्सर्गोऽभिनिविशते इति मौहूर्तः। सर्वज्ञवद् दैवज्ञः। गणयतीति गणकः। शुभाशुभज्ञानयोगाज् ज्ञानी। अत इनिः। कृतान्तो दैवं, ततः पूर्ववट्ठक्। कार्तान्तिकः॥

तान्त्रिको ज्ञातसिद्धान्तः

क्षीर० — तन्यते तन्त्र्यते वानेन तन्त्रं पारमेश्वरवैद्यकज्योतिषादि। तद् वेद तान्त्रिकः। सिद्धो निवारितविप्रतिपत्तिरन्तो निष्ठा अत्र सिद्धान्तः॥

टीका० — यस्यकस्यचिच्छास्त्रज्ञे[2] तान्त्रिकद्वयम्। 'तदधीते तद् वेद' (४. २. ५९) इत्यर्थे क्रतूक्थादिठकि तान्त्रिकः॥

---

१. 'णं, तं' ग. पाठः. २. 'रपद' ङ. छ. पाठः.

सत्री गृहपतिः समौ ।

क्षीर० — सीदन्त्यस्मिन् सत्रं गृहं सदा दानं च ॥

टीका० — सत्रिद्वयं दानपतौ । सदेरौणादिकः ष्ट्रन् । द्वितकारं दन्त्यादि च ।

"सत्रं यज्ञे सदा दाने छादनारण्ययोरपि"

इति धरणिः । तद्योगात् सत्री ॥

लिपिकरोऽक्षरचणोऽक्षरचुञ्चुश्च लेखके ॥ १५ ॥

क्षीर० — लिपिं करोति । 'दिवाविभा—' (३. २. २१)-इत्यादिना टः । अक्षरैर्वित्तोऽक्षरचणः, अक्षरचुञ्चुश्च । 'तेन वित्तश्चुञ्चुप्चणपौ' (५. २. २६) ॥

टीका० — लिपिकरचतुष्कं लेखके । दिवाकरवल्लिपिकरः । 'तेन वित्तश्चुञ्चुप्चणपौ' (५. २. २६) इति चणप्चुञ्चुब्भ्यामक्षरचणाक्षरचुञ्चू । लिखतेः ण्वुल् । लेखकः ॥

लिखिताक्षरविन्यासो लिपिर्लिबिरुभे स्त्रियौ ।

क्षीर० — अक्षरविन्यासे त्रयं वर्तते । लिख्यते स्म लिखितम् । लिप्यतेऽनया पत्रं लिपिः । जपादित्वात् पक्षे वत्वम् ॥

टीका० — पुस्तकादौ लिखितेऽक्षरसंस्थाने आरोपणे विन्यासे वा लिपिद्वयम् । लिखितमक्षरसंस्थानं च लिपेर्नामेति कृत्वा नामचतुष्टयमित्यन्ये । 'लिप उपदेहे' । किः । लिपिः । पृषोदरादिवत्वे लिबिः । ङीषि दीर्घान्ते च ॥

स्यात् सन्देशहरो दूतः

क्षीर० — सन्दिश्यते सन्देशो मुखस्वरूपम्। दूयतेऽनेन यथोक्त-वादित्वात् पर इति दूतः॥

टीका० — सन्देशहरद्वयं दूते। 'हरतेरनुद्यमनेऽच्' (३. २. ९)। सन्देशहरः। 'दुदु गतौ'। 'दुतनिभ्यां दीर्घश्च' (उ० २. ९०) इति क्तः, दीर्घश्च॥

दूत्यं तद्भावकर्मणोः॥ १६॥

क्षीर० — 'दूतवणिग्भ्यां च' (वा० ५. १. १२६) इति वक्तव्याद् यः॥

टीका० — दूतत्वे दूतकर्मणि च दूत्यम्। 'दूतवणिग्भ्यां चेति वक्तव्यम्' (वा० ५. १. १२६) इति यः। ब्राह्मणादेराकृतिगणत्वात् ष्यञि दौत्यमिति भाषावृत्तिः। 'दूत्यं तद्भागकर्मणी' इति पाठ इति केचित्। तत्र 'दूतस्य भागकर्मणी' (४. ४. १२०) इति यत्। भागेन चांशो वण्टक इति गृह्यते(?)॥

अध्वनीनोऽध्वगोऽध्वन्यः पान्थः पथिक इत्यपि।

क्षीर० — अध्वानं गच्छत्यध्वनीनः। 'अध्वनो यत्खौ' (५. २. १७)। 'आत्माध्वानौ खे' (६. ४. १६९) इति प्रकृतिभावः। पन्थानं गच्छति पथिकः। 'पथः ष्कन्' (५. १. ७५)। पन्थानं नित्यं गच्छति पान्थः। 'पन्थो ण नित्यम्' (५. १. ७६) इति णः पन्थादेशश्च। अदूरविप्रकर्षत्वादनयोः पर्यायत्वम्॥

टीका० — अध्वनीनपञ्चकं पथिके। 'अध्वनो यत्खौ' (५. २. १७)। अध्वनीनाध्वन्यौ। 'अन्तात्यन्त—' (३. २. ४८) इत्यादिना डः। अध्वगः। 'पन्थो ण नित्यम्' (५. १. ७६) इति णः पन्थादेशश्च। पान्थः। 'पथः ष्कन्' (५. १. ७५) इति ष्कन्। षकारो ङीषर्थः। पथिकः॥

स्वाम्यमात्यसुहृत्कोशराष्ट्रदुर्गबलानि च॥ १७॥
राज्याङ्गानि प्रकृतयः

---

१. 'चि' ख. पाठः. २. 'र्ण' च. पाठः.

क्षीर०—स्वं विद्यतेऽस्य स्वामी। 'स्वामिन्नैश्वर्ये' (५. २. १२६) इति साधुः। अमा सह समीपे वा भवोऽमात्यः। 'अमेहक्कतसित्रेभ्यस्त्यप्' (वा० ४. २. १०४)। कूयते मृग्यते कोशः। कुष्णातेः कोष इत्येके। राजते राष्ट्रम्। दुःखेन गम्यतेऽस्मिन् दुर्गम्। 'सुदुरोरधिकरणे च' (वा० ३. २. ४८) इति डः। बलन्त्यनेनेति बलम्। अङ्गान्यारम्भकाणि। प्रक्रियन्तेऽनया प्रकृतिः॥

पौराणां श्रेणयोऽपि च।

क्षीर०—एकमुख्यः सजातीयसमूहः श्रेणिः। प्रकृतयो राज्याङ्गानीत्येव। यत् कात्यः—

"अमात्याश्चापि पौराश्च सद्भिः प्रकृतयः स्मृताः"॥

टीका०—स्वाम्याद्याः सप्त राज्याङ्गान्युच्यन्ते। प्रकृतिवाच्याश्चैते। प्रकृतिशब्दस्तु पौरश्रेणिष्वपि वर्तते। तत्र स्वामी राजा, अमात्यो मन्त्री, सुहृन्मित्रं, सुवर्णादिमयो भाण्डागारः कोषः, जनपदवती भूमी राष्ट्रं, पर्वतोदकादिभिर्दुर्गमं पुरं दुर्गम्॥

सन्धिर्ना विग्रहो यानमासनं द्वैधमाश्रयः॥ १८॥
षड् गुणाः

क्षीर०—सन्धानमेकत्वं सन्धिः। विरुद्धं ग्रहणं स्वस्थानात्[3] परमण्डले दाहविलोपादि विग्रहः। यानं प्रयातव्यं प्रति यात्रा। आसनं विग्रहादिनिवृत्तिः। द्विप्रकारं द्वैधम्। 'द्वित्र्योश्च धमुञ्' (५. ३. ४५) एकेन सन्धायान्यत्र यात्रेत्यर्थः। यद्वा—

"बलिनोर्द्विषतोर्मध्ये वाचात्मानं समर्पयेत्।
द्वैधीभावेन वर्तेत काकाक्षिवदलक्षितः"॥

अशक्तया बलवदाश्रयणमाश्रयः। गुणा राज्योपकारकाः॥

---

१. 'द्विविधियोऽव्ययात्मकः। कू', २. 'मुह्यते' ख. पाठः. ३. 'संस्था' घ., 'स्वात् स्था' क. पाठः.

टीका० — सन्ध्यादिशब्दे गुणशब्दः । तत्रोपहार[1]लक्षणः पणबन्धः सन्धिः । धाञः 'उपसर्गे घोः किः' (३. ३. ९२) । अपहार[2]लक्षणो विग्रहः । ग्रहेः दरवदप् । स्वशक्त्युपचये परस्य व्यसने वा परजिगीषया प्रयाणं यानम् । यातेर्ल्युट् । देशकालाद्यपेक्षया युद्धाभावादुपसंहृतप्रयाणस्य स्थितिरासनम् । आसेर्ल्युट् । बलिनोर्द्विषतोर्मध्ये काकाक्षिवदलक्षितस्योभयत्र वचनेनात्मसमर्पणं द्वैधम् । 'द्वित्र्योश्च धमुञ्' (५. ३. ४५) । तदुक्तं —

"बलिनोर्द्विषतोर्मध्ये वाचात्मानं समर्पयेत् ।
द्वैधीभावेन वर्तेत काकाक्षिवदलक्षितः" ॥

रिपुणोच्छिद्यमानस्य यद्धर्मविजयिबलवदाश्रयणं स आश्रयः । श्रयतेः 'एरच्' (३. ३. ५६) । तदुक्तं —

"यदा परब(ला ? लेना)नुगमनीयतमो भवेत् ।
तदा तु संश्रयेत् क्षिप्रं धार्मिकं बलिनं नृपम्" ॥

शक्तयस्तिस्रः प्रभावोत्साहमन्त्रजाः ।

क्षीर० — **शक्यन्ते जेतुमाभिः शक्तयः । कोशदण्डर्द्धिः प्रभुशक्तिः । उद्यम्य सहनमुत्साहशक्तिः । मन्त्रः पञ्चाङ्गो मन्त्रशक्तिः ॥**

टीका० — तिस्रः शक्तयः प्रभावशक्तिरुत्साहशक्तिर्मन्त्रशक्तिश्चेति । तत्र कोशदण्डबलं प्रभुशक्तिः । बलवती विक्रमचेष्टा उत्साहशक्तिः । सन्ध्यादीनां यथावत्प्रयु(क्त ? क्ति)ज्ञानबलं मन्त्रशक्तिः ॥

क्षयः स्थानं च वृद्धिश्च त्रिवर्गो नीतिवेदिनाम् ॥ १९ ॥

क्षीर० — **प्रागवस्थातः शक्तिसिद्ध्योरपचयः क्षयः । साम्यं स्थानम् । उपचयो वृद्धिः । नीतेरन्यत्र धर्मादिस्त्रिवर्गः ॥**

टीका० — क्षयत्रयं त्रिवर्गवाच्यम् । अयं नीतिवेदिनां त्रिवर्गः,

---

१., २. 'का' क. ग. ङ. च. छ. पाठः.

धर्मार्थकामैरितरेषाम्। आत्मनोऽपचयः शत्रुकर्मोपचयनिमित्तकः क्षयः। तद्विपर्ययो वृद्धिः। उभयोः साम्यं स्थानम्। तदुक्तं —

"परकर्मोदये नेतुः क्षयो वृद्धिर्विपर्यये।
तुल्यकर्मफले स्थानं कर्मसु ज्ञेयमात्मनः ॥"

इति। एते च क्षयादयोऽष्टवर्गस्यापचयोपचयसाम्याद् भवन्ति।

"कृषिर्वणिक्पथो दुर्गं सेतुः कुञ्जरबन्धनम्।
खन्याकरब(ला)दानं (च?) शून्यानां च निवेशनम् ॥"

इत्येवाष्टवर्गः ॥

स प्रतापः प्रभावश्च यत् तेजो दण्डकोशजम्।

क्षीर०—प्रतपत्यनेन प्रतापः। प्रभवत्यनेन प्रभावः। तेज उत्कटत्वम्। यद् भरतः—

**"अधिक्षेपावमानादेः प्रयुक्तस्य परेण यत्।
प्राणात्ययेऽप्यसहनं तत् तेजः समुदाहृतम्" ॥**

टीका०—दमो दण्डः। तात्स्थ्याद् बलमपि। ततो जातं कोशाच्च यत् तेजस्तत्र प्रतापद्वयम्। तपेः घञ्। प्रतापः। 'श्रिणीभुवोऽनुपसर्गे' (३. ३. २४) इति घञ्। भावः। ततः प्रकृष्टो भावः प्रभावः। प्रादिसमासः ॥

सामदाने भेददण्डावित्युपायचतुष्टयम् ॥ २० ॥

क्षीर० — उपैत्यनेनोपायः। मायोपेक्षेन्द्रजालान्यत्रैवान्तर्भूतानि ॥

टीका० — (भेद? साम)चतुष्कमुपायाख्यम्। यद्यपि

"साम दानं च भेदश्च दण्डश्चेति चतुष्टयम्।
मायोपेक्षेन्द्रजालं च सप्तोपायाः प्रकीर्तिताः ॥"

---

१. 'द' ख. पाठः.

इति । तथापि मायोपेक्षे दण्डान्तर्गते । इन्द्रजालं च भेदेऽन्तर्गतम् । तेनापरत्रयं पृथङ् न कृतम् । तत्र परस्माद् विश्लेषणं भेदः । दण्डः पीडा । साम अनुकूलनम् । दानमुपहारः ॥

साहसं तु दमो दण्डः

क्षीर० — सहसि बले भवं साहसम् ॥

टीका० — नाममात्रेणोक्तानां प्रत्येकं पर्यायमाह । साहसत्रयं दण्डे । सहसा बलेन निर्वृत्तं साहसम् । 'तेन निर्वृत्तम्' (४. २. ६८) इत्यण् । दमनं दमः । 'दम उपशमे' । ण्यन्ताद् घञ् । 'णेरनिटि' (६. ४. ५१) इति णिलोपः । 'मितां ह्रस्वः' (६. ४. ९२) । अस्मादेव धातोः 'जमन्ताड्डः' (उ० १. ११९) । दण्डः ॥

साम सान्त्वम्

क्षीर० — स्यति वैरं सामयति वा साम प्रियवचनादि[1] । 'साम सान्त्वने' । 'सान्त्व सामप्रयोगे' ॥

टीका० — सामद्वयं सामनि । वेदे सामोक्तम् । अत्यर्थमधुरे सान्त्वम् ॥

अथो समौ ।

भेदोपजापौ

क्षीर० — संहतयोर्भेदनं भेदः । उपांशु जपनमुपजापः ॥

टीका० — भेदद्वयं भेदे । भिदेर्जपेश्च घञ् । दानं च ब्रह्मवर्ग एवाभिहितम् । तेनात्र नोक्तम् ॥

उपधा धर्माद्यैर्यत् परीक्षणम् ॥ २१ ॥

क्षीर० — उपधीयते समीपे ढौक्यते परीक्षार्थमुपधा । धर्मार्थका-

---

१. 'नि' ग. घ. ङ. पाठः.

मभयोपन्यासेनाशयान्वेषणम् । यत् कौटिल्यः — 'उपधाभिः शौचाचारपरिज्ञानममात्यानाम्' (अधि० १. अध्या० १०) ॥

टीका० — धर्माद्यैर्धर्मार्थकामभेदै राज्ञोऽमात्यानां परीक्षणमुपधा। अन्तर्धावत् ॥

पञ्च त्रिषु

क्षीर० — निश्शलाकान्ता वक्ष्यमाणा वाच्यलिङ्गाः ॥

टीका० — निश्शलाकान्ताः पञ्च त्रिषु ॥

अषडक्षीणो यस्तृतीयाद्यगोचरः ।

क्षीर० — न षडक्षीणि यत्र अषडक्षीणो मन्त्रः । 'अषडक्षाशितङ्गु—' (५. ४. ७) इति स्वार्थे खः । यदाहुः — 'षट्कर्णो भिद्यते मन्त्रः' । अत एव तृतीयादीनां नृणामगोचरः ॥

टीका० — द्वाभ्यां यो मन्त्रः असावषडक्षीणः । नास्मिन् षडक्षीणि विद्यन्त इत्यषडक्षीणः । 'बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात् —' (५. ४. ११३) इति षच् समासान्तः । ततः 'अषडक्षाशितंग्वलंकर्मालंपुरुषाध्युत्तरपदात् खः' (५. ४. ७) ॥

विविक्तविजनच्छन्ननिश्शलाकास्तथा रहः ॥ २२ ॥
रहश्चोपांशु चालिङ्गे

क्षीर० — विविच्यते पृथक्क्रियते स्म विविक्तम् । विगतो जनोऽत्र विजनम् । छाद्यते स्म छन्नम् । निर्गता शलाका व्यथकोऽत्र निश्शलाकः । रहयति रह इत्येके । रहश्शब्दः सान्तः क्लीबे । अन्योऽव्ययम् , उपांशु च । अलिङ्गे अव्यये द्वे । अनुरहसं च ॥

टीका० — विविक्तसप्तकं विजने । 'विचिर् पृथग्भावे' । क्तः । 'विविक्तं त्रिष्वि'ति रुद्रः । विगतो जनोऽस्मादिति विजनः । 'वा दान्तशान्तपूर्णदस्त-

स्पष्टच्छन्नज्ञप्ताः' (७. २. २७) इति निपातनाच्छन्नः। निर्गता शलाका अस्मादिति निश्शलाकः। शलाका शारिका, मदनशारिकेति पर्यायाः।

"शल्यं श्वाविच्छलाका स्याच्छारा मदनशारिका"

इति तालव्यादौ रभसः। रमन्तेऽत्रेति रहः। 'देशे ह च' (उ० ४. २१६) इत्यसुन् हश्चान्तादेशः। रहः। सान्तं क्लीबे। द्वितीयो रह उपांशुशब्दश्चालिङ्गे अव्यये॥

रहस्यं तद्भवे त्रिषु।

क्षीर०—रहसि भवं रहस्यम्। दिगादित्वाद् यत्॥

टीका०—रहोभवं रहस्यम्। दिगादियत्॥

समौ विस्रम्भविश्वासौ

०—विस्रम्भणं विस्रम्भः। विश्वास आश्वासः॥

०—विस्रम्भद्वयं **विश्वासे**। 'स्रन्भु विश्वासे'। दन्त्यादिः। घञ्। विस्रम्भः। 'श्वस प्राणने'। घञ्। विश्वासः॥

भ्रेषो भ्रंशो यथोचितात्॥ २३॥

क्षीर०—यथोचिताद् रूपाद् भ्रंशोऽधःपातो भ्रेषः। 'भ्रेष चलने'॥

टीका०—यथोचिताद् **यथाप्राप्ताद् भ्रंशो** भ्रेषः। मूर्धन्यषः। 'भ्रेषृ चलने'। घञ्॥

अभ्रेषन्यायकल्पास्तु देशरूपं समञ्जसम्।

क्षीर०—नियतमीयते न्यायः। 'परिन्योर्नीणोः—' (३. ३. ३७) इति घञ्। कल्पनं कल्पः सामर्थ्यम्। दिश्यमानस्योचितस्य रूपं देशरूपम्। प्रशस्तं देशनं[1] वा। सम्यगञ्जसा सत्यमत्र समञ्जसम्॥

टीका०—अभ्रेषपञ्चकं **न्याये**। नञा अभ्रेषः। 'परिन्योर्नीणोर्द्यूताभ्रेषयोः' (३. ३. ३७) इति घञ्। न्यायः। प्रलये कल्प उक्तः। सङ्गतमञ्ज-

1. 'शिदर्शनं' ग. घ. पाठः.

न्तत्त्वं समञ्जसम्। 'अच् प्रत्यन्ववपूर्वात् सामलोम्नः' (५. ४. ७५) इत्यत्र अजिति योगविभागादच् ॥

युक्तमौपयिकं लभ्यं भजमानाभिनीतवत् ॥ २४ ॥
न्याय्यं च त्रिषु षट्

क्षीर० — उपाय एवौपयिकम्। विनयादित्वाद् 'उपायाद्ध्रस्वश्च' (ग० ५. ४. ३४) इति ठक्। अभिनीयते स्माभिनीतम्। तद्वन्न्याय्यं न्यायादनपेतम्। 'धर्मपथ्यर्थ—' (४. ४. ९२) इति यत्। उचितं साम्प्रतं च ॥

टीका० — युक्तषट्कं न्याय्ये। औचित्य इति यावत्। युजेः क्तः। युक्तम्। औपयिकमिति। विनयादिषु 'उपायाद्ध्रस्वश्च' (ग० ५. ४. ३४) इति ठग्घ्रस्वत्वे। स्वार्थे 'पोरदुपधात्' (३. १. ९८) इति यति लभ्यम्। भजेः शानचि भजमानम्। नयतेः क्तः। अभिनीतम्। न्यायादनपेतमिति न्याय्यम्। यथा भजमानाभिनीते युक्ताभिधायके तथा न्याय्यमपीति वच्छब्दस्यार्थः। युक्तषट्कं त्रिषु। न्यायागते द्रव्यादौ युक्तषट्कम्, अभ्रेषपञ्चकं च न्याय्य इति केचित्[१] ॥

सम्प्रधारणा तु समर्थना।

क्षीर० — सम्प्रधार्यते भ्रष्टं स्वरूपमापद्यतेऽनयेति सम्प्रधारणा, युक्तायुक्तपरीक्षा ॥

टीका० — सम्प्रधारणद्वयं समर्थने। निर्धारणे इत्यर्थः ॥

अपवादस्तु निर्देशो निदेशः शासनं च तत् ॥ २५ ॥
शिष्टिराज्ञा च

क्षीर० — अपनम्य वदनमपवाद मुखस्वरूपम्। निश्शेषेण देशनं निर्देशः। शासनं नियोजनं शिष्टिः। आज्ञापनमाज्ञा ॥

टीका० — अपवादषट्कमाज्ञायाम्। अपवदनमपवादः। घञ्। दिशेर्घञि निर्देशनिदेशौ। शासेर्ल्युटि शासनम्। शिषेः क्तिन्। शिष्टिः। 'आतश्चोपसर्गे' (३. ३. १०६) इत्यङ्। आज्ञा ॥

---

१. 'कं न्या' ग. घ. पाठः.

संस्था तु मर्यादा धारणा स्थितिः ।

क्षीर० — सन्तिष्ठतेऽनया संस्था । मर्या इति सीमार्थेऽव्ययं, तत्र दीयते मर्यादा ॥

टीका० — संस्थाचतुष्कं **मर्यादायाम्** । न्यायपथस्थितावित्यर्थः । आज्ञावत् संस्था । पर्याङ्पूर्वाद् दाञो मर्यादा । नैरुक्तो वर्णविपर्ययः । धारेः 'ण्यासश्रन्थो युच्' (३. ३. १०७) । धारणा । तिष्ठतेः क्तिन् । स्थितिः ॥

आगोऽपराधो मन्तुश्च

क्षीर० —आ अगति कुटिलं गच्छत्यागः, असन्तः क्लीबे । मन्यते हृदि मन्तुः ॥

टीका० — आगस्त्रयमपराधे । 'इण आगोऽपराधे' (उ० ४. २१३) इत्यनेन इणोऽसुन् आगादेशश्च । 'अभ्यर्णमागस्कृतमस्पृशद्भिः' (स० २. श्लो० ३२) इति रघुः । अपराधनमपराधः । जन्तुवन्मन्तुः ॥

समे तूद्दानबन्धने ॥ २६ ॥

क्षीर० — उद्दीयतेऽस्मिन् उद्दानम् । 'दो अवखण्डने' 'देङ् रक्षणे' वा ॥

टीका०— उद्दानद्वयं बन्धने । 'दो अवखण्डने' । भावे ल्युट् । उद्दानम् । 'बन्ध बन्धने' । ल्युट् । बन्धनम् ॥

द्विपाद्यो द्विगुणो दण्डः

क्षीर० — द्वौ पादौ प्रमाणमस्य द्विपाद्यः । 'पणपादमाषशताद् यत्' (५. १. ३४) । प्राण्यङ्गत्वाभावात् 'पद्यत्यतदर्थे' (६. ३. ५३) इति पद्भावाभावः ॥

टीका० — यथोचिताद् द्विगुणो दण्डो द्विपाद्याख्यः । यथा धान्य-

षड्भागहरणे प्राप्ते[1] द्विभागहरणम्। द्वौ पादौ परिमाणमस्येति 'पणपादमाषश-ताद् यत्' (५. १. ३४)। 'पादः पद्' (६. ४. १३०) इति प्राण्यङ्गग्रहणाद[2]त्र न पद्भावः॥

भागधेयः करो बलिः।

क्षीर०— भाग एव भागधेयः। 'भागरूपनामभ्यो[3] धेयः' (वा० ५. ४. ३६)। कीर्यते प्रत्येकं करः। बलन्तेऽनेन बलिः। 'राजग्राह्यः षड्भागादिः भागः। प्रत्येकं स्थावरजङ्गमादादेयः करः। नियोज्योपजीव्यो बलि'रित्यवान्तरभेदोऽर्थशास्त्रोक्तो नाश्रितः॥

टीका०— राजदेये करे भागधेयत्रयम्। प्राग् व्युत्पादितम्॥

घट्टादिदेयं शुल्कोऽस्त्री

क्षीर०— घट्टन्तेऽनेन घट्टयति वा घट्टो नदीतरणस्थानम्। आदिशब्दाद् गुल्मप्रतोल्यादौ प्रावेश्यनैष्क्रम्यद्रव्येभ्यो राजग्राह्यो भागः शुल्कः, शलति शलयति वा सुखेन यात्यनेनेति॥

टीका०— घट्टो वर्त्म। आदिना गुल्मादि। तत्र रक्षार्थं राजदेये शु-ल्कोऽस्त्री, तालव्यादिश्च॥

प्राभृतं तु प्रदेशनम्॥२७॥

उपायनमुपग्राह्यमुपहारस्तथोपदा।

क्षीर०— प्रकर्षेणाराधनार्थमाभ्रियते ढौक्यते स्म प्राभृतम्। प्रदिश्यते प्रदीयते प्रदेशनम्। उप समीप[4]मयन्तेऽनेनोपायनम्[5]। उपगृह्यते उपग्राह्यम्। उपह्रियते उपहारः। उपदीयते उपदा। कौशलिकं ढौक-निकं च। उपदोत्कोच इत्येके।

"उपप्रदानमुत्कोच उपदा लञ्च[6]या समाः"॥

---

१. 'प्तऽपि द्वि' ङ. छ. पाठः. २. 'दन्यत्र' ख. ङ. छ. पाठः. ३. 'भ्यः स्वार्थे घे', ४. 'व' ख. पाठः. ५. 'पे अय' ग. पाठः, ६. 'म्ब' ख. ङ. पाठः.

टीका० — प्राभृतद्वयं पाहुड इति ख्याते। भृञः क्तः । प्राभृतम्। उपायनचतुष्कमुत्कोचादावुपहारे । एतेः ल्युट् । उपायनम् । ग्रहेर्ण्यति उपग्राह्यम् । हारवदुपहारः । अङि उपदा । षडेव केचिदुपहारे वर्णयन्ति ॥

यौतकादि तु यद् देयं सुदायो हरणं च तत् ॥ २८ ॥

क्षीर० — युतयोर्वधूवरयोरिदं यौतकम्[1] । आदिशब्दाद् बन्धुदत्तादि । सुष्ठु दीयते सुदायः । स दाय इत्येके । यच्छाश्वतः —

"यौतकादिधनं दायो दायो दानं च कथ्यते" ।

ह्रियते हरणम् ॥

टीका० — कन्यादानकाले जामात्रे दानं यौतकं, तत्र दायद्वयम् । युतकं योनिसम्बन्धः, तत्र भवं यौतकम्। अन्तःस्थादिः। आदिना व्रतभिक्षादिः । ददातेः घञ्। दायः । हरतेः ल्युट् । हरणम् ॥

तत्कालस्तु तदात्वं स्यात्

क्षीर० — स चासौ कालश्च तत्कालः । तदेत्यस्य भावस्तदात्वम् ॥

टीका० — तत्कालद्वयं वर्तमाने काले ॥

स्यायतिः काल उत्तरः ।

क्षीर० — आ एत्यायतिरागामिकालः ॥

टीका० — भाविनि काले आयतिः ॥

सान्दृष्टिकं फलं सद्यः

क्षीर० — सन्दृष्टं प्रत्यक्षं प्रयोजनमस्य सान्दृष्टिकम् । समानेऽहनि सद्यस्तात्कालिकं फलम् । 'सद्यःपरुत्परारि —' (५. ३. २२) इति साधुः ॥

---

१. 'के । ह्रि' क. ख. पाठः.   २. 'णम् । यल्लक्ष्यं — सत्त्वानुरूपं हरणीकृतश्रीः । तत्का' ख. पाठः.

टीका० — सद्य इति तात्कालिकं फलं सान्दृष्टिकम् । अध्यात्मादित्वाट्ठञ् ॥

उदर्कः फलमुत्तरम् ॥ २९ ॥

क्षीर० — उदृच्यतेऽभिलाषात् स्तूयते उदर्कः ॥

टीका० — भावि फलमुदर्कः । अर्कवत् ॥

अदृष्टं वह्नितोयादि

क्षीर० — भयमित्युत्तरेण योज्यम् । आदिशब्दात् पिशाचाशन्यादि ॥

टीका० — वक्ष्यमाणेन भय(सम्बन्धे?शब्दे)न सम्बन्धाद् वह्नितोयाद्यदृष्टं[1] भयमुच्यते, दैवजनितत्वात् । आदिना वृष्टिशलभमूषिकादि । भयहेतुत्वाद् भयम् ॥

दृष्टं स्वपरचक्रजम् ।

क्षीर० — स्वराष्ट्राच्चौरा[2]टविकादिभयं परराष्ट्राद् दाहविलोपादिभयं च ॥

महीभुजामहिभयं स्वपक्षप्रभवं भयम् ॥ ३० ॥

क्षीर० — स्वपक्षाद् राजपुत्रादेरहेरिव गृहस्थिताद् भयम् ॥

टीका० — स्वपक्ष[3]मात्रप्रभवं यद् राज्ञां युद्धे भयं, तदहेरिव भयमहिभयम् । पक्षशब्देन भृत्यादयः सप्त गृह्यन्ते । तथाहि —

"निजोऽथ मैत्रश्च समाश्रितश्च सम्बन्धजः कार्यसमुद्भवश्च ।
भृत्यो गृहीतो विविधोपचारैः पक्षं बुधाः सप्तविधं वदन्ति[4]" ॥

प्रक्रिया त्वधिकारः स्यात्

---

१. 'ष्ट' क. ख. ग. ङ. छ. पाठः. २. 'चो', ३. 'क्षजाद् य' ख. पाठः. ४. 'भजन्ति' ङ. छ. पाठः.

क्षीर० —प्रारम्भात् करणं प्रक्रिया। अधिक्रियते प्रस्तयतेऽधिकारः, व्यवस्थास्थापनमित्यर्थः ॥

टीका० — नृपादीनां चामरोद्धू(लीन)नादिप्रतिपत्तौ प्रक्रियाद्वयम्। 'कृञः श—' (३. ३. १००) इति शः। 'रिङ् शयग्लिङ्क्षु' (७. ४. २८) इति रिङ्। 'अचि श्नुधातु —' (६. ४. ७७) इत्यादिना इयङ्। प्रक्रिया॥

चामरं तु प्रकीर्णकम्।

क्षीर० —चमर्या इदं चामरम्। प्रकीर्यते विक्षिप्यते प्रकीर्णकम्॥

टीका० — चामरद्वयं चामरे। चमरो मृगः, तस्यायमिति चामरः। 'कॄ विक्षेपे'। कर्मणि क्तः। ततः स्वार्थे कन्। प्रकीर्णकम्॥

नृपासनं यत् तद् भद्रासनं

क्षीर० — भद्रस्यासनं, भद्रं रूप्यादिमयं वा आसनं भद्रासनम्॥

टीका० — नृपासनद्वयं नृपासनसामान्ये॥

सिंहासनं तु तत् ॥ ३१ ॥

हैमं

क्षीर० — हेम्न इदं हैमं सिंहोपलक्षितमासनम्॥

टीका० —तदेवासनं सौवर्णं सिंहासनाख्यम्॥

छत्रं त्वातपत्रं

क्षीर० — छाद्यतेऽनेन छत्रम्। आतपात् त्रायत आतपत्रम्॥

टीका० — छत्रद्वयं छत्रे। छादेः ष्ट्रन्। छद्मवद् ह्रस्वत्वम्। आतपात् त्रायत इत्यातपत्रम्॥

---

१. 'च' ख. च. पाठः.

राज्ञस्तु नृपलक्ष्म तत् ।

क्षीर० — तत् छत्रम् । यल्लक्ष्यं —

"नृपतिककुदं दत्त्वा यूने सितातपवारणम्" ॥

टीका० — राज्ञश्छत्रं कनकदण्डं नृपलक्ष्म । नान्तम् ॥

भद्रकुम्भः पूर्णकुम्भः

क्षीर० — भद्रार्थं भद्रार्थो वा कुम्भः ॥

टीका० — भद्रकुम्भद्वयं पूर्णकुम्भे ॥

भृङ्गारः कनकालुका ॥ ३२ ॥

क्षीर० — भृज्यते भ्रियते वा भृङ्गारः । सौवर्णी आलुका ॥

टीका० — भृङ्गारद्वयं कनकघटादौ । कनकस्यालुका कर्करी कनकालुका ॥

निवेशः शिबिरं षण्डे

क्षीर० — निवेश्यते सन्निवेशेन स्थाप्यते निवेशः सैन्यावासः । शेरतेऽस्मिञ्छिबिरम् । स्कन्धावारोऽपि ॥

टीका० — आगन्तुकसैन्यस्य[1] वाटके कटके वा निवेशद्वयम् । विशेर्घञ् । निवेशः । 'अजिरशिशिरशिबिर —' (उ० १. ५६) इत्यादिना शेतेर्निपातनाच्छिबिरम् । अनेकार्थत्वादन्तःपुरे[2]ऽपि ॥

सज्जनं तूपरक्षणम् ।

क्षीर० — सत् शोभनं जन्यते सज्जनं, सज्ज्यतेऽनेनेति वा । उपरक्ष्यतेऽनेनोपरक्षणं सैन्यस्य प्रगुणीकरणं गुल्मको वा ॥

---

१. 'स्या' अ., 'स्य दाठके' ख. पाठः. २. 'रेऽपि ख. पाठः.

टीका०—बलैकदेशेन यद् बलस्य रक्षणं तत्र सज्जनद्वयम्। 'ग्लुञ्चुषस्ज गतौ'। ल्युट्। जश्त्वचुत्वे। सज्जनम्॥

हस्त्यश्वरथपादातं सेनाङ्गं स्याच्चतुर्विधम्॥ ३३॥

क्षीर०—चतुरङ्गा हि सेना। पदातीनां समूहः पादातम्। भिक्षादित्वादण्॥

टीका०—हस्त्यश्वादिचतुष्कं सेनाङ्गम्। 'द्वन्द्वश्च प्राणितूर्यसेनाङ्गानाम्' (२. ४. २) इति समासे एकवचनम्। पदातिसमूहे पादातम्। समूहेऽण्॥

दन्ती दन्तावलो हस्ती द्विरदोऽनेकपो द्विपः।
मतङ्गजो गजो नागः कुञ्जरो वारणः करी॥ ३४॥
इभः स्तम्बेरमः पद्मी

क्षीर०—दन्तौ[1] स्तोऽस्य दन्ती। दन्तावलः। 'दन्तशिखात् संज्ञायाम्'(५. २. ११३)। वलच्। 'वले' (६. ३. ११८) इति दीर्घः। हस्ती। 'हस्ताज्जातौ' (५. २. १३३) इतीनिः। द्वौ रदावस्य द्विरदः। न एकेन पिबत्यनेकपः। द्वाभ्यां पिबति द्विपः। मतङ्गाद्दृषेर्जातो मतङ्गजः। गजति माद्यति गजः। नगे भवो नागः। न अगो वा। कुञ्जौ कुम्भाधोगतौ दंष्ट्रे वा स्तोऽस्य कुञ्जरः। 'खमुखकुञ्जेभ्यो रो वक्तव्यः' (वा० ५.२.१०७)। वारयत्यरीन् वारणः। एतीभः। स्तम्बे तृणे रमते स्तम्बेरमः। 'स्तम्बकर्णयो रमिजपोः' (३. २. १३)। अच्। पद्मानि यौवने रक्ता बिन्दवः सन्त्यस्य पद्मी। सामजः सिन्धुरः कुम्भी च॥

टीका०—दन्तिपञ्चदशकं हस्तिनि। दन्तयोगाद् दन्ती। 'दन्तशिखात् संज्ञायाम्' (५. २. ११३) इति वलच्। 'वले' (६. ३. ११८) इति दीर्घः। दन्तावलः। हस्तीति। 'हस्ताज्जातौ' (५. २. १३३) इतीनिः। दन्तद्वययोगाद् द्विरदः। करेणास्येन च पिबतीत्यनेकपः। अत एव द्विपः। 'सुपि' (३. २. ४) इति योगविभागात् कः। मतङ्गा[2]दृषेर्जातो मतङ्गजः। गजतीति

१. 'दन्तोऽस्यास्ति द' ग. घ. ङ. पाठः. २. 'ङ्गर्षेर्जा' ख. ङ. छ. पाठः.

गजः । अच् । नग इव दृश्यत इति नागः । शेषेऽण् । कुञ्जौ हनू, तद्योगात् कुञ्जरः । 'खमुखकुञ्जेभ्य उपसङ्ख्यानम्'•(वा० ५. २. १०७) इति रः । परबलं वारयतीति वारणः । नन्द्यादिः । करयोगाद् इनौ करी । 'इणः कित्' (उ० ३. १५४) इति भन् । इभः । 'स्तम्बकर्णयो रमिजपोः' (३. २. १३) इति अच् । स्तम्बेरमः । पद्मं बिन्दुजालकं, तद्योगाद् इनिः । पद्मी ॥

यूथनाथस्तु यूथपः ।

क्षीर० — इतोऽश्वेभ्यः प्राग् गजवर्गः ॥

टीका० — यूथनाथद्वयं यूथाधिपतौ करिणि ॥

मदोत्कटो मदकलः

क्षीर० — मदेन दानाम्बुना कलो मनोज्ञः ॥

टीका० — अन्तर्मदे हस्तिनि मदोत्कटद्वयम् ॥

कलभः करिपोतकः ॥ ३५ ॥

क्षीर० — कलो भाति, कं लभते वा कलभः ॥

टीका० — कलभद्वयं करिपोते । § 'शृशलिकलिभ्योऽभच्' (उ० ३. १२२) ॥

प्रभिन्नो गर्जितो मत्तः

क्षीर० — प्रभिद्यते स्म प्रभिन्नः । गर्जा सञ्जातास्य गर्जितः ॥

टीका० — प्रभिन्नत्रयं मत्तहस्तिनि । भिदिगर्जिमदिभ्यः क्तः । प्रन्नः ॥

---

१. 'न्नः । इतश्चि गर्जि' ख. पाठः.

---

§ 'कृशलिकलिगर्दिभ्योऽभच्' इति मुद्रितोणादिपाठः ।

समावुद्वान्तनिर्मदौ ।

क्षीर० — उद्वमति स्मोद्वान्तः [1]॥

टीका० — कालवशान्निगलितमदे उद्वान्तद्वयम् । 'टुवम उद्गिरणे' । क्तः । 'अनुनासिकस्य —' (६. ४. १५) इत्यादिना दीर्घः । उद्वान्तः ॥

राजवाह्यस्त्वौपवाह्यः

क्षीर० — उपवाह्याः समन्ताद् वोढव्याः सन्त्यस्यौपवाह्यः ॥

सन्नाह्यः समरोचितः ॥ ३६ ॥

क्षीर० — सन्नद्धं कर्तुमर्हति । समराय योग्यत्वात् ॥

हास्तिकं गजता वृन्दे

क्षीर० — हस्तिनां समूहो हास्तिकम् । 'अचित्तहस्तिधेनोष्ठक्' (४. २. ४७) । गजानां समूहो गजता । '†गजाच्च' (वा० ४. २. ४३) इति वक्तव्यात् तल् ॥

टीका० — **गजवृन्दे** हास्तिकद्वयम् । 'अचित्तहस्तिधेनोष्ठक्' (४. २. ४७) । हास्तिकम् । †'गजाच्चेति वक्तव्यम्' (वा० ४. २. ४३) इति तल् । गजता ॥

करिणी धेनुका वशा ।

क्षीर० — धयन्त्येनां धेनुका । वष्टि कामयते वशा ॥

टीका० — करिणीत्रयं **हस्तिन्याम्** । धेनुरेव धेनुका । 'वश कान्तौ' । अच् । वशा तालव्यशा । अतः परं गात्रापरपर्यायान्ता हस्तिनोऽवयवाः कथ्यन्ते ॥

---

१. 'ले' ख. पाठः.

---

† 'गजसहायाभ्यां च' इति मुद्रितवार्त्तिकपाठः ।

गण्डः कटः

क्षीर० — 'गडि वदनैकदेशे' । कटति वर्षति मदं कटः ॥

टीका० — मदनिर्झरस्थाने गण्डद्वयम् । खङ्गिनि गण्ड उक्तः । कटेः अच् । कटः ॥

मदो दानं

क्षीर० — माद्यत्यनेन मदः । 'मदोऽनुपसर्गे' (३. २. ६७) । अप् । द्यति खण्डयत्यनेनेति दानम्[1] ॥

टीका० — मदद्वयं मदे । द्वयं साधितम् ॥

वमथुः करशीकरः ॥ ३७ ॥

क्षीर० — वम्यते वमथुः । 'द्वितोऽथुच्' (३. ३. ८९) ॥

टीका० — वमनजले वमथुद्वयम् । 'टुवम उद्गिरणे' । 'द्वितोऽथुच्' (३. ३. ८९) । वमथुः ॥

कुम्भौ तु पिण्डौ शिरसः

क्षीर० — कुम्भाकृती मांससङ्घातौ ॥

टीका० — शिरःपिण्डौ कुम्भाख्यौ ॥

तयोर्मध्ये विदुः पुमान् ।

क्षीर० — वेत्ति संज्ञां[2] यस्मादङ्कुशस्थानात् स विदुः । यत् पालकाप्यः —

"तत्र रक्षाविताने द्वे विदू द्वौ श्रवणे गतौ ।
प्राक् च पश्चाच्च तिर्यक् च षड्भेदाङ्कुशधारणा" ॥

---

१ 'नं दन्तिनां ॥' ग. घ. ङ. पाठः. २. 'ज्ञायां य' ख. ग. घ. ङ. पाठः.

टीका० — कुम्भयोर्मध्यभागो विदुः । अङ्कुशाघातं वेत्यस्मिन्निति 'कुभ्रश्च' (उ० १. २२) इति बाहुलक औणादिकः कुः ॥

अवग्रहो ललाटं स्याद्

क्षीर० — अवगृह्यतेऽङ्कुशेनावग्रहः ॥

टीका० — ललाटेऽवग्रहो दीर्घशून्यो वृष्ट्यभावे साधितः ।

"गजालिके वृष्टिरोधे प्रतिबन्धेऽप्यवग्रहः"

इति रुद्रश्च ॥

ईषिका त्वक्षिकूटकम् ॥ ३८ ॥

क्षीर० — ईषा लाङ्गलकीलिकेवेषिका ॥

टीका० — अक्षिकूटमक्षिगोलं, तत्रेषिका । दीर्घादिः । 'ईष गतिहिंसादानेषु' । ण्वुल् । उणादौ तु 'ईषेः किद्ध्रस्वश्च' (उ० ४. २१) इतीकनि धातोर्ह्रस्वत्वे ह्रस्वादि दीर्घमध्यं च । 'ऐषीकमस्त्रमि'त्यादिसुरारेर्दीर्घमध्यप्रयोगः । शरकाष्ठिकायां वीरणकाष्ठिकायां चेदृगेव । तथाच — 'शरत्समयमिव रोचमानेषीकं द्विरदमि'त्याश्चर्यमञ्जरी । शरत्पक्ष इषीका ॥

अपाङ्गदेशो निर्याणं

क्षीर० — निर्यात्यश्रु अनेन निर्याणम् ॥

टीका० — काशीति ख्याते नेत्रान्ते निर्याणं, निर्यात्यनेन दृष्टिरिति । ल्युट् ॥

कर्णमूलं तु चूलिका ।

क्षीर० — चोद्यते पार्श्वगमनायाङ्कुशेनास्यां चूलिका ॥

---

१. 'दुसंज्ञितः । अ' ग. ब. ञ. पाठः.

टीका० — कर्णमूले चूलिका । 'चूल समुच्छ्राये' । ण्वुल् ॥

अधः कुम्भस्य वाहित्थं

क्षीर० — वाह्यते[1]ऽनेनाङ्कुशचोदनया वाहित्थम् । मदवाहिनि स्थाने तिष्ठति । वाहित्थापभ्रंशोऽयं वा ॥

टीका० — कुम्भस्येति वातकुम्भस्याधो वाहित्थम् । 'वाहित्थं वातकुम्भाध' इति भागुरिः । वातकुम्भश्च ललाटाधोभागः ॥

प्रतिमानमधोऽस्य च ॥ ३९ ॥

क्षीर० — अस्य वाहित्थस्याधः प्रतिमानम् । प्रतिमीयतेऽनेनेति । 'डुमिञ् प्रक्षेपणे' । 'मीनातिमिनोतिदीङां ल्यपि च' (६. १. ५०) इत्यात्वम् ॥

टीका० — वाहित्थस्याधोभागो दन्तयोर्मध्यं प्रतिमानम् । मातेर्ल्युट् ॥

आसनं स्कन्धदेशः स्यात्

क्षीर० — आस्यतेऽस्मिन्नासनम् ॥

टीका० — आसनद्वयं हस्तिपकोपवेशनस्थाने । आसनमुक्तम् ॥

पद्मकं बिन्दुजालकम् ।

क्षीर० — पद्मप्रतिकृती रक्तत्वात् पद्मकम् । तारुण्ये हस्तिनां देहे रक्तबिन्दवः स्युः ॥

टीका० — सिध्मादिरूपबिन्दुसमूहे पद्मकद्वयम् । पद्ममेव पद्मकम् ॥

पक्षभागः पार्श्वभागो दन्तभागस्तु योऽग्रतः ॥ ४० ॥

क्षीर० — हस्तिनां योऽग्रतो भागः ॥

---

१. 'ह्य' ग. पाठः.

टीका०—पक्षभागद्वयं पार्श्वदेशे। दन्तसन्निहितोऽग्रभागो दन्तभागः॥

द्वौ पूर्वपश्चाज्जङ्घादिदेशौ[1] गात्रापरे क्रमात्।

क्षीर०—हस्तिनां पूर्वः पादजङ्घादिभागो गात्रम्। पश्चाद्भागोऽपरम्॥

टीका०—पूर्वमग्रं, पूर्वजङ्घा आदिदेशो यस्य तद् गात्रम्। पश्चाज्जङ्घा आदिदेशो यस्य तत्रापरम्। पूर्वजङ्घाभागो गात्रं पश्चाज्जङ्घाभागोऽपरमित्यर्थः॥

तोत्रं वैणुकम्

क्षीर०—तुद्यतेऽनेन वेणुमयेन प्रेषणेनेति तोत्रम्॥

टीका०—तोत्रद्वयं कनाल इति ख्याते। 'तुद व्यथने'। 'दाम्नीशस—' (३. २. १८२) इत्यादिना ष्ट्रन्। तोत्रम्। वेणुना निर्वृत्तं वैणुकम्। 'निर्वृत्तेऽक्षद्यूतादिभ्यः'(४. ४. १९) इति ठक्। क्वचिद् वेणुकमिति पाठः। तदा च स्वार्थिकः कन्॥

आलानं बन्धस्तम्भे

क्षीर०—आलायते बध्यतेऽत्रालानम्॥

टीका०—आलानद्वयं बाखोड इति ख्याते। बन्धस्तम्भ इति समाहारद्वन्द्व(मि?इ)ति बन्धस्तम्भयोरुभयोरप्यालानं वर्तते इति केचित्। प्रयोगोऽप्युभयत्र दृश्यते। 'नालानं करिणां सस्रे' (इति),

"तद्गजालानतां प्राप्तैः सह कालागरुद्रुमैः"

इति च। लातेः करणे ल्युट्॥

अथ शृङ्खले॥ ४१॥

अन्दुको निगलोऽस्त्री स्याद्

---

१. 'दो' ग. घ. ङ. पाठः.

क्षीर० — शृणाति बन्धने शृङ्खलम् । अन्दति बध्नात्यन्दूः । 'अति-अदि बन्धने' । स्वार्थे कन् । 'इको ह्रस्वोऽङ्यो गालवस्य' (६. ३. ६१) । निगल्यते बध्यतेऽनेनेति निगलः ॥

टीका० — शृङ्खलत्रयं सिक्कंति[1] ख्याते । शिञ्जन्तः स्खलन्त्यनेनेति पृषोदरादिः । शृङ्खलः । 'शृङ्खलस्त्रिष्विति' तालव्यादौ रभसः । 'अति अदि बन्धने' । 'अन्दूदृन्भूजम्बूकफेलूकर्कन्धूदिधिषूः' (उ० १. ९६) इति बाहुलकः कूप्रत्ययः । ततः 'इवे प्रतिकृतौ' (५. ३. ९६) इति कन् । 'केऽणः' (७. ४. १३) इति ह्रस्वः । अन्दुकः । 'गड सेचने' । अच् । निगडः ॥

अङ्कुशोऽस्त्री सृणिर्द्वयोः ।

क्षीर० — अङ्क्यते गम्यतेऽनेनाङ्कुशः । सरत्यनया सृणिः ॥

टीका० — अङ्कुशत्रयमङ्कुशे । 'अकि लक्षणे' । 'सानसिवर्णसि—' (उ० ४. १९) इत्यादिना उशप्रत्ययः । अङ्कुशस्तालव्यशः । सर्तेः 'सृवृषिभ्यां कित्' (उ० ४. ५०) इति निः । सृणिः । 'आरक्षमग्नमवमत्य सृणिं शिताग्रम्' (स० ९. श्लो० ५) इति माघप्रयोगात् स्त्रियामिति प्रमादपाठः । द्वयोरित्येव पाठः ॥

दूष्या कक्ष्या वरत्रा स्यात्

क्षीर० — दूष्यते दूयतेवानया वा दूष्या । कक्षायां मध्यमदेशे भवा कक्ष्या । व्रियतेऽनया वरत्रा मध्यबन्धनी चर्मरज्जुः ॥

टीका० — चूषात्रयं कच्छरज्जौ । *'चूष याचने' । 'गुरोश्च हलः' (३. ३. १०३) इत्यः । चूषा । दीर्घवच्चकारादिमूर्धन्यषा । कक्षा विश्वप्रकाशे

१. 'लेन शृ' क. पाठः. २. 'डः' ग. घ. ङ. पाठः. ३. 'क' ख. ग. पाठः. ४. 'याः' ख. पाठः.

* 'चूष पाने इति' मुद्रितधातुपाठः ।

क्षान्तोक्ता । यान्तापि कक्ष्येत्यजयः । 'वृञश्चित्' (उ० ३. १०७) इत्यत्रन् । वरत्रा ॥

कल्पना सज्जना समे ॥ ४२ ॥

क्षीर० — हस्तिनां सज्जीकरणमङ्कोलगैरिकादिना । शृङ्गारेणेत्येके ॥

टीका० — कल्पनाद्वयं **सामणी**ति ख्यातायाम् । 'कृपू सामर्थ्ये' । 'ग्लुञ्चु षस्ज गतौ' । 'ण्यासश्रन्थो युच्' (३. ३. १०७) ॥

प्रवेण्यास्तरणं वर्णः परिस्तोमः कुथो द्वयोः ।

क्षीर० — प्रवयत्येनां प्रवेणी । आस्तीर्यते हस्तिपृष्ठे आस्तरणम् । वर्णो वर्णकम्बलः । भीमवत् । परिस्तोम्यते प्रस्तीर्यते परिस्तोमः । वर्णपरिस्तोम इत्येके । कुथ्यते कुथः ॥

टीका० — प्रवेणीपञ्चकं **चित्रकम्बले** । वेण्यां प्रवेण्युक्ता । आस्तीर्यतेऽनेनेत्यास्तरणम् । ल्युट् । ब्राह्मणादिषु वर्ण उक्तः । स्तौतेः सोमवन्मन् । परिस्तोमः । 'कुथ पूतीभावे' । इगुपधलक्षणः कः । 'स्त्रियां वेणी कुथं त्रिष्वि'ति वोपालितः ॥

वीतं त्वसारं हस्त्यश्वं

क्षीर० — वेति स्म याति भुङ्क्ते च वीतम् । विशेषेणेतं नष्टं वा । सेनाङ्गत्वात् समाहारः ॥

टीका० — असारं **युद्धाक्षमं हस्त्यश्वं** वीतम् । विगतमितं गमनमस्य तद् वीतम् ॥

वारी तु गजबन्धनी ॥ ४३ ॥

क्षीर० — वार्यतेऽनया वारी गजादानभूमिः ॥

टीका० — वारिद्वयं **वार्याम्** । 'वसिवपियजिराजिव्रजिसदिहनिवाशिवादिवारिभ्य इञ्' (उ० ४. १२६) इति वृणातेः ण्यन्तादिञ् । '**कृदिकाराद्** —' (ग० ४. १. ४९) इति ङीषि वारी च । उक्तो हस्ती ॥

---

१. 'णं कोलकगै' ख. पाठः. २. 'वा' क. ख. पाठः.

घोटके वीतितुरगतुरङ्गाश्वतुरङ्गमाः ।
वाजिवाहार्वगन्धर्वहयसैन्धवसप्तयः ॥ ४४ ॥

क्षीर० — घोटते भूमौ परिवर्तते घोटकः । वेति याति वीतिः । पीतिरित्येके । 'पीङ् पाने' । तुरं त्वरितं गच्छतीति तुरगः, 'अन्यत्रापि दृश्यते' (वा० ३. २. ४८) इति डः । तुरङ्गमः, 'गमश्च' (३. २. ४७) इति खच् । तुरङ्गः, 'खच डिद् वा वक्तव्यः' (वा० ३. २. ३८) । अश्नुतेऽध्वानमश्वः । वजति तच्छीलो वाजी । वाजाः पक्षा अभूवन्नस्येति वा । वाह्यते वाहः । अर्वति यात्यर्वा । गन्ध्यतेऽर्द्यते गन्धर्वः । हयति याति हयः । सिन्धौ भवः सैन्धवः । विशेषोऽपि सामान्यवृत्तिः । सपति समवैति सप्तिः । इतो रथप्रकरणात् प्रागश्वपरिकरः ॥

टीका० — घोटकत्रयोदशकमश्वे । 'घुट परिवर्तने' । ण्वुल् । घोटकः । पिबतेः 'क्तिच्क्तौ च संज्ञायाम्' (३. ३. १७४) इति क्तिः । 'पाने स्त्री पीतिरश्वे ना' इति रुद्रः । 'तुर त्वरणे' । 'इगुपधज्ञाप्रीकिरः कः' (३. १. १३५) । तुरो गच्छतीत्यर्थः । भुजगवड्डप्रत्ययादिः । 'अशू प्रुषिलटिकणिखटिविशिभ्यः क्वन्' (उ० १. १५७) । अश्वः । वाजो वेगस्तद्योगाद् वाजी । वाह्यत इति वाहः । घञ् । अर्तेः वनिप् । अर्वा नान्तः । शत्रन्तोऽप्यर्वन् । तथाच माघे—'(मुहुरमु?अ)र्वतां व्रजाः' इति । स्त्रियामर्वती । गन्धर्व उक्तः । 'हय गतौ' । पचाद्यच् । हयः । सिन्धुदेशे भवः सैन्धवः । 'कच्छादिभ्यश्च' (४. २. १३३) इत्यण् । सप समवाये' । बाहुलकस्तिः । सप्तिः ॥

आजानेयाः कुलीनाः स्युः

क्षीर०—आजेन क्षेपेण आनेया आजानेयाः, आयत्ता इत्यर्थः ॥

टीका०—कुलीनाः प्रधानाश्च भूमिभवा अश्वा आजानेयाः, सुवाहत्वात् । अजावन्नेया अजानेयाः । पृषोदरादित्वादादिदीर्घत्वमिति हड्डचन्द्रः ।

"अश्वं कुलीनमाजानेयं शावकं किशोरकं ब्रूते"

---

१. 'ति । डः । खच डित् । गमश्चेति खच् । अश्नु' क. ग. घ. ङ. पाठः. २. 'ति सप्तिः' ग. पाठः.

इति नाममालायामपि ॥

विनीताः साधुवाहिनः।

क्षीर० — विनीयन्ते विनीताः सुशिक्षिताः ॥

टीका० — शोभनवहनशीला यत्र तत्र भवा विनीताः। नयतेः क्तः॥

वनायुजाः पारसीकाः काम्बोजा बाह्लिका हयाः ॥ ४५ ॥

क्षीर० — वनाय्वादिषु देशेष्वेते जाता हयविशेषाः। एवं तुरकारादयोऽपि [1]। लक्ष्ये बाह्लीकोऽश्वः ॥

टीका० — वानायुजद्वयं **वनायुजदेशजे**। अनयोरभेदोपचारादेकत्वम्। द्वौ भवार्थेऽणि दीर्घा(दि:?दी)। तथाच नाममालो —

"श्वेतं कर्काख्यं वानायुजमपि पारसीकं तु"।

'पारसीको वनायुजः' इत्युत्पलिन्यां ह्रस्वादिः। **कम्बोजदेशजेऽश्वे** काम्बोजद्वयम्। 'कम्बोजाल्लुक्' (४. १. १७३) इति 'जनपदशब्दात् क्षत्रियादञ्' (४. १. १६६) इत्यस्यैवानन्तरविहितस्य लुक्, न तु शैषिकाणः। अतो दीर्घादिः काम्बोजः। कुङ्कुमे बाह्लिक उक्तः। हया हयविशेषाः। एकत्वं नास्ति। **पृथगेव** नामानीति केचित्॥

ययुरश्वोऽश्वमेधीयः

क्षीर० — यात्यत्यर्थं ययुः। अश्वमेधाय हितोऽश्वमेधीयः। 'अश्वमेधाच्छ च' ॥

टीका० — **अश्वमेधार्हे घोटके** ययुः। द्व्यन्तस्थः। 'या प्रापणे'। 'यो द्वे च' (उ० १. २१) इत्युः किच्च। ययुः। 'तस्मै हितम्' (५. १. ५) इति छः। अश्वमेधीयः॥

जवनस्तु जवाधिकः।

क्षीर० — जवते तच्छीलो जवनः। 'जुचङ्क्रम्य —' (३. २.

---

१. 'तुरुष्का' ग. घ. ङ, 'तु तर्करा' ख. पाठः.

१६०) इति युच् । मृगादिरपि । 'प्रजोरिनिः' (३. २. १५६) इति प्रजवी च ॥

टीका० — वेगाधिके जवनश्चवर्गादिः ॥

पृष्ठ्यः स्थौरी

क्षीर० — यत्पृष्ठे जलादिकमुह्यतेऽसौ पृष्ठ्यः । यप् । स्थूराणां पश्चाज्जङ्घाभागानामिदं स्थौरम् । स्थौरं बलमस्त्यस्य स्थौरी ॥

टीका० — बलीवर्दवत् पृष्ठेन भारवाहके पृष्ठ्यद्वयम् । य(त्प्र? प्प्र)-करणे 'अन्येभ्योऽपि दृश्यते' (वा० ५. २. १२०) इति य(त्? प्) । पृष्ठ्यः । 'स्थूल परिबृंहणे' । अण् । रलयोरैक्यात् स्थूराया इदं स्थौरं पृष्ठवाह्यं, तद्योगादिनिः, स्थौरी । स्थूरीत्यपि केचित् ॥

सितः कर्कः

क्षीर० — शुक्लोऽश्वः कर्कः । क्रियन्ते वर्णान्तराण्यस्येति ॥

टीका० — श्वेतहये कर्कः ॥

रथ्यो वोढा रथस्य यः ॥ ४६ ॥

क्षीर० — रथं वहति रथ्यः । 'तद् वहति रथयुग—' (४. ४. ७६) इति यत् ॥

टीका० — यो रथं वहति स रथ्यः । 'तद् वहति रथयुगप्रासङ्गम्' (४. ४. ७६) इति यत् ॥

बालः किशोरः

क्षीर० — (किश्यते?) वध्यते कश्यते वा किशोरः ॥

टीका० — बाले किशोरः । 'किशोरादयश्च' (उ० १. ६८) इत्यत्र तालव्यशः ॥

वाम्यश्वा बडवा

१. 'गोऽपि । प्रज' क. ख. पाठः. २. 'त' ख. ङ. छ. पाठः.

क्षीर०— वाम्यते गर्भं वामी। यल्लक्ष्यम्—'अथोष्ट्रवामीशतहारितार्थम्' (रघु० स० ५. श्लो० ३२)। वडं बलं हयं वा वाति वडवा। स्त्रीविषयत्वाद् ङीप् नास्ति। अश्वा त्वजादिः। अमूर्नानार्थे॥

टीका० — वामीत्रयमश्वायाम्। वामी गौरादिः। अश्व उक्तः। टापि अश्वा। वलतेर्बाहुलकाद् अवन्। डलयोरेकत्वस्मरणम्। वडवा॥

वाडवं गणे।

क्षीर०— वडवानां समूहो वाडवम्। 'खण्डिकादिभ्यश्च' (४. २. ४५) इत्यञ्॥

टीका० — वडवासमूहे वाडवम्। 'खण्डिकादिभ्यश्च' (४. २. ४५) इत्यञ्॥

त्रिष्वाश्वीनं यदश्वेन दिनेनैकेन गम्यते॥ ४७॥

क्षीर०— 'अश्वस्यैकाहगमः' (५. २. १९) इति खञ्॥

टीका० — अश्वेनैकदिनगम्ये वर्त्मन्याश्वीनम्। 'अश्वस्यैकाहगमः' (५. २. १९) इति खञ्॥

कश्यं तु मध्यमश्वानां

क्षीर०— कशामर्हति कश्यम्॥

टीका०— अश्वमध्यभागे कश्यं, कशां चर्मलतां ताडनार्थमर्हतीति। 'दण्डादिभ्यो यः' (५. १. ६६)। 'दशाकशावशे'ति तालव्यदेशना॥

हेषा ह्रेषा च निस्वनः।

क्षीर०— 'हेषृ ह्रेषृ अव्यक्ते शब्दे'। 'गुरोश्च हलः' (३. ३. १०३) इत्यः॥

टीका० — अश्वनिस्वने हेषाद्वयम्। 'हेषृ ह्रेषृ अव्यक्ते शब्दे'। 'गुरोश्च हलः' (३. ३. १०३) इत्यः। ह्रेषेति पाठो 'ह्रेष गतौ' इत्यतो व्युत्पाद्यः। द्वौ मूर्धन्यषौ॥

निगालस्तु गलोद्देशः

क्षीर० — निगलत्यनेन निगालः। गलो जत्रुसन्धिः। 'उन्न्योर्ग्रः' (३. ३. २९) इति घञ्। गलस्योद्देशः प्रदेशः। देवमणेरावर्तस्य स्थानम्॥

टीका० — अश्वानां गलस्योद्देशे समीपे निगालः। गिरतेर्ण्यन्ताद् एरचि रलयोरैक्यम्॥

वृन्दे त्वश्वीयमाश्ववत्॥ ४८॥

क्षीर० — अश्वानां समूहे। 'केशाश्वाभ्यां यञ्छावन्यतरस्याम्' (४. २. ४८)। पक्षे 'अनुदात्तादेरञ्' (४. २. ४४) इत्यञ्॥

टीका० — अश्वीयद्वयमश्वसमूहे। 'केशाश्वाभ्यां यञ्छावन्यतरस्याम्। (४. २. ४८) इति छः। अश्वीयम्। 'तस्य समूहः' (४. २. ३७) इत्यणि आश्वम्॥

आस्कन्दितं धोरितकं रेचितं वल्गितं प्लुतम्।
गतयोऽमूः पञ्च धाराः

क्षीर० — अश्वानां धाराख्याः पञ्चेमा गतयः। धार्यते गतौ स्थाप्यतेऽनया धारा। भिदादित्वात् साधुः। आस्कन्दनमास्कन्दितम्, उत्तेरिताख्यो गतिवेगः। धोरणं धोरितम्। 'धोरृ गतिचातुर्ये'। रेचितम् उत्तेजिताख्यम्। क्रमस्त्वन्यथा। यदाहुः—

"धोरितं वल्गितं धाराः प्लुतमुत्तेजितं क्रमात्।
उत्तेरितं चेति पञ्च शिक्षयेत् तुरगं गतीः॥
धोरितं गतिमात्रे यद् योजनं वल्गितं पुरः।
अग्रकायसमुल्लासात् कुञ्चितास्यं नतत्रिकम्॥
पूर्वापरोन्नमनतः क्रमादारोहणं प्लुतम्।

---

१. 'लोह' अ पाठः. २. 'स्याम् इति विकल्पेन यञ्' । ३' ख. पाठः.

उत्तेजितं मध्यवेगे योजनं श्लथवल्गया ॥
. उत्तेरिते तु वेगान्धो न शृणोति न पश्यति ।" ॥

टीका०—आस्कन्दितादयः पञ्च गतिविशेषा धाराशब्दवाच्याः । तत्र विष्टब्धा समा च गतिरास्कन्दितं वीरव· इति ख्यातम् । 'स्कन्दिर् गति-शोषणयोः' । क्तः । ऋजुदूरगमनं पुलिन इति ख्यातं धौरितकम् 'धोर्ऋ गति-चातुर्ये' । क्तः । तदन्तात् स्वार्थे कन् । मण्डलिकालयेन गमनं रेचितम् । क्तः । हेड्ड इति ख्यातम् । वेगेन विक्षिप्तोपरिचरणं वल्गनं वल्गितम् । वल्गेः क्तः[2] । मार्जा इति ख्यातम् । त्वरया साम्येन गतिः प्लुतम् । प्लवतेः क्तः । पर इति ख्यातम् ॥

घोणा तु प्रोथमस्त्रियाम् ॥ ४९ ॥

क्षीर०—घुणते श्वासेन चलति घोणा । प्रवते चलति प्रोथः, वृत्तो नासान्तरप्रदेशः ॥

टीका०—घोणायां प्रोथः । 'प्रोथृ पर्याप्तौ[1]' । पचादिः ॥

कविका तु खलीनोऽस्त्री

क्षीर०—कवते दन्तचर्वणाच्छब्दायते इति कविका वक्त्रैकदेशे वक्त्रनियामके लोहशङ्कौ वर्तते । लोके त्वयोमयी सर्वमुखनियन्त्रिका कविका । खलति चलति खलीनम् । खे तालुनि लीनं वा ॥

टीका०—कवीति ख्यातायां लोहकृतायां (लेखकृतायाम् ?) अश्वमुखबन्धन्यां कविकाद्वयम् । 'कवी तु खलीनं[3]' इत्यजयः । अतः स्वार्थिकोऽत्र कः ।

"कविका[4] तु खलीनोऽस्त्री कविकं कर्षणीत्यपि"

इति रभसः । खे मुखविवरे लीनं खलीनं दीर्घमध्यम् ।

"सोत्सेधैः स्कन्धदेशैः खरखलिनकशाकर्कशात्यन्तमुग्रैः"

इति विशाखदत्तः । तदा च पृषोदरादिह्रस्वत्वम् ॥

---

१. 'ति', २. 'क्तः । त्व' ज. पाठः. ३. 'लि' ग. घ. पाठः. ४. 'वी' ज. पाठः.

शफं क्लीबे खुरः पुमान् ।

क्षीर० — शण्यते भुवा[1] घृष्यते शफम् । खुरति विलिखति क्ष्मां खुरः ॥

टीका० — शफद्वयं खुरे । शफं क्लीबम् । 'खुरच्छेदने' । इगुपधलक्षणः कः ।

"भजेथाः पश्चान्मां वरतनु ! पुरस्तान्मृगखुर-[2]
क्षुरप्रस्यालेख्यस्थपुटितविभागा वनभुवः ।"

इत्यादि । (सुवश्च :) ॥

पुच्छोऽस्त्री लूमलाङ्गूले बालहस्तश्च बालधिः ॥ ५० ॥

क्षीर० — पूयते दंशादीनुत्सारयति पुच्छम् । पुतं[3] छादयति वा । लूयते लूमम् । लङ्गति चलति लाङ्गूलम् । बालो हस्त इव दंशवारणाद् बालहस्तः । प्रशस्ता बाला वा । बाला धीयन्तेऽस्मिन् बालधिः ॥

टीका० — पुच्छत्रयं लाङ्गूले । 'पुच्छ प्रमादे' । कः । पुच्छः । लूञो बाहुलको मक् । लूममदन्तम् । लगेः 'खर्जपिञ्जादिभ्य ऊरोलचौ' (उ० ४. ९१) । 'अन्येषामपि —' (६. ३. १३७) इति दीर्घः । लाङ्गूलम् । **केशवति लाङ्गूलमात्रे** बालहस्तद्वयम् । न तु हस्तिन एव । तथा च 'परिगतो ज्वलनमुग्धताबालधिः' इति बालरामायणे हनूमद्विषये बालधिः प्रयुक्तः । बालसमूहयोगाद् बालहस्तः । बालो धीयतेऽत्रेति बालधिः ॥

त्रिषूपावृत्तलुठितौ परावृत्ते मुहुर्भुवि ।

क्षीर० — उपावर्तते स्मोपावृत्तोऽश्वः । लुठति स्म लुठितः ॥

---

१. 'उगाहृष्य' ग. ड. पाठः. २. 'गक्षु' ट., 'गखुरप्र' ञ. पाठः. ३. 'तच्छाद' ग. पाठः.

टीका० — भूमौ पुनः पुनर्लोठ्यायतेऽश्वादावुपावृत्तद्वयम् । उपाङ्पूर्वाद् वृतेः लुठतेश्च कर्तरि क्तः ॥

याने चक्रिणि युद्धार्थे शताङ्गः स्यन्दनो रथः ॥ ५१ ॥

क्षीर० — यान्त्यनेन यानं साम्परायिकाख्यं । शताङ्गो बह्वरङ्कः । स्यन्दते याति स्यन्दनः । रमन्तेऽस्मिन् रथः । इतो भटादेः प्राग् रथप्रकरणम् ॥

टीका० — युद्धार्थे चक्रवति याने शताङ्गत्रयम् । शतमङ्गान्यस्येति बहुव्रीहिः । 'स्यन्दू प्रस्रवणे' । 'अनुदात्तेतश्च हलादेः' (३. २. १४९) इति युच् । स्यन्दनम् । रमेः 'हनिकुषिनीरमिकाशिभ्यः क्थन्' (उ० २. २) । रथः ॥

असौ पुष्यरथश्चक्रयानं न समराय यत् ।

क्षीर० — पुष्ये[2] यात्रोत्सवादौ मङ्गल्यो रथः पुष्यरथः[3], यद् युद्धार्थं न स्यात् । चक्रयुक्तं यानम् ॥

टीका० — यत्र युद्धार्थं चक्रयुक्तम्, अपि तु क्रीडाभ्रमणाद्यर्थं यानं, स पुष्यरथः । पूर्वपदं चात्र यरलवीययकारान्तं,

"महारथः पुष्यरथं रथाङ्गी क्षिप्रं क्षपानाथ इवाधिरूढः"
(स० ३. श्लो० २२)

इति माघे पुष्यशब्देन सह श्लेषात् ॥

कर्णीरथः प्रवहणं डयनं च समं त्रयम् ॥ ५२ ॥

क्षीर० — कर्णिषु स्कन्देषु रथः कर्णीरथः । दीर्घो लक्ष्यात् । पुंस्कन्धोह्यमानो रथः । प्रवहन्त्यनेन प्रवहणम् । डयन्ते विहायसा यान्तीवानेन डयनं विमानाख्यम् ॥

टीका० — स्त्रीणां नयनार्थे कोङ्कीयके डङ्करिकाप्राये रथे कर्णीरथत्रयम् । प्रवहेर्ल्युट् । प्रवहणम् । 'हि गतौ' । करणे ल्युट् । हयनम् । 'डीङ् विहायसा

१. 'त्र्यायितं' क. ख. ग. घ. ङ. पाठः. २. 'ष्यो' ग. पाठः. ३. 'थः । च' ख. पाठः. ४. 'ति', ५. 'त्येन' ख. पाठः.

गतौ' । करणे ल्युटि डयनमपि मतभेदादिति वर्णदेशना ॥

क्लीबेऽनः शकटोऽस्त्री स्याद्

क्षीर० — अनिति चीत्[1]करोति अनः । असुन् । शक्नोति भारं वोढुं शकटम् ॥

टीका० — अनोद्वयं शकटे । 'अन गतौ' इत्यस्माद् धातोः असुनि अनः, सान्तम् । 'शक्लृ शक्तौ' । 'शकादिभ्योऽटन्' (उ० ४. ८२) । शकटः ॥

गन्त्री कम्बलिवाह्यकम् ।

क्षीर० — गच्छति तच्छीला गन्त्री शकटिका । कम्बलिभिर्दान्तैर्वोढव्यम् ॥

टीका० — कम्बलिनो गावः, तद्वाह्ये शकटे गन्त्री । गमेः ष्ट्रन् । ङीष् ॥

शिविका याप्ययानं स्याद्

क्षीर० — शिवा श्रेयस्करी । 'संज्ञायां कन्' (५. ३. ८७) । याप्यस्याशक्तस्य यानं युगाख्यम् । कु[3]न्यायानमिति गौडः ॥

टीका० — शिविकाद्वयं झं[4]पाण इति ख्याते । शिविका तालव्यादिः । याप्यैरधमैर्याप्यते नीयत इति याप्ययानम् । अन्तस्थादिः ॥

दोला प्रेङ्खादिका स्त्रियाम् ॥ ५३ ॥

क्षीर० — दोल्यते दोला काष्ठमयी रज्जुः प्रालम्बश्च । प्रेङ्खयते प्रेङ्खा हिन्दोलकाख्या । आदिशब्दाच्छयानकादि, याप्ययानानुवृत्तेः ॥

टीका० — उद्यानादौ क्रीडनार्थे काष्ठादिमयो[6]ऽन्दोलः । प्रेङ्खा । प्रेङ्खयते प्रेर्यत इति प्रेङ्खा ।

---

१. 'सी' ग. पाठः. २. 'न विग' ग. च., 'नेवल' ख. ट., 'नलेल' ङ. छ. पाठः. ३. 'कुध्यान' ग. पाठः. ४. 'सं' क. ख. ञ. ट. पाठः. ५. 'ङ्खा । आ' घ. पाठः. ६. 'यो हि' क. ख., 'भि' ङ. च. छ. पाठः.

"दोला प्रेङ्खः पुमान् प्रेङ्खा निःश्रेणिरधिरोहिणी" ॥
इति रत्नकोशे द्वयोः । आदिना घट्टनादिवाद्यापि दोला ॥

उभौ तु द्वैपवैयाघ्रौ द्वीपिचर्मावृते रथे ।

क्षीर०—द्वीपिनश्चर्मणा प्रावृतो द्वैपो रथः । 'द्वैपवैयाघ्रादञ्' (४. २. १२) ॥

टीका०—व्याघ्रचर्मावृते रथे द्वैपद्वयम् । द्वीपिभवं चर्म द्वैपम् । तेन वृतो रथो द्वैपः । 'द्वैपवैयाघ्रादञ्' (४. २. १२) इत्यञ् ॥

पाण्डुकम्बलसंवीतः स्यन्दनः पाण्डुकम्बली ॥ ५४ ॥

क्षीर०—पाण्डुकम्बलेन प्रावृतो रथः । 'पाण्डुकम्बलादिनिः' (४. २. ११) ॥

टीका०—पाण्डुकम्बलेनावृते रथे पाण्डुकम्बली । 'पाण्डुकम्बलादिनिः' (४. २. ११) इतीनिः ॥

रथे काम्बलवास्त्राद्याः कम्बलादिभिरावृते ।

क्षीर०—'परिवृतो रथः' (४. २. १०) इत्यण् । आदिशब्दाद् दौकूलाद्याः[1][2] ॥

टीका०—वस्त्रकम्बलाभ्यामावृते रथे काम्बलवास्त्रौ। 'परिवृतो रथः' (४. २. १०) इत्यण् । आदिना क्षौमादिः ॥

त्रिषु द्वैपादयः

क्षीर०—वाच्यलिङ्गत्वाद् द्वैपी गन्त्री, द्वैपो रथः, द्वैपमनः । शकटाद्यपि रथत्वेन मन्यते ॥

टीका०—द्वैपादयो वास्त्रान्तास्त्रिषु ॥

१, 'दौग्रल्याख्याः ।' ग. पाठः. २. 'ख्याः' ख. पाठः.

रथ्या रथकड्या रथव्रजे ॥५५॥

क्षीर० — रथानां समूहे 'खलगोरथात्' (४. २. ५०) 'इनित्रकड्यचश्च'* (४. २. ५१) इति यत् कड्यच् च ॥

टीका० — रथ्याद्वयं रथव्रजे । 'खलगोरथात्' (४. २. ५०) इति यत् । रथ्या । 'इनित्रकड्यचश्च' (४. २. ५१) इति कड्यच् । डापि रथकड्या ॥

धूः स्त्री क्लीबे यानमुखं

क्षीर० — धूर्वति हिनस्ति वोढारं धूः । यस्या अग्रे वोढारो बध्यन्ते । यानमुखं रथादेरग्रम् ॥

टीका० — रथाग्रभागे धूर्द्वयम् । 'धुर्वी हिंसायाम्' । 'भ्राजभासभाषधुर्वी —' (३. २. १७७) इत्यादिना क्विप् । 'राल्लोपः' (६. ४. २१) इति वलोपः । धू रेफान्ता ॥

स्याद् रथाङ्गमपस्करः ।

क्षीर० — रथारम्भकं चक्रादन्यत् । अपकरोत्यपस्करः । 'अपस्करो रथाङ्गम्' (६. १. १४९) इति साधुः ॥

टीका० — रथावयवमात्रे चक्रादावपस्करः । 'अपस्करो रथाङ्गम्' (६. १. १४९) इति निपातितः ॥

चक्रं रथाङ्गं

क्षीर० — रथस्य यच्चक्रं, तद् रूढ्या रथाङ्गम् ॥

टीका० — चक्रद्वयं चक्रे । चक्रमुक्तम् ॥

---

१. 'वा' क. ख. घ. पाठः. २. 'वद्वयमा' ख. पाठः.

---

* 'कड्यचश्च' इति मुद्रिताष्टाध्यायीपाठः ।

तस्यान्ते नेमिः स्त्री स्यात् प्रधिः पुमान् ॥ ५६ ॥

क्षीर०— तस्य चक्रस्यान्ते । नमतीति नेमिः । प्रान्ते धीयते प्रधिः । प्रथते प्रथिरित्येके ॥[1]

टीका० — नेमिद्वयं चक्रस्यान्ते । 'नियो मिः' (उ० ४. ४४) इति मिः । नेमिः । ङीषि नेमी च । धाञः किः । प्रधिः ॥

पिण्डिका नाभिः

क्षीर० — पिण्ड्यन्ते अरा अस्यां सा पिण्डिका । नभ्यते हिंस्यतेऽक्षेण नाभिः ॥

टीका० — रथमध्ये चक्राकारा पिण्डी । यस्यां सर्वाणि काष्ठान्यासज्ज्यन्ते, सा नाभिः । ङीषि नाभी च[2] ॥

अक्षान्तकीलके तु द्वयोरणिः ।

क्षीर०—अक्षस्य नाभिक्षेप्यकाष्ठस्यान्ते व(द्धा[3]? न्धा)र्थं कीलके । अणति शब्दायतेऽणिः[4] । लक्ष्ये त्वाणी ॥

टीका० — अक्षः शकटः । तथाच —

"अक्षो वि(हीन?भीत)के नित्ये शकटव्यवहारयोः"

इत्यादि । **तस्याग्रिमे कीले** अणिः । अणेरौणादिक इः ।

"सीमावृक्षाग्रकीलेषु स्यादाणिरणि च द्वयोः"

इति रुद्रः ॥

रथगुप्तिर्वरूथो ना

क्षीर० — व्रियते गुप्त्यर्थं रथो येन, स वरूथो लोहादिमयी आवृतिः ॥

---

१. 'धिः । पिण्डि' ग. घ. ङ. पाठः. २. 'च ॥ द्वयोरिति रुद्रः । चक्रनिरोधार्थेऽक्षाग्रनिखातकीलके अणिः ॥ शस्त्र' ङ. छ., 'च ॥ द्वयोरिति रुद्रः ॥ शस्त्र' ख. पाठः. ३. 'न्धस्यार्थं' ग. घ. पाठः. ४. 'णिः ॥ रथ' ख. पाठः.

टीका० — शस्त्रभयादात्मरक्षार्थं कृते गुप्तीति ख्याते रथस्य स्थान-विशेषे रथगुप्तिद्वयम्। 'जॄवृञोरूथन्' (उ० २. ६) इत्यूथन्। वरूथः ॥

कूवरस्तु युगन्धरः ॥५७॥

क्षीर० — कूयते शब्दायते कूवरः। युगं वोढुं स्कन्धकाष्ठं धारयति युगन्धरः। 'संज्ञायां भृतॄवृजि'—(३.२.४६) इति खच् ॥

टीका० — रथस्य युगकाष्ठं यत्रासज्ज्यते, तत्र कूवरद्वयम्। कुं महीं वृणातिच्छादयतीति कूवरः। ‡'अन्येभ्योऽपि —' इति दीर्घः। धारेर्विश्वंभरवद् युगन्धरः ॥

अनुकर्षो दार्वधःस्थं

क्षीर० — अनुकृष्यतेऽनुकर्षः ॥

टीका० — रथस्याधःस्थं यद् दारु, यस्योपरि घट्टकर्म, सोऽनुकर्षः। 'कृष विलेखने'। अच् ॥

प्रासङ्गो ना युगाद्युगः।

क्षीर० — प्रसज्ज्यते वोढुं स्कन्धे प्रासङ्गः। युगेनातति युगाद् रथादिः, तस्य युगः। ना पुमान्। अन्यस्तु[1] क्लीबे। युगं कालो युग्मं वा। युगाद् युगान्तरं वत्सदमनार्थमिति गौडाः। यन्मुनिः — 'युगं द्वितीयं प्रासङ्गम्' ॥

टीका० — गुरुत्वाच्चतुर्भिः षड्भिर्वा वृषैर्यदा शकटो नीयते, तदा दीयमानस्य द्वितीययुगस्य प्रासङ्गाख्या ॥

सर्वं[2] स्याद् वाहनं यानं युग्यं पत्रं च धोरणम् ॥५८॥

---

१. 'ते र' ज. पाठः. २. 'त्तु' ख. पाठः.

---

‡ 'अन्येषामपि दृश्यते' (६.३.१३७) इत्येव दीर्घविधायकसूत्रं दृश्यते।

क्षीर०— सर्वं हस्त्यश्वरथादि दोलान्तम्। योक्तव्यं युग्यम्। 'युग्यं च पत्रे' (३.१.१२१) इति साधुः। पतन्त्यनेनेति पत्रम्। 'दाम्नीशस—'(३.२.१८२) इति करणे ष्ट्रन्। धोर्यतेऽत्र धोरणम्॥

टीका० — सर्वं हस्त्यश्वादि वाहनं यानादिचतुष्केणोच्यते। वहतियात्योः करणे ल्युट्। 'वाहनमाहितात्' (८. ४. ८) इति निपातनाद् दीर्घः। 'युग्यं च पत्रे' (३. १. १२१) इत्यनेन युग्यं निपातितम्। 'धोरृ गतिचातुर्ये'। ल्युट्। धोरणम्॥

परम्परावाहनं यत् तद् वैनीतकमस्त्रियाम्।

क्षीर० — वोढृभिः परम्परया वाह्यते। प्राबन्धिकमभ्यासस्थितम्। विनीतानामिदं याप्ययानादि॥

टीका० — मनुष्यादिभिर्यः परम्परया अंसपाण्यादिद्वारेण वाह्यते, स वैनीतकः॥

आधोरणा हस्तिपका हस्त्यारोहा निषादिनः॥ ५९॥

क्षीर० — आधोर्यते हस्ती यैराधोरणाः। हस्तिनं पान्ति हस्तिपकाः। हस्तिनमारोहन्ति हस्त्यारोहाः। निषीदन्त्यवश्यं निषादिनः। द्वौ द्वौ भिन्नार्थावित्येके। आद्यौ पालकौ, परौ योद्धारौ॥

टीका० — आधोरणचतुष्कं हस्त्यारोहे। आङ्पूर्वाद् धोरेः 'चलनशब्दार्थादकर्मकाद् युच्' (३. २. १४८)। आधोरणः। हस्तिनं पातीति हस्तिपः। ततः 'संज्ञायां कन्' (५. ३. ८७)। कर्मण्यणि हस्त्यारोहः। 'सदिरप्रतेः' (८. ३. ६६) इति षत्वे निषादी॥

नियन्ता प्राजिता यन्ता सूतः क्षत्ता च सारथिः।

---

१. 'त्य', २. 'ति ष्ट्र' ग. पाठः. ३. 'रु' ख. पाठः. ४. 'झम्पणादि' ख. ङ. छ. पाठः.

सव्येष्ठदक्षिणस्थौ च संज्ञा रथकुटुम्बिनः ॥ ६० ॥

क्षीर० — नियच्छति नियन्त्रयति[1] नियन्ता । प्राजति प्राजिता । 'अज गतिक्षेपणयोः' । वानुवृत्तेर्वीभावो नास्ति । सुवति सूतः । 'षू प्रेरणे' । क्षदति क्षत्ता । सरथस्यापत्यं[2] सारयति वाहान् वा[3] सारथिः । सव्ये तिष्ठति सव्येष्ठः । 'सव्ये स्थश्छन्दसि' (उ० २. १०१) इति ऋन् डिच्च । 'स्थास्थिन्स्थृणाम्—' (वा० ८. ३. ९७) इति षत्वम् । रथस्य कुटुम्बी वाहकः ॥

टीका० — रथकुटुम्बी सारथिः, तत्र नियन्त्रष्टकम् । अर्थात् सारथिनो रथकुटुम्बी च नाम । यमेस्तृचि नियन्ता । 'अज गतौ' । प्राजितृशब्दार्थे तृजन्ताद्[4] 'अजेर्व्यघञपोः' (२. ४. ५६) इति नित्यं वीभावे प्राप्ते 'वलादावार्धधातुके विकल्प इष्यते' (वा० २. ४. ५६) इति वीभावविकल्पः । 'वीभावपक्षे तु प्रवेता इत्यपी'ति वृत्तिः । 'षू प्रेरणे' । क्तः । सूतः । क्षदेः सौत्रात् 'तृन्तृचौ शंसिक्षदादिभ्यः[5] संज्ञायां चानिटौ' (उ० २. ९४) इति तृच् । क्षत्ता । सव्ये तिष्ठतीति सव्येष्ठा । 'दिवेर्ऋन्' (उ० २. ९९) 'नयेर्डिच्च' (उ० २. १००) इति चानुवृत्तौ 'सव्ये स्थश्छन्दसि' (उ० २. १०१) इति सव्यशब्दे उपपदे तिष्ठतेर्धातोः ऋन् । डित्वाट्टिलोपः । 'अम्बाम्ब—'(८. ३. ९७) इत्यादिना षत्वम् । 'हलदन्तात्—' (६. ३. ९) इति सप्तम्या अलुक् । 'सव्येष्ठा दक्षिणस्थश्चे'ति त्रिकाण्डपाठाद् भाषायां साधुरिति विनीतकीर्त्तिः । अम्बाम्बगोभूम्यादौ 'स्थास्थिन्स्थृणाम्—'(वा० ८. ३. ९७) इत्यस्य सर्वसम्मतत्वाभावादमरमालायामदन्तोऽयम् । तथाच —

"सूतः क्षत्ता नियन्ता च यन्ता सव्येष्ठ एव च"

इति ॥

रथिनः स्यन्दनारोहाः

क्षीर० — रथयोद्धारः ॥

---

१. 'ति नियन्ता' ख. पाठः. २. 'त्यं सारथिः । सा', ३. 'वा सारथिः । स' क. पाठः. ४. 'द् अजे' क. ख. ङ. छ. पाठः. ५. 'सिशंसिशासिक्ष' क. ख. ङ. च. छ. पाठः.

टीका०—रथिद्वयं रथयोधे ॥

अश्वारोहास्तु सादिनः।

क्षीर०—अश्ववाराख्याः। सीदन्त्यवश्यं सादिनः ॥

टीका०—अश्वारोहद्वयमश्वचारे। सदेर्णिनिः, सादी। 'सादी सूताश्वचारयोः' इति दन्त्यादावजयः ॥

भटा योधाश्च योद्धारः

क्षीर०—भटन्ति काङ्क्षन्ति युद्धं भटाः। युध्यन्ते योधाः। पचाद्यच् ॥

टीका०—भटत्रयं सामान्ययोद्धृपुरुषे। 'भट भृतौ'। पचाद्यच्। भटः। 'युध सम्प्रहारे'। पचादिः। योधः। तृचि योद्धा ॥

सेनारक्षास्तु सैनिकाः ॥ ६१ ॥

क्षीर०—'रक्षति' (४. ४. ३३) इति ठक्। प्राहरिकाद्याः ॥

टीका०—सेनारक्षद्वयं सेनारक्ष(प्र ?प्रा)हरिकादौ। 'रक्षति' (४. ४. ३३) इति ठक्। सैनिकः ॥

सेनायां समवेता ये सैन्यास्ते सैनिकाश्च ते।

क्षीर०—सेनां समवयन्ति श्लिष्यन्ति। 'सेनाया वा' (४. ४. ४५) इति ण्यठकौ ॥

टीका०—सेनासमवेते अङ्गभूते हस्त्यश्वादौ सैन्यद्वयम्। 'सेनाया वा' (४. ४. ४९) इति ण्यठकौ ॥

बलिनो ये सहस्रेण[2] ते साहस्राः[3] सहस्रिणः ॥ ६२ ॥

क्षीर०—बलं सैन्यम्। सहस्रं योद्धारः सन्त्यस्य। 'तपःसहस्राभ्यां विनीनी' (५. २. १०२)। 'अण् च' (५. २. १०३) ॥

१. 'धाः योद्धारश्च। प' ग. घ. ङ. पाठः. २. 'ण सा', 'स्रास्ते स' ख. पाठः.

टीका०—सहस्रा[1]श्वादेर्बलस्य स्वामिनि सेनापतौ साहस्रद्वयम्। 'अण् च' (५. २. १०३) इत्यण्। साहस्रः। 'तपःसहस्राभ्यां विनीनी' (५. २. १०२) इति इनिः। सहस्री ॥

परिधिस्थः परिचरः ·

क्षीर०—परिधौ सेना[2]प्रान्ते तिष्ठति परिधिस्थः। परितः समन्तात् चरति रक्षितुं परिचरः ॥

टीका०—परिधिस्थद्वयं युद्धकाले प्रहारादिभ्यो यो रक्षति तत्र। प्रयाणकाले सामन्तस्य स्थापनकारिणीत्यन्यः। सेनाया राज्ञो दण्डनायक इत्यन्यः। चेररच्। परिचरः ॥

सेनानीर्वाहिनीपतिः।

क्षीर०—सेनां नयति नियुङ्क्ते सेनानीः ॥

टीका०—सेनानीद्वयं सेनापतौ। कार्त्तिकेये सेनानीरुक्तः ॥

कञ्चुको वारबाणोऽस्त्री

क्षीर०—कञ्च्यते बध्यते कञ्चुकः। वारमाच्छादकं वानमस्य वारबाणम्। 'पूर्वपदात् संज्ञायाम्—' (८. ४. ३) इति णत्वम्। बाणवारस्य व्यत्ययो मयूरव्यंसकादित्वादिति श्रीभोजः ॥

टीका०—कञ्चुकद्वयं भौ[3]ट्टिकादौ चोळ[4]काकृतिसन्नाहे। 'कचि दीप्तिबन्धनयोः'। 'भृकणिभ्यामूकोकणौ' (उ० ४. ३९) इति बाहुलक उकण्। कञ्चुकः। बाणं वारयतीति पृषोदरादित्वाद् वर्णविपर्ययेण वारबाणः ॥

यत्तु मध्ये सकञ्चुकाः।

बध्नन्ति तत् सारसनमधिकाङ्गः

---

१. 'स्रस्याश्वा' ख. ङ. छ. पाठः. २. 'नान्ते' ग. घ. ङ. पाठः. ३. 'भाडिका' ङ. पाठः. ४. 'काकौकृ' ज., 'काकाकृ' क. ख. पाठः.

क्षीर०—सारं सनोति ददाति सारसनम् । अधिकमङ्गादधिकाङ्गः । सारसनाधिपाङ्गे इत्येके पेठुः[१] । यन्दुनिः—'अधिपाङ्गं सारसनम्' । * शुद्रस्तु—

"तस्य सारसनं ज्ञेयमधियाङ्गं निवन्धनम्" ॥

टीका०—सकञ्चुकाः पुरुषाः काण्डाघनादिनिवृत्त्यर्थं (?) हृदयमध्ये यद् दृढार्थं बध्नन्ति पट्टकर्णिकादिकं, तत्र सारसनद्वयम् ।

"भवेत् सारसनं काञ्च्यामुरःस्थेऽपि निगद्यते"

इति दन्त्यादावजयः । 'अधिकाङ्गं सारसनम्' इत्यमरमालायाम् आर्यापाठादधिकाङ्गं ह्रस्वादि ॥

अथ शीर्षकम् ।

शीर्षण्यं च शिरस्त्रे

क्षीर०—शीर्षप्रतिकृतिः शीर्षकम् । शिरसि भवं शीर्षण्यम् । 'शरीरावयवाद् यत्' (५. १. ६), 'शीर्षश्छन्दसि' (६. १. ६०), 'ये च तद्धिते' (६. १. ६१) । शिरस्त्रायते शिरस्त्रम् ॥

टीका०—शीर्षकत्रयं टोपर इति ख्याते । शीर्षं शिरो रक्षति त्रायत इति शीर्षकम् । 'कुमारशीर्षयोर्णिनिः' (३. २. ५१) इति निपातनाद् अकारान्ताच्छिरःशब्दपर्यायात् शीर्षशब्दात् 'प्रातिपदिकाद् धात्वर्थे णिज्बहुलमिष्ठवच्च' (ग० ३. १. २६) इति णिचि ण्वुल् । शिरसे हितं शीर्षण्यम् । 'शरीरावयवाद्यत्' (५. १. ६) । 'ये च तद्धिते' (६. १. ६१) इति शीर्षन्नादेशः । 'ये चाभावकर्मणोः' (६. ४. १६८) इति प्रकृतिभावः । शिरस्त्रायत इति शिरस्त्रम् ॥

---

१. 'त्यपरे पे', २. 'या' ग. घ. ङ. पाठः. ३. 'लि', ४. 'न्ति त' ख. पाठः.

---

* 'दुर्गस्तु—तस्य सारसनं ज्ञेय धिपाङ्गं च निवन्धनम् । इति' इति भानुजिः ।

अथ तनुत्रं वर्म दंसनम् ॥ ६४ ॥

उरश्छदः कङ्कटको जगरः कवचोऽस्त्रियाम् ।

क्षीर० — वृणोत्यङ्गं वर्म । दंस्यते बध्यते दंसनम् । कङ्कटत्याच्छादयति कङ्कते वा कङ्कटकः । जागर्तेरचि ह्रस्वाज्जगरः । यन्माला — 'उरश्छदो जगरः' । कवते कवचः, कं वञ्चति वा ॥

टीका० — तनुत्रसप्तकं सन्नाहे । शिरस्त्रवत् तनुत्रम् । वृञो मनिन् । वर्म । दंशेर्ल्युटि दंशनम् । उरश्छादयत्यनेनेत्युरश्छदः । 'छादेर्घेऽद्व्युपसर्गस्य' (६. ४. ९६) इति ह्रस्वः । 'ककि लौल्ये' । 'शकादिभ्योऽटन्' (उ० ४. ८२) । कङ्कटः । ततः कन् । जगरः । चवर्गादिः ।

"जगरः कङ्कटो योगः सन्नाहः स्यादुरश्छदः"

इति वोपालितः ॥

आमुक्तः प्रतिमुक्तश्च पिनद्धश्चापिनद्धवत् ॥ ६५ ॥

क्षीर० — आमुच्यते, प्रतिमुच्यते, अपिनह्यते बध्यते स्म । पिनद्धः ।

"वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः"

इति पक्षे अल्लोपः ॥

टीका० — परिहिते वस्त्रादौ आमुक्तचतुष्कम् । 'मुच्लृ मोक्षणे' । क्तः । आमुक्तप्रतिमुक्तौ । 'णह बन्धने' ।

"वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः"

इत्यल्लोपः । 'नहो धः' (८. २. ३४) इति धः । पिनद्धः । यथापिनद्धः परिहितकर्पटे, तथा पिनद्धोऽपीति वच्छब्दार्थः ॥

सन्नद्धो वर्मितः सज्जो दंसितो व्यूढकङ्कटः ।

क्षीर० — सन्नह्यति स्म सन्नद्धः । वर्म सञ्जातमस्य वर्मितः ।

सञ्जायते सज्जति वा सज्जः । व्यूढो धृतः कङ्कटो येन सः व्यूढकङ्कटः ॥

टीका० — सन्नद्धपञ्चकं कृतसन्नाहे[1] । पिनद्धवत् सन्नद्धः । 'सत्यापपाश—' (३. १. २५) इति णिजन्तात् क्तः । वर्मितः[2] । 'षस्ज गतौ' । पचाद्यच् । सज्जः । दंशेः क्तः । दंशितः ॥

त्रिष्वामुक्तादयः

क्षीर० — नवेत्यर्थः ॥

टीका० — आमुक्तादयो[3] व्यूढकङ्कटान्तास्त्रिषु ॥

वर्मभृतां कावचिकं गणे ॥ ६६ ॥

क्षीर० — कवचिनां समूहः कावचिकम् । 'ठञ् कवचिनश्च' (४. २. ४१) इति ठञ् ॥

टीका० — वर्मभृतां[4] गणे कावचिकम् । 'ठञ् कवचिनश्च' (४. २. ४१) इति ठञ् । 'नस्तद्धिते' (६. ४. १४४) इति टिलोपः ॥

पदातिपत्तिपदगपादातिकपदाजयः ।
पद्गश्च पदिकश्च

क्षीर० — पादाभ्यामतति गच्छति पदातिः । पादाभ्यामजति पदाजिः । 'पादस्य पदाज्यातिगोपहतेषु' (६. ३. ५२) इति पदभावः । हलन्तपक्षे पद्गः । यल्लक्ष्यं — 'पद्गा भरद्वाजमुनिं सशिष्यम्' (भट्टि० स० ३. श्लो० ४१) । पादाभ्यामतति पादातिकः । औणादिक इकः । वि-

---

१. 'हे । अपि' ञ. पाठः.　२. 'वर्मितदंशितौ तारकादीतजन्तौ । 'षस्ज गतौ' । अर्जे सर्जे व्यूढकङ्कटो बहुव्रीहिः ॥ आ' ङ. छ. पाठः.　३. 'दिव्यूढ',　४. 'कवचिनां समूहे का' ञ. पाठः.

नयादित्वात् स्वार्थे ठग्वा। पतति पत्तिः। पादाभ्यां चरति पदिकः। पर्पादित्वात् ष्ठन्। इके चरतौ वक्तव्यात् पादिकः॥

टीका०—पदातिस्तकं पादातीके। 'अत सातत्यगमने'। 'अज्यतिभ्यां च' (उ० ४. १३२) इत्यनुवृत्तौ 'पादे च' (उ० ४. १३३) इति पादोपपदे इण्। 'पादस्य पदाज्याति—' (६. ३. ५२) इति पदादेशोऽदन्तः। पदातिः। 'पदेर्तित्' इति पत्तिः। पादाभ्यां गच्छतीति पदगः। पूर्ववत् पदादेशः। पादातमस्यास्तीति पादातिकः। 'अत इनिठनौ' (५. २. ११५) इति ठन्। पदाजिरिति। 'पादस्य पदाज्याति—' (६. ३. ५२) इति निपातनाद् अजेर्न वीभावः। पादसमानाद्धलन्तात् पच्छब्दात् पद्गः। पद्भ्यां चरतीति पदिकः। 'पर्पादिभ्यः ष्ठन्' (४. ४. १०)। 'इके चरतावुपसंख्यानम्' (वा० ६. ३. ५३) इति पद्भावः॥

अथ पादातं पत्तिसंहतिः॥ ६७॥

क्षीर०— पदातीनां समूहः पादातम्। 'भिक्षादिभ्योऽण्' (४. २. ३८)॥

टीका०—पदातिसमूहे पादातम्। 'भिक्षादिभ्योऽण्' (४. २. ३८)॥

शस्त्राजीवे काण्डपृष्ठायुधीयायुधिकाः समाः।

क्षीर०—काण्डानि पृष्ठेऽस्य काण्डपृष्ठः। आयुधेन जीवति। 'आयुधाच्छ च' (४. ४. १४) इति ठञ्छौ॥

टीका०—शस्त्राजीवचतुष्कं यः शस्त्रं विधार्यावलगति, तत्र। वाहिताग्न्यादित्वात् काण्डस्पृष्टः स्पृष्टकाण्डः। तेन जीवतीत्यर्थे 'आयुधाच्छ च' (४. ४. १४) इति छठञौ। आयुधीयायुधिकौ॥

---

१. 'तौ पद् त्र' ख. पाठः. २. 'ति निपातनादजेर्न वीभावः। प' ञ. पाठः. ३. 'शः। प' क. पाठः. ४. 'ति पदादेशः। पाद' ख. ग. ङ. छ. पाठः.

कृतहस्तः सुप्रयोगविशिखः[1] कृतपुङ्खवत् ॥ ६८ ॥

क्षीर० — कृतौ सिद्धौ हस्तावस्य कृतहस्तः। कृताः पुङ्खा अनेन कृतपुङ्खः ॥

टीका० — सुप्रयुक्तकाण्डे पुरुषे कृतहस्तत्रयम्। कृतोऽभ्यस्तो हस्तो येन स कृतहस्तः। सुप्रयोगविशिखोऽपि बहुव्रीहिः। कृतपुङ्खवदित्यत्र कृतशब्दो गृहीतवाची। यथा — 'अकृतव्यूहाः पाणिनीयाः', 'कृतमपि शास्त्रं निवर्तयन्ति'। अत्र हि अकृतव्यूहा अगृहीतशास्त्रा इति परिभाषावृत्तिकारैरुक्तम्। कृतपुङ्खवत् कृतपुङ्ख इव सुप्रयोगविशिख इति वच्छब्दस्यार्थः ॥

अपराद्धपृषत्कोऽसौ लक्षाद् यश्च्युतसायकः।

क्षीर० — अपराद्धा अलब्धलक्षा बाणा अस्य अपराद्धपृषत्कः ॥

टीका० — लक्षात् च्युतः सायको बाणो यस्यासावपराद्धपृषत्कः। राधेः क्तः। अपराद्धः। अपराध्यो यकारान्त इति केचित्। अपराद्धः अशोभनः पृषत्कोऽस्येति बहुव्रीहिः ॥

धन्वी धनुष्मान् धानुष्को निषङ्ग्यस्त्री धनुर्धरः ॥ ६९ ॥

क्षीर० — धन्वास्यास्तीति धन्वी। व्रीह्यादित्वादिनिः। धनुः प्रहरणमस्य धानुष्कः। तदस्य प्रहरणमिति ठक्। निषङ्गस्तूणोऽस्यास्तीति निषङ्गी। अस्त्राणि सन्त्यस्य अस्त्री ॥

टीका० — धन्विषट्कं धानुष्के। धनुस्समानार्थाद्धन्वन्शब्दाद् व्रीह्यादित्वादिनिः। धन्वी। धनुष्मान् मत्वन्तः। धनुः प्रहरणमस्येति धानुष्कः। 'प्रहरणम्' (४. ४. ५७) इति ठक्। निषङ्गोऽस्त्रं तूणोऽपि[2]। 'स्याच्चापायुधयोरस्त्रम्' इति रभसः। तद्योगादुभयत्र इनिः ॥

---

१. 'खे' ख. पाठः. २. 'णः। स्या' ग. पाठः.

स्यात् काण्डवांस्तु काण्डीरः

क्षीर० — 'काण्डाण्डादीरन्नीरचौ' (५. २. १११) ॥

टीका०— काण्डवद्द्वयं काण्डधरे । उपाधिभेदाद् भेदः । काण्ड एव केवलो यस्यास्तमिति । अस्यैव वा नामद्वयम् । 'काण्डाण्डादीरन्नीरचौ' (५. २. १११) । काण्डीरः ॥

शाक्तीकः शक्तिहेतिकः ।

क्षीर० — शक्तिः प्रहरणमस्य शाक्तीकः । 'शक्तियष्ट्योरीकक्' (४. ४. ५९) ॥

याष्टीकपारश्वधिकौ यष्टिपार्श्वधहेतिकौ ॥ ७० ॥

क्षीर० — पार्श्वधः परशौ न दृष्टः । अतो 'यष्टिस्वधितिहेतिकौ' इति कश्मीराः पठन्ति । यन्मुनिः — 'परश्वधः कुठारश्च स्वधितिः' । तदस्य प्रहरणम् । 'परश्वधाट्ठञ्च' (४. ४. ५८) ॥

नैस्त्रिंशिकोऽसिहेतिः स्यात्

क्षीर० — निस्त्रिंशोऽसिः प्रहरणमस्य नैस्त्रिंशिकः ॥

टीका० — शक्त्यादिको हेतिः प्रहरणं येषां ते शाक्तीकयाष्टीकपारश्वधिकनैस्त्रिंशिकाः । यथाक्रमं 'शक्तियष्ट्योरीकक्' (४. ४. ५९) 'परश्वधाट्ठञ्च' (४. ४. ५८) 'प्रहरणम्' (४. ४. ५७) इति ठक् ॥

समौ प्रासिककौन्तिकौ ।

क्षीर० — प्रासः कुन्तश्च प्रहरणमस्य ॥

टीका० — प्रासिकद्वयं कुन्तकरे । पूर्ववत् ठक् ॥

चर्मी फलकपाणिः स्यात्

क्षीर० — चर्म[1] फलकोऽस्यास्तीति चर्मी। फलति विशीर्यते घातैः फलकः। रलयोरैक्यात् फरकोऽपि ॥

टीका० — चर्मिद्वयं फलकपाणौ। चर्मी व्रीह्यादिः ॥

पताकी वैजयन्तिकः ॥ ७१ ॥

क्षीर० — वैजयन्त्या चरति वैजयन्तिकः। 'चरति' (४. ४. ८) इति ठक् ॥

टीका० — पताकि[3]द्वयं पताकायुक्ते। व्रीह्यादित्वादिनिः। पताकी। 'चरति'· (४. ४. ८) इति ठक्। वैजयन्तिकः ॥

अनुप्लवः सहायश्चानुचरोऽभिचरः समाः।

क्षीर० — अनु पश्चात् प्लवते अनुप्लवः। सह अयते सहायः ॥

टीका० — अनुप्लवचतुष्कं सहाये[4] वाच्छियाण[5] इति ख्याते। सर्वे पचाद्यजन्ताः। सह अयते गच्छतीति[6] सहायः। अन्वभिशब्दौ पश्चादर्थे ॥

पुरोगाग्रेसरप्रष्ठाग्रतःसरपुरःसराः ॥ ७२ ॥

पुरोगमः पुरोगामी

क्षीर० — पुरो गच्छतीति पुरोगः। गमश्च (इति?) डः। अग्रे सरत्यग्रेसरः। 'पुरोऽग्रतोऽग्रेषु सर्तेः' (३. २. १८)। टः। प्रतिष्ठते प्रष्ठः। 'प्रष्ठोऽग्रगामिनि' (८. ३. ९२) इति साधुः ॥

टीका० — अग्रगामिनि पादातिकादौ पुरोगसप्तकम्। 'अन्येष्वपि —' (३. २. १०१) इति डः। पुरोगः। 'पुरोऽग्रतोऽग्रेषु सर्तेः (३. २. १८) इति टः। पुरःसराग्रेसराग्रतःसराः। 'प्रष्ठोऽग्रगामिनि' (८. ३. ९२) इति निपा-

---

१. 'र्मा' ख. पाठः. २. 'पुरोऽस्या' ग. घ. ङ. पाठः. ३. 'कायुक्ते पताकी।' क. ग. पाठः. ४. 'ये। स' ञ. पाठः. ५. 'पाजिया' ख. पाठः. ६. 'उच्छति' घ. पाठः.

तनात् प्रष्ठः। 'गमश्च' (३. २. ४७) इति खचि पुरोगमः। अव्ययत्वान्नुमभावः। णिनौ पुरोगामी ॥

मन्दगामी तु मन्थरः।

क्षीर०—मथ्नाति पादौ मन्थरः ॥

टीका०—मन्दगामिद्वयं **मन्दगमनशीले** ताच्छीलिकणिनौ मन्दगामी। 'मन्थ विलोडने'। 'ऋच्छेररन्' (उ० ३. १३१) इति बाहुलकोऽरन्। मन्थरः ॥

जङ्घालोऽतिजवः

क्षीर०—जङ्घे स्तोऽस्य जङ्घालः ॥

टीका०—**अतिवेगवति** जङ्घालद्वयम्। 'प्राणिस्थादातो लजन्यतरस्याम्' (५. २. ९६) इति लच्। जङ्घालः। अतिशयितो जवो वेगो यस्य सोऽतिजवः ॥

तुल्यौ जङ्घाकरिकजाङ्घिकौ ॥ ७३ ॥

क्षीर०—जङ्घा एव करो राजदेयोंऽशोऽस्त्यस्य जङ्घाकरिकः। जङ्घाभ्यां जीवति जाङ्घिकः ॥

टीका०—जङ्घाकरिकद्वयं **जङ्घाजीविनि धावकादौ**। जङ्घैव करी यस्येति व्युत्पत्त्या संज्ञायां कनि जङ्घाकरिक इति केश्चित्[1]। करो राजदेयः। जङ्घैव करो जङ्घाकरः। तद्योगाद् मत्वर्थठनि जङ्घाकरिक इत्यपरः। 'जीवति' इति ठकि जाङ्घिकः ॥

तरस्वी त्वरितो वेगी प्रजवी जवनो जवः।

क्षीर०—तरोऽस्यास्ति तरस्वी। 'अस्मायामेधा—' (५. २. १२१) इति विनिः। त्वरते स्म त्वरितः। प्रजवते प्रजवी। 'प्रजोरिनिः'

१. 'केचित्' ग. पाठः.

(३. २. १५६) । जवते तच्छीलो जवनः । 'जुचङ्क्रम्य—' (३. २. १५०) इति युच् । जवते जवः । पचाद्यच् ॥

टीका० — वेगवन्मात्रे तरस्विषट्कम् । 'अस्मायामेधास्रजो विनिः' (५. २. १२१) । तरस्वी । त्वरितजवयोः अर्शआद्यच् । वेगयोगाद् वेगी । जुः सौत्रो धातुः । चवर्गादिः । 'प्रजोरिनिः' (३. २. १५६) इति प्रजवी । जुचङ्क्रम्यादियुचि जवनः ॥

जय्यो यः शक्यते जेतुं

क्षीर० — 'क्षय्यजय्यौ शक्यार्थे' (६. १. ८१) इति साधुः ॥

टीका० — अवश्यं जेतुं शक्यो जय्यः । 'शकि लिङ् च' (३. ३. १७२) इति शक्तोत्यर्थे वर्तमानाद् धातोर्लिङ्कृत्यानां विधानाद् 'अचो यत्' (३. १. ९७) इति यत् । 'क्षय्यजय्यौ शक्यार्थे' (६. १. ८१) इत्ययादेश-निपातनाद् जय्यः ॥

जेयो जेतव्यमात्रके ॥ ७४ ॥

क्षीर० — शक्यादन्यत्रेत्यर्थः ॥

टीका० — योग्यतामात्रेण जयनीये जेयः । 'अचो यत्' (३. १. ९७) ॥

जैत्रस्तु जेता

क्षीर० — जेतैव जैत्रः । तृन्नन्तात् प्रज्ञादित्वादण् । जेतुरयं वा । फलितं[२] तुल्यार्थत्वम् ॥

टीका० — जेतृमात्रे जैत्रद्वयम् । जयशीले तु 'जेता जिष्णुश्च जित्वर' इति वक्ष्यति । जेतृशब्दात् प्रज्ञाद्यणि जैत्रः । तृचि जेता ॥

यो गच्छत्यलं विद्विषतः प्रति ।

१. 'म्येत्यादि' ज. पाठः.　२. 'लतस्तुल्या' ख. पाठः.

स्यादभ्यमित्रोऽभ्यमित्रीयोऽप्यभ्यमित्रीण इत्यपि ॥ ७५॥

क्षीर० — आभिमुख्येनामित्रानलङ्गामी। 'अध्वनो यत्खौ' (५. २. १६) 'अभ्यमित्राच्छ च' (५. २. १७) इति छो यत्खौ च ॥

टीका० — विपक्षाभिमुखमत्यन्तगन्तरि अभ्यमित्र्यत्रयम्। 'अध्वनो यत्खौ' (५. २. १६) इत्यनुवर्तमाने 'अभ्यमित्राच्छ च' (५. २. १७) इति छयत्खप्रत्ययाः ॥

ऊर्जस्वलः स्यादूर्जस्वी य ऊर्जातिशयान्वितः।

क्षीर० — ऊर्ज[1] ऊर्जा वास्त्यस्येति 'ज्योत्स्नातमिस्रा—' (५. २. ११४) इति साधुः। ऊर्जो[2] (नदिस? नास)न्तं मन्यते। अन्यथा ऊर्जस्वीति निपातनं व्यर्थं स्यात्। 'अस्मायामेधास्रजो विनिः' (५. २. १२१) इति विधिना सिद्धत्वात् ॥

टीका० — अतिशयितबलयुक्ते अतिशयितपराक्रमयुक्ते वा ऊर्जस्वलद्वयम्। 'ज्योत्स्नातमिस्रा —' (५. २. ११४) इत्यादिना निपातितौ ॥

स्यादुरस्वानुरसिलः

क्षीर० — उरसा बलं लक्ष्यते। तदस्यास्ति। पिच्छादित्वादिलच् ॥

टीका० — अतिशयितोरसि उरस्वद्द्वयम्। मतुपि 'झयः' (?) (८. २. १०) इति वत्वे उरस्वान्। पिच्छादीलचि उरसिलः ॥

रथिको रथिरो रथी ॥ ७६ ॥

क्षीर० — रथोऽस्यास्ति रथिकः। 'अत इनिठनौ' (५. २. ११५)। 'मघारथाभ्यामिरन्निरचौ' (वा० ५. २. १०९)। रथिन इत्यपपाठः ॥

टीका० — रथस्वामिनि राजादौ रथिकत्रयम्। 'अत इनिठनौ'

---

१. 'ऊर्जमस्यास्तीति' क. च. पाठः. २. 'ऊर्जोऽस' क. ग. घ. पाठः.

(५. २. ११५)। रथिकरथिनौ। 'मेधारथाभ्यामिरन्निरचौ वक्तव्यौ' (वा० ५. २. १०९) इति मत्वर्थे इरच्। रथिरः॥[1]

कामंगाम्यनुकामीनो ह्नि

क्षीर०—अनुकामं यथेच्छं गामी अनुकामीनः। 'अत्यारपारात्यन्तानुकामं गामी' (५. २. ११) इति खः॥

टीका०—कामंगामी यथेष्टगमनशीलः। स्वेच्छाप्रवृत्तिरनुकामीनः। 'अवारपारात्यन्तानुकामं गामी' (५. २. ११) इति खः॥

अत्यन्तीनस्तथा भृशम्।

क्षीर०—अत्यन्तं भृशं कृत्वा गामीत्यत्यन्तीनः। भृशं गन्तेत्यर्थः।[2] पूर्ववत् खः॥

टीका०—अत्यन्तगमनशीले अत्यन्तीनः। पूर्ववत् खः॥

शूरो वीरश्च विक्रान्तः

क्षीर०—शूरयते वीरयते शूरवीरौ। विक्रमते उत्सहते स्म विक्रान्तः॥

टीका०—शूरत्रयं शूरे। 'शूर वीर विक्रान्तौ'। चुरादिः। पचादिः। सूर्यनाम्न्यशत्वमपि निरूपितम्। क्रमेः क्तः। क्रान्तः॥

जेता जिष्णुश्च जित्वरः॥ ७७॥

क्षीर०—जेतुं शील इति तृन्।[3] 'ग्लाजिस्थश्च क्स्नुः' (३. २. १३९)। 'इण्नशिजिसर्त्तिभ्यः क्वरप्' (३. २. १६३)॥

टीका०—जयनशीले जेतृत्रयम्। जयतेस्तृचि जेता। 'ग्लाजिस्थश्च क्स्नुः' (३. २. १३९)। जिष्णुः। इत्वरवज्जित्वरः॥

सांयुगीनो रणे साधुः

---

१. 'मी', २. 'गच्छतीति अ' क. पाठः. ३. 'जेतुं शी' ख. पाठः.

क्षीर० — संयुगे साधुः सांयुगीनः । 'प्रतिजनादिभ्यः खञ्' (४. ४. ९९) ॥

टीका० — [illegible] सांयुगीनः । 'प्रतिजनादिभ्यः खञ्' (४. ४. ९९) इति खञ् ॥

शस्त्राजीवादयस्त्रिषु ।

क्षीर० — वाच्यलिङ्गत्वात् ॥

टीका० — पूर्वोक्ताः शस्त्राजीवादयः सांयुगीनान्तास्त्रिषु ॥

ध्वजिनी वाहिनी सेना पृतनानीकिनी चमूः ॥ ७८ ॥

वरूथिनी बलं सैन्यं चक्रं चानीकमस्त्रियाम् ।

क्षीर० — वाहाः सन्त्यस्यां वाहिनी । सिनोति सेना, सह इनेन वर्तते वा । ध्रियते पृतना । 'पृङ् व्यायामे' । चमत्यरीन् चमूः । वरूथो रथगुप्तिरस्त्यस्यां वरूथिनी । बलति प्राणिति बलम् । सेनैव सैन्यम् । चातुर्वर्ण्यादित्वात् ष्यञ् । करोति चकते वा चक्रम् । अनित्यनीकं, न नीयते वा । सैन्यैकदेशोऽयम् ॥

टीका० — ध्वजिनीसप्तकं सेनायाम् । तत्र वाहिनी पृतना अनीकिनी चमूरिति [illegible] सेनाभेदेऽपि वक्ष्यति । पताकाहयबलरथगुप्तीनां योगाद् [illegible] । 'कृवृजॄसिद्रुपन्यनिस्वपिभ्यो नित्' (उ० ३. १०) इति नः । सेना । 'कृषिचमितनि —' (उ० १. ८४) इत्यादिना ऊः । चमूः । [illegible] सामान्येन सेनाङ्गे । बलचक्रशब्दौ उक्तौ । सेनैव सैन्यम् । [illegible] ॥

व्यूहस्तु बलविन्यासः

---

१. [illegible]

क्षीर० — व्यूह्यते रच्यते व्यूहः ॥

टीका० — यथोक्तदेशे बलविन्यासो विभज्य स्थापनं व्यूहः । 'ऊह वितर्के' । घञ् ॥

भेदा दण्डादयो युधि ॥ ७९ ॥

क्षीर० — व्यूहस्येति शेषः । यदाहुः —

"दण्डो मण्डलभोगौ चाप्युत्पन्नश्चासंहतः ।
व्यूहास्तेषां विशेषाः स्युश्चक्रव्यूहादयोऽपि च" ॥

टीका० — दण्डभोगमण्डलासंहताश्चत्वारः प्रकृतिव्यूहभेदाः । तत्रानीकानां तिर्यग्वृत्तिर्दण्डः । समस्तानामन्वावृत्तिरन्योन्यमतावृत्तिर्भोगः । मण्डलश्च नया सरतामनीकानां सर्वतोवृत्तिः सर्पशरीरवन्मण्डलः । स्थितानामितरेतरसंहतानां विशिष्टतराणामनीकानां पृथग्वृत्तिरसंहतः । तथाच कामन्दकः —

"तिर्यग्वृत्तिस्तु दण्डः स्याद् भोगोऽन्वावृत्तिरेव च ।
मण्डलः सर्वतोवृत्तिः पृथग्वृत्तिरसंहतः ॥"

इति । तत्रापि प्रदरदृढकादयः सप्तदश दण्डभेदाः । गोमूत्रिकाहिंसकसञ्चारिकशकट(नरक ? मकर)पतन्तकाः पञ्च भोगभेदाः । सर्वतोभद्रदुर्जयौ मण्डलभेदौ । अर्धचन्द्रकोद्यानादयः षडसंहतभेदाः ॥

प्रत्यासारो व्यूहपार्ष्णिः

क्षीर० — प्रत्यासरति भेत्तान् प्रत्यासारः । 'सृ स्थिरे' (३. ३. १७) इति घञ् । पार्ष्णिः पश्चाद्भागः ॥

टीका० — व्यूहसमवेत एव व्यूहस्य पश्चाद्भागे व्यूहान्तरे वा प्रत्यासारद्वयम् । सर्तेर्घञ् । प्रत्यासारः ॥

सैन्यपृष्ठे प्रतिग्रहः ।

---

१. 'च व्युत्पन्न' क. पाठः. २. 'तु' ज. पाठः. ३. 'तिर्यग्वृ' ख. पाठः. ४. 'कि:', ५. 'ना' ज. पाठः. ६. 'भागान्' ग. घ. पाठः.

क्षीर० —प्रतिगृह्यतेऽवष्टभ्यतेऽनेन सैन्यम् ॥

टीका० — यत्र स्थितो राजा स्वसैन्यं प्रतिगृह्णाति, तत्सैन्यस्य पश्चाद् धनुःशतद्वयान्तरे स्थितं भिन्नसङ्घातमनीकं प्रतिग्रहः परिग्रहो वा । ग्रहेरप् ॥

एकेभैकरथा त्र्यश्वा पत्तिः पञ्चपदातिका ॥ ८० ॥

क्षीर० —पतति पत्तिः सेनाङ्गम् । यद् भारतम् —

"एको रथो गजश्चैको नराः पञ्च पदातयः ।
त्रयश्च तुरगास्तज्ज्ञैः पत्तिरित्यभिधीयते" ॥

टीका० — पत्तिनवकं प्रत्येकं सेनाविशेषे । तत्र त्रिभिरश्वैर्गजेनैकेन रथेन पदातिभिः पञ्चभिः पत्तिर्नाम सेनान्तरम् ॥

पत्त्यङ्गैस्त्रिगुणैः सर्वैः क्रमादाख्या यथोत्तरम् ।
सेनामुखं गुल्मगणौ वाहिनी पृतना चमूः ॥ ८१ ॥
अनीकिनी

क्षीर०—पत्तिस्त्रिगुणा सेनामुखम् । तत्त्रिगुणं गुडति गुल्मः । तत्त्रिगुणो गण्यते गणः । एवमुत्तरोत्तरं क्रमात् त्रिगुणम् ॥

टीका० — पत्त्यङ्गैश्च सर्वैर्गजादिभिर्यथापूर्वं त्रिगुणैः तथोक्तक्रमेण सेनामुखादयो भवन्ति । एतदुक्तं भवति — तिस्रः पत्तयः सेनामुखम् । त्रिभिः सेनामुखैर्गुल्मः । गुल्मत्रयेण गणः । त्रयो गणा वाहिनी । वाहिनीत्रयं पृतना । पृतनात्रयं चमूः । चमूत्रयमनीकिनी ॥

दशानीकिन्यक्षौहिणी

क्षीर० — अक्षाणां रथकाष्ठानाम् ऊहोऽस्त्यस्याः । अक्षादूहिन्यां वृद्धिश्च ॥

---

१. 'त्र्' क. छ. पाठः. २. 'नरश्चैको नागाः प' ख. पाठः.

टीका० — अक्षौहिण्यां न त्रैगुण्यं, किन्तु दशानीकिन्यो[1]ऽक्षौहिणी। अक्षो रथावयवः, तस्योहः, तद्योगान्मत्वर्थीय इनिः। 'ऋन्नेभ्यो ङीप्' (४. १. ५)। 'पूर्वपदात्—' (८. ४. ३) इत्यादिना णः। 'अक्षादूहिन्यां वृद्धिर्वक्तव्या'(वा० ६. १. ८९) इति वृद्धिः।

"अक्षौहिण्यामित्यधिकैः सप्तत्या त्वष्टभिः शतैः।
संयुक्ता[2]नि सहस्राणि रथानामेकविंशतिः॥
एवमेव गजानां तु संख्यानं कीर्तितं बुधैः।
पञ्चषष्टिसहस्राणि षट्शतानि दशैव तु॥
सङ्ख्यातास्तुरगास्तज्ज्ञैर्विना रथ्यैस्तुरङ्गमैः।"

रथसम्बन्धिनोऽश्वान् विहायेत्यर्थः।

"नृणां शतसहस्रं तु सहस्राणि नवैव तु॥
शतानि त्रीणि चान्यानि पञ्चाशच्च[3] पदातयः॥"

इति तदङ्केनाप्यक्षौहिणीसङ्ख्या यथा—गजरथौ (२१८७०), अश्वः (६५६१०) पदातिः (१०९३५०)॥

अथ सम्पदि।

सम्पत्तिः श्रीश्च लक्ष्मीश्च

क्षीर० — 'सम्पदादिभ्यो भावे क्विब् वक्तव्यः' (वा० ३. ३. १०८)। श्रयन्ति तां श्रीः। 'क्विब् वचि—' (उ० २. ६०) इति क्विब दीर्घश्च॥

टीका० — धनोत्कर्षः सम्पत्तिः, तत्र सम्पच्चतुष्कम्। 'सम्पदादिभ्यः क्विब् वक्तव्यः'। (वा० ३. ३. १०८)। सम्पत्। श्रीलक्ष्मीशब्दावुक्तौ। क्तिनि सम्पत्तिः॥

---

१ 'न्य' ङ. छ. पाठः. २. 'ता' ख. पाठः. ३. 'च प' ख. ङ. छ. पाठः.

विपत्त्यां विपदापदौ ॥ ८२ ॥

क्षीर० — विपत्तिर्दारिद्र्यम् ॥

टीका० — विपत्तित्रयं विपदि । पूर्ववत् ॥

आयुधं तु प्रहरणं शस्त्रमस्त्रम्

क्षीर० — आयुध्यन्तेऽनेनेत्यायुधम् । 'घञर्थे कविधानं स्थास्नागापाव्यधिहनियुध्यर्थम्' (वा० ३. ३. ५८) । शस्यतेऽनेन शस्त्रम् । 'दाम्नी —' (३. २. १८२) इति करणे ष्ट्रन् । अस्यतेऽस्त्रम् । हेतिर्नानार्थे ॥

टीका० — आयुधचतुष्कं शस्त्रमात्रे । 'घञर्थे कविधानम्' (वा० ३. ३. ५८) इति युध्यतेः कः । आयुधम् । 'शसु हिंसायाम्' । 'दाम्नीशस —' (३. २. १८२) इत्यादिना ष्ट्रन् । शस्त्रम् । 'असु क्षेपणे' । *'ष्ट्रन्' (उ० ४. १६०) इति ष्ट्रन् । अस्त्रम् । शस्त्रं, विना क्षेपेण घातकं खड्गादि, क्षेपणीयं शर(रा)द्यादि अस्त्रमिति केचिच्छस्त्रास्त्रयोर्भेदमाहुः । 'शस्त्रास्त्रैर्बहुधा मुक्तैरि'ति देवीमाहात्म्ये च ॥

अथास्त्रियौ ।

धनुश्चापौ धन्वशरासनकोदण्डकार्मुकम् ॥ ८३ ॥
इष्वासोऽपि

क्षीर० — धन्यते अर्थ्यते धनुः । अर्धर्चादिः । यल्लक्ष्यं — 'ततो धनुषमादाय' । चपस्य वेणोर्विकारश्चापम् । धनेः(इति?) कनिप् । शरा अस्यन्तेऽनेनेति शरासनम् । 'कुदि अनृतभाषणे' । अस्माद्दं अण्डन्, कुर्देर्वा रेफलोपे कोदण्डम् । कर्मणे प्रभवति कार्मुकम् । 'कर्मण उकञ्' (५. १. १०३) । इषवोऽस्यन्तेऽनेन इष्वासः । आसोऽपि ॥

टीका० — धनुःसप्तकं चापे । 'धन धान्ये' । 'अर्तिपृवपियजितनिधनित्रपिभ्यो नित्' (उ० २. ११७) इति उसिः । धनुः सान्तम् । 'भृमृशीतृचै-

१. 'प' ख. पाठः. २. 'स्यं' ख. पाठः. ३. 'न श' ख. ग. पाठः. ४. 'त्, कु' क. पाठः. ५. 'स' ख. पाठः.

* 'सर्वधातुभ्यः ष्ट्रन्' इति मुद्रितोणादिपाठः ।

रित्सरितनिधनिमिमस्जिभ्य उः' (उ० १. ७) इत्यनेन धनुरुदन्तोऽपीत्युणादिः। दीर्घान्तः स्त्रीलिङ्गः । तथाच — 'शरावापो धनूः स्त्री स्याद्' इति त्रिकाण्डशेषः। 'चप सान्त्वने' । भूवादौ पवर्गमध्ये पठितः। ततः पचाद्यच् । चपो वृक्षविशेषः। तस्य विकारश्चापः । धन्वचतुष्कं क्लीबम् । तत्र धन्व नान्तम् । 'कर्मण उकञ्' (५. १. १०३) । कार्मुकम् । इष्वासो मूर्धन्यमध्यो दन्त्यान्तः ॥

अथ कर्णस्य कालपृष्ठं शरासनम् ।
कपिध्वजस्य गाण्डीवगाण्डिवौ पुन्नपुंसके ॥ ८४ ॥

क्षीर० — गाण्डिः पर्वास्यास्तीति गाण्डीवम् । 'गाण्ड्यजगात् संज्ञायाम्' (५. २. ११०) इति वः । गाण्डिरिदन्त ईदन्तश्चात्र प्रश्लिष्य निर्दिष्टः। पुन्नपुंसके इति प्रथमाद्विवचनमजहल्लिङ्गम् ॥

टीका० — कर्णस्य **कानीनस्य धनुः** कालपृष्ठम् । कपिध्वजोऽर्जुनः, **तद्धनुषि** गाण्डीवद्वयम् । 'गाण्ड्यजगात् संज्ञायाम्' (५ २. ११०) इति गाण्डीगाण्डिशब्दाभ्यां वः । गाण्डीवं गाण्डिवम् । द्वितीयो ह्रस्वान्तः, 'गाण्ड्यजगादि'ति संहितायां दीर्घह्रस्वान्तयोस्तुल्यत्वात् ॥

कोटिरस्याटनिः

क्षीर० — अस्य धनुषः प्रान्तः कुटति कोटिः । अटत्यटनिः । अटनीत्येके ॥

टीका० — धनुषः कोटिरुभयप्रान्तम् अटनिः । 'अट पट गतौ' । अशनिवर्दनिः । पक्षे ङीष् ॥

गोधे तले ज्याघातवारणे ।

क्षीर० — गोधा च गोधा च द्वे, सव्यसाचित्वात् । 'गुध परिवेष्टने' । तलं चर्मादिमयो ज्याघाताधारः । गोधा तला च गोधातले द्वे इत्येके ॥

---

१. 'स्ति गा' ख. ग. घ. पाठः.　२. 'दटनिः' ञ. पाठः.

टीका० — गुणाघाघातनिवारणार्थं[1] बाहुपट्टिकायां गोधाद्वयम् ।

"तलस्ता(लं? ले) चपेटे च तलं चाधः स्वरूपयोः ।
*कार्यवीर्ये[2] प्रकोष्ठे ज्याघातस्यैवापवारके ॥"

क्वचिद् बाह्वोर्द्वित्वाद् गोधे तले इति पाठः ॥

लस्तकस्तु धनुर्मध्यं

क्षीर० — 'लस श्लेषणे' ॥

टीका० — वाँस इति ख्याते लस्तकः ॥

मौर्वी ज्या शिञ्जिनी गुणः ॥ ८९ ॥

क्षीर० — मूर्वाख्यतृणस्य विकारो मौर्वी । जिनाति ज्या । जीवापि । शिञ्जे शब्दायते शिञ्जिनी । गुण्यतेऽभ्यस्यते गुणः ॥

टीका० — मौर्वीचतुष्कं धनुर्गुणे । मूर्वा वृक्षविशेषः, तद्विकारो मौर्वी । ज्या चवर्गादिः । आवश्यकणिनौ शिञ्जिनी । तालव्यादिः । गुण उक्तः ॥

स्यात् प्रत्यालीढमालीढमित्यादि स्थानपञ्चकम् ।

क्षीर० — जङ्घयोश्चारि[4]निवृत्तौ[5] स्थितिः स्थानकम्[6] । अत्र विशेषः । आलेढि भुवमालीढम् । आदिशब्दात् समपादं, वैशाखं, मण्डलं च धनुर्वेदप्रसिद्धम् । भरतस्त्वन्यथाह —

"वैष्णवं समपादं च वैशाखं मण्डलं तथा ।
प्रत्यालीढमथालीढं स्थानान्येतानि षड् नृणाम् ॥"

इति ॥

टीका० — प्रत्यालीढमालीढं समपदो विशाखो मण्डलं चेति धन्विनः पञ्च पदस्थानानि । तत्रोर्ध्वस्थस्य वामजङ्घाप्रसारे दक्षिणसङ्कोचे प्रत्यालीढम् ।

१. 'र्थं', २. 'मध्ये प्र', ३. 'खाल इ' क. पाठः. ४. 'नुत्र', ५. 'वृ' ख. पाठः. ६. 'मात्र' ग. घ. पाठः.

* 'कार्यबीजे' इति तु मेदिनी ।

दक्षिणप्रसारे वामसङ्कोचे आलीढम्। तुल्यपादयुगे[1] समपदम्। वितस्त्यन्तरेण स्थिते पदद्वये विशाखः। मण्डलाकृतिपदद्वयं मण्डलम्॥

लक्षं लक्ष्यं शरव्यं च

क्षीर० — लक्ष्यत इति घञ् ण्यच्च। शृणाति शरुर्हिंस्रः, तस्मै हितं शरव्यम्। 'उगवादिभ्यो यत्' (५. १. २)। शरैर्वीयते छाद्यते वा[3]। वेध्यं च॥

टीका० — लक्षत्रयं वेज्ञा इति ख्याते। व्याजे लक्षमुक्तम्। श्रृणातेः स्वरुवदुः (शरुः) आयुधं, तस्मै हितं शरव्यम्। 'उगवादिभ्यो यत्' (५. १. २) इति यत्। 'ओर्गुणः' (६. ४. १४६) इति गुणः। अवन्तादेशः॥

शराभ्यास उपासनम्॥ ८६॥

क्षीर० — 'असु क्षेपणे'॥

टीका० — नित्यं शराभ्यासे परिशीलने उपासनम्॥

पृषत्कबाणविशिखा अजिह्मगखगाशुगाः।
कलम्बमार्गणशराः पत्री रोप इषुर्द्वयोः॥ ८७॥

क्षीर० — पर्षति सिञ्चत्यसृजा पृषत्कः, पृथक् षट्कमस्येति। धनुर्वेदः—

"पुङ्खः शरस्तथा शल्यं पक्षस्नायुजतूनि षट्।"

वणति वण्यतेऽनेन वा बाणः। विशीर्यते विशिखः। 'शि निशाने'[4]। विविधशिखो वा। अजिह्मगः ऋजुगामी। कल्यते क्षिप्यते कलम्बः। मार्गयति लक्ष्यं मार्गणः। शृणाति[5] शरः। रोप्यते निखन्यते रोपः। इष्यति इषुः। 'इष गतौ'। प्रदराद्या[6] नानार्थे॥

टीका० — पृषत्कद्वादशकं काण्डे। स्पृशन्[7] कसति गच्छतीति पृषत्कः। पृषोदरादिः मूर्धन्यषश्च। 'बण भण सम्भक्तौ'। घञ्। बाणः। विशन् खनतीति

---

१. 'गे' ज. पाठः. २. 'खम्॥' ङ. छ. पाठः. ३. 'वा॥ अ' ग. घ. ङ. पाठः. ४. 'शासने' ख. पाठः. ५. 'णो' ग. घ. ङ. पाठः. ६. 'त' ग. घ. पाठः. ७. 'पृषति क' ङ. छ. पाठः.

विशिखः। पृषोदरादिः। अजिह्मगाद्यास्त्रयो डप्रत्ययान्ताः। 'कड मदे'। बाहुलकोऽम्बन्। लडयोरेकत्वस्मरणम्। कलम्बः। 'मार्ग अन्वेषणे'। ल्युट्। मार्गणः। शृणातेः 'ऋदोरप्' (३. ३. ५७)। शरः।

"स्थलं क्ष्वेडो विपाटश्च चित्रपुङ्खः शरः सरः"

इति त्रिकाण्डशेषे दन्त्यादिश्च। पत्रं पक्षः, तद्योगात् पत्री। 'रुप विमोहने'। चुरादिः। अच्। रोपः। 'इषेः किच्च' (उ० १. १३) इत्युः। इषुः॥

प्रक्ष्वेडनास्तु नाराचाः

क्षीर० — प्रक्ष्वेडन्ते प्रक्ष्वेडनाः। क्ष्विदे रूपं क्ष्वेडतेर्वा[1]न्नियम्। नैरमञ्चति नैराचः[3]। नैराच एव नाराचः। स्वार्थेऽण्। सर्वलोहोऽयम्॥

टीका० — प्रक्ष्वेडनद्वयं **नाराचे**। 'ञिक्ष्विदा स्नेहनमोचनयोः'। नन्द्यादिः। पृषोदरादित्वाड्डत्वम्। प्रक्ष्वेडनः। नरानाचामतीति नाराचः। 'अन्येभ्योऽपि—' (३. २. १०१) इति डः। 'अन्येषामपि —' (६. ३. १३७) इति दीर्घः॥

पक्षो वाजः[6]

क्षीर० — 'पक्ष परिग्रहे'। वजति गच्छत्यनेन वाजः॥

टीका० — काण्डपत्रे पक्षद्वयम्। 'वज गतौ'। करणे घञ्। वाजः। 'अजिव्रज्योश्च' (७. ३. ६०) इति चकारस्यानुक्तसमुच्चयार्थत्वात् कुत्वनिषेधः॥

त्रिपूत्तरे।

क्षीर० — लिप्तान्ता वाच्यलिङ्गाः॥

---

१. 'ड्विवों' ग. घ. पाठः. २, ३, ४. 'ना' क. ख. ङ. पाठः. ५. 'त्व' ग. पाठः. ६. 'जः। न्यङ्क्वादेः कुत्वम्॥ त्रि' ग. घ. ङ. पाठः.

टीका० — उत्तरे परे लिप्तकान्ताश्लिष्ठ ॥

निरस्तः प्रहिते बाणे

क्षीर० — निरस्यते[1] स्म प्रहीयते स्म, क्षिप्त इत्यर्थः ॥

टीका० — प्रहिते (नि?वि)क्षिप्ते बाणे निरस्तः। प्राक् साधितः ॥

विषाक्ते दिग्धलिप्तकौ ॥ ८८ ॥

क्षीर० — विषेणाक्ते उक्षिते। दिह्यते स्म लिप्यते स्म ॥

टीका० — वि(षभ? षो)क्षितकाण्डे दिग्ध(त्र? द्व)यम्। दिहेः क्तः। दिग्धः। 'लिप उपदेहे'। क्तः। ततः कन्। लिप्तकः ॥

तूणोपासङ्गतूणीरनिषङ्गा इषुधिर्द्वयोः।
तूण्यां

क्षीर० — तूण्यते पूर्यते शरैस्तूणः। तूणीति लिङ्गभेदार्थम्। उपासज्यन्ते निषज्यन्ते (स्म?) च बाणा यत्रेत्युपासङ्गनिषङ्गौ। इषवो धीयन्तेऽत्र इषुधिः। कलापो नानार्थे ॥

टीका० — तूणषट्कं तोण इति ख्याते। 'तूण पूरणे'। चुरादिः। एरचि तूणः। गौरादिङीषि तूणीत्यपीति धातुप्रदीपः। रूपभेदात् पुमान्। टापि तूणेति वररुचिः। 'षञ्ज सङ्गे'। घञ्। उपासङ्गः। 'कुगृशृपृकटिपटिशौटिभ्य ईरन्' (उ०४.३०) इति बाहुलक ईरन्। तूणीरः। 'उपसर्गात्—' (८.३.६५) इत्यादिना षत्वे निषङ्गो मूर्धन्यषः। इषवो धीयन्तेऽत्रेति इषुधिः ॥

खड्गे तु निस्त्रिंशचन्द्रहासासिऋष्टयः ॥ ८९ ॥
कौक्षेयको मण्डलाग्रः करवालः कृपाणवत्।

---

१. 'ते प्र' क. ग. पाठः. २. 'स' क. ख. पाठः.

क्षीर०— खण्डयति[1] भिनत्ति खड्गः । निष्क्रान्तस्त्रिंशतोऽङ्गुलिभ्यो निस्त्रिंशः । चन्द्रवद्धासः प्रभास्य चन्द्रहासः । अस्यतेऽसिः । ऋषेर्गत्यर्थादृष्टिः । 'ऋत्यकः' (६. १. १२८) इति प्रकृतिभावः । हिंसार्थाद् रिषेस्तु रिष्टिः । चन्द्रहासासिरिष्टय इति केचित् पठन्ति । कुक्षौ भवः कौक्षेयकः । 'कुलकुक्षि—' (४. २. ९६) इति ढकञ् । मण्डलाकृत्यग्रमस्य मण्डलाग्रः । करे वलनमस्य करवालः । कल्पते कृपाणः । कृपिः पूरणार्थः ॥

टीका० — खड्गनवकं खड्गे । 'खट खटि भेदने' । बाहुलको गन् । खड्गः । निर्गतस्त्रिंशतोऽङ्गुलिभ्य इति निस्त्रिंशः । 'डच्प्रकरणे सङ्ख्यायास्तत्पुरुषस्योपसङ्ख्यानं निस्त्रिंशाद्यर्थम्' (वा० ५. ४. ७३) । डच् । चन्द्रमिव हसति उद्योतकारित्वाच्चन्द्रहासः । 'कर्मण्यण्' (३. २. १) । 'असु क्षेपणे' । 'खनिकष्यज्यसिवसिवनिसनिध्वनिग्रन्थिचलिभ्यश्च' (उ० ४. १४१) इति इः । असिः । दन्त्यसः । 'ऋषि गतौ' । क्तिचि ऋष्टिः । एवमजादिः ।

"चन्द्रहासर्ष्टिनिस्त्रिंशा ज्ञेया एकार्थवाचकाः"

इति त्रिकाण्डशेषश्च । 'रिषि हिंसायां, हलादिरि'ति वर्णदेशना । द्विविध एवेति रभसः । 'कुलकुक्षि—' (४. २. ९६) इत्यादिना ढकञ् । कौक्षेयकः । करं पालयति पलतीति वा करपालः । 'कर्मण्यण् (३. ४. १) । 'विधूतकरपालकः पालक' इति यमकम् ।

"दन्तैश्चिच्छिदिरे लूनकरवालाः पदातयः" (स० १९. श्लो० ५५)

इति माघश्लेषाद् वकारवानपि । कृपाण इति । कृपेर्बहुलवचनादानच् सम्प्रसारणं चेति न्यासकारः । यथा कृपाणः खड्गे तथा करवालोऽपीति वत्यर्थः ॥

त्सरुः खड्गादिमुष्टौ स्याद्

क्षीर० — 'त्सर छद्मगतौ' ॥

---

1. 'ति ख' ख. पाठः.

टीका० — खड्गच्छुरिकादिमुष्टौ[1] त्सरुः। ना। 'त्सर छद्मगतौ'। दन्त्यसः। चरुवद् उः॥

मेखला तन्निबन्धनम्॥ ९०॥

क्षीर० — मीयते मणिबन्धे प्रक्षिप्यते मेखला। यथा प्रहरतो हस्तान्न निर्याति॥

टीका० — खड्गादिनिबन्धनः सीकनलिकातकादिकं[2](?) मेखला। गङ्गायामिति केचित्॥

फलकोऽस्त्री फलं चर्म

क्षीर० — फलति विशीर्यते प्रहारैः फलकम्। फलं मुनिना खड्गाद्यग्रे[3] दृष्टम्। अयं तु लोकात्[4] फलकं मन्यते। यच्छाश्वतः—

"लाभे सस्ये शराद्यङ्गे[5] व्युष्टौ च फलके फलम्"।

चर्ममयत्वाच्चर्म॥

टीका० — फलगा इति ख्याते फलकत्रयम्। फलकचर्मणी साधिते॥

सङ्ग्राहो मुष्टिरस्य यः।

क्षीर० — सङ्गृह्यतेऽनेन सङ्ग्राहः। 'समि मुष्टौ' (३. ३. ३६) इति घञ्। अस्य चर्मणो मुष्टिर्ग्रहणस्य स्थानम्॥

टीका० — फलकस्य मुष्टौ माण्डु इति ख्याते सङ्ग्राहः। 'समि मुष्टौ' (३. ३. ३६) इति ग्रहेर्घञ्॥

द्रुघणे मुद्गरघनौ

क्षीर० — द्रुं वृक्षाङ्गं हन्ति द्रुघणः। द्रोर्घनो वा। अयोघनो-

---

१. 'दिषु मु' ङ. छ. पाठः. २. 'सिककलिकातनिका' क. ख. ङ. छ. पाठः. ३. 'द' ख. पाठः. ४. 'लो' क. ख. पाठः. ५. 'द्या' ख. पाठः.

ऽन्यः। मुदं गिरति ग्रसते मुद्गरः। हन्यतेऽनेन घनः। 'मूर्तौ घनः' (३. ३. ७७) इति साधुः। यच्छाश्वतः—

"वाद्ये मुस्तेऽम्बुदे सान्द्रे घनः स्याल्लोहमुद्गरे" ॥

टीका०—वर्धकिमुद्गराकृतावस्त्रविशेषे द्रुघणत्रयम्। द्रुः वृक्षो हन्यतेऽनेनेति द्रुघणः। 'करणेऽयोविद्रुषु' (३. ३. ८२) इति द्रुशब्द उपपदे हन्तेर्धातोरप्प्रत्ययः, घनादेशश्च। धातोः 'पूर्वपदात् संज्ञायामगः' (८. ४. ३) इति णत्वम्। क्षुभ्नादेराकृतिगणत्वात् 'कवर्गव्यवाये हादेशप्रतिषेधो वक्तव्य' इति णत्वं न भवतीत्यपरे। मुदं हर्षं हरतीति मुद्गरः। पचादिः॥

स्यादीली करवालिका ॥ ९१ ॥

क्षीर०—ईड्यते ईली। एकधारोऽसिस्तुरुष्कायुधम्। करवालादल्पे कन्। तरवारिकेत्येके॥

टीका०—हस्तकुण्डेति ख्याते ईलीद्वयम्।

"ईलिः करवाली स्याद् धैमेयो धान्यपरिवर्तः"[1]

इति नाममालायामार्यापाठाद् दीर्घादिः। 'इल स्वप्नक्षेपणयोः'। 'इगुपधात् किरि'त्यनेन ह्रस्वादिरिति पुरुषोत्तमटीका। पक्षे ङीष्॥

भिन्दिपालः सृगस्तुल्यौ

क्षीर०—भिन्दतः पालयति भिन्दिपालः[2]। स हस्ताक्षेप्यो लगुडः। सृज्यते सरति वा सृगः॥

टीका०—भिन्दिपालद्वयं हस्तप्रमाणे हस्तकाण्डे इति ख्याते। नळिकाण्डमिति केचित् तमाहुः।

"भिन्दिर्द्वादशतालं तु दशकुन्तोऽभिधीयते"

इति भरतीये। सृगो दन्त्यादिः॥

परिघः परिघातनः।

क्षीर०—परिहन्ति परिघः। 'परौ घः' (३. ३. ८४) इति घत्वम्। लोहबद्धो लगुडः॥

---

१. 'र्तौ' ज. पाठः. २. 'लः। सहस्राक्षे' स. पाठः.

टीका० — परिघद्वयं लोहबद्धलगुडे खड्गे च । 'परौ घः' (३. ३. ८४) इति हन्तेरप् घादेशश्च । 'परेश्च घाङ्कयोः' (८. २. २२) इति लत्वविकल्पः । परिघः पलिघः । हन्तेर्ण्यन्ताल्ल्युटि परिघातनः ॥

द्वयोः कुठारः स्वधितिः परशुश्च परश्वधः ॥ ९१ ॥

क्षीर० — कुठान् वृक्षान् इयर्त्ति कुठारः । स्वं धियति बिभर्ति स्वधितिः । परान् शृणाति परशुः परश्वधश्च । पर्श्वधोऽपि । यदाह —

"याष्टीकपारश्वधिकौ यष्टिपर्श्वधहेतिकौ" ॥

टीका० — कुठारचतुष्कं कुठारे । कुठं तरुम् आरातीति कुठारः, कप्रत्ययान्तः । आङ्पूर्वाच्छृणातेः 'आङ्परयोः खनिशॄभ्यां डिच्च' (उ० १. ३४) इति कुः । परशुः ।

"कुठारः स्त्री च स्वधितिः परशुश्च परश्वधः ।
कुठाटङ्कः पर्शुरथच्छुरिका कोषणादिका ॥"

इति रभसः । परश्वधस्तालव्यमध्यः ॥

स्याच्छस्त्री चासिपुत्री च छुरिका चासिधेनुका ।

क्षीर० — शस्यतेऽनया शस्त्री । असेः पुत्रीव, अल्पत्वात् । छुराति छिनत्ति छुरिका । क्षुरिकापि ॥

टीका० — शस्त्रीचतुष्कं छुरिकायाम् । ङीषि शस्त्री । पुत्रीधेनुकाभ्यामसेः षष्ठीसमासः । 'छुर छेदने' । कुन् । छुरिका ॥

वा पुंसि शल्यं शङ्कुर्ना

क्षीर० — शलति विशल्यन्तः शल्यम् । शङ्कतेऽस्माच्छङ्कुरायुधविशेषः । यच्छाश्वतः —

"सङ्ख्याकीलकयोः शङ्कुः शङ्कुः प्रहरणान्तरे" ।

अन्यत्रोपचाराच्छल्यम् ॥

---

१. 'ठारट', २. 'परशुर' क. ख. पाठः.

टीका० — शल्यद्वयं शेल्ल इति ख्याते। शलेः यत्। शल्यः। यादोभेदे शङ्कुरुक्तः॥

सर्वला तोमरोऽस्त्रियाम् ॥ ९२ ॥

क्षीर० — सर्वान् लाति सर्वला। स्तोम्यते श्लाघ्यते तोमरम्। तुः सौत्रो वा॥

टीका० — शर्वरीति[1] ख्यातायां शर्वलाद्वयम्। 'शर्व चर्व गतौ'। वृषादिकलच्। शर्वला। 'शार्दूलशर्वलाशलाटुः' इति शभेदः॥

प्रासस्तु कुन्तः

क्षीर० — प्रास्यते प्रासः। हस्तक्षेप्यः (शिल्पः? शल्यः)। कुणाति कुन्तः॥

टीका० — प्रासद्वयं कुन्ते। 'असु क्षेपणे'। घञ्। प्रासः। कुं तनोतीति कुन्तः। पृषोदरादिः॥

कोणस्तु स्त्रियः पाल्यश्रिकोटयः।

क्षीर० — कोणो गृहादेर्विदिक्। 'कुण शब्दोपकरणयोः'। पाति पालिः। अश्नुते अश्रिः। कुटति कोटिः॥

टीका० — कोणचतुष्कमग्रभागे। यथा षट्कोणः षडश्र इति। पालित्रयं पक्षे ङीषन्तं च। 'अश भोजने'। वङ्क्र्यादित्वाद् रिन्। अश्रिः। कुटेरिः। कोटिः॥

सर्वाभिसारः सर्वौघः सर्वसन्नहनार्थकः ॥ ९३ ॥

क्षीर० — सर्वेण सैन्येनाभिसरणं सर्वाभिसारः। सर्वेषामोघो वहनं सर्वौघः। सर्वैः सन्नह्यतेऽत्र सर्वसन्नहनम्॥

टीका० — चतुरङ्गबलस्य सन्नहने सर्वपल्लाण इति ख्याते सर्वाभिसारद्वयम्॥

लोहाभिसारोऽस्त्रभृतां राज्ञां नीराजनो विधिः।

---

१ 'ज्वलीति' ञ. पाठः.

क्षीर० — अस्त्रभृतां राज्ञां यः शान्त्रिको[1] विधिः प्रस्थानात् प्राक्, स लोहाभिसारः। लोहं शस्त्रमभिसार्यते प्रस्थाप्यतेऽत्रेति। नीरस्य शान्त्युदकस्य अजनं क्षेपोऽत्र नीराज(नं?नः), मन्त्रोल्कया वाहनायुधादेर्निश्शेषेण राजनं वा। अत्र नीराजनानन्तरं कर्म लोहाभिसार[2] इति मुनिः—

"विधिर्लोहाभिसारस्तु[3] राज्ञां नीराजनोत्तरः"।

भृगोऽपि—

"लोहाभिसारस्तु[4] विधिः परो नीराजनान्नृपैः।"
दशम्यां दंसितैः कार्यः"

इति। अत एव नीराजनाद्विधिरित्येके पठन्ति॥

टीका० — महानवमीदीक्षायां बलस्य नीराजने निर्मज्जने राज्ञां शस्त्रधारिणां यः शास्त्रचोदितो विधिः, तत्र लोहाभिहारः॥

यत् सेनयाभिगमनमरौ तदभिषेणनम्॥ ९४॥

क्षीर० — 'सत्यापपाश —' (३. १. २५) इति णिच्। 'उपसर्गात् सुनोति—' (८. ३. ६५) इति षत्वम्॥

टीका० — सेनया करणभूतया विजिगीषोररौ शत्रौ आभिमुख्येन गमनमभिषेणनम्। सेनाशब्दात् 'सत्यापपाश —' (३. १. २५) इत्यादिना णिच्। ल्युट्। 'उपसर्गात् सुनोति —' (८. ३. ६९) इत्यादिना षत्वम्॥

यात्रा व्रज्याभिनिर्याणं प्रस्थानं गमनं गमः।

क्षीर० — यान्त्यस्यां यात्रा। व्रजनं व्रज्या। 'व्रजयजोर्भावे क्यप्' (३. ३. ९८)। प्रपूर्वस्तिष्ठतिर्गत्यर्थः। 'ग्रहवृदृनिश्चि —' (३. ३. ५८) इत्यपि गमः॥

---

१. 'न्ति' ग. पाठः. २, ३, ४. 'हा' ग. पाठः.

टीका० — विजिगीषोः प्रयाणे यात्राषट्कम् । यातेः ष्ट्रन् । यात्रा । भिक्षायां व्रज्योक्ता । निर्याणत्रिके ल्युट् । गमेरप् । गमः ॥

स्यादासारः प्रसरणं

क्षीर० — सैन्यस्य सर्वतो व्याप्तिरासारः । आस्रियतेऽनेनेत्यासारः अन्वागच्छद्बलम् । प्रसारस्तु सैन्याद्बहिस्तृणजलाद्यर्थं प्रसरणमिति कौटिल्यः । यल्लक्ष्यं —

"निरुद्धवीवधासारप्रसारा गा इव व्रजम्" ॥

टीका० — सर्वतो बलस्य प्रसारे आसारद्वयम् । सर्तेर्घञ् । आसारः । धरणिवत् प्रसरणिः । पक्षे 'कृदिकाराद् —' (ग० ४. १. ४९) इति ङीष् ॥

प्रचक्रं चलितार्थकम् ॥ ९५ ॥

क्षीर० — प्रस्थितं सैन्यं प्रचक्रम् ॥

टीका० — चलितशब्दस्यार्थे प्रचक्रम् । 'प्रचक्रं चलितं त्रिषु' इत्यमरमाला ॥

अहितान् प्रत्यभीतस्य रणे यानमभिक्रमः ।

क्षीर० — आभिमुख्येनाभिभूयारीन् वा[2] प्रतिगमनमभिक्रमः ॥

टीका० — अरीन् प्रति निर्भयस्य पुंसो याने अभिक्रमः ॥

वैतालिका बोधकराः

क्षीर० — वितालः शब्दः प्रयोजनमेषां वैतालिकाः । मङ्गल्याख्याः प्रातर्बोधका इत्येके ॥

टीका० — निशान्ते ये बोधयन्ति, तत्र वैतालिकद्वयम् । विविधतालेन चरन्तीति[3] वैतालिकाः । 'चरति' (४. ४. ३) इति ठक् ॥

---

१ 'स', २. 'वा ग' क. ख. पाठः. ३. 'ति ठ' ञ. पाठः.

चाक्रिका घाण्टिकार्थकाः ॥ ९६ ॥

क्षीर० — चक्रं राष्ट्रम् । घण्टाघातेन देवताद्यग्रे ये शंसन्ति ते, श्रावकाख्याः ॥

टीका० — बहुभिर्मि[1]लित्वा स्तुवत्सु चाक्रिकद्वयम् । चक्रेण चरन्तीति ठक् । घट[2]या चरन्तीति घाण्टिकाः । पृषोदरादित्वाद् वर्णागमः, निरनुनासिको वा ॥

स्युर्मागधास्तु मगधाः[3]

क्षीर० — वंशोदीरणेन ये याचन्ते । आहुश्च —

"वैतालिकास्तु कथ्यन्ते कविभिः सौखशायिकाः ।
राज्ञः प्रबोधसमये घण्टाशिल्पास्तु घाण्टिकाः ॥
मागधाः स्तुतिवंशज्ञाः"

इति । मगधेति याच्ञार्थः कण्ड्वादिः । यच्छ्रीभोजः —

"कमर्थिनः क्षुभ्यन्तु कं मगध्यन्तु मागधाः ।
कमिषुध्यन्तु यज्वानो रामेऽरण्यं भुरण्यति" ॥

टीका० — वंशस्तुतिपाठकेषु मागधद्वयं, वनौषधौ साधितम् ॥

बन्दिनः स्तुतिपाठकाः ।

क्षीर० — वन्दन्ते स्तुवन्ति तच्छीलाः । चत्वार एकार्था इत्येके ॥

टीका० — वीर्यादिस्तुतिं ये नासीरे पठन्ति, तत्र वन्दिद्वयम् । सारपद्यस्तुतिपाठक इति केचित् । व्रीह्यादीनौ वन्दी ॥

संशसकास्तु समयात् सङ्ग्रामादानवर्तिनः ॥ ९७ ॥

---

१. 'लिताभिस्तुवत्सु वावेहा इति ख्यातेषु चा' ख. ङ. छ. पाठः. २. 'ण्ट' ख, पाठः. ३. 'वंशज्ञाः' ख. छ. पाठः.

क्षीर० — संशपन्ति पलायमानान्, सशपथं वा युध्यन्ते दृढनिश्चयाः संशप्तकाः ॥

टीका० — समयात् तत्रैव स्थित्वास्माभिर्योद्धव्यमिति निश्चयाद्, अथवा कुलाचाराद्, ये सङ्ग्रामे न निवर्तन्ते, ते संशप्तकाः। 'शप उपालम्भने'। क्तः॥

रेणुर्द्वयोः स्त्रियां धूलिः पांसुर्ना न द्वयो रजः।

क्षीर० — रीयते रेणुः। 'रीङ् गतौ'। धूयते धूलिः। पंसयति वस्त्रादि पांसुः। 'पसि नाशने'। रज्यते वस्त्राद्यनेन रजः क्लीबे। 'रजनरजकरजस्सूपसंख्यानम्' इति नलोपः॥

टीका० — रेणुचतुष्कं धूल्याम्। स्थाणुवद् रेणुः। 'धू विधूनने'। बाहुलकाल्लिः। कुटादित्वाद् ङिद्वद्भावः। वङ्क्र्यादित्वात् क्रिन्। रलयोरेकत्वस्मरणम्। धूलिः। ङीषि धूली च। 'पशि नाशने'। 'अर्जिदृशिकम्यमिपशि —' (उ० १. २७) इत्यादिना उः दीर्घश्च। पांशुः। एवमुणादौ तालव्यवान्। धातुवृत्तौ दन्त्यवानुक्तः। अत एव वृन्दावनयमकं —

"कणिकाभिरपां सुखरं विसृजन्ति गुहासमीरणमपांसुखरम्"

इति। रञ्जेः 'भूरञ्जिभ्यां कित्' (उ० ४. २१८) इत्यसुन्। रजः। अदन्तोऽपि। तथाचोत्पलिनी —

"पुष्परेणौ गुणे चैव रजोऽपि रजसा सह"

इति। न द्वयो रज इति सम्बन्धः॥

चूर्णे क्षोदः

क्षीर० — 'चूर्ण क्षोदे'। 'क्षुदिर् सम्पेषणे'। धूलिप्रायोऽयम्। यच्छाश्वतः —

"चूर्णानि वासयोगाः स्युश्चूर्णो धूलिः सशर्करा" ॥

१. 'कयोस्तूप' ग. पाठः. २. 'स्वम्' ख. पाठः. ३. 'ग्याः' क. ग. पाठः.

टीका० — धूलितः किञ्चिदुपचिते क्षोदनेन कृते माषादीनां रजोविशेषे क्षोदद्वयम्। क्षोदसाहचर्यात् चूर्णो ना। 'क्षुदिर् सम्पेषणे'। घञ्। क्षोदः। षडेव समानार्था इत्यपरः॥

समुत्पिञ्जपिञ्जलौ भृशमाकुले ॥ ९८ ॥

क्षीर०—'पिजि हिंसायाम्'। आह च—'समुत्पिञ्जोऽतिसङ्कुलः'॥

टीका० — अत्यन्तव्याकुले सैन्यादौ समुत्पिञ्जद्वयम्। 'तुजि पिजि वलने'। चौरादिकादेरचि समुत्पिञ्जः। पृषोदरादित्वात् पिञ्जलः॥

पताका वैजयन्ती स्यात् केतनं ध्वजमस्त्रियाम्।

क्षीर० — पतति धूयते पताका। विजयते विजयन्तः। औणादिको झच्। तस्येयं वैजयन्ती। केत्यते संज्ञायतेऽनेन केतनम्। ध्वजति धूयते ध्वजः। पताकादण्डो ध्वज इत्येके। केतुर्नानार्थे॥

टीका० — पताकाचतुष्कं पताकायाम्। '‡शलिपरिपतिभ्यो नित्' इत्याकः। पताका। पटाकाशब्दोऽप्यत्र। विपूर्वाज्जयतेः 'तृभूवसिवहिभासिसाधिगडिमण्डिजिनन्दिभ्यश्च' (उ०३. १३८) इति झच्। अन्तादेशः। पृषोदरादित्वाद् वर्णविपर्ययः। वैजयन्तः। षिदधिकारान्ङीषि वैजयन्ती। विजयन्तानां सम्बन्धिनी वा वैजयन्ती। 'तस्येदम्' (४. ३. १२०) इत्यण्। गेहे केतनमुक्तम्। ध्वजेरच्। ध्वजः॥

सा वीराशंसनं युद्धभूमिर्यातिभयप्रदा ॥ ९९ ॥

क्षीर० — वीरा आशंस्यन्तेऽत्र॥

टीका० — खण्डखण्डि(?) भूतैरश्वहस्त्यादिभिरतिभयङ्करा भूः वीराशंसनम्। 'शन्सु स्तुतौ'। कर्मणि 'कृत्यल्युटो बहुलम्' (३. ३. ११३) इति ल्युट्। बहुलमन्यत्रापीति वा युच्॥

---

१. 'ली' ख. पाठः. २. 'श्र', क. पाठः.

---

‡ इदं मुद्रितोणादौ बलाकादिगणान्तर्गतं दृश्यते।

अहं पूर्वमहं पूर्वमित्यहम्पूर्विका स्त्रियाम् ।

क्षीर० — अहं पूर्वमहं पूर्वमस्यां क्रियायामिति सर्वे यत्र ब्रुवते, सा अहंपूर्विका । स्वार्थे कन् । मत्वर्थीयो वा ठन् ॥

टीका० — अहमग्रे यामि अहमग्रे यामीत्यन्योन्यं यद् योधानां धावितं तत्राहम्पूर्विका । विभक्तिप्रतिरूपकोऽहंशब्दो निपातितः । 'सुप्सुपा' इति योगविभागात् समासः । ततः संज्ञायां कन् । वीप्साया गम्यमानत्वोत्र द्विरुक्तिः ॥

आहोपुरुषिका दर्पाद् या स्यात् सम्भावनात्मनि ॥१००॥

क्षीर० — अहो पुरुषोऽहमित्यस्य भावः । मनोज्ञादित्वाद् वुञ् ॥

टीका० — अधिकार्थवचनेनात्मनः शक्तेरप्रतिघाताविष्करणं संभावना, तत्र आहोपुरुषिका । अत्राप्यहोशब्दोऽहंकृद्वाची । पूर्ववत् समासः । मनोज्ञादित्वाद् वुञ् ॥

अहमहमिका तु सा स्यात् परस्परं यो भवत्यहङ्कारः ।

क्षीर० — अहं शक्तोऽहं शक्त इत्यस्त्यस्यामहमहमिका । ठन् । अहंशब्दो निपातः ॥

टीका० — अन्योन्यं प्रति श्रेष्ठोऽहमित्यभिमानोऽहमहमिका । आर्येयम् ॥

द्रविणं तरःसहोबलशौर्याणि स्थाम शुष्मं च ॥ १०१ ॥
शक्तिः पराक्रमः प्राणः

क्षीर० — द्रवत्यनेनारिर्द्रविणम् । तरत्यनेनापदं तरः । सहतेऽनेन अरिं सहः । असन्तौ । शूरस्य भावः शौर्यम् । तिष्ठन्त्यनेन स्थाम । शुष्यत्यनेनारिः शुष्मम् । शुष्मेत्येके । शकनं शक्तिः । प्राणनं प्राणः ॥

---

१. 'पूर्विकैव स्त्रियामहं' ग. पाठः. २, ३. 'भवामि', ४. 'त्वाद् द्वि' अ. पाठः.

टीका० — द्रविणदशकं सामर्थ्ये। 'द्रु गतौ'। 'द्रुदक्षिभ्यामिनन्' (उ० २. ५३.)। द्रविणम्। तरतेः सहतेश्च असुनि तरस्सहसी क्लीबे। बलम् उक्तम्। शूरस्य भावः शौर्यम्। तिष्ठतेर्मनिन्, स्थामा। शुषेर्मक्, शुष्मम्। 'शक्लृ शक्तौ'। क्तिन्। शक्तिः। क्रमतेर्घञ्, पराक्रमः। प्राण उक्तः॥

विक्रमस्त्वतिशक्तिता।

क्षीर० — विक्रमन्तेऽनेन विक्रमः॥

टीका० — अतिशक्तिता शौर्यातिशयो विक्रमः॥

वीरपाणं तु यत् पानं वृत्ते भाविनि वा रणे॥ १०२॥

क्षीर० — वीराणां मद्यपानं वीरपाणम्॥

टीका० — भूते रणे भविष्यति वा यद् योधानां मध्वादिपानं, तद् वीरपाणम्। पातेर्ल्युटि 'वा भावकरणयोः' (८. ४. १०) इति णत्वम्॥

युद्धमायोधनं जन्यं प्रधनं प्रविदारणम्।
मृधमास्कन्दनं सङ्ख्यं समीकं साम्परायिकम्॥ १०३॥
अस्त्रियां समरानीकरणाः कलहविग्रहौ।
सम्प्रहाराभिसम्पातकलिसंस्फोटसंयुगाः॥ १०४॥
अभ्यामर्दसमाघातसङ्ग्रामाभ्यागमाहवाः।
समुदायः स्त्रियः संयत्समित्याजिसमिद्युधः॥ १०५॥

क्षीर० — 'युध सम्प्रहारे'। युद्धम्। भावे क्तः। ल्युट्यायोधनम्। जायते जन्यं, 'भव्यगेय—' (३. ४. ६८) इति साधुः। प्रधनन्ति घ्नन्ति प्रधनम्। धनिर्मरणार्थोऽत्र निधनवत्। म्रियतेऽस्मिन् मृधम्। आस्कन्द्यतेऽत्रास्कन्दनम्। संचक्ष्यतेऽस्मिन् सङ्ख्यम्। सम्पूर्वश्चक्षिर्वर्जनार्थः। समीयतेऽस्मिन् समीकम्। 'ई गतौ'। सम्परायो मृत्युः प्रयोजनमस्य साम्परायिकम्। विनयादित्वात् स्वार्थे ठग्वा। समियर्ति सङ्घटतेऽस्मिन् समरः। न नीयते चाल्यतेऽत्रानीकम्। अनीकमस्त्यस्यै वा।

---

१. 'समार्थे द्रु' अ. पाठः. २. 'यन्ते मृ', ३. र्थः। सङ्ख्यं च। स', ४. 'त्र' ग. पाठः.

रणन्ति दुन्दुभयोऽत्र रणम्। 'वशिरण्योश्च' (वा० ३. ३. ५८) इति वक्तव्यादप्। कल्यते क्षिप्यतेऽत्र कलहः। कलं हीनबलं हन्ति वा। विगृह्णात्यत्र विग्रहः। 'ग्रहवृदृनिश्चि—'(३.३.५८) इत्यप्। सम्प्रहरन्त्यन्योन्यं घ्नन्त्यत्र सम्प्रहारः। अभिसम्पतन्त्यत्र अभिसम्पातः। कल्यतेऽत्र कलिः। संस्फुटन्त्यत्र संस्फोटः। संस्फेट इति तु युक्तः पाठः। 'स्फिट अनादरे'। भरते तु संफेटः। संयुज्यन्तेऽत्र सङ्गता रथयुगा अत्र वा संयुगः। अभ्यामृद्नन्त्यत्र अभ्यामर्दः। समाघ्नन्त्यत्र समाघातः। सङ्ग्रामयन्तेऽस्मिन् सङ्ग्रामः। अभ्यागच्छन्त्यत्र अभ्यागमः। आह्वयन्तेऽत्र आह्वः। 'आङि युद्धे' (३. ३. ७३) इत्यप्। 'ह्वः सम्प्रसारणम्' (६. १. ३२)। समुद्यन्ते मिलन्त्यत्र समुदायः। संयतन्ते संयच्छन्ति[१] वात्र संयत्। संयन्ति सङ्गच्छन्तेऽत्र समितिः। आ अज्यन्ते क्षिप्यन्तेऽत्राजिः। युध्यन्तेऽस्यां युत्[२]॥

टीका०—युद्धाद्येकत्रिंशद् युद्धे। युद्ध[३]योर्धन[४]योर्भावे क्तल्युटौ। शस्त[५]जनयोगाज्जन्यम्। यत्प्रकरणे 'अन्येभ्योऽपि दृश्यते'(५. २. १२०) इति यप्। प्रशस्तं धनं सङ्घोऽत्रेति प्रधनम्। दृणातेर्णिचि ल्युट्। प्रविदारणम्। 'शृधुमृधू[६] उन्दे'। अधिकरणे घञर्थे कः। मृधम्। 'स्कन्दिर् गतिशोषणयोः'। ल्युट्। आस्कन्दनम्। ख्यातेः 'घञर्थे कविधानम्' (३. ३. ५८) इति कः। सङ्ख्यम्। 'समँ ष्टम वैक्लव्ये'[७]। 'अळीकादयश्च' (उ० ४. २५) इति ईकन्, समीकम्। दन्त्यवत्। सम्परापूर्वादिणः 'पुंसि संज्ञायां घः प्रायेण' (३. ३. ११८) इति घः। ततः संज्ञायां स्वार्थे कन्। सम्परायकः। साम्परायिकपाठे स्वार्थे 'विनयादिभ्यष्ठक्' (५. ४. ३४)। सह मरेण वर्तते समरः। अनीकं सैन्यं, तद्योगादनीकम्। अर्शआद्यच्। रणतेः पचाद्यच्। रणः। समरात्रिकमस्त्रियाम्। कलं हन्तीति कलहः। विग्रहोऽबन्तः। 'अध्यायन्यायोद्यावसंहाराधारावायाश्च' (३. ३. १२२) ई[८]त्यनेन चकारस्यानुक्तसमुच्चयार्थत्वादधिकरणे घञि सम्प्रहारः। अधिकरणे 'हलश्च' (३. ३. १२१) इति घञ्, अभिसम्पातः। कलेः 'इन्' इति इन्।

---

१. 'न्ते आक्षि' ख. पाठः. २. त्। घटादयः षित इति।' क. ग. घ. ङ. पाठः. ३. 'धा', ४. 'धयो' ख. ग. पाठः. ५. 'स्त्रजयो', ६. 'धू शब्दने अ' ङ. छ. पाठः. ७. 'म वै' ख. ग. पाठः. ८. 'इति घञ्। अनेन' ङ. छ. पाठः.

कलिः । स्फुटेर्घञ् । संस्फोटः । युगे युग उक्तः । सम्पूर्वः संयुगः । 'मृद क्षोदे' । घञ् । अभ्यामर्दः । हन्तेर्घञ् । 'हनस्तोऽचिण्णलोः' (७. ३. ३२) इति तकारः । आघातः । 'सङ्ग्राम युद्धे' । चुरादिणिच् । 'पुंसि संज्ञायां घः प्रायेण' (३. ३. ११८) इति घः । सङ्ग्रामः । गमेरप् । अभ्यागमः । आहूयन्तेऽत्रेत्या-हवः । 'आङि युद्धे' (३. ३. ७३) इत्यप् सम्प्रसारणं च । समूहे समुदाय उक्तः । 'यमु उपरमे' । क्विप् । 'गमः क्वौ' (६. ४. ४०) इत्यनुवृत्तौ 'गमादीना-मिति वक्तव्यम्' (६. ४. ४०) इति क्वौ अनुनासिकलोपः । संयत् ।

"रवेण भौमो ध्वजवर्तिवीरवेरवेजि संयत्यतुलास्त्रगौरवे ।"

इति दण्डिना पुमान् संयत् प्रयुक्तः । समितिः । 'अज गतिक्षेपणयोः' । 'अज्यति-भ्यां च' (उ० ४. १३२) इति इण् । बाहुलकान्न वीभावः । आजिः ।

"वाहनाजनि मानासे साराजावनमा ततः ।"

इति माघे (सर्ग० १९. श्लो० ३३) पुमानाजिः । सारश्चासावाजिश्चेति सारा-जिः । तस्मिन् साराजौ । किंभूते, मानासे मानखण्डके । अन्यथा मानासाया-मिति स्यात् । समिणोऽधिकरणे सम्पदादिक्विप् । समित् । युध्यतेः क्विप् । युत् ॥

नियुद्धं बाहुयुद्धे

क्षीर० — **नियुतं युद्धं नियुद्धम्** ॥

टीका० — **मल्लादीनां बाहुयुद्धे** नियुद्धम् ॥

अथ तुमुलं रणसङ्कुले ।

क्षीर० — **ताम्यन्त्यत्र तुमुलम् । तुः सौत्रो वा** ॥

टीका० — **आकुले रणे** तुमुलम् । 'तुमुलो व्याकुलो रण' इति त्रि-काण्डः ॥

क्ष्वेडा तु सिंहनादः स्यात्

---

१. 'त्य' ख. पाठः.

क्षीर० — 'क्ष्वेड अव्यक्ते शब्दे' इति दुर्गः। सिंहस्येव नदनं भटानां सिंहनादः ॥

टीका० — योधानां परबलभङ्गार्थं झङ्कारवे क्ष्वेडाद्वयम्। विषे क्ष्वेड उक्तः। सिंहानां गर्जितमिव सिंहनादः ॥

करिणां घटना घटा ॥ १०६ ॥

क्षीर० — 'घटादयः षित' इति 'षिद्भिदादिभ्योऽङ्' (३. ३. १०४) ॥

टीका० — करिणां घटना सङ्ग्रामभावोक्तं सज्जनं घटा। 'घट चेष्टायाम्'। घटादीनां षित्वात् 'षिद्भिदादिभ्योऽङ्' (३. ३. १०४) ॥

क्रन्दनं योधसंरावः

क्षीर० — समन्ताद् रवणं संरावः। 'उपसर्गे रुवः' (३. ३. २२)। घञ् ॥

टीका० — योधानामन्योन्यं मया सह युध्यस्वेत्याद्याह्वाने क्रन्दनद्वयम्। क्रन्दतेर्ल्युट् ॥

बृंहितं करिगर्जितम्।

क्षीर० — 'बृहि शब्दे' ॥

टीका० — करिणां गर्जिते बृंहितद्वयम्। 'बृह बृहि वृद्धौ'। क्तः ॥

विष्फारो धनुषः स्वानः

क्षीर० — 'स्फुर चलने' ॥

टीका० — धनुश्शब्दे विस्फारः। 'स्फुर संचलने'। घञ्। लघूपधगुणः। 'स्फुरतिस्फुलत्योर्घञि' (६. १. ४७) इति एचः स्थाने आत्वे विस्फारः। दन्त्यवान्। 'स्फुरतिस्फुलत्योर्निर्निविभ्यः' (८. ३. ७६) इति षत्वविकल्पे विष्फार

इत्यपि। णिचि तु एरचि 'चिस्फुरोर्णौ' (६. १. ५४) इत्यात्वविकल्पे पूर्ववत् षत्वविकल्पे च विस्फोरविष्फोरौ च ॥

पटहाडम्बरौ समौ ॥ १०७ ॥

क्षीर० — पटो हन्यते स्म पटहः। आदम्यते आडम्बरः। डमरुवद् दस्य डत्वम् ॥

टीका० — पटहद्वयं सङ्ग्रामपटहध्वनौ। पटह उक्तः। आङ्पूर्वाल्लम्बतेः 'ऋच्छेररन्' (उ० ३. १३१) इति बाहुलकोऽरन्। डलयोरेकत्वस्मरणम्। आडम्बरः ॥

प्रसभं[1] तु बलात्कारे हठः

क्षीर० — प्रगता सभात्र प्रसभम्[2]। सभया युक्तायुक्तविचारो लक्ष्यते। 'प्रस प्रसवे वा'। बलादिति निपातो हठार्थः। 'हठ प्लुतिशठत्वयोः' ॥

टीका० — प्रसभत्रयं बलात्कारे। 'क्लीबे तु प्रसभं हठः' इति बोपालितः। 'हठ प्लुतिसङ्कोचयोः'। पचाद्यच्। हठः ॥

अथ स्खलितं छलम्।

क्षीर० — स्खलनं मार्गाच्चलनम्। छयति भिनत्ति छलम् ॥

टीका० — स्खलितद्वयं युद्धविषये मर्यादायाः स्खलने। पूर्वं तु नाट्यप्रकरणे[3] धैर्यादेः स्खलने रिङ्गणमुक्तम् ॥

अजन्यं क्लीब उत्पात उपसर्गः समं त्रयम् ॥ १०८ ॥

क्षीर० — न जने साध्वजन्यम्। उत्पतत्यकस्माद्योयात्युत्पातः[4]। ज्वलादित्वाण्णः। उपसृज्यते उपह्रियते प्रजाऽत्रोपसर्गः ॥

---

१. 'भस्तु ब', २ 'भः। स' ख. पाठः. ३. 'क्रमे धै' क. ख. ग. घ. पाठः, ४. 'दुद्यात्यु' ख. पाठः,

टीका० — अजन्यत्रयमुत्पाते । 'अजन्योपप्लवोत्पाता' इति[1] तु पुंस्काण्डे वोपालितः ॥

मूर्छा तु कश्मलं मोहोऽपि

क्षीर० — कशति वैचित्यात् कश्मलम् ॥

टीका०—मूर्छात्रयं **मोहे** । 'मुर्छा मोहसमुच्छ्राययोः' । 'गुरोश्च हलः' (३. ३. १०३) इत्यः । टाप् । 'उपधायां च' (८. २. ७८) इति दीर्घः । मूर्छा । कसेः सौत्रात् 'कम्बलादयश्च' इति निपातनात् कलप्रत्ययो मुगागमश्च । कसलम् । तालव्यशामिति केचित् । 'कुष निष्कर्षे' । 'कुटिकुषिभ्यां कमलच्' (उ० ४. १८८) इति वर्तमाने 'कुषेरश्चोपधायाः'* इति कमलच् उपधायाश्च अकारः । कष्मलम् । एवमुणादौ मूर्धन्यवत् । 'मुह वैचित्ये' । घञ् । मोहः ॥

अवमर्दस्तु पीडनम् ।

क्षीर० — 'पीड गहने' ॥

टीका० — परचक्रेण देशस्य पीडने अवमर्दद्वयम् । 'मृद क्षोदे' । घञ् । अवमर्दः । पीडयतेर्ल्युटि पीडनम् ॥

अभ्यवस्कन्दनं त्वभ्यासादनं

क्षीर० — छलादाक्रमणमित्यर्थः । साचि[2] चं[3] (?) । रात्रौ[4] सौप्तिकम्[5] ॥

टीका० — निश्शक्तीकरणाय यः शत्रुभिः प्रहारो दीयते तत्राभ्यवस्कन्दनद्वयम् । 'स्कन्दिर् गतिशोषणयोः' । ल्युट् । अभ्यवस्कन्दनम् । सदेर्णिचि ल्युट् । आसादनं, दन्त्यसम् ॥

---

१. 'ति पुं' ञ. पाठः. २. 'दि' ख. पाठः. ३. 'षी ब', ४. 'चात्रौ ग. पाठः. ५. 'कः' ॥ क. घ. पाठः.

---

* इदं सूत्रं मुद्रितोणादौ न दृश्यते ।

विजयो जयः ॥ १०९ ॥

क्षीर० — विः स्वार्थे । लोचनविलोचनवत् ॥

टीका० — विजयद्वयं जयक्रियायाम् । एरच् (३. ३. ५६) ॥

वैरशुद्धिः प्रतीकारो वैरनिर्यातनं च सा ।

क्षीर० — प्रतीपकरणं प्रतीकारः । शुद्धिः निर्यातनं शोधनम् । 'यत निकारोपसंस्कारयोः' । जितकाशी जिताहवः ॥

टीका० — वैरशुद्धित्रयं वैरनिर्यातने । क्तिन्नन्तत्वाद् वैरशुद्धिः । स्त्रियां घञि प्रतीकारः । 'उपसर्गस्य घञ्यमनुष्ये बहुलम्' (६. ३. १२२) इति पक्षे दीर्घः ॥

प्रद्रावोद्द्रावसन्द्रावसन्दावा विद्रवो द्रवः ॥ ११० ॥
अपक्रमोऽपयानं च

क्षीर० — एतेऽष्टौ पलायनार्थाः । 'प्रे द्रुस्तुस्रुवः' (३. ३. २७)। 'उदि श्रयतियौतिपूद्रुवः' (३. ३. ४९) इति घञ् । 'समि युद्रुदुवः' (३. ३. २३) इति घञ् । अपद्वारेण क्रमणं पलायनम् अपक्रमः ॥

टीका० — प्रद्रावाष्टकं पलायनमात्रे । 'प्रे द्रुस्तुस्रुवः' (३. ३. २७) इति घञ् । प्रद्रावः । 'उदि श्रयतियौतिपूद्रुवः' (३. ३. ४९) इति घञि उद्द्रावः । सन्द्रावसन्दावयोः 'समि युद्रुदुवः' (३. ३. २३) इति घञ् । ऋदोरपि[२] विद्रवद्रवौ । यातेर्ल्युट् । अपयानम् ॥

रणे भङ्गः पराजयः ।

क्षीर० — भङ्गोऽपसरणम् । अन्यत्रोपचारात् ॥

---

१. 'पातोप' ग. घ. पाठः.   २. 'पृ । वि' अ. पाठः.

टीका० — युद्धभङ्गे पराजयः ॥

पराजितपराभूतौ त्रिषु

क्षीर० — परिभूतोऽभिभूतोऽपि ॥

टीका० — युद्धे जिते पराजितद्वयम् । क्तान्तम् ॥

नष्टतिरोहितौ ॥ १११ ॥

क्षीर० — त्रिष्वित्येव । नश्यति स्म नष्टम् । अदृश्यम् । तिरोधीयते स्म तिरोहितम् । गृहीतादिकं च ॥

टीका० —नष्टद्वयमदृष्टे वस्तुनि । लुक्कोइत इति यावत् । त्रिष्वित्युभयत्र सम्बध्यते । नश्यतेः क्तः । नष्टः । तिरःपूर्वाद् धाञः क्तः । 'दधातेर्हिः' (७. ४. ४२) इति धातोर्हिरादेशः । अथवा 'हि गतौ' । क्तः । तिरस् अदर्शनं हितो गतः तिरोहितः ॥

प्रमापणं निबर्हणं निकारणं निशारणम् ।
प्रवासनं परासनं निषूदनं निहिंसनम् ॥ ११२ ॥

निर्वासनं संज्ञपनं निर्ग्रन्थनमपासनम् ।
निस्तर्हणं निहननं क्षणनं परिवर्जनम् ॥ ११३ ॥

निर्वापणं विशसनं मारणं प्रतिघातनम् ।
उद्वासनं प्रमथनक्रथनोज्जासनानि च ॥ ११४ ॥

आलम्भपिञ्जविशरघातोन्माथवधा अपि ।

क्षीर० — अत्राहिंसार्था अप्युपसर्गवशाद्धिंसार्था ज्ञेयाः । अकर्मकाश्च णिचा सकर्मकाः । प्रमापणम् । 'मीङ् हिंसायाम्' । णिचि 'मीनातिमिनोति—' (६. १. ५०) इत्यात्वम् । निपूर्वाद् बृहेर्बर्हेर्वा निबर्हणम् ।

---

१. 'क्ष ॥ प्र', २. 'का इति', ३. 'ति हिरा', ४. 'न' ख. पाठः

निकारणम्। 'कृञ् हिंसायाम्'। निशारणम्। 'शॄ हिंसायाम्'। प्रवसतः प्रयुक्तिः प्रवासनम्। एवं निर्वासनम्। 'असु क्षेपणे'। अस्मात् परासनमपासनं च। 'षूद क्षरणे'। अस्मान्निषूदनं जीवाच्चालनम्। नितरां हिंसनं निहिंसनम्। संज्ञपनम्। ज्ञपेः 'मारणतोषण—' इति मित्त्वाद्ध्रस्वः। निर्ग्रन्थनम्। 'ग्रथि कौटिल्ये'। निस्तर्हणम्। तृहेर्हिंसार्थान्निष्पूर्वात् स्तृहेर्वा निपूर्वात्। क्षणनम्। 'क्षण हिंसायाम्'। निर्वापणम्। 'पै ओवै शोषणे'। विशसनम्। 'शसु हिंसायाम्'। क्रथनम्। 'क्रथ हिंसायाम्'। उज्जासनम्। 'जसु हिंसायाम्'। आकुलं लम्भनमालम्भः। लभिराङ्पूर्वो हिंसार्थः। 'उपसर्गात् खल्घञोः' (७. १. ६७) इति नुम्। 'पिजि हिंसायाम्'। पिञ्जः। विशरणं हिंसनं विशरः। हननं वधः। 'हनश्च वधः' (३. ३. ७६) इत्यप् वधादेशश्च। पक्षे घञि घातः। 'मथ संक्लेशने'। व्यापादनं निशसनं कदनं निसुम्भनं च॥

टीका० — प्रमापणादयस्त्रिंशद् मारणे। प्रमाणीनामेयमनुष्टुप्। 'हन्त्यर्थाश्च' इति चुरादिणिच्। 'मीनातिमिनोतिदीङां ल्यपि च' (६. १. ५०) इत्यात्वम्। 'अर्तिह्री—' (७. ३. ३६) इत्यादिना पुक्। 'णेर्विभाषा' (८. ४. ३०) इति णत्वविकल्पः। प्रमापणम्। आलम्भादिषड्बहिः सर्वत्र ल्युट्। निबर्हणमुक्तम्। 'कृञ् हिंसायाम्'। प्रमापणवण्णिचि निकारणविशारणे। 'वस स्नेहच्छेदापहरणेषु'। चुरादिणिचि प्रवासनपरासननिर्वासनोद्वासनानि। 'षूद क्षरणे हिंसायां च'। 'सात्पदाद्योः' (८. ३. १११) इति षत्वप्रतिषेधः। निसूदनम्। 'बृह बृहि हिसि हिंसायाम्'। निहिंसनम्। 'मारणतोषणनिशामनेषु ज्ञा' इति मित्त्वम्। संज्ञपनम्। 'ग्रन्थ हिंसायाम्'। निर्ग्रन्थनम्। 'तृह हिंसायाम्'। निस्तर्हणम्। हन्तेर्निहननम्। 'क्षणु हिंसायाम्'। क्षणनम्। 'वृजी वर्जने'। परिवर्जनम्। डुवपो णिचि निर्वापणम्। 'शसु हिंसा-

---

१. 'म्। पिञ्जः। पिजिर्हिंसार्थः। वि' ख. पाठः. २. 'पि' ग. पाठः. ३. 'शु' क. पाठः.

याम्' । विशसनम् । मृङो णिचि मारणम् । हन्तेः पूर्ववण्णिचि प्रतिघातनम् । 'मथे विलोडने' । प्रमथनम् । 'श्रथ क्रथ हिंसायाम्' । पूर्ववण्णिचि घटादिमित्त्वे च क्रथनम् । 'जसु हिंसायाम्' । तद्वण्णिचि उज्जासनम् । आङ्पूर्वो लभिर्मारणे । घञ् । 'उपसर्गात् खल्घञोः' (७. १. ६७) इति नित्यत्वाद् वृद्धिं बाधित्वा नुम् । आलम्भः । 'पिजि हिंसायाम्' । चुरादिः । एरचि पिञ्जः । शृणातेः ऋदोरपि विशरः । आघातवद् घातः । 'मथे विलोडने' । घञ् । उन्माथः । 'हनश्च वधः' (३. ३. ७६) इति हन्तेः पक्षे अप् वधादेशश्च । वधः ॥

स्यात् पञ्चता कालधर्मो दिष्टान्तः प्रलयोऽत्ययः ॥ ११९ ॥

अन्तो नाशो द्वयोर्मृत्युर्मरणं निधनोऽस्त्रियाम् ।

क्षीर० — देहस्तावत्[२] पञ्चभूतारब्धः । मरणं[३] त्वेतस्य पञ्चभावः, प्रत्येकं स्वांशसङ्क्रमात् । कालो मृत्युदूतः, क्षणत्रुट्यात्मको वा । यदाहुः — 'कालः संहरति प्रजाः' । तस्य धर्मः कालधर्मः संहारः । दिष्टस्य कालस्य जीवितावधेरन्तो दिष्टान्तः । अत्ययोऽन्तः । मरणं मृत्युः । द्वयोः स्त्रीपुंसयोः । निवृत्तं धनमत्र निधनम् । निपूर्वो धनिर्मरणार्थ इति सभ्यः[५] ॥

टीका० — पञ्चतादशकं मरणे । पञ्चानां[६] भूतानां पृथक्ता पञ्चता । कालस्य यमस्य धर्मः, तत्प्रयुक्तत्वात् कालधर्मः । दिष्टस्य कालस्यान्तो दिष्टान्तः । प्रलय उक्तः । एतेः 'एरच्' (३. ३. ५६) । अत्ययः । 'अति अदि बन्धने' । अच् । अन्तः । अमेर्वा तन् । नश्यतेर्घञ् । नाशः । 'भुजिमृङ्भ्यां युक्त्युकौ' (उ० ३. २१) इति त्युक् । मृत्युः द्वयोः । म्रियतेर्ल्युटि मरणम् निपूर्वाद् दधातेः 'कृपृवृजिमन्दिनिधाञ्भ्यः क्युः' (उ० २. ८३) । निधनम्[७] ॥

---

१. 'णे । उ' ङ. छ. पाठः. २. 'न्महाभू', ३. णत्वेनास्य पञ्चता । प्र' ४. 'युगाद्यात्म' क. पाठः. ५. 'भ्याः' ङ. पाठः. ६. 'ञ्चभू' क. ख. पाठः, ७ 'नोऽस्त्रियाम्' क. ख. ञ. पाठः.

*परासुप्राप्तपञ्चत्वपरेतप्रेतसंस्थिताः ॥ ११६ ॥

मृतप्रमीतौ त्रिष्वेते

क्षीर० — परागता असवोऽस्य परासुः । संतिष्ठते स्म संस्थितः । सम्पूर्वस्तिष्ठतिर्मरणे वर्तते । सप्तैते वाच्यलिङ्गाः ॥

टीका० — परासुसप्तकं मृते । परागता असवोऽस्येति परासुः । प्राप्तं पञ्चत्वं पृथगात्मता येन स प्राप्तपञ्चत्वः । पराप्रपूर्वादिणः क्तः । परेतप्रेतौ । सम्पूर्वस्तिष्ठतिर्मरणे । क्तः । संस्थितः । मृङः क्तः । मृतः । 'मीङ् हिंसायाम्' । प्रमीतः । परास्वादयस्त्रिषु ॥

चिता चित्या चितिः स्त्रियः ।

क्षीर० — चीयते स्म चिता । चेतव्या चित्या । 'चित्याग्निचित्ये च' (३. १. १३२) इति साधुः । चीयते चितिः । एते प्रेतदाहार्थेऽग्न्याधारे वर्तन्ते ॥

टीका० — चितात्रयं चितायाम् । चिञो बहुलवचनाद् 'अञ्जिघृसिभ्यः क्तः' (उ०३. ८९) । टाप् । चिता । 'निष्ठा' (३. २. १०२) इति वा क्तः । 'चित्याग्निचित्ये च' (३. १. १३२) इत्यनेन निपातिता चित्या । अधिकरणे क्तिनि चितिः ॥

कबन्धोऽस्त्री क्रियायुक्तमपमूर्धकलेबरम् ॥ ११७ ॥

क्षीर० — कस्य शिरसो बन्धोऽत्र कबन्धः । केन बन्धो वा । क्रियायुक्तं नृत्यत् । अपगतो मूर्धास्य अपमूर्धं यत् कलेबरम् । कुण्डोऽपि ॥

टीका० — शिरःशून्यं सक्रियं शरीरं कबन्धः । कं शिरः बध्यतेऽस्मि[2]न्निति कबन्धः । अधिकरणे घञ् ॥

श्मशानं स्यात् पितृवनं

क्षीर० — शवानां शयनं श्मशानम् । पृषोदरा[3]दित्वाच् शवशब्दस्य श्मादेशः शयनस्य शानं च । प्रेतवनं करवीरं च ॥

---

१. 'ञि' क. ख. पाठः. २. 'ति अ' पाठः. ३. 'दिः । प्रे' ग. पाठः.

---

* इतः प्राक् 'प्रलयोऽस्त्री दीर्घनिद्रा हिंसा संस्था प्रमीलनम्' इत्यर्धमधिकं क्षीरस्वामीयकोशेषु दृश्यते ।

टीका० — श्मशानद्वयं श्मशाने। शवस्य शयनं श्मशानम्। पृषोदरादिः। तालव्यं च। 'वनं पुरगामिश्रकासिध्रकाशारिकाकोटराग्रेभ्यः' (८. ४. ४) इति नियमितत्वादत्र न णत्वं, पितृवनम् ॥

कुणपः शवमस्त्रियाम्।

क्षीर० — कुणं शब्दं पाति कुणपः। धनञ्जयाख्यस्य वायोः शवेऽसम्भवात्। शवति यात्यस्माज्जीवः शवः ॥

टीका० — कुणपद्वयं शवे। कणेः शब्दार्थाद् दण्डकात् 'कणेः सम्प्रसारणं च' (उ० ३. १४३) इति कपन्, वकारस्य सम्प्रसारणमुकारः। कुणपः। 'शव गतौ'। तालव्यादिः। पचाद्यच्। शवः ॥

प्रग्रहोपग्रहौ वन्द्यां

क्षीर० — प्रगृह्यते बध्यते प्रग्रहः। वन्द्यते याच्यते वन्दी हठहृता स्त्री। बलवतो हस्ते क्षिप्तो राजपुत्रादिश्च। यदाहुः— 'वन्दी स्यात् पणबन्धस्थः' ॥

टीका० — प्रग्रहद्वयं वन्द्याम्। 'ग्रहवृदृनिश्चिगमश्च' (३. ३. ५८) इत्यपि प्रग्रहोपग्रहौ। वन्देः 'इन्' (उ० ४. ११९) इति इन्। ङीपि वन्दी ॥

कारा स्याद् बन्धनालये ॥ ११८ ॥

क्षीर० — कीर्यते क्षिप्यतेऽस्यां कारा। भिदादिः। गुप्तिश्च ॥

टीका० — काराद्वयं काहरेति ख्याते। भिदादिगणसूत्रेण 'कारा बन्धने' इत्यनेन करोतेरङुपधादीर्घत्वाभ्यां कारा निपातिता ॥

पुंसि भूम्न्यसवः प्राणाश्चैवं

क्षीर० — अस्यन्तेऽसवः। स्वभावाद् बहुत्वे पुंलिङ्गाः। प्राणित्यमीभिः प्राणाः। एवंशब्दात् पुंसि भूम्नि च। 'प्राणो नाम वायुरि'त्येकत्वमजीवार्थत्वात् ॥

---

१. 'प्।' क. ख. ग. पाठः. २. 'वार्यते' ग. पाठः.

टीका० — असुद्वयं प्राणेषु । 'असु क्षेपणे' । स्वरुवद् उः । असुशब्दो दन्त्यवान् । प्राणा अपि पुंसि बहुत्वे चेति एवंशब्दार्थः । कथं तर्हि 'प्राणो नाम महान् वायुर्यदोर्ध्वमतिक्रामती'ति न्यासः । स एकत्वविवक्षायां साधुः । पञ्चानां वायूनां च यदा प्राणशब्देनाभिधानं, तदा बहुत्वमेव । अत एव एकत्व-विवक्षायां —

"प्राणोऽपानः समानश्चोदानव्यानौ च वायवः"

इति प्रयोगः ॥

जीवोऽसुधारणम् ।

क्षीर० — **जीवः**[1] **प्राणधारणम् । जीवापि ॥**

टीका० — **प्राणधारणक्रियायां** जीवद्वयम् । जीवतेः 'हलश्च' (३. ३. १२१) इति घञ् । जीवः ॥

आयुर्जीवितकालो ना

क्षीर० — **आयात्यायुः**[2] **। जीवनावधिः । उसन्तः क्लीबे । छन्द-स्युदन्तोऽपि ॥**

टीका० — आयुर्द्वयमायुषि । 'एतेर्णिच्च' (उ० २. ११८) इति उसिः । णित्त्वाद् वृद्धिः आयुः । जीवितकालो ना ॥

जीवातुर्जीवनौषधम् ॥ ११९ ॥

क्षीर० — **जीवत्यनेन जीवातुः । जीवनायौषधं**[3] **जीवरक्षो-पायः । यथा —**

"जीवातवे विसृज शूद्रमुनौ कृपाणम्" ।

जीवितमौषधं चेत्युपाध्यायः ॥

इति क्षत्रियवर्गः ॥

---

१. 'वनं जी' ख. पाठः. २. 'य', ३. 'नौष' क. पाठः.

टीका० — म्रियमाणसञ्जीवनौषधौ जीवातुद्वयम्। 'जीवेरातुः' (उ० १. ८२) इत्यातुः। 'जीवातुः पुन्नपुंसकमि'ति रभसः॥

इति वन्द्यघटीयश्रीसर्वानन्दकृतौ टीकासर्वस्वे क्षत्रियवर्गः।

अथ वैश्यवर्गः।

ऊरव्या ऊरुजा अर्या वैश्या भूमिस्पृशो विशः।

क्षीर० — ऊर्वोर्भवा[1] ऊरव्याः। 'शरीरावयवाद् यत्' (५. १. ६)। यच्छ्रुतिः — 'ऊरू तदस्य यद्वैश्यः'। अरणीयोऽर्यः। 'अर्यः स्वामिवैश्ययोः' (३. १. १०३) इति साधुः। विशोऽपत्यं जातिर्वैश्यः। 'गर्गादिभ्यो यञ्' (४. १. १०५)। भूमिं स्पृशति कृष्यादिना भूमिस्पृक्। विशतीति विट्॥

टीका० — ऊरव्यषट्कं वैश्ये। ब्रह्मण ऊर्वोर्भवा ऊरव्याः। 'शरीरावयवाद् यत्'[2] (५. १. ६) इति यत्। 'ओर्गुणः' (६. ४. १४६)। 'वान्तो यि प्रत्यये' (६. १. ७९) इत्यवादेशः। ऊर्वोर्जाता ऊरुजाः। 'ऋ गतौ'। 'अर्यः स्वामिवैश्ययोः' (३. १. १०३) इति यत्। अर्यः। विश एव वैश्याः। स्वार्थे ष्यञ्। क्षेत्रसंस्काराय नित्यं भूमिं स्पृशन्तीति भूमिस्पृशः। विशेः क्विप्। विट् शान्तः॥

आजीवो जीविका वार्ता वृत्तिर्वर्तनवे[3]तने॥ १॥

क्षीर० — आजीवत्यनेनेति करणे भावे वा साधुः। जीवनं जीविका। 'रोगाख्यायां—' (३. ३. १०८) इत्यत्र धातुमात्राद् भावे ण्वुल् वक्तव्यः। कृष्यादिस्तूपचारात्। वर्तनं वृत्तिरस्त्यस्यां वार्ता। 'प्रज्ञाश्रद्धार्चा—' (५. २. १०१) इति णः। वर्तन्तेऽनया वृत्तिः। वेति[5] खादत्यनेन वेतनम्॥

टीका० — आजीवषट्कं जीविकायाम्। 'अकर्तरि च —' (३. ३.

---

१. 'रो' ख. पाठः. २. 'त्।' ञ. पाठः. ३. 'जीवने' क. ग. घ. पाठः. ४. 'श्यः', ५. 'ति न खा' ख पाठः.

१९) इति घञि आजीवः। जीवयतीति जीविका। ण्वुल्[1]। वृत्तिः प्राणधारणा, तद्योगात् 'प्रज्ञाश्रद्धार्चावृत्तिभ्यो णः' (५. २. १०१)। वार्ता। क्तिनि वृत्तिः। करणे ल्युट्। वर्तनजीवने ॥

स्त्रियां कृषिः पाशुपाल्यं वाणिज्यं चेति वृत्तयः।

क्षीर० — कर्षणात् कृषिः। 'इक् कृष्यादिभ्यः' (वा० ३. ३. १०८)। पशुपालस्य कर्म पाशुपाल्यम्। वणिजः कर्म वाणिज्यम्। ब्राह्मणादित्वात् ष्यञ्। 'दूतवणिग्भ्यां च' (५. १. १२६) इति वक्तव्याद् वणिज्यापि वा ॥

टीका० — कृष्यादयस्त्रयः प्रत्येकं वैश्यानां वृत्तयः। 'इक् कृष्यादिभ्यः' (वा० ३. ३. १०८) इति इक्। कृषिः। पशून् गोमहिष्यादीन् पालयतीति पशुपालः। 'कर्मण्यण्(३. २. १)। ततः कर्मणि ष्यञ्। वणिज्येत्यपीत्यन्यः ॥

क्षीर० —

"ऋतामृताभ्यां जीवेत्तु मृतेन प्रमृतेन वा।
सत्यानृताभ्यामथवा न श्ववृत्त्या कथञ्चन ॥"
(मनु० अ० ४. श्लो० ४)

इति ये षड् वृत्तिभेदाः, तानाह —

सेवा श्ववृत्तिः

शुन इव वृत्तिः। परपिण्डोपजीवित्वादवमेत्यर्थः ॥

टीका० — सेवाद्वयं शूद्रवृत्तौ। षेवृ सेवार्थो दण्डकः। 'गुरोश्च हलः' (३. ३. १०३) इत्यः। सेवा। सा च दैन्यादिना अतिनिकृष्टतया शुन इव वृत्तिः श्ववृत्तिरुच्यते। केवलं कृष्यादिरेव वृत्तिः। सेवा (श्व? च) वृत्तिरिति पाठे श्ववृत्तिशब्दस्यासङ्ग्रहः स्यात्। स चेष्यते। तथाच नाममाला — 'कर्षणयाचितसेवानृतमृतश्ववृत्त्याख्याः' ॥

अनृतं कृषिः

क्षीर० — न ऋतमनृतं पापिष्ठत्वात्। प्रमृतमिति तु सभ्यः पाठः ॥[2]

---

१. 'ल्। वृद्धिः। वृ' घ. ञ. पाठः. २. 'णं कृ' ख. पाठः.

टीका० — अनृतद्वयं कृष्याम् । सत्यमृतं, नञा अनृतम् ॥

उञ्छसिलं त्वृतम् ॥ २ ॥

क्षीर० — उञ्छो धान्यकणोच्चयः । सिलं धान्यमञ्जर्यार्जनम् । समस्तं व्यस्तं विपर्यस्तं चैतत् । ऋतधर्मत्वात् सत्यम् ॥

टीका० — उञ्छत्रयं सिञ्चोह[1] इति ख्याते । 'उछि उञ्छे' । घञ् । उञ्छः । 'शिल सिल उञ्छे' । इगुपधलक्षणः कः । शिलम् ।

"लूनकेदारशेषं तु शिलं सिलमिति स्मृतम् ।
उञ्छभक्षं च यच्चान्यन्निष्परिग्रहमाहृतम् ॥"

इति नियमाख्यमभिधानम् ।

"प्रतिग्रहाच्छिलं श्रेयस्ततोऽप्युञ्छः प्रशस्यते"

इति । उञ्छशिलमिति समाहारद्वन्द्वः । तत्र शाल्यादिनिपतितपरित्यक्तमञ्जरीणामादानं शिलम् । एकैकशः कपोतवत् कणानां ग्रहणमुञ्छः । अन्ये तु अल्पभेदादेकत्वं मन्यन्ते । तथाच प्रयोगः—

"शक्या न चेदुञ्छसिलेन वृत्तिः फलेन मूलेन च वारिणा च"

इति । सत्ये ऋतमुक्तम् ॥

द्वे याचितायाचितयोर्यथासङ्ख्यं मृतामृते ।

क्षीर० — मृतं निर्जीवमिव । अमृतम् अविनश्वरम् ॥

टीका० —यथाक्रमं याचिते मृतम्, अयाचितेऽमृतम् । द्वयं साधितम् । याचितं याचितलक्षणवृत्तिः । मरणसमदुःखतया मृतमित्युच्यते ॥

सत्यानृतं वणिग्भावः

क्षीर० — किञ्चित् सत्यं किंचिच्चासत्यम् । अत्र मनुः—

"ऋतमुञ्छसिलं ज्ञेयममृतं स्यादयाचितम् ।
मृतं तु याचितं भैक्षं प्रमृतं कर्षणं स्मृतम् ॥
सत्यानृतं तु वाणिज्यं तेनापि खलु जीव्यते ।
सेवा श्ववृत्तिराख्याता तस्मात् तां परिवर्जयेत् ॥"

(अ० ४. श्लो० ५. ६)

---

१. 'ञ्छोन इ' ग. पाठः.

टीका० — सत्यानृतद्वयं वाणिज्ये । सत्यसहितमनृतं सत्यानृतम् ।

"वाणिज्यं[1] सत्यानृतमाख्याता योषिद् वणिज्या"

इति वोपालितः ॥

स्यादृणं पर्युदञ्चनम् ॥ २ ॥

उद्धारः

क्षीर० — अर्यते स्म ऋणम् । 'ऋणमाधमर्ण्ये' (८. २. ६०) इति साधुः । परित[2] उदञ्चनम् उत्तमर्णादुद्धारत्वेन ग्रहणम् ॥

टीका० — ऋणादित्रयमृणे । 'ऋणमाधमर्ण्ये' (८. २. ६०) इति निष्ठातो नः । अञ्चतेः कर्मणि ल्युट् । पर्युदञ्चनम् । उद्ध्रियते गृह्यत इत्युद्धारः ॥

अर्थप्रयोगस्तु कुसीदं वृद्धिजीविका ।

क्षीर० — अर्थस्य[3] प्रयोगः कलान्तरेणादानम्[4] । कुत्सितं सीदन्त्यत्र कुसीदम् ॥

टीका० — अर्थप्रयोगत्रयं वृद्धिजीविकायाम् । 'कुस श्लेषणे' । 'कुसेरूलोम्भोमे(दे)ताः कित्' (उ० ४. १०८) इति ईदः । कुसीदं दन्त्यसमिति काचिदुणादिवृत्तिः । वृद्ध्या जीविका वृद्धिजीविका ॥

याच्ञयाप्तं याचितकं निमयादापमित्यकम् ॥ ४ ॥

क्षीर० — 'अपमित्ययाचिताभ्यां कक्कनौ' (४. ४. २१) । मुनिस्तु—

"निमयः परिवर्तः स्यादुद्धारोऽप्यापमित्यकम्" ॥

टीका० — याच्ञाप्राप्ते वस्तुनि **जाइवार्था**[6] इति ख्याते याचितकम् । 'अपमित्ययाचिताभ्यां कक्कनौ' (४. ४. २१) इति कन् । **निमयात् परिवर्तनादवाप्ते वस्तुनि** आपमित्यकम् । 'मेङ् प्रणिदाने' । अपपूर्वाद् 'उदीचां माङो व्यती-[7]

1. 'ज्य वाणिज्यं स' ञ. पाठः. 2. 'र्युद', 3. 'र्थप्र', 4. 'ण दानात् । कु' क.पाठः. 5. 'दाः' ञ. पाठः. 6. 'त्ता' ङ. पाठः. 7. 'ति' ख. पाठः.

ह्वारे' (३. ४. १९) इति क्त्वाप्रत्ययः । क्त्वो ल्यप् । 'मयतेरिदन्यतरस्याम् (६ ४. ७०) इति इत्त्वम् । 'ह्रस्वस्य पिति कृति तुक्' (६. १. ७१) इति तुक् । 'अपमित्ययाचिताभ्यां कक्कनौ' (४. ४. २१) इति कक् । 'किति च' (७. २. ११८) इत्यादिवृद्धिः ॥

उत्तमर्णाधमर्णौ द्वौ प्रयोक्तृग्राहकौ क्रमात् ।

क्षीर० — उत्तम ऋणेन उत्तमर्णः प्रयोक्ता । अधम ऋणेन अधमर्णः ग्राहकः । 'सुप्सुपे'ति समासः ॥

टीका० — ऋणदातर्युत्तमर्णः । उपचयहेतुतया उत्तममृणमस्येति समासः । ऋणग्रहीतरि अधमर्णः । अपचयहेतुतया अधममृणमस्येति समासः ॥

कुसीदिको वार्धुषिको वृद्ध्याजीवश्च वार्धुषिः ॥ ५ ॥

क्षीर० — कुसीदं गृह्णातीति कुसीदिकः । 'कुसीददशैकादशात् ष्ठन्ष्ठचौ' (४. ४. ३१) । वृद्धिं गर्ह्यां प्रयच्छति वार्धुषिकः । 'प्रयच्छति गर्ह्यम्' (४. ४. ३०) इति ठक् वृद्धेर्वृधुषिभावश्च । लक्ष्यादिदन्तोऽपि । यन्मनुः —

"श्रोत्रियस्य कदर्यस्य वदान्यस्य च वार्धुषेः" ।

(अ० ४. श्लो० २२४)

वृद्धिमाजीवति वृद्ध्याजीवः । द्वैगुणिकश्च । वृद्धिर्लाभः कलान्तरम् ॥

टीका० — वृद्ध्याजीविके कुसीदिकचतुष्कम् । 'कुसीददशकादशाट्ठन्ठचौ' (४. ४. ३१) इति ठन् । कुसीदिकः । 'वृद्धेर्वृधुषिभावश्च वक्तव्यः' (वा० ४. ४. ३०) इति ठक् । वार्धुषिकः । वार्धुषिरिति नैरुक्तोऽत्र ककारलोपइति टीकाकृतः ॥

क्षेत्राजीवः कर्षकश्च कृषिकश्च कृषीवलः ।

क्षीर०—कर्षति कृषिकः । औणादिक इकः । कृषक इत्येके । कर्षति क्ष्मां कर्षकः । शिल्पिनि कार्षिकोऽपि । कृषिरस्त्यस्य कृषीवलः । 'रजःकृष्यासुतिपर्षदो वलच्' (५. २. ११२) । 'वले' (६. ३. ११८) इति दीर्घः ॥

टीका० — क्षेत्राजीवचतुष्कं कृषके । ण्वुलि कर्षकः । 'कृषेर्वृद्धिश्चोदीचाम्' (उ० २. ४०) इति कुन् वृद्धिश्च । कार्षकः । अवृद्धिपक्षे कृषकः । 'रजःकृष्यासुतिपर्षदो वलच्' (५. २. ११२) । 'वले' (६. ३. ११८) इति दीर्घत्वम् । कृषीवलः ॥

क्षेत्रं व्रैहेयशालेयं व्रीहिशाल्युद्भवोचितम् ॥ ६ ॥

क्षीर० —व्रीहीणां भवनं क्षेत्रं व्रैहेयम् । 'व्रीहिशाल्योर्ढक्' (५. २. २) ॥

टीका० —व्रीहयो यवाद्याः, तत्क्षेत्रे व्रैहेयम् । 'व्रीहिशाल्योर्ढक्' (५. २. २) । शालिभवने क्षेत्रे शालेयम् । व्रैहेयवद् ढक् ॥

यव्यं यवक्यं षष्टिक्यं यवादिभवनं हि तत् ।

क्षीर०—यवानां भवनं क्षेत्रं यव्यम् । 'यवयवकषष्टिकाद्यत्' (५. २. ३) । यवकोऽल्पयवः । 'षष्टिकाः षष्टिरात्रेण पच्यन्ते' (५. १. ९०) । उपाध्यायो यवादिभवने हितमिति पाठं परिकल्प्यायस्तवान् चोद्यं करिष्यामीति, अशुद्धं पठामीति ॥

टीका० —यवादिभवने क्षेत्रे यव्यादिकम् । 'यवयवकषष्टिकाद्यत्' (५. २. ३) ॥

तिल्यतैलीनवन्माषोमाणुभङ्गाद् द्विरूपता ॥ ७ ॥

क्षीर० — तिलानां भवनं क्षेत्रं तिल्यं तैलीनम् । 'विभाषा तिलमाषोमाभङ्गाणुभ्यः' (५. २. ४) इति यत्खञौ । एवं माषादीनां द्विरूपता ।

---

१. 'कः । कार्षको' ङ. पाठः. २. 'पि' ख. ङ. पाठः. ३. 'त्यशुभं चोद्यं करिष्यामीत्यशुद्धं पाठमिति ॥' ग. घ, 'त्यशुद्धं पाठमिति' ख. ङ. पाठः. ४. 'दिति यत्' ग. पाठः.

माष्यं माषीणम् । उम्यमौमीनम् । उमा अतसी । अणव्यमाणवीनम् । भङ्ग्यं भाङ्गीनम् ॥

टीका० — तिलादिभवने क्षेत्रे तिल्यं तैलीनं च । यथा तिलक्षेत्रे तिल्यं तैलीनं च, तद्वन्माष्यं माषीणं च । उम्यमौमीनम् । अणव्यम् आणवीनम् । भङ्ग्यं भाङ्गीनम् । 'विभाषा तिलमाषोमाभङ्गाणुभ्यः' (५. २. ४) इति यत् । पक्षे खञ् ॥

मौद्गीनकौद्रवीणादि शेषधान्योद्भवक्षमम् ।

क्षीर० — मुद्गानां कोद्रवाणां च भवनं क्षेत्रम् । 'धान्यानां भवने क्षेत्रे खञ्' (५. २. १) । आदिशब्दान्मासूरीणादि । शेषाणि व्रीह्यादिभ्योऽन्यानि । शाकक्षेत्रे द्वयं शाकशाकटं शाकशाकिनं, 'भवने क्षेत्रे शाकटशाकिनौ वक्तव्यौ'[1] (वा० ५. २. २९) इति वक्तव्यात् ॥

टीका० — व्रीह्यादिभङ्गान्तं यदुक्तं, तच्छेषम् । मुद्गकोद्रवादिधान्यभवने क्षेत्रे मौद्गीनकौद्रवीणादि । 'धान्यानां भवने क्षेत्रे खञ्' (५. २. १) इति खञ् । आदिना कौळत्थीनादयः[2] ॥

बीजाकृतं तूप्तकृष्टे

क्षीर० — अबीजं सबीजं सम्पन्नं बीजाकृतम् । 'कृञो द्वितीयतृतीयशम्बबीजात् कृषौ' (५. ४. ५८) इति डाच् । आदावुप्तं पश्चात् कृष्टं क्षेत्रमुप्तकृष्टम् । 'पूर्वकाल —' (२. १. ४९) इति समासः ॥

टीका० — पूर्वमुप्तं पश्चात् कृष्टं यत् क्षेत्रं, तत्र बीजाकृतद्वयम् । 'कृञो द्वितीयतृतीयशम्बबीजात् कृषौ' (५. ४. ५८) इति डाच् । बीजाकृतम् ॥

सीत्यं कृष्टं च हल्यवत् ॥ ८ ॥

क्षीर० — सीतया हललेखया समितं सङ्गतं सीत्यम् । 'नौवयोधर्म —' (४. ४. ९१) इति सीतया समिते यत् । हलेन कृष्टं हल्यम् । 'मतजनहलात् करणजल्पकर्षेषु' (४. ४. ९७) इति यत् ॥

टीका० — सीत्यत्रयं कृष्टभूमौ । 'नौवयोधर्मविषमूलमूलसीता—' (४. ४. ९१) इत्यादिना यत् । सीत्यम् । कृषेः क्तः । कृष्टम् । 'मतजनहलात् करणजल्पकर्षेषु' (४. ४. ९७) इति यत् । हल्यम् ॥

---

१. 'व्यात् ॥' ख. पाठः. २. 'स्थी' ञ. पाठः.

त्रिगुणाकृतं तृतीयाकृतं त्रिहल्यं त्रिसीत्यमपि तस्मिन्।

क्षीर० — त्रिगुणं कृष्टं क्षेत्रं त्रिगुणाकृतम्। 'सङ्ख्यायाश्च गुणान्तायाः' (५. ४. ५९) इति डाच्। त्रिहल्यं त्रिसीत्यमपि प्राग्वत्। 'नौवयोधर्म —' (४. ४. ९१) इत्यादिना 'मतजन —' (४. ४. ९७) इत्यादिना च यत्। रथसीताहलेभ्यो यद्विधौ तदन्तविधिः॥

टीका० — वारत्रयं कृष्टे त्रिगुणाकृतचतुष्कम्। आर्येयम्। 'सङ्ख्यायाश्च गुणान्तायाः' (५. ४. ५९) इति डाच्। त्रिगुणाकृतम्। बीजाकृतवत् तृतीयाकृतम्। 'रथसीताहलेभ्यो यद्विधौ तदन्तविधिरिष्यत' इति वचनाद् हल्यवत् त्रिहल्यत्रिसीत्ये॥

द्विगुणाकृते तु सर्वं पूर्वं शम्बाकृतमपीह॥ ९॥

क्षीर० — सर्वं पूर्वं डाच् यच। द्वितीयाकृतं द्विहल्यं द्विसीत्यम्। शम्बाकृतं हि सम्याक् कृष्ट्वा तिर्यक् कृष्टमाहुः[1]॥

टीका० — द्विगुणाकृते वारद्वयं कृष्टे सर्वं समानम्। तद्यथा — द्विगुणाकृतं द्वितीयाकृतं द्विहल्यं द्विसीत्यम्। अतिरिक्तं च सम्बाकृतमपीह। सम्बारिमिति यत्र प्रसिद्धिः। एवमत्र पञ्च नामानि। सम्बाकृतं दन्त्यादि॥

द्रोणाढकादिवापादौ द्रौणिकाढकिकादयः।

क्षीर० — द्रोणस्य वापः क्षेत्रं द्रौणिकम्। उप्यते अस्मिन्निति वापः। 'तस्य वापः' (५. १. ४५) इति ठक्। आदिशब्दात् प्रस्थादिभ्यः 'सम्भवत्यवहरति पचति' (५. १. ५२) इति प्रास्थिकादयः॥

टीका० — उप्यतेऽस्मिन्निति वापः क्षेत्रम्। यथाक्रमं द्रोणस्य वापे क्षेत्रे द्रौणिकः, आढकस्य वापे आढकिकः। 'तस्य वापः' (५. १. ४५) इति ठक्। आदिना प्रास्थिकादि॥

खारीवापस्तु खारीकः

---

१. 'शम्बरीकृष्टं ति' ख., 'शम्याकृष्टं ति' क. पाठः.

क्षीर० — 'खार्या ईकन्' (५. १. ३३) ॥

टीका० — खारीवापे क्षेत्रे खारीको दीर्घमध्यः। 'खार्या ईकन्' (५. १. ३३) इति ईकन् ॥

उत्तमर्णादयस्त्रिषु ॥ १० ॥

क्षीर० — वाच्यलिङ्गत्वात् ॥

टीका० — उत्तमर्णादयः खारीकान्तास्त्रिषु ॥

पुन्नपुंसकयोर्वप्रः केदारः क्षेत्रम्

क्षीर० — उप्यतेऽस्मिन् वप्रम् । के जले दार्यते केदारः । क्षीयते धान्यैरुष्यतेऽत्र, हलैर्हिंस्यते वा क्षेत्रम् । 'क्षि निवासे', 'क्षीष् हिंसायां' वा ॥

टीका० — वप्रत्रयं क्षेत्रे । वप्र उक्तः । के जले दरणमस्येति केदारः । क्षेः ष्ट्रन् । क्षेत्रम् ॥

अस्य तु ।

कैदारकं स्यात् कैदार्यं क्षैत्रं कैदारिकं गणे ॥ ११ ॥

क्षीर० — अस्य क्षेत्रस्य समूहार्थे एते स्युः । 'केदाराद्यञ्च' (४. २. ४०) इति यञ् वुञ् च । 'ठञ् कवचिनश्च' (४. २. ४१) इति ठञ् । क्षेत्राद् 'अचित्तहस्ति—' (४. २. ४७) इति ठकि प्राप्ते भिक्षादित्वादण् ॥

टीका० — क्षेत्रस्य समूहे कैदारकचतुष्कम् । 'केदाराद्यञ्च' (४. २. ४०) इति यञ् । चकाराद् वुञ् । कैदारककैदार्ये । 'भिक्षादिभ्योऽण्' (४. २. ३८) । क्षैत्रम् । केदारानुवृत्तौ 'ठञ् कवचिनश्च' (४. २. ४१) इति ठञि कैदारिकम् ॥

लोष्टानि लोष्टवः पुंसि

क्षीर० — लुष्यते लुषति वा लोष्टम्। लोष्टुश्च मृत्खण्डः ॥

टीका० — मृत्तिकाखण्डे लोष्टद्वयम्। 'लोष्टपलितौ'(उ० ३. ९२) इत्यनेन लूञः क्तुष्टुग्गुणा निपात्यन्ते। 'लिश अल्पीभावे'। तुप्रत्ययेन लेष्टुरिति[1] चान्द्राः। 'लेष्टुः खण्डेऽपि लोष्टः स्याद्' इति पुंस्काण्डे वोपालितः॥

कोटिशो लोष्टभेदनः।

क्षीर० — कोटिभिः कोणैः श्यति भिनत्ति कोटिशः॥

टीका० — कोटिशद्वयं कोडणा[2] इति ख्याते। कोटिरग्रभागः, तद्योगाल्लोमादिशः। 'लोष्टघ्नः कोटीश' इति रत्नकोशे दीर्घमध्यः॥

प्राजनं तोदनं तोत्रं

क्षीर० — प्राज्यते प्रेर्यतेऽनेन प्राजनम्। 'वा यौ' (२. ४. ५७) इति पक्षे अजेर्धातोर्वी। प्रवयणं च। तुद्यतेऽनेन तोत्त्रम्। प्रेषणं च॥

टीका० — प्राजनत्रयं पाणाटीति ख्यातायाम्। अजेर्ल्युट्। प्राजनम्। वीभावपक्षे प्रवयणं चेति वृत्तिः। तुदेर्ल्युट्ष्ट्रनौ तोदनतोत्रे॥

खनित्रमवदारणम् ॥ १२ ॥

क्षीर० — खन्यतेऽनेन खनित्रं कुद्दालादि॥

टीका० — खनित्रद्वयं खनित्रे। अरित्रवत् खनेः खनित्रम्॥

दात्रं लवित्रम्

क्षीर० — द्यति लुनाति चा[3]नेन। 'दाम्नी—' (३. २. १८२) इति ष्ट्रन्। 'अर्तिलूधूसूखन—' (३. २. १८४) इत्यादिना इत्रः॥

टीका० — दात्रद्वयं दात्रे। 'दाप् लवने'। ष्ट्रन्। दात्रम्। अरित्रवल्लूञा लवित्रम्॥

---

१. 'तुष्टुप्र' ख. पाठः. २. 'को' ग. पाठः. ३. 'वा' क. ग. पाठः.

आबन्धो योत्रं योक्त्रम्

क्षीर० — आबध्यते यूयते युज्यते चानेनेति । चर्मरज्जुः ॥

टीका० —आबन्धत्रयं योत्रे[1] । करणे घञ् आबन्धः । यौतेर्युजेश्च ष्ट्रन् । योत्रयोक्त्रे ॥

अथो हलम् ।

क्षीर० —इतो हलप्रकरणमारब्धमित्यर्थः । अतो हलमित्येके पठन्ति ॥

निरीषे कुटकं

निष्क्रान्ता ईषा अस्मान्निरीषम् । कुटति कुटकं, यस्मिन् फालो बध्यते ॥

फालः कृषकः

फलति विशीर्यते भूमिरनेनेति फालः । कृषति क्ष्मां कृषकः । 'ष्वुन् शिल्पिसंज्ञयोः—' (उ० २. ३५) । हलादयः पञ्चैकार्था इत्येके । कुशिकः फलं च ॥

टीका० —फलपञ्चकं हले । 'फलं लाभे फलेऽस्त्राङ्गे........ व्युष्टौ हेतु-समुत्थे स्यादि'ति पवर्गादावजयः । फलशब्द उक्तः । ईषाया निर्गतं निरीषम् । कुट एव कुटकः साधितः । 'ञिफला विशरणे' । णिजन्तादच् । फालः । 'वृश्चिकृषोः किकन्' (उ० २. ४२) इति किकन् । कृषिकः । क्वचित् कृषक इत्यपि[2] पाठः[3] ।

"उदित्रं योक्त्रमाबन्धः फालः कृषक उच्यते ।
ईषा लाङ्गलदण्डस्तु निरीषं कुटकं हलम् ॥"

इति वृष्काः । केचित्तु इहापि ऊष्मादि पठित्वा हलादित्रयं लाङ्गलमुण्डके, फालद्वयं फाले वर्णयन्ति ॥

---

१ 'क्त्रे' ञ. पाठः. २. 'पि वा पा' ख. पाठः. ३. 'ठः । केचित्तु उ' ञ. पाठः. 'म् । इति वृष्काः । इ' ग. घ., 'म् । इति भागुरिः भृषकाः इ' ञ. पाठः.

लाङ्गलं हलम् ॥ १३ ॥

गोदारणं च सीरः

क्षीर०—लङ्गति लाङ्गलम् । हलति विलिखति हलम् । गौर्भूर्दार्यतेऽनेनेति गोदारणम् । सीयते बध्यते सीरः ॥

टीका०—लाङ्गलचतुष्कं लाङ्गले । 'हल विलेखने' । पचाद्यच् । गां भूमिं दारयतीति गोदारणम् । नन्द्यादि । 'षिञ् बन्धने' । 'शुसिचिमीनां दीर्घश्च' (उ० २. २७) इति क्रन् । सीरम् ॥

अथ शम्या स्त्री युगकीलकः ।

क्षीर०—शाम्यति शम्या ॥

टीका०—शम्याद्वयं युगकीले शमिल इति ख्याते । शाम्यतेरघ्न्यादियत् । शम्या ॥

ईषा लाङ्गलदण्डः स्यात्

क्षीर०—ईषति ईषा । 'ईष उञ्छे' ॥

टीका०—ईषाद्वयमीषे । 'ईष गतिहिंसादानेषु'‡ । 'गुरोश्च हलः' (३. ३. १०३) इत्यः । ईषा दीर्घादिर्मूर्धन्यषा ।

"प्रभुशङ्करयोरीशः स्त्रियां लाङ्गलदण्डके"

इति तालव्यान्ते रभसः ॥

सीता लाङ्गलपद्धतिः ॥ १४ ॥

क्षीर०—स्यति भुवं सीता हललेखा ॥

टीका०—सीताद्वयं लाङ्गलरेखायाम् ।

"सीता लाङ्गलरेखा स्याद् व्योमगङ्गा च जानकी"

इति दन्त्यादौ रभसः ।

---

१. 'द' क. ख. ग. पाठः.

---

‡ 'ईष गतिहिंसादर्शनेषु' इति मुद्रितधातुपाठः ।

"शीता नभस्सरिति लाङ्गलपद्धतौ च
शीता दशाननरिपोः सहधर्मिणी च ।
शीतं स्मृतं हिमगुणे च तदन्विते च
शीतोऽलसे च बहुवारतरौ च दृष्टः ॥"

इति तालव्यादौ धरणिः ॥

पुंसि मेथिः खलेदारु न्यस्तं यत् पशुबन्धने ।

क्षीर०— मीयते क्षिप्यते मेथिः । मेध्यते[1] सङ्गच्छते[2]ऽस्मिन् वा । खलेवाली च । खलं[3] तु खलधानकम् । खलेदार्विति 'हलदन्तात्—' (६. ३. ९) इत्यलुक् । पशुबन्धने पशुबन्धननिमित्तम् ॥

टीका०— खले धान्यमर्दनस्थाने पशुबन्धनार्थं मध्ये निहिते दारुणि मेथिः । 'मेधृ सङ्गमे च' । 'इन्' (उ० ४. ११९) इति इन् ॥

आशुर्व्रीहिः पाटलः स्यात्

क्षीर०— अश्यते अश्नुते वा आशुः । शीघ्रपाको वा । यद् शुभ्रः— 'आश्वाख्या शालिशीघ्रयोः' । व्रीणाति व्रीहिः षष्टिकादिधान्यविशेषः । 'व्री हरणे' । यतः,

"व्रीहिर्यवो मसूरो गोधूमो मुद्गमाषतिलचणकाः ।
अणवः प्रियङ्गुकोद्रवमयुष्टकाः शालिकाढक्यः ।
किञ्च कलायकुलस्थौ शणश्च सप्तदश धान्यानि" ॥

टीका०— आशुत्रयम् आशुधान्ये । शब्दत्रयं साधितम् । 'पादलोडीमिराशु च' इति तन्त्रान्तरम् ॥

शितशूकयवौ समौ ॥ १९ ॥

१, २. 'न्ते', ३. 'लं ख' ख. पाठः. ४. 'षा' ग. पाठः,

क्षीर० — शितस्तीक्ष्णः शूकः किंशारुरस्य शितशूकः । यूयते यवः ॥

टीका० — शितशूकद्वयं **यवे** । यौतेरच् । यवः ॥

तोक्मस्तु तत्र हरिते

क्षीर० — तत्र नीले यवे । तुज्यते तोक्मः । 'तुजि हिंसायाम्'[1] ॥[2]

टीका० — हरिते अपक्वे **यवे** तोक्मः ॥

कलायस्तु सतीनकः ।

हरेणुखण्डिकौ चास्मिन्

क्षीर० — कलामतिसारम् अयते कलायः । कं लाति वा । सीदन्त्यनेन सतीनकः । सातीनकोऽपि[3] । ह्रियते हरेणुः । खण्ड्यते खण्डिकः ॥

टीका० — कलायचतुष्कं **कलाये** । कं वातं लातीति कलायः । कृञः करेणुवद् हरेणुः । खण्डयोगात् खण्डिकः । 'पृखण्डिभ्यां ठन्' ।

"कलायस्त्रिपुटः प्रोक्तः सतीनो वर्तुलो मतः ।
हरेणुरङ्कटा ज्ञेया"

इति व्याडिः ॥

कोरदूषस्तु कोद्रवः ॥ १६ ॥

क्षीर० — कोरं भक्तं दूषयति कोरदूषः, कदन्नत्वात् । केनाम्भसा उद्यते क्लिद्यते कोद्रवः । उद्दालकोऽपि ॥

टीका० — कोरदूषद्वयं **कोद्रवे** । कोरं रुधिरं दूषयतीति कोरदूषः ॥

मङ्गल्यको मसूरः

क्षीर० — 'मसी परिणामे'[4] ॥

---

१. 'जिहिं', २. 'थैः ॥' ग. पाठः. ३. 'नेऽपि' ख. पाठः. ४. 'मा' ग. घ. ङ. पाठः.

टीका० — मङ्गल्यकद्वयं मसूरे। 'मसेश्च' (उ० १. ४६) इति उरन्। मसुरो ह्रस्वमध्य इति प्रथमपादीयोणादिवृत्तिः। ततो 'मसेरूरन्' (उ० ५. ३) इत्यनेन तत्पञ्चमपादीयेन दीर्घमध्योऽपि साधितः। 'मसूरो मसुरश्चापी'ति द्विरूपकोशः॥

अथ मकुष्ठकमयुष्ठकौ।

वनमुद्गे

क्षीर०—मङ्क्यतेऽनेन मकुष्ठकः॥

टीका० —मकुष्ठकत्रयमृषिमुद्गे काठाइडा इति ख्याते। मयुष्ठके द्वितीयोऽन्तःस्थः॥

सर्षपे तु द्वौ तुन्तुभकदम्बकौ॥ १७॥

क्षीर०—सरति सर्षपः। तुदति तुन्तुभः। कुत्सितमम्बते कदम्बकः॥

टीका० — सर्षपत्रयं सर्षपे। 'सर्तेरपः षुक् च' (उ० ३. १४१) इत्यपः षुगागमश्च धातोः। सर्षपो दन्त्यादिमूर्धन्यमध्यः।

"सर्षपः स्यात् सरिषपः कटुस्नेहश्च तुन्तुभः"

इति त्रिकाण्डशेषः॥

सिद्धार्थस्त्वेष धवलः

क्षीर० — सिद्धप्रयोजनो रक्षोघ्नत्वात्। श्वेतसर्षपः॥

टीका० — सितसर्षपे सिद्धार्थः॥

गोधूमः सुमनः समौ।

क्षीर० —गुध्यति परिवेष्टयति गोधूमः, गां धुनोति वा। सुष्ठु मन्यते सुमनोऽकारान्तः॥

टीका० — गोधूमद्वयं गोधूमे। 'गुध परिवेष्टने'। 'गुधेरूमः' (उ० ५. २) इति ऊमः। सुमनोऽदन्तः॥

स्याद् यावकस्तु कुल्माषः

क्षीर० — यूयतेऽम्भसा यावकः । कोलति कुलेन मस्यति परिणमते वा कुल्मासः, अर्धस्विन्नो यवादिः । धान्यविशेष इत्येके ॥

टीका० — यावकद्वयं माषपत्रायतपत्रे राजमाषे । कुलस्थे इत्यन्ये । यवको बोखधान्यमिति रक्षितः । कुलं मस्यतीति कुल्मासः । 'मस परिणामे' । 'कर्मण्यण्' (३. २. १) । पृषोदरादित्वात् कुलशब्दाकारलोपः । एवं धातुपारायणे दन्त्यसः । कुत्सितो माषः कुल्माषः । पृषोदरादिरित्यन्यः ।

"कुल्माषं काञ्जिके क्लीबं यवके तु पुमानसौ"

इति मूर्धन्ये रुद्रः ॥

चणको हरिमन्थकः ॥ १८ ॥

क्षीर० — चणते दीर्यते चणकः । हरिभिर्मथ्यते हरिमन्थकः ॥

टीका० — चणकद्वयं चणके । 'चन च, नोच्यते' इत्यस्माद् धातोरौणादिककुना धातुप्रदीपादौ चनकः साधितः । चणकस्तु चिन्त्यः । हरिमन्थके स्वार्थिकः कः ॥

द्वौ तिले तिलपेजश्च तिलपिञ्जश्च निष्फले ।

क्षीर० — 'तिलान्निष्फलात् पिञ्जपेजौ वक्तव्यौ' (वा० ४. २. ३६) । 'जर्तिलः स्याद् वनतिलः' ॥

टीका० — निष्फले तिले तिलपेजद्वयम् । 'तिलान्निष्फलात् पिञ्जपेजौ वक्तव्यौ' (वा० ४. २. ३६) इति पिञ्जपेजौ ॥

क्षवः क्षुताभिजननो राजिका कृष्णिकासुरी ॥ १९ ॥

क्षीर० — क्षौत्यनेन क्षवः । क्षुतमभिजनयति क्षुताभिजननः । कृ-

१. 'य' घ. ङ. च. पाठः.

ष्णसर्षपोऽयं राजसर्षपाख्यः। राजते राजिका। कृष्णा वर्णेन, कर्षति विलिखति वा कृष्णिका। अस्यते असुरस्त्रीव वा आसुरी ॥

टीका०— क्षवपञ्चकं राजिकायाम्। क्षुवतेरपि क्षवः। क्षुधामभिजनयतीति क्षुधाभिजननः। नन्द्यादिः। 'असुरी राजिकायां स्याद्' इति रभसः ॥

स्त्रियौ कङ्गुप्रियङ्गू द्वे

क्षीर०— कुत्सितं कृत्वा अङ्ग्यते कङ्गुः। कङ्कुः कुङ्गुश्चेत्येके। प्रीणाति प्रियङ्गुः ॥

टीका०— कङ्गुद्वयं कामण इति ख्यातायाम्। कङ्कुः कङ्गुश्चेति द्विरूपकोशः ॥

अतसी स्यादुमा क्षुमा।

क्षीर०— न तस्यते अतसी। अवते उमा। 'उङ् शब्दे'। क्षौत्यनया भुक्तया क्षुमा ॥

टीका०— अतसीत्रयमिनीति ख्यातायाम्। 'अत सातत्यगमने'। 'अत्यमिचमि—' (उ० ३. ११७) इत्यादिना असच्। गौरादिः ॥

मातुलानी तु भङ्गायां

क्षीर०— न तोल्यते मातुलानी। भङ्ग्यते भङ्गा। शणोऽपि ॥

टीका०— मातुलानीद्वयं कश्मीरेषु भङ्गा इति[१] ख्यातायाम्। एतत्फलं कलायपरिमाणम्। द्वयं साधितम् ॥

व्रीहिभेदस्त्वणुः पुमान् ॥ २० ॥

क्षीर०— अणुरल्पकणत्वात्। अणति पर्दत्यनेनेति वा। तुवरी त्वरके। वल्लो निष्पावे। श्यामः श्यामाके च ॥

---

१. 'सेव ख्या' क. ग. पाठः.

टीका० — कङ्कुतो मनागुपचितो व्रीहिविशेषोऽणुशब्देनैव केदारादिदेशे ख्यातोऽणुः । अणेर्धातोः 'धान्ये नित्' (उ० १. ९) इति उः ॥

किंशारुः सस्यशूकं स्यात्

क्षीर० — कुत्सितं शृणाति किंशारुः । श्यति शूकम् ॥

टीका० — किंशारुद्वयं **सस्यशूके** । 'किंजरयोः श्रिणः' (उ० १. ४) इत्युण् ॥

कणिशं सस्यमञ्जरी ।

क्षीर० — कणाः सन्त्यस्य कणिशम् । धान्ययवादि शिलं, सिलं च ॥

टीका० — अभिनवधान्यादिशीर्षे कणिशद्वयम् । कणिशं तालव्यशम् ॥

धान्यं व्रीहिः स्तम्बकरिः

क्षीर० — धन्यतेऽर्थ्यते धान्यम् । स्तम्बं करोति स्तम्बकरिः । 'स्तम्बशकृतोरिन्' (३. २. २४) । सीत्यं च ।

"कुसूलो वलकः कोष्ठागारं धान्यादिकोष्ठकः" ॥

टीका० — धान्यत्रयं **धान्ये** । 'दधातेर्यङ् नुट् च' (उ० ५. ४८) इति यक् नुडागमश्च प्रत्ययस्य । धान्यम् । स्तम्बं गुत्सं करोतीति स्तम्बकरिः । 'स्तम्बशकृतोरिन्' (३. ३. २४) ॥

स्तम्बो गुच्छस्तृणादिनः ॥ २१ ॥

क्षीर० — तृणादेर्यः स्तम्बो नालं स गुच्यतेऽनेन गुच्छः । यं प्रति स्तम्बोऽप्रसिद्धः, तं प्रत्यन्यथा विध्यनुवादौ कार्यौ । एवं सर्वत्रोन्नेयम् ॥

---

१. 'णुः । क्वचिन्नित्यन्यः । अ' ग. पाठः. २, 'न्यं' क. ग. पाठः. ३. 'स्य', ४. 'लः सवकः', ५. 'कम्' ख. पाठः, 'त' ग. पाठः. ६. 'न्यादित्र' क. ग. पाठः. ७. 'योज्यौ ।' ख. पाठः.

टीका० — तृणस्य गुत्से स्तम्बः । आदिना धान्यस्य । द्वयं सावितम् ।

"हस्तैन्यूनाधिकं[1] यस्य प्रमाणं न ततः परम् ।
नाभिमात्रश्च विस्तारो गुत्सः स इति कथ्यते ॥
पत्राणि येषामाकाशे सारं भूमौ तु वर्तते ।
तेऽपि गुत्सा इति प्रोक्ता यथा स्युर्मूलकादयः ॥
एकस्मादेव मूलात्तु लतापुञ्जाद् विनिर्गतः ।
एकोऽपिच प्ररोहैस्तु बहुभिः स्तम्ब उच्यते ॥"

इति निगमाख्यमभिधानम् ॥

नाडी नालं च काण्डोऽस्य

क्षीर० — अस्य गुच्छस्य यः कण्डत्यनेनेति काण्डः, सा नडति नाडी । 'णल गन्धे' ॥

टीका० — अस्य तृणादिनः काण्डे नाडीद्वयं, सावितम् ॥

पलालोऽस्त्री स निष्फलः ।

क्षीर० — स काण्डः । पलति पलालः ॥

टीका० — स एव तृणादिकाण्डो गृहीतधान्यः पलालाख्यः ॥

कडङ्गरो बुसं क्लीबे

क्षीर० — कडत्यावृणोति कड् अङ्ग रूपमस्य कडङ्गरः । बुस्यते उत्सृज्यते बुसं तृणादिक्षोदः ॥

टीका० — कडङ्गरद्वयं पातानत इति ख्याते । 'बुस उत्सर्गे' । 'इगुपधज्ञाप्रीकिरः कः' (३. १. १३५) । बुसो दन्त्यस इति धातुप्रदीपः । 'बुषवेषतुषारकाषा' इति मूर्धन्यपभेदः ॥

धान्यत्वचि पुमांस्तुषः ॥ २२ ॥

क्षीर० — तुष्यत्यनेनाग्निस्तुषः ॥

टीका० — धान्यत्वचि तुषः । 'तुष तुष्टौ' । इगुपधलक्षणः कः ॥

शूकोऽस्त्री श्लक्ष्णतीक्ष्णाग्रे

---

१. 'स्तं न्यू' क. पाठः.

क्षीर०— श्यति शूकम्। श्लक्ष्णं च तीक्ष्णाग्रं च तत्। सस्यादेरन्यत्र वृश्चिकादिकण्टकोऽपि शूक इति किंशारोः पृथङ्निर्देशः। शूकधान्यशमीधान्यभेदार्थं वा पुनरुक्तम्। धान्यतीक्ष्णाग्र इत्येके॥

टीका० — सामान्येन श्लक्ष्णे सूक्ष्मे तीक्ष्णाग्रे शूकः। 'शूकोऽनुग्रहशुङ्गयोरि'ति तालव्यादावजयः॥

शमी शिम्बा

क्षीर० — शाम्यत्यस्यां शमी। शिनोति शिम्बा। शिम्बि[1]रित्यपि॥

टीका० — शमीद्वयं शि[2]म्बडिकायाम्। शमी उक्तः॥

त्रिपूत्तरे।

क्षीर० — रिद्धाद्याश्चत्वारो वाच्यलिङ्गाः॥

टीका० — ऋद्धादयो बहुलीकृतान्तास्त्रिषु॥

रिद्धमावसितं धा[3]न्यं

क्षीर० — रिद्धं सिद्धं राधेः। ऋ[4]द्धं सुसम्पन्नम् इत्येके, ऋधेर्वा। आवसितं रक्षार्थमाच्छादितम्। 'वस आच्छादने'। अ[5]वसितं निष्पन्नमित्येके॥

टीका० — ऋद्धे सम्पन्ने आवसितम्। आङ्वपूर्वात् 'षो अन्तकर्मणि' इत्यस्मात् क्तः। (न स्योत तत् स्थितमवकीर्णे श्रुतम्?) । ऋद्धमावसितामिति नाममालायां दीर्घादिः।

"अवसानं गते ज्ञाते ऋद्धेऽ[6]प्यवसितं त्रिषु"

---

१. 'बिः शिबिरि', २. 'चि' ख. पाठः. ३. 'न्यं स रि', ४. 'रि' क. पाठः. ५. 'वसि' क. ख. पाठः. ६. 'न्द्र' ख., 'न्द्रु' ग. पाठः.

इति ह्रस्वादौ रभसः ॥

पूतं तु बहुलीकृतम् ॥ २३ ॥

क्षीर० — पूयते स्म पूतं निर्बुसीकृतम् । बहु लाति बहुलं सारम्[1] । मार्जनीशोधनमित्येके ॥

टीका० — पूतद्वयं बहुलीकृतधान्ये । पूतमुक्तम् ॥

माषादयः शमीधान्ये

क्षीर० — वर्तन्त इति शेषः । आदिशब्दान्मुद्गमसूरादयः ॥

टीका० — शमीसहिते धान्ये शमीधान्यम् ।

"मुद्गो माषो राजमाषः कुलत्थश्[2]चणकस्तिलः ।
काकाण्डश्चरवश्चेति शमीधान्यगणः स्मृतः ॥"

इति रत्नकोषः ॥

शूकधान्ये यवादयः ।

क्षीर० — आदिशब्दाद् गोधूमादयः ॥

टीका० — शूकसहिते धान्ये शूकधान्यम् । ते यवगोधूमादयः ॥

शालयः कलमाद्याश्च षष्टिकाद्याश्च पुंस्यमी ॥ २४ ॥

क्षीर० — शाल्यते शालिः । कल्यते कलमः । आदिशब्दाद् राजशाल्याद्याः[3] जलजाः । 'षष्टिकाः षष्टिरात्रेण पच्यन्ते' (५. १. ९०) । आदिशब्दात् कटजाद्याः स्थलजाः । अमी इति पुल्लिङ्ग[4]निर्देशान्माषाद्याः शाल्यन्ताः पुंसि ॥

टीका० — कलमाद्याः शूकधान्यविशेषाः शालिशब्दवाच्याः । प्रथमेनादिना रक्तशाल्यादेर्ग्रहणम् । द्वितीयेन कलमादिभ्योऽपकृष्टानां ग्रहणम् । अपकर्षादेव षष्टिकस्य पृथक्करणम् । 'शाडृ श्लाघायाम्' । 'इन्' (उ० ४. ११९)

---

१. 'म् । ओतः श्विः । मा' ग. पाठः. २ 'लुत्थश्च' ठ. पाठः. ३. 'दयः ज' ख. पाठः. ४. 'ला' ख. पाठः.

इति इन् । लत्वम् । शालिः । 'षष्टिकाः षष्टिरात्रेण पच्यन्ते' (५. १. ९०) इति कन्नन्तो निपातितः षष्टिकः । माषयवशालिषष्टिकाः पुंसि ॥

तृणधान्यानि नीवाराः

क्षीर० — नियते[1]र्व्रियन्ते नीवाराः, मुन्यन्नत्वात् । 'नौ वृ धान्ये । (३. ३. ४८) इति घञ् । बहुवचनाच्छ्यामाकादयोऽपि ॥

टीका० — नीवारादयस्तृणधान्यानीत्युच्यन्ते । आदिना श्यामाकादिग्रहणम् । 'नौ वृ धान्ये' (३. ३. ४८) इति घञ् । नीवारः औ[2]डिति ख्यातः ॥

स्त्री गवेधु[3]र्गवेधु[4]का ।

क्षीर० — गवे अम्भसि धीयते । गवेधुर्नाम मुन्यन्नम् । गवेथुरित्येके ॥

टीका० — गवेधुद्वयं **गवेधुके** इति ख्याते । घुणुञ्चीति चास्याः प्रसिद्धिः । पुंसि च । 'गवेधु(र्न ? र्ना) गवेधुक' इति रत्नकोषः ॥

अयोग्रं मुसलोऽस्त्री स्याद्

क्षीर० — अयोऽग्रेऽस्य अयोग्रम् । अयोदिरित्येके पेठुः । मुस्यते खण्ड्यतेऽनेनेति मुसलम् ॥

टीका० — अयोग्रद्वयं **मुसले** । अयो लोहोऽग्रे मुखेऽस्येति अयोग्रम् । मुसलिनि मुसलो व्युत्पादितः । मूर्धन्योऽपि दृश्यत इति वर्णदेशना ॥

उडूखलमुलूखलम् ॥ २९ ॥

क्षीर० — ऊर्ध्वं[8] खं लाति । उद्धणोद्धलवत् पृषोदरादित्वादुभयम् ।

टीका०—उडूखलद्वयमुलूखले । ऊर्ध्वं खमस्येत्युडूखलम् । पृषोदरादित्वादूर्ध्वस्य उडूभावः, खस्य च खलः । एवमयं टवर्गतृतीयवान् । अतो डलयोरैक्याद् उलूखलमित्यपि । तस्मात् तवर्गतृतीयोऽपपाठः ॥

---

१. 'ते त्रि' ङ. पाठः. २. 'दी' ग. पाठः. ३, ४. 'धु' क. पाठः. ५. 'मु । अ' ख. ग पाठः. ६. 'जि' क., 'न्दि' ख. पाठः. ७. 'तः । मुषलइत्यपि ॥' ठ. पाठः. ८. 'र्ध्वं खं ला' ख. क. पाठः. ९. 'द् द्वयम्' क. पाठः. १०. 'त् पदे उलूखलपाठो युज्यते । त' ञ. पाठः.

प्रस्फोटनं शूर्पमस्त्री

क्षीर० — प्रस्फोट्यते असारं बहिः क्रियतेऽनेनेति प्रस्फोटनम् । शीयते शीर्यते वानेन शूर्पम् । 'शूर्प माने' वा ॥

टीका० — प्रस्फोटनद्वयं कुल्लके । स्फुटतेर्ल्युट् । 'श्यः सम्प्रसारण-मूश्च' इति वर्तमाने 'सुशृभ्यां निच्च' (उ० ३. २६) इति पप्रत्ययः, ऊकारश्चान्तादेशः । शूर्पम् ॥

चालनी तितउः पुमान् ।

क्षीर० — चाल्यतेऽनेन । चालनमिति काल्यः ।

"क्षुद्रच्छिद्रसमोपेतं चालनं तितउ स्मृतम्" ।

तनोति सारं तितउः । 'तनोतेर्डउः सन्वच्च' (उ० ५. ५२) । परि-(वन ? पव)नं च ॥

टीका० — चालनी । 'चालनं तितउ प्रोक्तम्' इति तु रत्नकोषः । अतः पुमानिति मतान्तरमाश्रित्योक्तम् । अपपाठ इति केचित् । 'तनोतेर्डउः सन्वच्च' (उ० ५. ५२) इति डउप्रत्ययः सन्वद्भावश्च । डउ इति विसन्धिनिर्देशात् संहितायाः अभावः । अन्यथा लाघवाड् डोरित्येव ब्रूयात् । तितउः ॥

स्यूतप्रसेवौ

क्षीर०[1] — समानावित्येव । सीव्यते स्म स्यूतः । वस्त्राद्यावपनम् । प्रसीव्यते प्रसेवः ॥

टीका० — स्योनद्वयं धौतच्छटे । सीव्यत इति स्योनः । 'सिवु तन्तु-सन्ताने' । बहुलवचनान्नः । ऊठ् गुणश्च । स्योनः । स्यूत इति पाठे क्तः । 'स्योनस्यूतप्रसेवका' इति रभसः । कर्मणि घञ् । प्रसेवः ॥

कण्डोलपिटौ

क्षीर० — कण्ड्यते कण्डोलः । पट्यते पिटः वंशदलादिमयं भाण्डम् । पिटकोऽपि ॥

---

१. 'वकः' । क. ख. पाठः. २. 'ज्य' ख. पाठः.

टीका० — कण्डोलद्वयं कण्डोलके। 'कडि रक्षणे'। $ 'कविकल्हिकण्डिगडिगण्डिकटिपटिभ्य ओलच्' (उ० १. ६९)। कण्डोलः। 'पिट शब्दे'। इगुपधलक्षणः कः। पिटः॥

कटकिलिञ्जकौ॥ २६॥

समानौ

क्षीर० — कटत्यावृणोति कटः। किल्यते क्षिप्यतेऽस्मिन् किलिञ्जकः। वीरणनडादिमयं कुणोलाख्यम्॥

टीका० — येन मरावो बध्यते, तत्र कटद्वयम्। गजावयवे कट उक्तः॥

रसवत्यां तु पाकस्थानमहानसे।

क्षीर० — रस आस्वादोऽस्त्यस्यां रसवती। महदनोऽस्य महानसम्। अनसा उपकरणं लक्ष्यते। 'अनोऽश्मायस्सरसां जातिसंज्ञयोः' (५. ४. ९४) इति[1] समासान्तष्टच्प्रत्ययः॥

टीका० — रसवतीत्रयं [2]महानसे। रसः संस्क्रियमाणोऽस्यामस्तीति मतुपि रसवती। महच्चानश्चेति महानसम्। 'सन्महत्—' (२. १. ६१) इत्यादिना कर्मधारयः। 'अनोश्मायस्सरसां जातिसंज्ञयोः' (५. ४. ९४) इति समासान्तोऽच्॥

पौरोगवस्तदध्यक्षः

क्षीर० — पुरो [3]गौर्मांसं जलं वास्याः पुरोगुः, तस्या रसवत्या अयं पौरोगवः॥

टीका० — रसवत्यध्यक्षे पौरोगवः॥

सूपकारास्तु बल्लवाः॥ २७॥

---

१. 'ति टच्' क., 'समासान्तोऽच्प्र' ख. पाठः. २. 'रसनगृहे। र' ज. पाठः. ३. 'गोमत् स्थलं' क. ग., 'गोमान् स्थल' ख. घ. पाठः.

$ 'कपिगडि.........' इति मुद्रितोणादिपाठः।

क्षीर० — सूपं कुर्वन्तीत्युपलक्षणं मांसपाकादेः । वल्हिः सौत्रः प्रीत्यर्थः ॥

आरालिका आन्धसिकाः सूदा औदनिका गुणाः ।

क्षीर०—अरालम् अन्ध ओदनं च पण्यमेषाम् । सूदयन्ति तण्डुलान् सूदाः । गुणयन्ति गुणाः । रक्तकराश्च ॥

टीका०— सूपकारसप्तकं सूपकारे । सूपं व्यञ्जनं करोतीति सूपकारः । कर्मण्यण् । वर्णोऽधिकारः । तद्योगाद् वर्णवः । वप्रकरणे 'अन्येभ्योऽपि दृश्यन्त इति वक्तव्यम्' (वा० ५. २. १०९) इति वः । अरालं कुटिलं चरतीत्यारालिकः । अन्धो भक्तं तत्साधनं शिल्पमस्येति आन्धसिकः । 'शिल्पम्' (४. ४. ५५) इति ठक् । एवमौदनिकः । 'सूद क्षरणे' । दन्त्यादिः । पचादिः । सूदः । गुण उक्तः ॥

आपूपिकः कान्दविको भक्ष्यकारः

क्षीर०— अपूपाः कन्दुश्च पण्यमस्य । 'इसुसुक्तान्तात् कः' (७. ३. ५१) इति कान्दुक इति न्याय्यम् । खरविशदमभ्यवहार्यं भक्ष्यम् ॥

टीका० — छन्दवारेति ख्याते आपूपिकत्रयम् । 'तदस्य पण्यम्' (४. ४. ५१) इति ठकि आपूपिकः । कन्दुः स्वेदनी, तत्र संस्कृतपिष्टादिकमप्युपचारात् कन्दुः, स पण्यमस्येति कान्दविकः । भक्षं करोतीति भक्षकारः । भक्षशब्दो यकारान्त इति प्रमादपाठः ॥

इमे त्रिषु ॥ २८ ॥

क्षीर० — पौरोगवाद्या वाच्यलिङ्गाः ॥

टीका० — पौरोगवाद्या भक्षकारान्तास्त्रिषु ॥

अश्मन्तमुद्धानमधिश्रयणी चुल्लिरन्तिका ।

---

१. 'रक्तकारा' ख. पाठः.

क्षीर० — अश्नुतेऽश्मन्तम् । उद्धन्यतेऽत्रोद्धानम् । अधिश्रीयतेऽनया अधिश्रयणी । 'श्रीञ् पाके' । 'अन्त्यधिश्रयणी भवेदि'ति माला ॥

टीका० — अश्मन्तपञ्चकं चुल्ल्याम् । अश्मनोऽप्यन्तमत्रेति अश्मन्तकम् । शकन्ध्वादिरिति गोवर्धनः । उत्पूर्वाद्धाञो ल्युट् । उद्धानम् । 'ध्मा शब्दाग्निसंयोगयोरि'ति उद्ध्मानमिति कश्चित् । 'श्रीञ् पाके' । अघ्न्यादिः । ल्युट् । अधिश्रयणी । 'चुल्ल भावकरणे' । 'इन्' (उ० ४. ११९) इति इन् । चुल्लिः । पक्षे ङीष् । समीपे अन्तिक उक्तः । ततष्टाप् ॥

अङ्गारधानिकाङ्गारशकट्यपि हसन्त्यपि ॥ २९ ॥
हसन्यपि

क्षीर० — अङ्गारा धीयन्ते अस्याम् अङ्गारधानी । मग्नाग्निः । हसत्यङ्गारैर्हसन्ती, हसन्यपि[1] ॥

टीका० — अङ्गारधानिकाचतुष्कम् अङ्गारशकटिकायाम् । माङ्गलिका[3] माङ्गलशकटिकेति यामाहुः । स्वेदायाङ्गारो धीयतेऽस्यामिति अङ्गारधानी । ल्युट् । स्वार्थे कः । हसन्ती शत्रन्ता । ल्युटि हसनी ॥

अथ न स्त्री स्यादङ्गारः

क्षीर० — अङ्ग्यते अङ्गारः । लिङ्गार्थं विधिः ॥

अलातमुल्मुकम् ।

क्षीर० — अलन्ति[4] वारयन्ति[5] एतदलातम्[6] । न[7] लान्ति वा । उल्कां मुञ्चत्युल्मुकम् अर्धदग्धं काष्ठम् । उलति वा । उलिः सौत्रः ॥

टीका० — ईषद्दग्धकाष्ठादिखण्डे साग्नौ निरग्नौ चाङ्गारत्रयम् । 'अङ्गारचुम्बितमिव व्यथमानमास्ते' इति साग्नौ प्रयोगः । 'कलङ्कस्तत्रत्यो व्रजति मलिनाङ्गारतुलनामि'ति तु निरग्नौ प्रयोगः । 'अगि रगि लगि गत्यर्थाः' । मन्दार-

---

१. 'नी च । ' ख. पाठः. २. 'कादिच' ग. पाठः. ३. 'ङ्गा' ङ. पाठः. ४, ५. 'ति' क. पाठः. ६. 'म् । उल्कां' ख. पाठः. ७. 'अ' ग. पाठः.

बदारन् । अङ्गारः । 'उच समवाये' । 'उल्मुकदर्विहोमि---' (उ० ३. ८४) इति मुक्प्रत्ययो गुणाभावो लत्वं च चकारस्य निपात्यते ॥

क्लीबेऽम्बरीषं भ्राष्ट्रो वा

क्षीर०—अम्ब्यतेऽर्थ्यतेऽम्बरीषम् । भृज्ज्यतेऽस्मिन् भ्राष्ट्रः । अस्त्र्यम्बरीषमित्येके पठन्ति ॥

टीका०—यत्र कलायचणकादिकं भृज्ज्यते, तत्राम्बरीषद्वयम् । 'अस्जो पाके' । 'अम्बरीषः' (उ० ४. २७) इत्यनेन ईषन् अम्बर इत्ययं चादेशः । 'भ्राष्ट्रोऽम्बरीष उक्त' इति पुंस्काण्डे वोपालितः । 'अस्जगामिहनिनमिवि*शां वृद्धिश्च' (उ० ४. १६१) इति ष्ट्रन् वृद्धिश्च । भ्राष्ट्रम् ॥

कन्दुर्ना स्वेदनी स्त्रियाम् ॥ ३० ॥

क्षीर०—वेत्येव । विकल्पेन कन्दुर्ना पुमान् । पक्षे स्त्री । कन्दत्येनां कन्दुः । स्वेदयति स्वेदनी ॥

टीका०—अधोमुखीकृत(क ? घ)टर्कपालप्राये लोहादिमये पाकपात्रे कन्दुद्वयम् । 'स्कन्देः सलोपश्च' (उ० १. १४) इति कुः । कन्दुः । ल्युटि स्वेदनी ॥

अलञ्जरः स्यान्मणिकः

क्षीर०—अलं जीर्यत्यलञ्जरः महाकुम्भः । मणत्यम्भसा ध्रियमाणो मणिकः ॥

टीका०—अलञ्जरद्वयं जाडीति ख्याते । मणिरेव मणिकः । स्वार्थिकोऽत्र कः ॥

---

१. 'मृ' ख. ग. ङ. च. पाठः. २ 'कप्रा', ३. 'जी' ख., 'जला । म' ग. पाठः. ४. 'त्रि' ख. पाठः. ५. 'भालञ्चूर' ङ. च. छ. पाठः. ६. 'भी' ख. ग. पाठः.

---

* 'विद्यशाम्' इति मुद्रितोणादिपाठः ।

कर्कर्यालूर्गलन्तिका ।

क्षीर०—किरत्यम्बु कर्करी । आलात्यालूः । 'अड उद्यमने' । अस्मादालूर्वा । गलत्यम्भोऽस्या गलन्तिका ॥

टीका०—कर्करीत्रयं भावाडिआ इति ख्याते । 'ऋ गतौ' । 'त्रो रश्च लः' (उ० १. ९) इति बाहुलकाद् गुणलत्वे । आलुः । 'गड सेचने' । 'हृवसी'-त्यादिना झच् । स च षि(त्वा?)त् । ङीप् । गलन्तिका ॥

पिठरः स्थाल्युखा कुण्डं

क्षीर०—पिठति पिठरः पिठरी च । 'पिठ अवयवे' । पिठेरमिति सभ्याः । तिष्ठत्यस्यां स्थाली । स्थालं कुम्भी च । (उ?ओ)खत्युखा । कु(ड्य?ण्ड्य)ते पच्यतेऽस्मिन्निति कुण्डं कुण्डी च ॥

टीका० — पिठरचतुष्कं भाण्डीति ख्यातायाम् । पचतेः 'पचिवचिभ्यामिच्चोपधायाः' इत्यरः ठश्चान्तादेशः । पिठरः । 'स्थाचतिमृजेरालज्वालजालीयरः' (उ० १. ११९) इति आलः । स्थाली । 'उख णखे'-त्यादौ इगुपधलक्षणः कः । उखा । कुण्ड उक्तः ॥

कलशस्तु त्रिषु द्वयोः ॥ ३१ ॥

घटः कुटनिपौ

क्षीर०—कं लाति कलयति वा कलशः । घटते घटः । कुटति कौत्यम्भसा वा कुटः । निपिबन्त्यस्मान्निपः ॥

टीका०—कलशचतुष्कं कलशे । 'सकलशे कलशे वनमालिके'ति कप्फिणाभ्युदये यमकम् । 'सुक्षेत्रमिव सकलशालिकं स्नानागारमि'त्याश्चर्यमञ्जरी च । 'कलशः कलसोऽपि च' इति तु रभसः । घटेरचि घटः । स्त्रियां घटी । कुटेः कः । कुटः । निपिबन्त्यनेनेति निपः । 'घञर्थे कविधानम्' (वा० ३. ३. ५८) इति कः ॥

१. 'अ' क. ख. पाठः. २. 'ल' क. ग. ङ. पाठः. ३. 'दारुपूर्वा', ग., 'दारुर्वा' ङ. पाठः. ४. 'का । चालयतीत्यर्थः । पि' क. ग. ङ. पाठः. ५. 'भाडि' ङ. छ. पाठः. ६. 'न्त्य' ख. ङ. पाठः. ७. 'स्या' ग. पाठः.

अस्त्री शरावो वर्धमानकः ।

क्षीर०—शीर्यमाणमवति शरावः । वर्धते मृत्पिण्डाद् वर्ध्यते छिद्यते वा चक्राद् वर्धमानकः । शालाजि[1]रो[2]ऽपि ॥

टीका०—शरावद्वयं **शरावे** । 'शृणातेराव' इत्यावः । शरावैः[3] । 'अस्त्री सराव' इति तु विदग्धाः । 'ताच्छील्यवयोवचनशक्तिषु चानश्' (३. २. १२९) । स्वार्थे कन् । वर्धमानकः ॥

ऋचीकं पिष्टपचनं

क्षीर०—अर्च्यते पाकोत्कर्षादृचीकम् । ऋजीषमिति तान्त्रिकाः[4] । 'ऋज भृजि भर्जने' । पिष्टकृतं भक्ष्यं पच्यतेऽस्मिन् पिष्टपचनम् ॥

टीका०—तेलावणीति ख्यातायाम् ऋजीषद्वयम् । 'अर्ज षर्ज अर्जने' । 'अर्जेः[5] किद् ऋज च' (उ० ४. २८) इति ईषन् ऋजादेशश्च धातोः । ऋजीषम् । मूर्धन्यषम् ॥

कंसोऽस्त्री पानभाजनम् ॥ ३२ ॥

क्षीर०—काम्यतेऽस्मात् कंसः । चषको मल्लिका पारी च ॥

टीका०—कंसद्वयं **पानभाजने** । रजतमयादावपि । 'कमेः सः' इति सः । कंसः ॥

कुतूः कृत्तेः स्नेहपात्रं

क्षीर०—कुत्सितं तन्यते कुतूः । कृत्तेश्चर्मणः ॥

टीका०—कृत्तेश्चर्मणः स्नेहपात्रे कुडुआ इति ख्याते **कुतूः** । सैवेति निर्देशात् स्त्रियाम् ॥

सैवाल्पा कुतुपः पुमान् ।

क्षीर०—ह्रस्वा कुतूः कुतुपः । 'कुत्वा डुपच्' (५. ३. ८९) ॥

---

१. 'जी' ग. पाठः. २. 'को' ख. पाठः. ३. 'वः । शरावोऽस्त्री निरसरावरणेइ' क. च. छ., 'वः रावेणेइ' ख. ग. ट. पाठः. ४. 'काः । ऋषीकामित्येके । ऋ' ख. पाठः. ५. 'जेर्ऋ-जश्च इ' क. ख. पाठः.

टीका० — अल्पा कुतूः कुतुपः । 'कुत्वा डुपच्'(५. ३. ८९) इति कुतूशब्दाड् डुपच् ॥

सर्वमावपनं भाण्डं पात्रामत्रे[1] च भाजनम् ॥ ३३ ॥

क्षीर०— आ उप्यते आधेयमस्मिन्नावपनम्। भण्डत्याधेयं भाण्डम्। 'भडि परिभाषणे'। पात्याधेयं[2] पीयतेऽस्माद्वा पात्रम्। अमत्याधेयमत्रामत्रम्। भज्यतेऽस्मिन्नाधेयं भाजनम्। भाण्डावपने पृथगाहुः। यन्मुनिः—

"उष्ट्रिकादि[3] तु यद् भाण्डं सर्वमावपनं विदुः"॥

टीका० — सर्वमावपनं वस्तुस्थापकं गोणीप्रसेवकादिका[4] कलशस्थाल्यादिकश्च भाण्डादिचतुष्कवाच्याः। आङ्पूर्वो वपिर्न्यासे[5]ने। 'भडि परिभाषणे'। पचाद्यच्। पृषोदरादित्वाद् दीर्घः। भाण्डम्। पातेः ष्ट्रन्। पात्रम्। अमत्रं ह्रस्वादि। भजेर्ण्यन्ताल् ल्युट्। भाजनम् ॥

दर्वी कम्बिः खजाका च

क्षीर० — दृणाति पाक्यं दर्वी। काम्यते कम्बिः। खजति मथ्नाति खजाका ॥

टीका०— दर्वित्रयं[6] दार्वीति ख्यातायाम्। 'दॄ विदारणे'। 'वॄदॄभ्यां[7] विन्' (उ० ४. ५४)। दर्विः। 'उल्मुकदर्विहोमिनः' (उ० ३. ८४) इत्यनेन वा विप्रत्ययान्ता दर्विर्निपात्यते। कमेर्बाहुलकाद् विन्। कम्बिः। 'खज मन्थे'। 'खजेराकः' (उ० ४. १३) इत्याकः। टाप्। खजाका ॥

स्यात्तन्दूर्दा[8]रुहस्तकः।

क्षीर० — ततं दुनोति खण्डयति तन्दूः, तनोति वा। तण्डूरिति सभ्यः पाठः। दारुमयी हस्तप्रतिकृतिः दारुहस्तकः। दर्वीभेदोऽयम् ॥

---

१. 'त्रं' ङ. पाठः. २. 'त्यते आधे' ख. पाठः. ३. 'दिमयं भा' ग. पाठः. ४. 'वका क' ख. ङ. ञ., 'बादिककरक' ठ. पाठः. ५. 'से।' क. पाठः. ६. 'दर्व्याम्' ठ. पाठः, 'दावीति' ख. पाठः. ७. 'दॄवीभ्यां' ख. ट. पाठः. ८. 'बा। दा' ग. पाठः.

अस्त्री शरावो वर्धमानकः ।

क्षीर० — शीर्यमाणमवति शरावः । वर्धते मृत्पिण्डाद् वर्ध्यते छिद्यते वा चक्राद् वर्धमानकः । शालाजिरो[1][2]ऽपि ॥

टीका० — शरावद्वयं शरावे । 'शृणातेराव' इत्यावः । शरावः[3] । 'अस्त्री सराव' इति तु विदग्धाः । 'ताच्छील्यवयोवचनशक्तिषु चानश्' (३. २. १२९) । स्वार्थे कन् । वर्धमानकः ॥

ऋचीकं पिष्टपचनं

क्षीर० — अर्च्यते पाकोत्कर्षादृचीकम् । ऋजीषमिति तान्त्रिकाः[4] । 'ऋज भृजि भर्जने' । पिष्टकृतं भक्ष्यं पच्यतेऽस्मिन् पिष्टपचनम् ॥

टीका० — तेलावणीति ख्यातायाम् ऋजीषद्वयम् । 'अर्ज षर्ज अर्जने' । 'अर्जेः[5] किद् ऋज च' (उ० ४. २८) इति ईषन् ऋजादेशश्च धातोः । ऋजीषम् । मूर्धन्यषम् ॥

कंसोऽस्त्री पानभाजनम् ॥ ३२ ॥

क्षीर० — काम्यतेऽस्मात् कंसः । चषको मल्लिका पारी च ॥

टीका० — कंसद्वयं पानभाजने । रजतमयादावपि । 'कमेः सः' इति सः । कंसः ॥

कुतूः कृत्तेः स्नेहपात्रं

क्षीर० — कुत्सितं तन्यते कुतूः । कृत्तेश्चर्मणः ॥

टीका० — कृत्तेश्चर्मणः स्नेहपात्रे कुडुआ इति ख्याते कुतूः । सैवेति निर्देशात् स्त्रियाम् ॥

सैवाल्पा कुतुपः पुमान् ।

क्षीर० — ह्रस्वा कुतूः कुतुपः । 'कुत्वा डुपच्' (५. ३. ८९) ॥

---

१. 'जी' ग. पाठः. २. 'को' ख. पाठः. ३. 'वः । शरावोऽस्त्री निरसरावरणेइ' क. च. छ., 'वः रावेणेइ' ख. ग. ट. पाठः. ४. 'काः । ऋषीकामित्येके । ऋ' ख. पाठः. ५. 'जेर्ऋजश्च इ' क. ख. पाठः.

टीका० — अल्पा कुतूः कुतुपः । 'कुत्वा डुपच्'(५. ३. ८९) इति कुतूशब्दाड् डुपच् ॥

सर्वमावपनं भाण्डं पात्रामत्रे[1] च भाजनम् ॥ ३३ ॥

क्षीर० — आ उप्यते आधेयमस्मिन्नावपनम्। भण्डत्याधेयं भाण्डम्। 'भडि परिभाषणे'। पात्याधेयं पीयते[2]ऽस्माद्वा पात्रम्। अमत्याधेयमत्रामत्रम्। भज्यतेऽस्मिन्नाधेयं भाजनम्। भाण्डावपने पृथगाहुः। यन्मुनिः—

"उष्ट्रिकादि[3] तु यद् भाण्डं सर्वमावपनं विदुः" ॥

टीका० — सर्वमावपनं वस्तुस्थापकं गोणीप्रसेवकादिका[4] कलशस्थाल्यादिकश्च भाण्डादिचतुष्कवाच्याः। आङ्पूर्वो वपिर्न्यासे[5]ने। 'भडि परिभाषणे'। पचाद्यच्। पृषोदरादित्वाद् दीर्घः। भाण्डम्। पातेः ष्ट्रन्। पात्रम्। अमत्रं ह्रस्वादि। भजेर्ण्यन्ताल् ल्युट्। भाजनम् ॥

दर्वी कम्बिः खजाका च

क्षीर० — दृणाति पाक्यं दर्वी। काम्यते कम्बिः। खजति मथ्नाति खजाका ॥

टीका० — दर्वित्रयं दार्वी[6]ति ख्यातायाम्। 'दॄ विदारणे'। 'वॄदॄभ्यां[7] विन्' (उ० ४. ५४)। दर्विः। 'उल्मुकदर्विहोमिनः' (उ० ३. ८४) इत्यनेन वा विप्रत्ययान्ता दर्विर्निपात्यते। कमेर्बाहुलकाद् विन्। कम्बिः। 'खज मन्थे'। 'खजेराकः' (उ० ४. १३) इत्याकः। टाप्। खजाका ॥

स्यात्तन्दूर्दा[8]रुहस्तकः।

क्षीर० — ततं दुनोति खण्डयति तन्दूः, तनोति वा। तण्डूरिति सभ्यः पाठः। दारुमयी हस्तप्रतिकृतिः दारुहस्तकः। दर्वीभेदोऽयम् ॥

---

१. 'त्रं' ङ. पाठः. २. 'त्यते आधे' ख. पाठः. ३. 'दिमयं भा' ग. पाठः. ४. 'वका क' ख. ङ. ञ., 'बादिककरक' ठ. पाठः. ५. 'से।' क. पाठः. ६. 'दव्व्यीम्' ठ. पाठः, 'दावीति' ख. पाठः. ७. 'दृवीभ्यां' ख. ट. पाठः. ८. 'बा। दा' ग. पाठः.

टीका० — तर्डूद्वयं परिवेषणोपयुक्तायाम्। '*त्रो डुक् च' (उ० १.९२) इति ऊः धातोर्डुगागमश्च। तर्डूः स्त्रियाम्। दारुणो हस्त इव दारुहस्तकः। 'इवे प्रतिकृतौ' (५. ३. ९६) इति कन् ॥

अस्त्री शाकं हरितकं शिग्रुः

क्षीर० — श्यति देहं, शक्यतेऽनेन भोक्तुं वा शाकम्। हरितकं नीलत्वात्। शिनोति शिग्रुः त्र्यर्थे, शौभाञ्जनं हरितकविशेषश्चेति ॥

टीका० — शाकत्रयं शाके। शाकशिग्रुशब्दावुक्तौ। हरितात् स्वार्थे कन्। हरितकम् ॥

अस्य तु नाडिका ॥ ३४ ॥

कदम्बश्च कलम्बश्च

क्षीर० — अस्य शाकस्य नाडी। कदति के लम्बति वा कदम्बः। शाकविशेषे इत्येके। प्राकृते दस्य डत्वात् कडम्ब इत्याहुः। कलम्बो वा ॥

टीका० — शाकनालिकायां कडम्बद्वयम्। नाला उक्ता। कनि नालिका। कडेर्बाहुलकः अम्बच्। कडम्बकलम्बौ ॥

वेषवार उपस्करः।

क्षीर० — वेषं व्याप्तिं वृणीते वेषवारः। कासमर्दसुरसादिः। येन मांसाद्युपस्क्रियतेऽसावुपस्करः। 'समवाये च' (६. १. १३८) इति सुट् ॥

टीका०— वेशवारद्वयं सर्षपादौ हिङ्गुजीरकाम्लवेतसादौ च। वर्णदेशनायां तु दन्त्यो वेसवारः। उपस्करोति व्यञ्जनमिति उपस्करः। पचादिः ॥

तद्भेदानाह—

तिन्तिडीकं च चुक्रं च वृक्षाम्लम्

१. 'सौभञ्जनं हरितवि', २. 'लि', ३. 'ली'ख. पाठः. ४. 'डस्य सत्त्वा' ग. पाठः. ५. 'माहुः' ख. पाठः. ६. 'ते स उप', ७. 'त्रि' क. ख. पाठः.

* 'त्रो दुट् च' इति मुद्रितोणादिपाठः।

क्षीर० — तिन्तृडीशैलजं तिन्तृडीकम्। चुक्रम्। 'चुक व्यथने'। वृक्षस्याम्लमम्लवेतसमाहुः॥

टीका० — महाद इति ख्याते तिन्तृडीकद्वयम्। 'चक तृप्तौ'। 'चकि-रम्योरुच्चोपधायाः' (उ० २. १६) इति रक्। चुक्रम्॥

अथ वेल्लजम्॥ ३५॥

मरिचं कोलकं कृष्णमूषणं धार्मपत्तनम्।

क्षीर० — वेल्ले वेल्लातटे जायते वेल्लजम्। वेल्लाख्यः शाखीत्येके। म्रियते मरिचम्। सौक्ष्म्यात् कोलकम्। 'कुल बाल्ये'। कृष्णं वर्णेन, कर्षति तैक्ष्ण्याद्वा। ऊषति रुजत्यूषणम्। धर्मपत्तने भवं धार्मपत्तनम्। आह च —

"मरिचं वलितं श्यामं वेल्लजं कृष्णमूषणम्।
यवनेष्टं शरं वृन्तं कोलकं धार्मपत्तनम्"॥

टीका० — वेल्लजषट्कं मरिचे।

"मरीचं कोलकं धार्मपत्तनं मरिचं समम्"

इति रभसः। कृष्णमुक्तम्। उषणं दीर्घादि चास्ति॥

जीरको जरणोऽजाजिः कणा

क्षीर० — जीर्यतेऽनेनान्नं जीरको जरणश्च। अजं स्वाभाविकं मन्दाग्नित्वमजति अजाजिः, स्त्री। कणाः सन्त्यस्यां कणा। अर्शआदित्वा-दच्॥

टीका० — जीरकचतुष्कं जीरके। 'स्त्र्यजाजिर्जीरणोऽजाजी' इति वोपालितः। कणा उक्ता॥

कृष्णे तु जीरके॥ ३६॥

सुषवी कारवी पृथ्वी पृथुः कालोपकुञ्चिका।

क्षीर० — कृष्णा तु पिप्पलीत्येके पेठुः। सुष्ठु सुवति प्रेरयति दोषान्

१., २. 'न्त्रि' क. ख. पाठः. ३. 'म्' 'म्रि', ४. 'न। ऊ', ख. पाठः. ५. भ्योऽच्' ङ. पाठः.

सुषवी। कारोरियं कारवी[1]। काला वर्णेन। उपकुञ्चयत्यल्पीकरोति दोषान् उपकुञ्चिका। आह च—

"उत्कुञ्चिकोपकुञ्ची च कालिका चोपकालिका।
सुषवी कुञ्चिका कुञ्ची पृथ्वीका कृष्णजीरकः" ॥

टीका०—कृष्णजीरके सुशवीषट्कम्। सुशवी तालव्यमध्या। अपरं साधितम् ॥

आर्द्रकं शृङ्गिबेरं स्याद्

क्षीर०—आर्द्रात् 'संज्ञायां कन्' (५. ३. ७५)। शृङ्गोपलक्षितं बेरं देहोऽस्य शृङ्गिबेरम्। आह च—

"महौषधं शृङ्गिबेरं कटुभद्रं तथार्द्रकम्" ॥

टीका०—आर्द्रकद्वयमार्द्रके। आर्द्रायां नक्षत्रे जातमार्द्रकम्। कनि 'केऽणः' (७. ४. १३) इति ह्रस्वत्वम्। शृङ्गमिव बेरं वपुरस्येति शृङ्गबेरम् ॥

अथच्छत्रा वितुन्नकम् ॥ ३७ ॥

क्षीर०—छत्राभा[2] छत्रा, छादयति दोषान् वा। वितुदति मन्दाग्नित्वं[3] वितुन्नकम् ॥

कुस्तुम्बुरु च धान्याकम्

कुत्सितं तुम्बति कुस्तुम्बुरु। 'तुबि लुबि अर्दने'। पारस्करादित्वात् सुट्। धान्यमकति धान्याकम्। अल्लुका धान्यकं च ॥

टीका०—छत्राचतुष्कं धान्याके[4]। छत्रा उक्ता। विपूर्वात् तुदेः क्तः। स्वार्थे कन्। वितुन्नकम्। कुत्सितं तुम्बुरु कुस्तुम्बुरु। 'कुस्तुम्बुरूणि जातिः' (६. १. १४३) इति सुट् निपात्यते। धान्यात् स्वार्थे कनि धान्याकम्। धान्यकमपीति हट्टचन्द्रः ॥

---

१. 'बी। बृहत्कारणात् का' क, 'बी ......त्करणात् का' ग. पाठः. २. 'त्राभपत्रा' छादयति दोषान् वा छत्रा। वि' ग. ङ. पाठः. ३. 'मित्वाद वि' ख. पाठः. ४. 'श्यामाके' ग. पाठः.

अथ शुण्ठी महौषधम् ।

स्त्रीनपुंसकयोर्विश्वं नागरं विश्वभेषजम्[1] ॥ ३८ ॥

क्षीर० — शुण्ठति शुष्यति शुण्ठी । नगराख्ये देशे भवं नागरम् । विश्वभेषजम् अनेकदोषजित् । विश्वं विश्वा च, भीमवत् ॥

टीका० — शुण्ठीपञ्चकं शुण्ठ्याम् । 'शुठि शोषणे' । पचादि[2]गौरादी । स्त्रीनपुंसकयोर्विश्वम् । देवभेदे पुमानुक्तः ॥

आरनालकसौवीरकुल्माषाभिषुतानि तु ।
अवन्तिसोमधान्याम्लकुञ्जलानि च काञ्चिकम् ॥ ३९ ॥

क्षीर० — अरनालो भक्तं, तज्जमारनालम् । सुवीरेषु प्रायभवं सौवीरम् । 'षुञ् अभिषवे'[3], अस्माद्वा पृथक् कुल्माषाख्या नास्ति । अस्ति चेद् भीमवत् स्यात् । कुल्माषैर्यवादिभिरर्धस्विन्नैरभिषूयते परिवास्यते स्म कुल्माषाभिषुतम् । अवन्तिषु सूयते अवन्तिसोमम् । कुञ्जं लाति[4], तथा कुत्सितं जलमस्त्यस्य वा कुञ्जलम् । काञ्चयति दीपयत्यग्निं[5] काञ्चिकं, बध्नाति दोषान् वा काञ्च्यां पुरि भवं वा । आह च —

"काञ्चिकं काञ्जिकं वीरं कुन्माषाभिषुतं तथा ।
अवन्तिसोमं धान्याम्लमारनालं महारसम् ॥
सौवीरकं सुवीराम्लं तथा चुक्रं तुषोदकम्" ॥

टीका० — आरनालाष्टकं काञ्चिके । सौवीरं दन्त्यसम् । यवके कुल्माष उक्तः । दन्त्योऽपि कुल्मासः । स च यवविकारवाचीति वर्णदेशना । अभिषुतं मूर्धन्यषम् । अवन्तिसोमेतिच्छेदः । केन जलेन अञ्जिका अभिव्यक्तिरस्येति काञ्जिकम् ॥

सहस्रवेधि जतुकं बाल्हिकं हिङ्गु रामठम् ।

क्षीर० — सहस्रं बहु विध्यति सहस्रवेधि[6] । जायते जतुकम् । बाल्हिकरामठौ उदग्देशौ । हिनोति हिङ्गु । अत्युग्रं भूतनाशनं गूढगन्धं च ॥

---

१. 'म् । शुष्यति शुण्ठी शती । न', २. 'दिः । गौरादिः । स्त्री' ग. पाठः. ३. 'पुञोऽभिषवार्थाद्वा' क. पाठः. ४. लातीति कु' ख. पाठः. ५. 'ग्निं बध्नाति दोषान् वा काञ्चिकम् । का' ग. ड. पाठः. ६. 'धि । बा' ख. पाठः.

टीका० —सहस्रवेधिपञ्चकं हिङ्गुनि । ताच्छीलिकणिनौ सहस्रवेधी । जतुकं चवर्गादि प्रागुक्तम् । बाल्हीकोऽप्युक्तः । न स्त्री हिङ्गुरित्यन्यतन्त्रम् । रमठदेशे भवो रामठः ॥

तत्पत्री कारवी पृथ्वी बाष्पिका कबरी पृथुः ॥ ४० ॥

क्षीर० —तस्य हिङ्गोः पत्री । कारोरियं कारवी संस्कर्त्री । बाष्पं स्रवति बाष्पिका । कबर्याकृतिः कबरी । करवीति पाठभेदः ॥

टीका० —हिङ्गुतरुपत्र्यां कारवीपञ्चकम् ॥

निशाख्या काञ्चनी पीता हरिद्रा वरवर्णिनी ।

क्षीर० —निशाख्या रात्रिपर्याया, नानार्थे रजनीत्वात् । काञ्चनवर्णा काञ्चनी । हरिं पीतं वर्णं द्राति हरिद्रा । वरो वर्णोऽस्त्यस्या वरवर्णिनी । आह च—

"हरिद्रा पीतिका पिण्डा रजनी रजना निशा ।
गौरी वर्णवती पीता हरिता वरवर्णिनी" ॥

टीका० —निशाह्वापञ्चकं हरिद्रायाम् । निशाह्वा रात्रिपर्यायाभिधाना । 'कचि दीप्तौ' । ल्युट् । पृषोदरादित्वाद् दीर्घत्वम् । काञ्चनी । पीत उक्तः । टापि पीता । वरः श्रेष्ठो वर्णः पीतः । तद्योगाद् वरवर्णिनी ॥

सामुद्रं यत्तु लवणमक्षीवं वशिरं च तत् ॥ ४१ ॥

क्षीर० —लुनाति जाड्यं लवणम् । नन्द्यादित्वाल्ल्युः, णत्वं च । अक्ष्णोति व्याप्नोति अक्षीवम् । उश्यते वशिरम् । 'वश कान्तौ' ॥

टीका० —समुद्रवेलाभवे कडकश्चेति ख्याते लवणे अक्षीवद्वयम् । अक्षीवं ह्रस्वादि ॥

सैन्धवोऽस्त्री शीतशिवं माणिमन्थं च सिन्धुजे ।

क्षीर० —सिन्धुनद्युपलक्षितं सैन्धवम् । तत्र भवः । 'कच्छादिभ्यश्च' (४. २. १३३) इत्यण् । शीतं शिनोति शीतशिवम्, उष्णवीर्यत्वात् । आह च—

"मणिमन्थं च सिन्धूत्थं नादेयं सिन्धुजं शिवम् ।
शुद्धं शीतशिवं च ॥"

अन्यदेव वस्तकम् ॥

---

१. 'ल्हि' ग. पाठः. २. 'रितं पी', ३. 'त' ख. पाठः. ४. 'दिदी', ५. 'दिल्युः' ग. पाठः. ६. 'त् । वस्तं तु रौमके । सि' ङ. पाठः.

टीका० — सिन्धुदेशभवे लवणे सैन्धवत्रयम्। शैलवदाणि सैन्धवः, अस्त्री। सितं शुभ्रं शुभं कल्याणमिति कर्मधारयः। मणिमन्थपर्वते भवो माणिमन्थः॥

रौमके[1] वस्नकं

क्षीर० — रुमायामाकरे भवं वस्नकं नाम लवणम्। 'रौमके वसुकं वस्वि'ति च माला॥

टीका० — रुमा नाम समहरिदेशे लवणाकरः, तत्र प्रविष्टं दार्वपि चिराल्लवणं स्यात्। तद्भवे लवणे रौमकद्वयम्॥

पाक्यं विडं[2] च कृतके द्वयम्॥ ४२॥

क्षीर० — पाके साधु पाक्यं पक्त्व्यं वा कलराख्यम्। विडति भिनत्ति मलान् विडम्[3]। कृतकलवणस्य द्वे नामनी। पाक्यविडलवणयोर्भेदेऽपि कृतकत्वादैक्यम्। न्यर्थे पाक्यं, विडलवणं यवक्षारः क्षारश्चेति॥

टीका० — लवणमृत्तिकां सिक्त्वा निष्पादिते लवणे पाक्यम्। पचतेर्ण्यत्॥

सौवर्चलेऽक्षुरुचके[4]

क्षीर० — सुवर्चलाकरभवं सौवर्चलं, सुवर्चस्येदं सौवर्चम् अग्निदीपनं लाति वा। 'वर्च दीप्तौ'। अच्। अश्नोति व्याप्नोत्यक्षुं। अक्षमित्येके। रोचतेऽनेन रुचकम्। हृद्यगन्धं च॥

टीका० — सौवर्चलत्रयं सौवर्चले। अक्षद्वयं साधितम्॥

तिलकं तत्र मेचके।

क्षीर० — तिलति स्निह्यति तिलकम् तत्र तस्मिन् मेचके कृष्णे[5] लवणे वर्तते। पूर्वं तु मधुवर्णम्। अगन्धं कृष्णवर्णं तिलकमित्येके[6]। यद्वैद्याः —

---

१. 'वस्नकं रौमके रु' ग. पाठः. २. 'वि' ग. ङ. पाठः. ३. 'वि' ग. पाठः. ४. 'क्षुः रो' क. ग. पाठः. ५. 'ष्णे व' ख. पाठः. ६. 'ष्णलवणं ति' ग. पाठः.

"कृष्णे सौवर्चलगुणा लवणे गन्धवर्जिते" ॥

टीका० — कृष्णे सौवर्चले तिलकं, साधितम् ॥

मत्स्यण्डी फाणितं खण्डविकारे

क्षीर० — मदं स्यन्दयते[1] मत्स्यण्डी सामान्यशर्करा । मत्स्यानमति[2] मत्स्यान्दीति वा । मत्स्याण्डीति वैद्याः । यद्धन्वन्तरिः—

"शर्करोक्ता तु मीनाण्डी श्वेता मत्स्याण्डिका सिता ।"

"मत्स्यण्डिकाखण्डसिताः क्रमेण गुणवत्तराः "

इति तु वाहटः । फण्यते द्रवत्वात् फाणितम् । खण्ड्यते श्च्योतः । क्षौद्रकं त्विक्षुरसविकारः खण्डवत् ॥

टीका० — इक्षुविशेषस्य रसपाके खण्डयोग्ये या सारभूता गुडिकाकारा जायते सा मत्स्यण्डी खण्डशाल्कम् । अर्धावर्तितं फाणितम् । (अनः खण्डविकारौ[3]?) ॥

शर्करा सिता ॥ ४३ ॥

क्षीर० — शीर्यते शर्करा । सीयते सिता, खण्डशर्कराख्या ॥

टीका० — शर्कराद्वयं शर्करायाम् । शर्करोक्ता ।

"शर्करायां सिता शुक्ले बद्धे चावसिते त्रिषु "

इति दन्त्यान्ते रभसः ॥

कूर्चिका क्षीरविकृतिः स्याद्

क्षीर० — कूर्चस्तन्मस्तु[4], तदस्त्यस्यां कूर्चिका । कुचति कुंचिकेत्येके[5] । किलाटिकाख्या ॥

टीका० — क्वथितक्षीरविकारे खिरिस इति ख्याते कूर्चिका ।

---

१. 'न्दते', २. 'ति भजति मत्स्यण्डी' क. ग. ङ. पाठः. ३. 'रे' ज. पाठः. ४. 'चोंऽस्त्य' ख., 'चस्तमस्तद' ग., 'चस्तद' क. पाठः. ५. 'कूच्चिके' ख., 'कुचील्ये' क. पाठः.

"दध्ना सह पयः पक्कं यत् तत् स्याद् दधिकूर्चिका।
तक्रेण पक्कं यत् क्षीरं सा भवेत् तक्रकूर्चिका" ॥

रसाला तु मार्जिता।

क्षीर० — रसमलति रसाला। मार्ज्यते मार्जिता दधिसितामरिचादिकृतं लेह्यम्। यत् सूदशास्त्रम् —

"अर्धाढकं सुचिरपर्युषितस्य दध्नः
खण्डस्य षोडशपलानि शशिप्रभस्य।
सर्पिः पलं मधु पलं मरिचं द्विकर्षं
शुण्ठ्याः पलार्धमपि चार्धपलं चतुर्णाम् ॥
श्लक्ष्णे पटे ललनया मृदुपाणियुक्ता
कर्पूरधूलिसुरभीकृतभाण्डसंस्था।
एषा वृकोदरकृता सरसा रसाला
यास्वादिता भगवता मधुसूदनेन" ॥

टीका० — रसालाद्वयं शिखरिण्याम्।

"स चान्तर्जातकाजाजीसगुडार्द्रकनागरम्।
रसाला स्याच्छिखरिणी सघृतं सरसं दधि ॥"

इति रत्नमाला। आम्रे रसाल उक्तः। ततष्टाप्। मृजोऽङि 'मृजेरजादौ संक्रमे विभाषा वृद्धिरिष्यत' इति वृद्धौ मार्जा। ततस्तत्करोतीति णिजन्तात् क्तः। मार्जिता ॥

स्यात् तेमनं तु निष्ठानं

क्षीर० — तिम्यत्यार्द्रीभवत्यनेन तेमनम् उपसेचनं कौपनाख्यम्। नितिष्ठत्यन्नमनेन निष्ठानम्। व्यञ्जनं च। सूपादय उपचारात् ॥

टीका० — **त्रिपण** इति ख्याते तेमनद्वयम्। 'तिम ष्टिम आर्द्रभावे'। ल्युट्। तेमनम्। तिष्ठतेर्ल्युट्। निष्ठानम् ॥

---

१. 'चा' क. ग. ङ. पाठः. २. 'संस्कृतं' क. पाठः. ३. 'केवना' ख. पाठः.

त्रिलिङ्गा वासितावधेः ॥ ४४ ॥

क्षीर० — इतः प्रभृति वासितान्ता वाच्यलिङ्गाः ॥

टीका० — अतः परं वासितावधेः प्राग् वाच्यलिङ्गाः ॥

शूलाकृतं भटित्रं च शूल्यम्

क्षीर० — 'शूलात् पाके' (५. ४. ६५) इति डाच् । भटत्यनेन भटित्रम् । 'भट भृतौ' । शूले संस्कृतं शूल्यम् । 'शूलोखाद्यत्' (४. २. १७) । भरूटकं भृष्टं[1] च ।

"संस्कृतं सर्पिषा दध्ना सार्पिष्कं दाधिकं क्रमात् ।
उदलावणिकं तत् स्याद् यत् सिद्धं लवणाम्भसा" ॥

टीका० — शूलाकृतत्रयं भटित इति ख्याते तेमनविशेषे । शूलाकृतम् । 'शूलात् पाके' (५. ४. ६५) इति डाच् । 'भट भृतौ' । 'अशित्रादिभ्य इत्रोत्रौ' (उ०४. १७४) इति इत्रः । भटित्रम् । 'शूलोखाद् यत्' (४. २. १७) इति यत् । शूल्यं मांसम् । शूल्यो मत्स्यः । शूल्या वार्त्ताकुः ॥

उख्यं तु पैठरम् ।

क्षीर० — उखायां स्थाल्यां संस्कृतम् उख्यम् । पिठरे संस्कृतं पैठरम् । 'संस्कृतं भक्षाः' (४. २. १६) इत्यण् ॥

टीका० — स्थाल्यां संस्कृते उख्यद्वयम् । शूल्यवदुख्यम् । 'संस्कृतं—' (४. २. १६) इत्यण् । पैठरम् ॥

प्रणीतमुपसम्पन्नं

क्षीर० — रूपरसादिनिष्पन्नमन्नं प्रणीयते स्म प्रणीतम् ॥

टीका० — पाकरूपरसादिभिः सम्पन्ने व्यञ्जने प्रणीतद्वयम् । नयतेः पदेश्च क्तः ॥

---

1. 'ष्टकं च' च. पाठः.

प्रयस्तं स्यात् सुसंस्कृतम् ॥ ४५॥

क्षीर० — परिव्ययपाकादिना प्रयत्ननिष्पन्नमन्नं प्रयस्तम्। संस्कृतम्। अनित्ये सार्धुः। प्रयतमिति केचित्। यदुक्तं—'प्रयतं संस्कृते पूते'॥

टीका० — तैलपरिव्ययादियोगेन सुष्ठु संस्कृते व्यञ्जनादौ प्रयस्तम्। 'यसु प्रयत्ने'। क्तः॥

स्यात् पिच्छिलं तु विजिलं

क्षीर० — पिच्छा आचामोऽस्य पिच्छिलम्। पिच्छादित्वादिलच्। विजते चलति विजिलम्। विज्यमिति वैद्याः। 'स्यात् पिच्छिलं तु विजलमि'त्येके॥

टीका० — पिच्छिलद्वयं पिच्छिले। पिच्छादीलचि पिच्छिलम्। 'ओविजी भयचलनयोः'। 'कुटादिभ्यः कित्' इति इलच्। स च कित्। विजिलम्॥

संमृष्टं शोधितं समे।

क्षीर० — वालमक्षिकादिरहितं सम्मृष्टम्। 'मृजू शुद्धौ'॥

टीका० — अपनीतकेशमक्षिकाद्यवकरे सम्मृष्टद्वयम्। मृजेः शुध्यतेश्च क्तः। सम्मृष्टं शोधितम्॥

चिक्कणं मसृणं स्निग्धे

क्षीर० — चिगित्यव्यक्तं कणति चिक्कणम्। मस्यति मसृणम्॥

टीका० — चिक्कणत्रयं चिक्कणे। 'चिती संज्ञाने'। 'चितः कः कणच्' (उ० ४. १७७) इति कणच्, तकारस्य ककारः। चिक्कणम्। 'ऋण गतौ दीप्तौ च'। सम्पूर्वात् कः। पृषोदरादित्वाद् वर्णविपर्ययः। मसृणम्॥

तुल्ये भावितवासिते ॥ ४६ ॥

---

१. 'धुः ॥ स्यात्' क. ग. ङ. पाठः. २. 'द्य' क., 'ज्यद्यमि' घ. पाठः. ३. 'थ्य' क. ट. पाठः. ४. 'क्तः॥' क. ख. ट. पाठः. ५. 'मसृण' ठ. पाठः. ६. 'णमिति धातुप्रदीपः। ऋ' क. ख. ग. घ. ङ. पाठः.

क्षीर० — भाव्यते मिश्रीक्रियते स्म भावितम्। 'भुवोऽवकल्कने'। णिच्। वास्यते द्रव्यान्तरेण मिल्यते धूपपुष्पादिना वाधिवास्यते वासितम्। यन्मुनिः — 'धूपितं वासितं विदुः' ॥

टीका० — व्याघ्राङ्गारादिना धूपिते तेमनादौ भावितद्वयं, मनुष्यवर्गे साधितम् ॥

आपक्कं पौलिरभ्यूषः

क्षीर० — ईषद्भृष्टं कलायादि आपक्कं खेलभर्जिताख्यम्। * पुलति वर्धते पौलिः। 'पुल महत्त्वे'। ऊषो रुजार्थादभ्यूषः। उषो दाहार्थादभ्योष इत्येके ॥

टीका० — पाकावस्थे यवशीर्षादौ अग्निना ईषद्दग्धे हांदुस इति ख्याते आपक्कत्रयम्। ओलभेति चास्य प्रसिद्धिः। पचेः क्तः। 'पचो वः' (८.२.५२)। आपक्कम्। 'ऊष रुजायाम्'। घञर्थे कः। अभ्यूषः।

"भृष्टयवो धानाः स्त्री तोक्मो हरितो यवोऽभ्युषः पक्कः।"

इति रत्नकोषार्यादौ ह्रस्वमध्यश्च। पौलिर्ना ॥

लाजाः पुम्भूम्नि चाक्षताः।

क्षीर० — लज्यन्ते लाजाः। 'लज भर्जने'। न क्षण्यन्ते अक्षताः। चार्द्धं भिन्नक्रमात् ते पुंसि बहुत्वे च। 'अक्षता यवाः' इति पुराणम्। तन्मते पुंबहुत्वार्थो विधिः ॥

टीका० — लाजद्वयं[5] लाजेषु। 'लाज लाजि भर्जने'। पचादिः। लाजाः। न क्षता अक्षताः। दारा इव लाजाः। 'लाजाः स्त्रियामि'ति वार्तः।

---

१. 'घ्रया' च. पाठः. २. 'बलवार्जि' क. ग. पाठः. ३. 'भा' ग. पाठः. ४. 'तृते' ख. पाठः. ५. 'यं भी इति ख्यातायाम्। लाज' क. ख. ग. घ. पाठः.

---

* पुलतेः क्षीरस्वामिपक्षे तुदादित्वमपि। तथाच पुलधातौ क्षीरतरङ्गिणी—"पोलति...... तुदादौ पुलति" इति।

"लाजाः पुंसि बहुत्वे वा स्त्रियां लाजापि चाक्षतम्"
इति संसारावर्ते एकवचनान्तापि ॥

पृथुकः स्याच्चिपिटकः

क्षीर० — आर्द्रभृष्टं सस्यं तद्विपाकात् पृथु भवति, चिपिटीभवति च । नीलधान्यं वा भृष्टमुलूखलक्षोदाच्चिपिटीभूतं तण्डुलम् ॥

टीका० — पृथुकद्वयं चिड इति ख्याते । निशब्दाद् 'इनच्पिटच्चिकचि च' (५. २. ३३) इति पिटच्प्रत्ययश्चिरादेशश्च नेः । 'चिपिटस्तु चिपुटः स्यादि'ति[1] उकारमध्योऽपि ॥

धाना भृष्टयवे स्त्रियः ॥ ४७ ॥

क्षीर० — धीयन्ते[2] धानाः । भृष्टयव इति जात्याख्यायामेकत्वम् । धानाश्चूर्णिताः सक्तवः स्युः । 'वस्तिः स्याद्संसशष्कुली' । धूँस्तीरिति[3] द्रमिडाः ॥

टीका० — भृष्टयवे धाना नित्यबहुवचनान्ताः । 'धापॄवस्यज्यतिभ्यो नः' (उ० ३. ६) ॥

पूपोऽपूपः पिष्टकः स्यात्

क्षीर० — पुनाति पूपः । न पूयतेऽपूपः पिष्टातकमयो मण्डकाख्यः । 'पूयी विशरणे' । अद्भिरुप्यत इति नैरुक्ताः । **'पिष्टाच्च' (४. ३. १४६), 'संज्ञायां कन्' (४. ३. १४७) । मुनिस्तु—**

"अपूपः पिष्टपूपः स्यात् पूपा भक्ष्याः प्रकीर्तिताः" ॥

टीका० — पूपत्रयं पिष्टके । पिष्टानां तण्डुलानां विकारः पिष्टकः । 'पिष्टाच्च' (४. ३. १४६) इत्यनुवृत्तौ 'संज्ञायां कन्' (४. ३. १४७) इति कन् ॥

करम्भो दधिसक्तवः ।

---

१ 'ति रभसकोषार्थ उ' क. ख. ग. घ. ङ., 'ति रत्नकोषार्थ उ' ज. पा.
२. 'र्णस' क. ग. पाठः. ३. 'ध्रस्तिरि' ख. पाठः.

क्षीर० — केन रभ्यते †(मी?मि)ल्यते कार्यते वा करम्भः । दध्युपसिक्ताः सक्तवः ॥

टीका० — दध्युपसिक्ताः सक्तवः करम्भः, भान्तः । तथाच —

"साम्भः कुम्भं करम्भं नवमथितघटीकर्करीं शर्करीं च"

इति बाणानुप्रासः । यस्तु पकारान्तः, स मिश्रसामान्यवाची । करंकुकोककल-हंसकाम्बविक' इति विदग्धमुखमण्डनम् (?) ॥

भिस्सा स्त्री भक्तमन्धोऽन्नमोदनोऽस्त्री स दीदिविः ॥४८॥

क्षीर० — भस्यते भक्ष्यते भिस्सा । भ्यसेः सम्प्रसारणं वा । 'ब्राह्मणभिस्से'ति भाष्यम् । भज्यते भक्तम् । अनित्यनेनान्धः, सान्तम् । अद्यतेऽन्नम् । उनत्ति क्लिद्यत्योदनम् । भृशं दीव्यत्यनेन दीदिविः । स इति विशेषणात् पुंसि ॥

टीका० — भिस्साषट्कं भक्ते । भिस्सा दन्त्यसा । 'अदेर्नुम् धश्च' (उ० ४. २०७) इत्यसुन् नुं धान्तादेशश्च । अन्धः । 'अन्नाण्णः' (४. ४. ८५) इति निपातनादन्नम् । 'पन अन च व्यवहारे' । 'कृवृदृवसिद्रुपन्य-निस्वपिभ्यो नित्' (उ० ३. ९) इति वा अनेर्नः । 'उन्देर्नलोपश्च' (उ० २. ७९) इति युच् । ओदनम् । 'दिवो द्वे दीर्घश्चाभ्यासस्य' (उ० ४. ५६) इति क्विन् । 'लोपो व्योर्वलि' (६. १. ६६) इति वलोपः । ओदन-शब्दो दीदिविसहितोऽस्त्री, न तु सदीदिविशब्दः[२] ॥

भिस्सटा दग्धिका

क्षीर० — कुत्सिता भिस्सा भिस्सटा । यथा — ओदनभिस्सटा । लक्ष्यानुरोधाट्टः । यथा — स्वर्गग्रामटिका, वधूटिका ॥

टीका० — दाडीति ख्यातायां भिस्सटाद्वयम् ॥

---

१. 'तें' ङ. छ. पाठः. २. 'विः ॥' छ. पाठः.

---

† 'मिल श्लेषणे' इति मिलधातोः श्लिष्यतेरिव सकर्मकत्वात् कर्मणि लट् । मेल्यत इति वा पाठ्यम् । मिल्यते कार्यते इति रभेरर्थद्वयकथनं, 'परिरभत' इत्यादौ मेलनार्थस्य 'तन्तुना पटमारभते' इत्यादौ करणार्थस्य च दर्शनात् ।

सर्वरसाग्रे मण्डमस्त्रियाम् ।

क्षीर० — सर्वरसानां द्रवद्रव्याणामग्रं मुखं, मण्डयति मण्डः ॥

टीका० —सर्वेषां रसानां घृतौदनादीनामग्ररसे मण्डः । 'मडि भूषायाम्' । अच् ॥

मासराचामनिस्रावा मण्डे भक्तसमुद्भवे ॥ ४९ ॥

क्षीर० — मस्यति परिणमते मासरः । आचम्यते आचामः । निस्राव्यते निस्रावः ॥

टीका० — भक्तमण्डे मासरत्रयम् । 'चमु अदने' । आङ्पूर्वात् कर्मणि घञ् । आचामः । सूत्रं निस्रावयतीति निस्रावः ॥

यवागूरुष्णिका श्राणा विलेपी तरला च सा ।

क्षीर० — यूयते पिष्टादिना यवा । आगूयतीत्यागूः । संज्ञितो[1] उष्णा उष्णिका । 'ब्राह्मणकोष्णिके संज्ञायाम्[2]' (५. २. ७१) । श्रायते श्राणा । 'श्रा पाके' । विलिम्पति विलेपी । तरला लेह्यत्वाच्चपला ।

"अ[3]ङ्क्षणाभ्यञ्जने तैलं कृसरो[4]ऽत्र तिलौदनः" ॥

टीका० — यवागूपञ्चकं यवाग्वाम् । वैद्यके तु विलेपनादिर्यवागूविशेष इत्युक्तम् । यौतेः 'सृयुवचिभ्योऽन्युजागूजक्नुचः' (उ० ३. ८१) इत्यागूच् । यवागूः । 'ब्राह्मणकोष्णिके संज्ञायाम्' (५. २. ७१) इति कना निपातितत्वादुष्णिका । 'श्रा पाके' । क्तः । 'संयोगादेरातो धातोर्यण्वतः' (८. २. ४३) इति निष्ठातो नः । श्राणा, तालव्यादिः । विलेपी पचादिः, गौरादिः । तरलशब्द उक्तः ॥

गव्यं त्रिषु गवां सर्वं

---

१. 'का' ग. ङ. पाठः. २. 'म् इति कन् प्रत्ययमानिपात्यते । श्रा' ख. पाठः. ३. 'उक्षणा' क. ख. पाठः. ४. 'लो' ग. पाठः.

क्षीर०— गोरिदं गवि भवमित्यादिषु सर्वेष्वर्थेषु गव्यं क्षीरादि 'सर्वत्र गोरजादिप्रत्ययप्रसङ्गे यत्' (वा० ४. १. ८५) ॥

टीका०— गोर्विकारोऽवयवो वा गव्यम्। तत्र भवे इत्याद्यर्थे 'सर्वत्र गोरजादिप्रसङ्गे यद् वक्तव्यः' (वा० ४. १. ८५) इति यत्। अवयवार्थे 'उगवादिभ्यो यत्' (५. १. २) ॥

गोविड् गोमयमस्त्रियाम् ॥ ५० ॥

क्षीर०— गोर्विष्ठा गोविट्। 'गोश्च पुरीषे' (४. ३. १४५)। मयट् ॥

टीका०— गोविड्द्वयं गोमये। गोविट् षान्ता स्त्रीलिङ्गा च। 'गोश्च पुरीषे' (४. ३. १४५) इति मयट् ॥

तद्विशुष्कं करीषोऽस्त्री

क्षीर०— करोत्यग्निं करीषं शुष्कं गोमयम् ॥

टीका०— गोमये विशुष्के करीषः। 'कॄ विक्षेपे'। 'कॄतॄभ्यामीषन्' (उ० ४. २६) ॥

दुग्धं क्षीरं पयः समम्।

क्षीर०— दुह्यते दुग्धम्। घस्यते क्षीरम्। 'घसेः किच्च' (उ० ४. ३४) इतीरन्। 'गमहनजनघन—' (६. ४. ९८) इत्युपधालोपः। 'खरि च' (८. ४. ५५) इति चर्त्वम्। 'शासिवसिघसीनां च' (८. ३. ६०) इति षत्वम्। पीयते पयते वा स[३]रसत्वात् पयः। असुन्। सममिति पयसो नपुंसकत्वार्थम् ॥

टीका०— दुग्धत्रयं दुग्धे। दुहेः क्तः। दुग्धम्। पय उक्तम् ॥

१. 'दिभ्य' ख. ग. ङ. पाठः. २. 'वाद्य' क. ख. पाठः. ३. 'रसवत्त्वात्' क. पाठः.

पयस्यमाज्यदध्यादि

क्षीर०—पयसो विकारः पयस्यम्। 'गोपयसोर्यत्' (४. ३. १६०)। आदिशब्दान्नवनीतादि॥

टीका०—आज्यदधितक्रादि पयस्याख्यम्। गव्यवद् यत्॥

द्रप्सं दधि घनेतरत्॥ ५१॥

क्षीर०—दृप्यति द्रप्सम्। घनादन्यद्, अघनमित्यर्थः। यन्माला—'द्रप्सं दध्यघनं तथा'। एतच्च द्रप्सं 'शरमि'ति भागुरिपाठः। सरमिति बुद्ध्वा मालाकारो भ्रान्तः। 'केचिन्नेटैस्तु नाशिता' इति * अयमपि मालापाठेन विप्रलब्धः। यदाह मुग्रः—'बाणद्रप्सौ शरौ' इति। इत्थं सामर्थ्यं—तरत् उपरि प्लवमानं घनं दधि द्रप्सम्॥

टीका०—घनेतरद् अघनं दधि द्रप्सं द्रगड इति ख्यातम्॥

घृतमाज्यं हविः सर्पिः

क्षीर०—जिघर्ति घृतम्। 'अञ्जिसिघृभ्यः क्तः' (उ० ३. ८९) आ अञ्जनीयम् आज्यम्। 'आङ्पूर्वादञ्जेः संज्ञायाम्—' (वा० ३. १ १०९)। क्यप्। हूयते हविः, हविष्यं च। सर्पति सर्पिः। इसन्तौ॥

टीका०—घृतचतुष्कं घृते। 'घृ क्षरणदीप्त्योः'। 'अञ्जिघृषिभ्यः क्तः' (उ० ३. ८९)। घृतम्। 'आङ्पूर्वादञ्जेः संज्ञायाम्—' (वा० ३. १. १०९)। क्यप्। आज्यम्। 'अर्चिशुचिहुसृ[illegible]च्छर्दिच्छादिभ्य इसिः' (उ० २. १०८)। हविः, सर्पिश्च। तद्दिवसीयाद् दध्नो दुग्धाद् वा समुद्धृतं घृतम्॥

नवनीतं नवोद्धृतम्।

क्षीर०—दध्नो मथितान्नवं तत्कालं नीतमुद्धृतं नवनीतं घृतयोनिः॥

१. 'त्॥ घ' क घ. पाठः. २. 'त्तेन ना', ३. 'हुः वा' ख. पाठः. ४. 'समर्थ्यं तत्' क. पाठः. ५. 'र्थ्यान्तरम्। उ' ख. पाठः.

* अयमपि भागुरिपाठोऽपि। मालापाठेन विप्रलब्धः, मालापाठविस्रम्भेण पाठकैर्नाशित इति तात्पर्यम्।

टीका० — नाग्निस्पृष्टं नवनीतम् । नवाद् दध्यादेर्नीतं प्राप्तम् ॥

तत् तु हैयङ्गवीनं यद् ह्योगोदोहसमुद्भवम् ॥ ५२ ॥

क्षीर० — ह्योगोदोहस्य विकारो हैयङ्गवीनम् । 'हैयङ्गवीनं संज्ञायाम्' (५. २. २३) इति साधुः । कात्यो नवनीतमित्याह ॥

टीका० — ह्यो गतदिनं, तद्गोदोहभवं घृतं हैयङ्गवीनम् । 'हैयङ्गवीनं संज्ञायाम्' (५. २. २३) इति खञ् निपातितः । ह्योगोदोहशब्दस्य हियङ्गवादेशः । तस्य च विकारे खञ् ॥

दण्डाहतं कालशेयमरिष्टमपि गोरसः ।

क्षीर० — मन्थदण्डेनाहतम् । कलश्यां घर्घर्यां भवं कालशेयम् । 'दृतिकुक्षिकलशि—' (४. ३. ५६) इति ढञ् । न रिष्यति न निहन्त्यरिष्टं, सर्वरोगजित्त्वात् ॥

टीका० — सामान्यगोरसे दण्डाहतचतुष्कम् । मन्थानदण्डेन हतं दण्डाहतम् । कलश्यां भवं कालशेयं, तालव्यशम् । आहेयवड् ढञ् । अरिष्टमुक्तम् ॥

क्षीर० — तद्विशेषानाह—

तक्रं ह्युदश्विन्मथितं पादाम्ब्वर्धाम्बु निर्जलम् ॥ ५३ ॥

तक्वति द्रुतं गच्छति तक्रं, चतुर्भागाम्बु । उदकेन श्वयत्युदश्वित्, अर्धाम्बु । दध्नो मथनमात्रसाध्यं मथितं, निर्जलम् ।

"द्विगुणाम्बु श्वेतरसमर्धोदकमुदश्वितम् ।
तक्रं त्रिभागहीनं तु केवलं मथितं स्मृतम् ॥"

इति धन्वन्तरिः ॥

टीका० — यथाक्रमं पादाम्बु घोलं तक्राख्यम्, अर्धाम्बु उदश्वित्, निर्जलं तु मथिताख्यम्। 'तञ्चु[1] सङ्कोचने'। 'स्फायितञ्चि—' (उ० २. १३) इत्यादिना रक्। न्यङ्क्वादि कुत्वम्। तक्रम्। बहूदकत्वाद् उदकेन[2] श्वयति वर्धत इत्युदश्वित्। 'टुओश्वि गतिवृद्ध्योः'। क्विप्। तुक् च। 'उदकस्योदः संज्ञायाम्' (६. ३. ५७) इत्युदकस्योदभावः। 'उदश्वितोऽन्यतरस्याम्' (४. २. १९) इति निपातनान्न सम्प्रसारणम्। 'मथे विलोडने'। क्तः। मथितम्॥

मण्डं दधिभवं मस्तु

क्षीर० — दध्नो मण्डं द्रवो भागः। मस्यति परिणमते मस्तु॥

टीका० — दध्नो मण्डे मस्तु। 'मस परि(माणे?णामे)'। सेतुवत् तुन्॥

पीयूषोऽभिनवं पयः।

क्षीर० — पीयते पीयूषः। 'नवप्रसूतगवीक्षीरं क्वथितं सत् पीयूषमिति सज्जनः॥

टीका० — गोप्रसवा[3]नन्तरे सप्तरात्रपर्यन्ते दुग्धे(पेष्टुषम्[4]। 'अथ पेष्टुषपिष्टनवं?) सप्तदिनावधी'ति शब्दार्णवः॥

अशनाया बुभुक्षा क्षुद्

क्षीर० — अशनेच्छा अशनाया। 'अशनायोदन्य—' (७. ४. ३४)[5] इति साधुः। भोक्तुमिच्छा बुभुक्षा। 'क्षुध बुभुक्षायाम्'। क्विपि क्षुत्। रुचिश्च॥

टीका० — अशनायात्रयं **बुभुक्षायाम्**। अशनशब्दादिच्छायां क्यच्। 'अ प्रत्ययात्' (३. ३. १०२) इत्यः। 'अशनायोदन्यधनाया बुभुक्षापिपासागर्धेषु' (७. ४. ३४) इत्यात्वम्। अशनाया। भुजेः सन्। बुभुक्षा। क्षुधेः क्विप्। क्षुत्॥

ग्रासस्तु कबलार्थकः॥ ५४॥

---

१. 'श्वि गतौ। स्फा' ग. पाठः. २. 'न व' क. ग. पाठः. ३. 'वान्त', ४. 'षष्टम्। अथ पेपष्टपि' क. ख. पाठः. ५. 'पृ' क. ख. पाठः.

क्षीर० — ग्रस्यते ग्रासः । के तालुनि वलते कबलः ॥

टीका० — ग्रासद्वयं कबले । 'ग्रसु ग्लसु अदने' । कर्मणि घञ् । ग्रासः । केन तोयेन वलनमस्येति कवलः ॥

सपीतिः स्त्री तुल्यपानं

क्षीर० — सहपानं सपीतिः ॥

टीका० — तुल्यपाने सहपाने सपीतिः[1] । समाना पीतिः, स्त्रीलिङ्गा । 'समानस्यच्छन्दस्यमूर्धप्रभृत्युदर्केषु' (६. ३. ८४) इति सभावः । छान्दसा अपि लोके प्रयुज्यन्ते, 'दिवसावसानताम्यत्तामरसमधुसपीतिप्रीते धुतपक्षैराजिवीजितरजसि राजहंसयूथे' इति बाणप्रयोगात् । स्त्रिया योषिता सह पीतिरिति नादरणीयम् ॥

सग्धिः[3] स्त्री सहभोजनम् ।

क्षीर० — सहादनं[4] सग्धिः । क्तिन् । 'बहुलं छन्दसि' (२. ४. ३९) इति घस्लृ । 'घसिभसोर्हलि च' (६. ४. १००) इत्युपधालोपः । 'झलो झलि' (८. २. २६) इति सलोपः । 'झषस्तथोर्धोऽधः' (८. २. ४०) । 'झलां जश झशि' (८. ४. ५३) ॥

टीका० — सहभोजने सग्धिः । समाना ग्धिः सग्धिः । अदेः क्तिन् । 'बहुलं छन्दसि' (२. ४. ३९) इति घस्लादेशः । 'घसिभसोर्हलि च' (६. ४. १००) इत्युपधालोपः । 'झलो झलि' (८. २. २६) इति सकारलोपः । ततस्तकारस्य धत्वं, जश्त्वं च । पूर्ववत् सभव : ॥

उदन्या तु पिपासा तृट् तर्षः

क्षीर० — उदकेच्छोदन्या । 'अशनायोदन्य—' (७. ४. ३४) इति साधुः । तर्षणं तृट् तर्षश्च । 'ञितृषा पिपासायाम्' । तृष्णा नानार्थे ॥

---

१. 'तिः स्त्री' क. छ. पाठः. २. 'स्र' क. पाठः. ३. 'जग्धिः स', ४. 'ने क्तिन्' घ. पाठः.

टीका० — उदन्याचतुष्कं पिपासायाम् । उदकशब्दात् क्यच् । 'अशनाय—' (७. ४. ३४) इत्यादिनोदन्भावः । उदन्या । पातुमिच्छा पिपासा । 'ञितृषा पिपासायाम्' । भावे क्विप्' । तृट् षान्ता । घञि तर्षः ॥

जग्धिस्तु भोजनम् ॥ ५५ ॥

जेमनं लेपं आहारो निघसो न्याद इत्यपि ।

क्षीर० — अदनं जग्धिः । 'अदो जग्धिर्ल्यप् ति किति' (२. ४. ३६) । जमेर्जेमनमाहुः । जमनं जवनं वा । यद् मुग्नः — 'जमनं भोजनं क्वचित्' । न्यदनं निघसः । 'नौ ण च' (३. ३. ६०) इत्यप्[3] । 'घञपोश्च' (२. ४. ३८) इति घस्लादेशः । णे न्यादः । प्रत्यवसानमभ्यवहारश्च ॥

टीका० — जग्धिसप्तकं भोजने । अदेः क्तिन्जग्ध्यादेशौ । जग्धिः । भुजेर्ल्युटि भोजनम् । 'चमु छमु जमु झमु अदने' इत्यत्र जिमिरप्यूहनीयः । जेमनम् । लिपेरच् । लेपः । हरतेर्घञि आहारः । 'नौ ण च' (३. ३. ६०) इति चकाराद् निपूर्वाददेरप् । 'घञपोश्च' (२. ४. ३८) इति घस्लादेशः । निघसः । 'नौ ण चे'त्यनेनैव णप्रत्ययेन अदेर्न्यादः ॥

सौहित्यं तर्पणं तृप्तिः

क्षीर० — सुहितस्य भावः सौहित्यम् ॥

टीका० — सौहित्यत्रयं तृप्तौ । सुहितस्तृप्तः । तद्भावः सौहित्यम् । तृपेर्ल्युट् । तर्पणम् । क्तिनि तृप्तिः ॥

फेला भुक्तसमुज्झितम् ॥ ५६ ॥

क्षीर० — फलति विशीर्यते फेला । 'फेलृ चलने' अस्माद्वा ॥

टीका० — पूर्वं भुक्तं पश्चात् समुज्झितं भुक्तसमुज्झितम् । तत्र फेला ॥

कामं प्रकामं पर्याप्तं निकामेष्टं यथेप्सितम् ।

क्षीर० — काम्यते कामम् । पर्याप्तिः पर्याप्तम् । इष्यते इष्टम् । ईप्सितमनतिक्रम्य यथेप्सितम् । प्रायः क्रियाविशेषणान्येतानि । अत

---

१. 'ह' क. ख. पाठः. २. 'गर्गः— ज' ख. पाठः. ३. 'प् । णप्रत्ययश्च । अप् । घ' घ. पाठः.

एव अव्ययत्वे[1] एषां श्रीभोजो भ्रान्तः । यच्छाश्वतः — 'कामे निकामे कामाख्या' ॥

टीका० — कामषट्कं **यथेष्टे** । 'कमेर्णिङ्' (३. १. ३०) इति णिङन्तात् कमेरच् । कामं प्रकामं निकामं च । क्रियाविशेषणतया चैते क्लीबलिङ्गाः । आप्नोतेः क्तः । पर्याप्तम् । 'इषु इच्छायाम्' । क्तः । इष्टम् । ईप्सितस्यानतिक्रमो यथेप्सितम् । क्लीबाव्ययम् ॥

गोपे गोपालगोसङ्ख्यगोधुगाभीरवल्लवाः ॥ ५७ ॥

क्षीर० — **गाः पाति गोपः[2] । गाः पालयति गोपालः । गाः सङ्ख्याति गोसङ्ख्यः । गां दोग्धि गोधुक् । आँ[3] अभित ईरयत्याभीरः । वल्लति गाः वल्लवः । वल्लिः सौत्रो वा ॥**

टीका० — गोपषट्कं **गोपे** । गां पातीति गोपः । 'आतोऽनुपसर्गे कः' (३. २. ३) । कर्मण्यणि गोपालः । गां सञ्चष्टे गोसङ्ख्यः । 'सभि ख्यः' (३. २. ७) इति कः । 'चक्षिङः ख्याञ्' (२. ४. ५४) इति ख्याञादेशः । गां दोग्धीति क्विप् । गोधुक्, हान्तः । आ भियं राति समन्ताद् भीतिं ददात्याभीरः, कप्रत्ययान्तः । गोमहिष्यादिकं[4] वल्लमानाः संवृण्वन्तो वान्ति गच्छन्तीति वल्लवाः । 'बद स्थैर्ये' । क्विप् । बत् स्थैर्यम् । लुनातेरच् । लवः । बदो लवा बल्लवा इति सनातनः ॥

गोमहिष्यादिकं पादबन्धनं

क्षीर० — **पादे बन्धनमस्य पादबन्धनम् । आदिशब्दात्[5] खरादि । जीववद् धनमित्येके पेठुः ॥**

टीका० — गोमहिष्यादिकं धनं यादवाख्यम् । यदूनामिदं यादवम् । ते ह्येवंधना अभवन्[6] ।

"क्षोभमाशु हृदयं नयदूनां रागवृत्तिमकरोन्न यदूनाम् ।"
(स० १०. श्लो० ९०)

इति माघः ॥

---

१. 'त्वेन श्रुतेरेषां', २. 'पः । पा' ग. ङ. पाठः. ३. 'गा' क. पाठः. ४. 'कं धनं' ख. पाठः. ५. 'त् स्कान्धिकादिबन्धन' क. ग. ङ. पाठः. ६. 'न् ॥ गर्वा' ढ. पाठः.

टीका० — उक्षनवकं **बलीवर्दे** । 'श्वन्नुक्षन्ना'दिसूत्रे उक्षा नान्तो निपातितः । भद्रवृषावुक्तौ । 'ऋषिवृषिभ्यां कित्' (उ० ३. १२३) इत्यभचि ऋषभवृषभौ । 'अनसि वहेः क्विप्, अनसो ड श्चे'ति अनउपपदाद् वहतेः क्विप्, सकारस्य च डः । सम्प्रसारणम् । 'सावनडुहः' (७. १. ८२) इति नुम् । 'चतुरनडुहोरामुदात्तः' (७. १. ९८) इत्यामागमः । अनड्वान् । 'इतश्चानिञः' (४. १. १२२) इति ढकि सौरभेयः । गच्छतीति गौः । 'गमेर्डोः' (उ० २. ७०) इति डोप्रत्ययः । तत्रानडुहादित्रयं स्त्रियां च । 'अनडुहः स्त्रियां वेति वक्तव्यम्' (वा० ७. १. ९८) इत्याम्विकल्पेन अनड्वाही अनडुही च । गौरादिपाठान्ङीष् । 'टिड्ढाणञ् —' (४. १. १५) इत्यादिना ङीप् । सौरभेयी । गौरित्यत्र तु विशेषणे परं विशेषो न रूपे ॥

उक्ष्णां संहतिरौक्षकम् ।

क्षीर० — **'गोत्रोक्षोष्ट्र —'** (४. २. ३९) इति **वुञ्** ॥

टीका० — **बलीवर्दानां संहतौ** औक्षकम् । राजकवद् वुञ् ॥

गव्या गोत्रा गवां

क्षीर० — **संहतिरित्येव** । **'खलगोरथात्'** (४. २. ५०) **इति यः** । **'इनित्रकट्यचश्च'** (४. २. ५१) **इति त्रः** ॥

टीका० — **गवां संहतौ** गव्याद्वयम् । 'खलगोरथात्' (४. २. ५०) इति यत् । गव्या । 'इनित्रकट्यचश्च' (४. २. ५१) इति त्रः । गोत्रा ॥

वत्सधेन्वोर्वात्सकधैनुकम् ॥ ६० ॥

क्षीर० — **वत्सानां समूहो वात्सकम् । 'गोत्रोक्ष —'** (४. २. ३९) **इति वुञ् । धेनूनां समूहो धैनुकम् । 'अचित्तहस्तिधेनोष्ठक्'** (४. २. ४७) ॥

टीका० — **यथाक्रमं वत्ससंहतौ** वात्सकम् । राजकवद् वुञ् । **धेनुसंहतौ**[1] धैनुकम् । हास्तिकवत् ठक् । 'इसुसुक्तान्तात् कः' (७. ३. ५१) इति ठस्य कः ॥

---

१. 'ति कः' क. ख. ग. घ. पाठः.

उक्षा महान् महोक्षः स्यात्

क्षीर० — महांश्चासावुक्षा च महोक्षः । 'अचतुर —' (५. ४. ७७) इत्यादिना साधुः । एवं वृद्धोक्षजातोक्षौ । मालात्र —

"महोक्षः स्यादुक्षतरः स्कान्धिकः स्कन्धवाहकः ।
षोडन् षड्दशनोऽथ स्यात् कूटो भग्नविषाणकः" ॥

टीका० — अतिमहति बलीवर्दे महोक्षः । 'अचतुर —' (५. ४. ७७) इत्यादिना समासान्तोऽच् ॥

वृद्धोक्षस्तु जरद्गवः ।

क्षीर० — जरंश्चासौ गौश्च जरद्गवः । 'गोरतद्धितलुकि' (५. ४. ९२) इति टच् ॥

टीका० — वृद्धोक्षद्वयं वृद्धवृषे । पूर्ववत् समासान्ताचि वृद्धोक्षः । 'गोरतद्धितलुकि' (५. ४. ९२) इति समासान्तोऽच् । जरद्गवः ॥

उत्पन्न उक्षा जातोक्षः

क्षीर० — प्रसूतमात्रो जातोक्षः ॥

टीका० — उत्पन्न उक्षा सम्प्राप्तबलीवर्दभावः, तत्र जातोक्षः । अचतुरादिना समासान्तोऽच् ॥

सद्यो जातस्तु तर्णकः ॥ ६१ ॥

क्षीर० — तृणोत्पत्ति केवलं तर्णकः ॥

शकृत्करिस्तु वत्सः स्यात्

क्षीर० — शकृत् करोति शकृत्करिः । स्तम्बशकृतो[१]र्व्रीहिवत्सयोरुपसङ्ख्यानाद् इन् । वसति वत्सः ॥

---

१. 'तोरिन् । व्रीहि' क. ख. ग. घ. पाठः.

दम्यवत्सतरौ समौ ॥

क्षीर० — दमार्हो दम्यः। वत्सत्वं [illegible] वत्सतरः। 'वत्सोक्षाश्वर्षभेभ्यश्च तनुत्वे' (५. ३. ९१) इति ष्टरच्। तनुत्वं [illegible] प्राप्तिः ॥

टीका० — हड्डवाल्ये दाम्बोडेति ख्याते दम्यद्वयम्। 'पोरदुपधात्' (३. १. ९८) इति यति दम्यः। 'वत्सोक्षाश्वर्षभेभ्यश्च तनुत्वे' (५. ३. ९१) इति ष्टरचि वत्सतरः ॥

आर्षभ्यः षण्डतायोग्यः

क्षीर० — अण्डाकर्षणोचितः। षण्ड इत्येके । अत एव ऋषभस्य प्रकृतिरार्षभ्यः। 'ऋषभोपानहोर्ञ्यः' (५. १. १४) ॥

टीका० — षण्डतायोग्ये [illegible]षण्डो वत्स आर्षभ्याख्यः। 'ऋषभोपानहोर्ञ्यः' (५. १. १४) ॥

षण्डो गोपतिरिट्चरः ॥ ६२ ॥

क्षीर० — सन्यते उत्सृज्यते षण्डः। एषणमिट्, इषा चरति इट्चरः स्वेच्छाचारी। इत्वर इत्येके पेठुः ॥

टीका० — षण्डत्रयं षण्डे। 'षणु दाने'। 'ञमन्ताड्डः' (उ० १. ११९)। षण्डः। '(षा ? सा)ण्डस्त्रिवत्सः सोमक्रयणः' इति वेदपाठात् साण्डो गोपतिरिट्चर इति युज्यते[2] पाठ इति[3] देवेश्वरः। 'गोपतिनपुंसकयोः शण्डः' इति नानानुशासनम्। एषणम् इट्, तया चरतीत्यच्। इट्चरः ॥

स्कन्धदेशस्त्वस्य वहः

क्षीर० — वहन्त्यनेन वहः। 'गोचर—' (३. ३. ११९) इति साधुः ॥

---

१. 'ण्डं त्रिवत्सं सो' छ. ज. पाठः. २. 'ति उच्यतु', ३. 'ति वारणसेवो दे' क. ख. ग. घ. ङ. च. पाठः.

युगादीनां तु वोढारो युग्यप्रासङ्ग्यशाकटाः ।

क्षीर०— युगं प्रासङ्गं शकटं च वहति । 'तद् वहति रथयुगप्रासङ्गम्' (४. ४. ७६) इति यत् । 'शकटादण्' (४. ४. ८०) ॥

टीका० — युगप्रासङ्गशकटानां वोढृषु युग्यत्रयम् । जूमाळेति ख्यातो युगः । दमनार्थमदम्यानां स्कन्धे यद् वक्रं काष्ठमासज्यते, स प्रासङ्गः । 'तद् वहति रथयुगप्रासङ्गम्' (४. ४. ७६) इति यत् । 'शकटादण्' (४. ४. ८०) इत्यण् । शाकटः ॥

खनन्ति तेन तद् वोढास्येदं हालिकसैरिकौ ॥ ६४ ॥

क्षीर० — हलेन खनति । 'तेन दीव्यति—' (४. ४. २) इति ठक् । हलं वहति हलस्येदं चेति 'हलसीराट्ठक्' (४. ४. ८१, ४. ३. १२४) ॥

टीका० — तेन खनतीत्याद्यर्थत्रये हालिकसैरिकौ । अयमर्थः — लाङ्गलेन खनतः लाङ्गलं वहतः लाङ्गलस्येश्वरस्य च, तथा सीरेण खनतः सीरं वहतः सीरस्येश्वरस्य च यथाक्रमं नामद्वयम् । तत्र तेन खनतीत्यर्थे 'तेन दीव्यति खनति जयति जितम्' (४. ४. २) इति ठक्, तद्वहत्यर्थे तस्येदमित्यर्थे च ॥

धूर्वहे धुर्यधौरेयधुरीणाः सधुरंधराः ।

क्षीर० — धुरं वहति । 'धुरो यड्ढञौ' (४. ४. ७७) । 'खः सर्वधुरात्' (४. ४. ७८) इति योगविभागात् खः । धुरं धारयति धुरंधरः । कथञ्चित् संज्ञात्वात् खच् । धूर्धरोऽप्युक्षा स्यात् ॥

टीका० — धूर्वहपञ्चकं सामान्येन यो धुरं वहति तत्र । वहतेः पचाद्यच् । धूर्वहः । 'धुरो यड्ढञौ' (४. ४. ७७) इति यत् । 'न भकुर्छुराम्' (८. २. ७९) इति प्रतिषेधाद् 'हलि च' (८. २. ७७) इति न दीर्घः । धुर्यः । खः सर्वधुरात्' (४. ४. ७८) इत्यत्र ख इति योगविभागात् खः । धुरीणः । 'वाचंयमपुरन्दरौ च' (६. ३. ६९) इत्यत्र चकारस्यानुक्तसमुच्चयार्थत्वाद् धुरंधर इति न्यासकारः । पृषोदरादित्वाद् धूर्धरोऽपीत्यन्यः ॥

उभावेकधुरीणैकधुरावेकधुरावहे ॥ ६५ ॥

क्षीर० — 'एकधुराल्लुक् च' (४. ४. ७९) इति खः लुक् च। लुक्पक्षे 'ऋक्पूरब्धूः —' (५. ४. ७४) इत्यच् समासान्तः॥

टीका० — एकस्यैव रथस्य लाङ्गलस्य वा यो धुरं वहति तत्र एकधुरीणत्रिकम्। एका चासौ धूश्चेति एकधुरा। 'ऋक्पूरब्धूःपथामानक्षे' (५. ४. ७४) इति समासान्ताकारप्रत्ययः। स्त्रीत्वाट्टाप्। तां वहतीत्यर्थे 'एकधुराल्लुक् च' (४. ४. ७९) इति खः लुक् च। लुक्पक्षे 'लुक् तद्धितलुकि' (१. २. ४९) इति स्त्रीप्रत्ययनिवृत्तिः। वहेः पचाद्यच्। एकधुरावहः॥

स तु सर्वधुरीणो[2] यो भद्रः सर्वधुरावहः।

क्षीर० — 'खः सर्वधुरात्' (४. ४. ७८)॥

टीका० — यः सर्वधुरां रथसम्बन्धिनीं लाङ्गलसम्बन्धिनीं च वहति स सर्वधुरीणः। 'खः सर्वधुरात्' (४. ४. ७८) इति खः॥

माहेयी सौरभेयी गौरुस्रा माहा[3] च शृङ्गिणी ॥ ६६ ॥

अर्जुन्यघ्न्या रोहिणी

क्षीर० — मह्यते पूज्यते माहा, तस्या अपत्यं माहेयी। सुरभ्या अपत्यं सौरभेयी। वसति क्षीरमस्यामुस्रा। शृङ्गिण्यादयः सामान्यं हित्वा विशेषे वर्तन्ते। अर्जुनी हि शुक्लगवी। न हन्त्यघ्न्या। 'अघ्न्यादयश्च' (उ० ४. ११३) इति साधुः। रोहिणी शबला। अनड्वाही गौरनडुही च। प्रशस्ता गौर्गोमतल्लिका। सुरभिर्नानार्थे॥

टीका० — माहेयीनवकं स्त्रीगवि। मह्या भूमेरपत्यं माहेयी। 'स्त्रीभ्यो ढक्' (४. १. १२०)। एवं सौरभेयी। गोशब्द उक्तः। किरणे उस्र उक्तः।

१. 'न्तोऽच्। स्त्री' क. ख. घ. च. छ. ज. झ. ञ. ट ठ., 'न्तः अः। स्त्री' ङ. पाठः. २. 'णः स्याद् यो हि स' ख. पाठः. ३. 'ता' ग. पाठः. ४. 'का ॥ स्या' क. पाठः.

'अपरिमाणबिस्ताचित—' (४. १. २२) इति ङीब् नास्ति, कालः सङ्ख्या च न परिमाणमिति ॥

टीका० — द्विसंवत्सरायां गवि द्विहायनीद्वयम्। 'दामहायनान्ताच्च' (४. १. २७) इति ङीपि द्विहायनी। द्वे वर्षे भूता द्वे वर्षे स्वसत्तया व्याप्तवती द्विवर्षा। 'तमधीष्टो भृतो भूतो भावी' (५. १. ८०) इति ठञ्। 'चित्तवति नित्यम्' (५. १. ८९) इति लुक्॥

एकाब्दा त्वेकहायनी।
चतुरब्दा चतुर्हायण्येवं त्र्यब्दा त्रिहायणी॥ ६८॥

क्षीर० — 'त्रिचतुर्भ्यां हायनाद् वयसि' (वा० ४. १. २७) इति णत्वम्॥

टीका० — एकवर्षायां गवि एकाब्दाद्वयम्। पूर्ववन्ङीष्॥

वशा वन्ध्या

क्षीर० — वष्टि कामयते एवं[1] वशा। बध्नाति (प्रैस्तौति?[2]) वन्ध्या, बन्धनीया वा॥

टीका० — वशाद्वयं वन्ध्यायाम्। वशोक्ता। अघ्न्यादित्वाद् यक्, उपधालोपाभावश्च। वन्ध्या॥

अवतोका तु स्रवद्गर्भा

क्षीर० — अवस्रुतं तोकमपत्यमस्याः अवतोका। 'अवस्रवन्ती[3] मृतवत्सा स्रवद्गर्भे'ति माला॥

टीका० — यस्याः दैववशाद् गर्भः स्रवति सा अवतोका। अवगलितं तोकमपत्यमस्या इति बहुव्रीहिः॥

अथ सन्धिनी।

१. 'वं शब्दाद् ब' क. ग. घ. ङ. पाठः. २. 'प्राप्नोति' ख. पाठः. ३. 'अवप्रस्नुवती मृ' क. ग. ङ. पाठः.

आक्रान्ता वृषभेण

क्षीर०—सन्धानं सन्धा गर्भग्रहणमस्त्यस्याः सन्धिनी । 'अ-दुग्धा दोहकाले तु सन्धिनी' इति कात्यः ।

"सन्धिन्यङ्गुलिदुग्धा गौर्वृषाक्रान्ता च सन्धिनी"

इति शाश्वतः ॥

टीका०—ऋषभेण या ऋतुमती आक्रान्ता सा सन्धिनी । गर्भः सन्धीयतेऽस्यामिति सन्धिनी । दधातेर्ल्युट् । पृषोदरादित्वान्मध्यस्याकारस्य इकारः ॥

अथ वेहद्गर्भोपघातिनी ॥ ६९ ॥

क्षीर०—विहन्ति गर्भं वेहत्[१], 'वेहृ प्रयत्ने' अस्माद्वा । 'वेहद् वृष-भोपगते'ति भागुरिः ॥

टीका०—अनृतावपि वृषोपगमनवशाद् यस्या गर्भपातो भवति तत्र वेहद्द्वयम् । 'संश्चत्तृपद्वेहत्' (उ० २. ८६) इति वहेरुपधेत्त्वा[३]तिप्रत्ययाभ्यां वेहन्निपातिता । वृषोपगमननिमित्तो गर्भघातोऽस्यामस्तीति गर्भोपघातिनी ॥

काल्योपसर्या प्रजने

क्षीर०—प्रजने गर्भग्रहणे प्राप्तकाला वृषेणोपसरणीयोपसर्या । 'उपसर्या काल्या प्रजने' (३. १. १०४) इति साधुः ।

टीका०—प्रजने प्रथमगर्भग्रहणे काल्या प्राप्तकाला ऋतुमती या सा उपसर्या । कालः प्राप्तोऽस्या इति 'कालाद् यत्' (५. १. १०७) इति यत् । काल्या । उपात् सर्तेः 'उपसर्या काल्या प्रजने' (३. १. १०४) इति यत् ॥

पष्ठौही बालगर्भिणी ।

---

१. 'तु' क. पाठः. २. 'त् गर्भोपघातिनी । वे' ख. पाठः. ३. 'दि' क. ख. पाठः.

क्षीर० — पष्ठं वहति पष्ठौही । 'वहश्च' (३. २. ६४) इति ण्विः। 'वाहः' (४. १. ६१) इति ङीप् । 'वाह ऊठ्' (६. ४. १३२) । 'एत्येधत्यूठ्सु' (६. १. ८९) इति वृद्धिः । 'पष्ठौही कालगर्भिणी' इति सभ्याः । 'असिक्नी बालगर्भिणी'ति भागुरिः । 'मलिनी बालगर्भिणी'ति माला ॥

टीका० — या बाला प्रथमगर्भिणी च सा पष्ठौही । 'वाहः' (४. १. ६१) इति ङीप् । 'वाह ऊठ्' (६. ४. १३२) इत्यूठ् । 'एत्येधत्यूठ्सु' (६. १. ८९) इति वृद्धिः ॥

स्यादचण्डी तु सुकरा

क्षीर० — अचण्ड्यकोपनेत्यर्थः । बह्वादित्वाद् वा ङीष् । सुखेन क्रियते सुकरा । 'सुकुचे'त्यागमः ॥

टीका० — सुशीलायां गवि अचण्डीद्वयम् ॥

बहुसूतिः परेष्टुका ॥ ७० ॥

क्षीर० — परमिच्छति परेष्टुः । सकृत् प्रसूता तु गृष्टिः ॥

टीका० — बहुसूतिः भूरिप्रसवा परेष्टुकाख्या ॥

चिरसूता बष्कयिणी

क्षीर० — बस्कं (य्य?)तेऽतिक्रामति । बस्कयश्चिरकालः औणादिकात् षत्वम् । सोऽस्त्यस्या बष्कयिणी ॥

टीका० — चिरकालप्रसूतायां गवि बष्कयिणी । मूर्धन्यषः । 'बष्कयस्त्वेकहायनो वत्स' इति शाकटायनः । तद्योगादिनिङीपौ ॥

धेनुः स्यान्नवसूतिका ।

क्षीर० — धयन्त्येनां धेनुः ॥

---

१. 'पङ्क्ती बा' ख., 'सिक्षी बा' घ. पाठः. २, ३. 'षु' ख. घ. ङ. पाठः. ४. 'ष्कयते' क. ग. घ. ङ. पाठः. ५. 'र' क. पाठः. ६. 'अः' ग. पाठः. ७. 'ले' ख. पाठः.

टीका० — प्रत्यग्रप्रसूतायां गवि धेनुः ॥

सुव्रता सुखसन्दोह्या

क्षीर० — सुशीलेत्यर्थः ॥

टीका० — सन्दानमन्तरेण या सुखेन दुह्यते सा सुव्रता ॥

पीनोध्नी पीवरस्तनी ॥ ७१ ॥

क्षीर० — पीनमूधोऽस्याः पीनोध्नी । 'ऊधसोऽनङ्' (५. ४. १३१) । 'बहुव्रीहेरूधसो ङीष्' (४. १. २५) । पीवरस्तनीति । 'स्वाङ्गाच्चोपसर्जनात् —' (४. १. ५४) इति ङीष् ॥

टीका० — बृहदूधःप्रदेशायां गवि पीनोध्नीद्वयम् । पीनमूधोऽस्याः पीनोध्नी । 'ऊधसोऽनङ्' (५. ४. १३१) इत्यनङ् । 'बहुव्रीहेरूधसो ङीष्' (४. १. २५) । 'स्वाङ्गाच्चोपसर्जनात् —' (४. १. ५४) इति ङीषि पीवरस्तनी ॥

द्रोणक्षीरा द्रोणदुघा

क्षीर० — द्रोणं दोग्धि द्रोणदुघा । 'दुहः कब् घश्च' (३. २. ७०) ॥

टीका० — द्रोणपरिमितक्षीरदायिन्यां गवि द्रोणक्षीराद्वयम् । द्रोणदुग्धं प्रस्रवतीति द्रोणदुघा । 'दुहः कब् घश्च' (३. २. ७०) इति कब् घश्चान्तादेशः ॥

धेनुष्या बन्धके स्थिता ।

क्षीर० — 'संज्ञायां धेनुष्या' (४. ४. ८९) इति साधुः । आ ऋणशुद्धेर्या बन्धके स्थापिता सा पीतदुग्धाख्या ॥

---

१. 'यां धेनुका ॥' क. ख. ङ. ठ. पाठः. २. 'व्रता सु' ख पाठः. ३. 'तू — क्षी' क. ग. घ. ङ. पाठः. ४. 'स्यां' ख., 'स्याम् इति पी' ग. पाठः. ५. 'घकारश्चा' ग. पाठः. ६. 'न्धस्था' ख., 'न्धे स्था' ग. घ. ङ. पाठः.

टीका० — गौर्महिषी वा दुग्धबन्धके[1] स्थिता धेनुष्या, मूर्धन्यषा । 'संज्ञायां धेनुष्या' (४. ४. ८९) इति यत्षुगागमौ ॥

समांसमीना सा यैव प्रतिवर्षं प्रसूयते ॥ ७२ ॥

क्षीर० — 'समां समां विजायते' (५. २. १२) इति खः[2] । समां समामिति वीप्सा । विजायत इति प्रत्ययार्थः । गर्भधारणेन समावाप्य? इति 'कालाध्वनोः —' (२. ३. ५) इति द्वितीया । समां समां विजायते समांसमीना गौः । 'पूर्वपदे सुपोऽलुग् वक्तव्यः' (वा० ५. २. १२) ॥

टीका० — वर्षे वर्षे प्रसवित्र्यां[3] समांसमीना । समायां समायां विजायत इत्यर्थे 'समां समां विजायते' (५. २. १२) इति खः । पूर्वपदे यलोपः । परिशिष्टस्य चालुक् ॥

ऊधस्तु क्लीबमापीनं

क्षीर० — उनत्त्यूधः । आप्यायते आपीनम् । 'प्यायः पी'[4] (६. १. २८) अनुपसर्गस्य । 'सोपसर्गान्न' (वा० ६. १. २८) । आङ्पूर्वस्यान्धूधसोर्वक्तव्यात् सोपसर्गस्य । ओदित्त्वान्निष्ठानत्वम्[5] । हुम्भारावो गवां ध्वनिः ॥

टीका० — गोस्तने ऊधोद्वयम् । ऊधः सान्तं क्लीबं दीर्वादि च । आङ्पूर्वात् प्यायेः क्तः । 'आङ्पूर्वस्यान्धूधसोः'[6] (वा० ६. १. २८) इति वक्तव्येन पीभावः । 'ओदितश्च' (८. २. ४५) इति नत्वम् । आपीनम् । अरुणस्तु पुंसि पठति ॥

समौ शिवककीलकौ ।

क्षीर० — शिवात् कन्, शिनोति वा शिवकः । कील्यते बध्यतेऽस्मिन् कीलकः ॥

टीका० — गोष्ठे गवां बन्धनार्थं[7] काष्ठे शिवकद्वयम् । शिव उक्तः ।

---

१. 'ने' ज. पाठः. २. 'खः ॥' क. ग. घ. ङ. पाठः. ३. 'न्यां' ग. ठ. पाठः ४. 'पी सो', ५. 'दोदि' ग. घ. पाठः. ६. 'र्वादन्धू' क. ख. ग. घ. ज. ठ. पाठः. ७. 'कण्डूयना' ग. पाठः.

'कील बन्धने'। 'हलश्च' (३. ३. १२१) इत्यधिकरणे घञ्। उभयत्र स्वार्थे कः॥

न पुंसि दाम सन्दानं

क्षीर० — दीयते रक्ष्यतेऽनेन, द्यति वा दाम। दामा स्त्री। सन्दीयते रक्ष्यतेऽनेन सन्दानं बन्धनरज्जुः॥

टीका० — यत्रैकस्मिन् बहुप्रग्रहयुक्ते बहवो गावो बध्यन्ते, तत्र दामद्वयम्। 'दो अवखण्डने'। मनिन्। दाम। स्त्रियां(टा? डा)प् दामा सीमावत्। सम्पूर्वो दाः संयमनार्थः। करणे ल्युट्। सन्दानम्॥

पशुरज्जुस्तु दामनी॥ ७३॥

क्षीर० — 'नित्यं संज्ञाच्छन्दसोः' (४. १. २९) इति ङीप्॥

टीका० — वत्सरूपाश्वादीनां चरणपाशो दामनी। तथाच —

"वत्सानां रोपितैः कीलैर्दामनी पाशपाशितैः"

इति हरिवंशः। दामैव दामनी। प्रज्ञादेराकृतिगणत्वादण्। क्वचित् 'पशुरज्जुस्तु बन्धनी' इति पाठः॥

वैशाखमन्थमन्थानमन्थानो मन्थदण्डके।

क्षीर० — विशाखासु जातो वैशाखः। 'विशाखाषाढादण् मन्थदण्डयोः' (५. १. ११०)। विशाखस्यायं वा। मथ्यतेऽनेन मन्थः। 'पुंसि संज्ञायां घः प्रायेण' (३. ३. ११८)। मश्नातीति मन्थानः। ताच्छील्ये चानश्। मथिन्शब्दस्य 'इतोऽत् सर्वनामस्थाने' (७. १. ८६)। 'थो न्थः' (७. १. ८७)। मन्था इत्येकत्वे। मन्थनार्थो दण्डो मन्थदण्डः। कः संज्ञायाम्। खजाकः कुण्डोऽपि॥

टीका० — वैशाखपञ्चकं मन्थनदण्डे। 'विशाखाषाढादण् मन्थदण्डयोः' (५. १. ११०) इत्यण्। वैशाखः। करणे घञि मन्थः। मन्थानः, अद-

१. 'स्य' ग. पाठः. २. 'न्थर' क. ग. घ. ङ. पाठः. ३. 'वो ब' ग. घ. ङ. पाठः. ४. 'दा सं' ग. घ. पाठः. ५. 'मार्थः' क. ख. ज ठ. पाठः. ६. 'न्थ्य' ग. पाठः. ७. 'घः। म' क. ख. पाठः. ८. 'नः। चा' क. ग. घ. ङ. पाठः. ९. 'थ' ख. पाठः. १०. 'ण्डकः।' क., 'ण्डः॥ ख' ख. पाठः.

न्तोऽयम् । 'मन्थ विलोडने' । 'परमे कित्' (उ० ४. १०) इत्यनुवृत्तौ 'मन्थः' (उ० ४. ११) इत्यनेन सूत्रेण इनिः, स च कित् । एवं मथिन् । पथिन्छब्दवद्रूपम् । 'अङ्गाधिकारे तस्य च तदुत्तरपदस्य चे'ति वचनाद् द्वन्द्वेऽपि 'थो न्थः' (७. १. ८७) इत्यादि कार्यम् ॥

कुठरो दण्डविष्कम्भे

क्षीर० — कुटति कुटरः कुटको वा दण्डकुटके वर्तते । दण्डं विष्कभ्नाति बध्नाति दण्डविष्कम्भः, यस्मिन् बद्ध्वा मन्थ आकृष्यते । मञ्जीरोऽपि । दण्डकोटकमित्येके ॥

टीका० — यत्र स्तम्भेऽवकर्षणार्थं रज्ज्वा मन्थदण्डो बध्यते तत्र कुठरः । दण्डस्य विष्कम्भो निबन्धको दण्डविष्कम्भः । मूर्धन्यषः ॥

मन्थनी गर्गरी समे ॥ ७४ ॥

क्षीर० — मथ्यतेऽस्यां मन्थनी । गिरति दधि गर्गरी । कलशी च ॥

टीका० — मन्थनकुम्भिकायां मन्थनीद्वयम् । अधिकरणे ल्युटि मन्थनी । गर्गशब्दं रातीति गर्गरी, गौरादिः ॥

उष्ट्रे क्रमेलकमयमहाङ्गाः

क्षीर० — उष्यते दह्यते मरावुष्ट्रः । क्रमादेलयति क्रमेलकः । मीनात्यहीन् मयः, मयते गच्छति वा । यम इत्येके ।

"दासेरको दीर्घजङ्घो ग्रीवी रणकधूम्रकौ" ॥

टीका० — उष्ट्रचतुष्कमुष्ट्रे । 'उष दाहे' । 'उषिखनिभ्यां कित्' (उ० ४. १६३) इति ष्ट्रन् । उष्ट्रः । 'मय गतौ' । पचाद्यच् । मयः । महान्ति अङ्गान्यस्येति महाङ्गः ॥

करभः शिशौ ॥

क्षीर० — कं शिरो रभते उन्नमयति करभो बालोष्ट्रः ॥

---

१. 'ञ्जि' क., 'ञ्जी', २. 'काष्ठक' ख. पाठः. ३. 'न्थ्य' घ. ङ. पाठः. ४. 'हिं म' ख. पाठः. ५. 'मय इ' ग. घ. ङ. पाठः. ६. 'जिह्वो गीती उरणधू' ग. घ. पाठः.

टीका० — उष्ट्रशिशौ करभः । किरतेः शरभवद् अभच् ॥

करभाः स्युः शृङ्खलका दारवैः पादबन्धनैः ॥ ७५ ॥

क्षीर० —'शृङ्खलमस्य बन्धनं करभे' (५. २. ७९) इति कन् । विकारे 'नित्यं वृद्धशरादिभ्यः' (४. ३. १४४) इति मयटा दारुमयैरिति युक्तम् ॥

टीका० — दारुविकारैः पादबन्धनैर्लक्षिताः करभाः शृङ्खलकाख्याः । 'शृङ्खलमस्य बन्धनं करभे' (५. २. ७९) इति कन् ॥

अजा छागी

क्षीर० — अजति गच्छति व्यायामशीलत्वादजा । 'अजाद्यत[1]ष्टाप्' (४. १. ४) । छ्यति रोगान् छागी । 'जातेरस्त्रीविषयादयो[2]पधात्[3]' (४. १. ६३) इति ङीष् । स्त्रीप्रत्ययविशेषार्थं पृथक् पाठः ॥

टीका० — अजाद्वयं छाग्याम् ॥

शुभश्छागबस्तच्छगलका अजः ।

क्षीर० — शोभते शुभः । स्त(नो?भ्नो)ति स्त(भे?भो) निघण्टुषु । बस्ते बस्तः । छ्यति रोगान् छागः छगलश्च । छगो[4]ऽपि ॥

टीका० — तुभपञ्चकं छागे । 'णभ तुभ हिंसायाम्' । इगुपधलक्षणः कः । तुभः । 'छो छेदने' । खङ्गवद् गन् । छागः । 'गन्ध बस्त अर्दने' । कर्मणि घञ् । बस्तः । 'छो गुक् ह्रस्वश्च' (उ० १. ११८) इति कलः । धातोर्गुगागमो ह्रस्वश्च । छगलः । 'जनी प्रादुर्भावे' । 'जनस्तो रश्च' इत्यनुवृत्तौ 'डोऽट् च' इति डः अडागमश्च धातोः । अजः ॥

मेढोरु[5]भ्रोरणोर्णा[6]युमेषवृष्णय एलकाः[7] ॥ ७६ ॥

क्षीर० — मेहति मेढः[8] । उरु भ्रमत्युरुभ्रः[9] । उच्चैरभते वा । उः स्वरप्रतिरूपको[10] निपातः । एवमुच्चै रणोऽस्य उरणः । उरण्याति

---

१. 'त्' । अजाद्य' क. पाठः. २. 'त् । डी' क. ग. घ. ङ. पाठः. ३. 'थं·' क. ख. पाठः. ४. 'लः । ज' क. ख. ङ. च. छ. ज. ट. पाठः. ५. 'ण्डोरभ्रो' क. 'डोरभ्रो' ग. घ. ङ. पाठः. ६. 'ण्ड' ख. पाठः. ७. 'काः ॥ एडशब्दार्थाः । मे' ख. च., 'काः ॥ एडशब्दार्थात् मे' ग. घ. ङ. पाठः. ८. 'ण्डकः । उ' क, 'डकः । उ' ग, 'ण्डः । उ' घ. पाठः. ९. 'र' क. पाठः. १०. 'को वा नि' ख. पाठः.

देवताः प्रीणातीति श्रीभोजः, कण्ड्वादिपाठात्। ऊर्णास्त्यस्योर्णायुः। 'ऊर्णाया युस्' (५. २. १२३)। मेषते वाशते मेषः। पचाद्यच्। वर्षति वृष्णिः। आ ईड्यन्तेऽनेन देवाः एडकः। हुडुश्च। अविर्नोनार्थे॥

टीका० — मेण्डसप्तकं मेण्डे। उरभ्रोरणौ ह्रस्वादी। ऊर्णा मेषलोम, तद्योगाद् 'ऊर्णाया युस्' (५. २. १२३)। ऊर्णायुर्दीर्घादिः। 'मिष स्पर्धायाम्'। पचाद्यच्। मेषः। 'वृषु सेचने'। 'सृवृषिभ्यां कित्' (उ० ४. ५०) इति निः। वृष्णिः। स्त्रियामेडका॥

उष्ट्रोरभ्राजवृन्दे स्यादौष्ट्रकौरभ्रकाजकम्।

क्षीर० — 'गोत्रोक्षोष्ट्र—' (४. २. ३९) इति वुञ्॥

टीका० — यथाक्रममुष्ट्रादिसमूहे औष्ट्रकत्रयम्। 'गोत्रोक्षोष्ट्र—'(४. २. ३९) इत्यादिना वुञ्॥

चक्रीवन्तस्तु बालेया[1] रासभा गर्दभाः खराः॥७७॥

क्षीर० — चक्रमस्त्यस्य तैलिकादिचक्रभ्रमणाच्च। 'आसन्दीवद्-ष्ठीवच्चक्रीवद्—' (८. २. १२) इति साधुः। 'चक्रवालस्तु बालेय' इति माला। बालेभ्यो हितो बालेयः। बाले बलने भवो वा। रासते रासभः। 'रासृ शब्दे'। गर्दति गर्दभः। 'गर्द शब्दे'। शङ्कुकर्णोऽपि। खं शब्दं राति खरः, खमस्त्यस्य वा। 'खमुखकुञ्जेभ्यो रः' (वा० ५. २. १०७)। क्रूरो वा।

"षट्त्वे पशुनामभ्यः षड्गवं[2,3]मथ गोयुगं द्वित्वे"।

यथा मेषषड्गवम्। 'षट्त्वे षड्गवच्' (वा० ५. २. २९) इति वक्तव्यात् षड्गवच्। गोगोयुगम्। 'पशुनामभ्यो द्वित्वे गोयुगच्'। (वा०५. २. २९)।

"अविसोढमविमरीसं तथाविदूसं पयो मेष्याः"।

'अवेर्दुग्धे सोढदूसमरीसचः' (वा० ४. २. ३६)॥

---

१. 'आधिर्नो' क. ग. घ. ङ. पाठः. २. 'वा' क. पाठः. ३. 'वम्। यथा मेषषड्गवम्। षट्त्वे षड्गवच् इति वक्तव्यात् षड्गवच्। अथ गोयुगं द्वित्वे। यथा गोगोयुगम्। 'पशुनामभ्यो द्वित्वे गोयुगच्। अविसोढमविमरीसं दुग्धं तथाविदूसमवेः। 'अवेर्दुग्धे प्रत्यया वक्तव्याः सोढदूसमरीसचः॥' क. ख. च. छ. पाठः.

टीका० —चक्रीवत्पञ्चकं **गर्दभे**। मतुपि चक्रीवान्। 'आसन्दीवदष्ठीवच्च-क्रीवद्—' (८. २. १२) इत्यादिना चक्रीभावो निपात्यते। 'रासृ शब्दे'। 'रासि-वल्लिभ्यां च' (उ० ३. १२५) इत्यभच्। रासभः। 'गर्द शब्दे'। शलभवद-भच्। गर्दभः॥

वैदेहकः सार्थवाहो नैगमो वाणिजो वणिक्।
पण्याजीवो ह्यापणिकः क्रयविक्रयिकश्च सः॥ ७८॥

क्षीर० — विदेहे उपचये भवो वैदेहः। सार्थान् सधनान् सरतो वा पान्थान् वहति सार्थवाहः। निगमे आगमे भवो नैगमः। निगमो वणिक्पथमस्य निवासो वा। पणते वणिक्। प्रज्ञादित्वात् स्वार्थेऽण्। (वाणिजः)। आपणः प्रयोजनमस्य आपणिकः। क्रयविक्रयाभ्यां जीवति क्रयविक्रयिकः। 'वस्नक्रयविक्रयाट्ठन्' (४. ४. १३) इति सङ्घातवि-गृहीताट्ठन्॥

टीका० —वैदेहकाष्टकं **वणिजि**। वसिष्ठमुनिना राजा निमिर्क्रत्विङ्नि-मित्तं विदेहो भवेति शप्तः। एतन्निमित्तं विदेह इत्यस्य नामाभूत्। विदेहेन च वणिज्याशास्त्रं प्रणीतम्। अतो वणिजस्तच्छिष्याः। 'धूमादिभ्यश्च' (४. २. १२७) इति शैषिको वुञ्। वैदेहकः। सार्थं वणिक्संघातं वहति देशान्तरं प्राप-यतीति कर्मण्यणि सार्थवाहः। निगमः पुटभेदनं, तत्र भवो जातो वा नैगमः। पणत इति वणिक्। 'पणेरिज्यादेश्च वः' (उ० २. ७३) इतीजिप्रत्ययः आदेश्च वः। इकार उच्चारणार्थः। वणिगेव वाणिजः। प्रज्ञादिः। पण्येनाजीवतीति पण्याजीवः। 'आङि पणिपतिखनिभ्यश्च' (उ० २. ४५) इति इकन्। आप-णिकः। क्रयविक्रयाभ्यां जीवतीति क्रयविक्रयिकः। 'वस्नक्रयविक्रयाट्ठन्' (४. ४. १३)॥

विक्रेता स्याद् विक्रयिकः

क्षीर० — विक्रीणीते भाण्डेन मूल्यं गृह्णाति॥

---

१. 'चक्रीवदष्ठीवद्' क. ख. च. ज. ठ. पाठः. २. 'चित् इ' क. ख. च. छ. पाठः. ३. 'फ' क. पाठः. ४. 'तार्थाट्ठक्॥' ग. पाठः. ५. 'ह्राष्ट' क. ख. ज. ठ. पाठः.

टीका० — विक्रेतृद्वयं विक्रेतरि। तृचि विक्रेता। पूर्ववद्वनि विक्रयिकः॥

क्रायकः क्रयिकः समौ।

क्षीर० — क्रीणाति मूल्येन भाण्डं[1] गृह्णाति क्रायकः। क्रयेण जीवति क्रयिकः॥

टीका० — क्रायकद्वयं क्रेतरि। ण्वुलि क्रायकः। 'क्रय इकन्' (उ० २. ४६) इतीकन्। क्रयिकः॥

वाणिज्यं तु वणिज्या स्याद्

क्षीर० — वणिजो भावः। ब्राह्मणादित्वात् ष्यञ्। 'दूतवणिग्भ्यां च' (वा० ५. १. १२६) इति वक्तव्याद्[2] यच्च॥

टीका० — वणिजां कर्मणि वाणिज्यद्वयम्। वाणिज्यमुक्तम्। दूत्यवद् यत्। टापि वणिज्या॥

मूल्यं वस्नोऽप्यवक्रयः॥ ७९॥

क्षीर० — मूलेनानाम्यं मूल्यम्। 'नौवयोधर्म—' (४. ४. ९१) इति यत्। वसत्यस्मिन् पण्यं वस्नः। अवक्रीयतेऽनेन अवक्रयः॥

टीका० — मूल्यत्रयं मूल्ये। पटादीनामुत्पत्तिकारणं हिरण्यं मूलं[3], तदधिकं हिरण्यं मूल्यम्। 'नौवयोधर्मविषमूल—' (४. ४. ९१) इत्यादिना यत्। अधिकत्वाद् मूलेन नाभिभूयते। मूलाद् विक्रयार्थस्यालपत्वे[4] अभिभवनीयं स्यात्। वसतेः 'धावृवस्यज्यतिभ्यो नः' (उ० ३. ६)[5]। वस्नः। क्लीबं चैतदित्यन्यः॥

नीवी परिपणो मूलधनं

क्षीर० — नीवीव परहस्तेऽर्प्यमाणत्वात्[6]। परिपण्यते वृद्ध्यर्थं[7] प्रयुज्यते परिपणः। मूलं लाभकारणम्[8]॥

---

१. 'ण्डं क्रा' क. ग. घ. ङ. पाठः. २. 'च्चाद्यच्च' क. पाठः. ३. 'लं नौ' ठ. पाठः. ४. 'त्वम्' क. ख. ग. घ. ङ. च. छ. ज. ठ. पाठः. ५. 'पृ' ठ. पाठः. ६. 'स्तेर्यमा' क. ख. ग. पाठः. ७. 'त्त्य' ग. घ. ङ. पाठः. ८. 'भे' ख. पाठः.

टीका० — नीवीत्रयं **मूलधने**[1] **भाण्डा** इति ख्याते । निपूर्वाद् व्येञः 'नौ व्यो यलोपः पूर्वपदस्य च दीर्घः' (उ० ४. ३७) इति इण्[2]प्रत्ययः डिच्च यलोपः पूर्व[3]प[4]दस्य दीर्घत्वम् । ङीषि नीवी । घप्रत्यये परिपणः ॥

लाभोऽधिकं फलम् ॥ ८० ॥

क्षीर० — **मूलधनाद् यदधिकं निष्पन्नं, स लाभः । फलं च क[5]लान्तरादि ॥**

टीका० — मूलधनविक्रयादधिकं यद् धनं लभ्यते, स लाभः । घञन्तः ॥

परिदानं परीवर्तो नै[6]मेयनिमयावपि ।

क्षीर० — **परिवृत्त्या दानं परिदानम् । नि[7]मेये परिवर्तनीये भवो नै[8]मेयः । निमानं निमयः । 'मेङ् प्रणिदाने' ॥**

टीका० — प्रतिदानचतुष्कं **परीवर्ते** । ल्युटि प्रतिदानम् । दीर्घत्वविकल्पात् परिवर्तोऽपि । 'मेङ् प्रणिदाने' । विपूर्वः । 'अचो यत्' (३. १. ९७) । विमेयः । प्रज्ञाद्यणि वैमेयः । मिञ एरचि निमयः ॥

पुमानुपनिधिर्न्यासः

क्षीर० — **उप समीपे निधीयते गुप्तं स्थाप्यते उपनिधिः । उप समीपे निधेर्वा । न्यस्यते निक्षिप्यते न्यासः । निक्षेपोऽपि । स्मार्ते त्वेषां भेदोऽस्ति —**

"वा[9]सनस्थमनाख्याय हस्तेऽन्यस्य यदर्पितम् ।
द्रव्यं तू[10]पनिधिर्न्यासः प्रकाश्य स्थापितं तु यत् ॥
निक्षेपः शिल्पिहस्ते तु भाण्डं संस्कर्तुमर्पितम् ।"

---

१. 'ने ।' ठ. पाठः. २. 'ह्' ख. ग. च. ठ., 'ङ्च्प्र' क. ङ. छ. ट. पाठः. ३. 'वद् दी' क. ख. ङ. च. छ. ट. ठ. पाठः. ४. 'ददी' ज. पाठः. ५. 'का' क. ख. घ. ङ. पाठः. ६. 'वै', ७. 'वि', ८. 'वै' ख. पाठः. ९. 'भाजन' क. ख. पाठः. १०. 'तदुपधि' ग. पाठः.

टीका० — उपनिधिद्वयं **निक्षेपे** । निधिरुक्तः । उपपूर्वादुपनिधिः । 'असु क्षेपणे' । घञ् । न्यासः ॥

प्रतिदानं तदर्पणम् ॥ ८१ ॥

क्षीर० — तस्य न्यासस्य निक्षप्त्रे प्रतीपं दानं प्रतिदानम् । परिदानमित्येके ।

"प्रत्यक्षदानात् स्वीकारोऽवक्रयः क्लृप्तकं च तत्" ॥

टीका० — **निक्षेपार्पणे** परिदानम् । परिपूर्वो ददातिर्न्यासार्पणे ॥

क्रये प्रसारितं क्रय्यं

क्षीर० — क्रयनिमित्तमापणे न्यस्तं क्रय्यम् । 'क्रय्यस्तदर्थे' (६. १. ८२) इति साधुः ॥

टीका० — क्रयोऽस्य भवत्विति यद् घट्टादौ प्रसारितं वस्तु, तत् क्रय्याख्यम् । क्रीणातेः 'अचो यत्' (३. १. ९७) । 'क्रय्यस्तदर्थे' (६. १. ८२) इत्ययादेशः ॥

क्रेयं क्रेतव्यमात्रके ।

क्षीर० — यथा क्रेयो गौर्वर्तते न च क्रय्योऽस्ति ॥

टीका० — **क्रेतव्यमात्रे वस्तुनि न तु प्रसारिते** क्रेयम् । 'अचो यत्' (३. १. ९७) ॥

विक्रेयं पणितव्यं च पण्यं

क्षीर० — 'अवद्यपण्य —' (३. १. १०१) इति साधुः ॥

टीका० — विक्रेयत्रयं **विक्रयणीये** । 'क्रय्यस्तदर्थे' (६. १. ८२) इत्यनुपसर्गनिर्देशाद् विक्रय्यमसाधुरिति श्रीकण्ठः । पणेस्तव्यत् । पणितव्यम् । 'अवद्यपण्यवर्या —' (३. १. १०१) इत्यादिना यति पण्यम् ॥

क्रय्यादयस्त्रिषु ॥ ८२ ॥

क्षीर० —वाच्यलिङ्गा इत्यर्थः ॥

टीका० —क्रय्यादयस्त्रिषु ॥

क्लीबे सत्यापनं सत्यङ्कारः सत्याकृतिः स्त्रियाम् ।

क्षीर० —अवश्यं मयैतद् विक्रेयमिति सत्यस्य करणं सत्यापनम् । 'सत्यापपाश —' (३. १. २५) इति णिच् । 'अर्थवेदसत्यानामापुक्' (वा० ३. १. २५) । 'कारे सत्यागदस्य' (६. ३. ७०) इति मुम् । 'सत्यादशपथे' (५. ४. ६६) इति डाच् ॥

टीका० —अवश्यं सत्यमिदं कर्तव्यमित्याख्याने सत्यापनत्रयम् । 'सत्यापपाश —' (३. १. २५) इत्यादिना ण्यन्ताल्ल्युट् । सत्यापनम् । पवर्गवत् । 'सत्यापना सत्याकृतिरि'ति स्त्रीकाण्डे वोपालितः । सत्यंकार इति 'कारे सत्यागदस्य' (६. ३. ७०) इति मुम् । सत्यस्य कृतिः सत्याकृतिः । 'सत्यादशपथे' (५. ४. ६६) इति डाच् ॥

विपणो विक्रयः

क्षीर० —विपणनं विपणः । चुराद्य(द)न्तादच् । अन्यथा विपाणः स्यात् ॥

टीका० —विपणद्वयं विपणक्रियायाम् । 'नित्यं पणः परिमाणे' (३. ३. ६६) इत्यप् ॥

सङ्ख्याः सङ्ख्येये ह्यादश त्रिषु ॥ ८३ ॥

क्षीर० —एकाद्या दशान्ताः संख्याः सङ्ख्येये वर्तमानास्त्रिलिङ्गाः । एका शाटी एकः पटः एकं कुण्डम् । दश स्त्रियः दश पटाः दश कुण्डानि । आदशेत्यष्टादशान्ताः ॥

टीका० —आदशं दशश्रुतिपर्यन्तम्, आ अष्टादशभ्य इति यावत् । एकादिसङ्ख्याशब्दाः सङ्ख्येयवस्तुनि वर्तमानास्त्रिषु । एतेषां च संख्यासंख्येययोः सामानाधिकरण्यं भवति । एको ब्राह्मणः एका स्त्री एकं ब्राह्मणकुलम् । दश

---

१. 'दिण्यन्ता' क. ग. घ. ङ. पाठः. २. 'शकश्रु' ग. पाठः.

ब्राह्मणाः दश स्त्रियः दश ब्राह्मणकुलानि इत्यादि[1]। एतस्य चाभिधेयलिङ्गतया त्रिष्वित्युक्तं, न तु ब्राह्मणानामित्यादिवैयधिकरण्यं भवति । 'अनश्च' (५. ४. १०८) इति समासान्ताचि आदशमकारान्तम् । 'आङ् मर्यादाभिविध्योः' (२. १. १३) इति समासः ॥

विंशत्याद्याः सदैकत्वे सर्वाः संख्येयसंख्ययोः ।

क्षीर० — विंशत्याद्याः सर्वा एव संख्याः संख्येये संख्यायां (च) नित्यमेकवचनान्ता वर्तन्ते । यद् भाष्यम् — 'आ दशभ्यः संख्याः संख्येये वर्तन्ते[2] । अत ऊर्ध्वं संख्याने संख्येये च' । विंशतिः पटाः विंशतिः पटानाम् । शतं गावः शतं गवाम् ॥

टीका० — विंशत्याद्याः सर्वे एव संख्याशब्दा बहुवचनविशिष्टसंख्येयवचना अपि एकत्ववृत्तय एव । तद् यथा विंशतिर्गावः । संख्यावचनत्वे तु गवां विंशतिः । भेदनिबन्धना षष्ठी ॥

संख्यार्थे द्विबहुत्वे स्तः

क्षीर० — संख्यामात्रेऽर्थे वर्तमानाया विंशत्यादेः[3] संख्याया द्विवचनबहुवचने अपि स्तो[4] भवतः, एकशेषात्[5] । द्वे विंशती तिस्रो विंशतयः । गवां विंशती[6] गवां विंशतयः ॥

टीका० — यदा तु संख्यान्तरस्यार्थेऽभिधेये विंशत्यादयो वर्तन्ते, तदा द्विवचनबहुवचने अपि भवतः । द्वे विंशती तिस्रो विंशतयः । पञ्च शतानीति ॥

तासु चा नवतेः स्त्रियः ॥ ८४ ॥

क्षीर० — विंशत्याद्या नवत्यन्ताः स्त्रीलिङ्गाः ॥

टीका० — तासु विंशत्यादिषु । आ नवतेः नवतिं व्याप्य । विंशतित्रिंशच्चत्वारिंशत्पञ्चाशत्षष्टिसप्तत्यशीतिनवतयो भिन्नलिङ्गेनापि[7] समानाधिकरणाः ।

---

१. 'नि । अष्टादश ब्राह्मणा इ' ग. पाठः. २ 'न्ते । ऊ', ३. 'दिसं', ४. 'स्तः, ए' ख. पाठः. ५. 'षो द्वे' क. ग. घ. ङ. पाठः. ६. 'तिः' ख. घ. ङ. पाठः. ७. 'ङ्गा अपि' ग. पाठः.

स्त्रियः स्त्रीलिङ्गाः । यथा — विंशत्या[1] पुरुषैः विंशतिः कुण्डानि एकविंशतिः कुण्डानीति ॥

पङ्क्तेः शतसहस्रादि क्रमाद् दशगुणोत्तरम् ।

क्षीर० — द्वौ पञ्चतौ[2] पङ्क्तिर्दशाख्या । 'पङ्क्तिविंशतित्रिंशत्—' (५. १. ५९) इति साधुः । दश पङ्क्तयः शतं, दश शतानि[3] सहस्रं, दश सहस्राण्ययुतम् । इत्थं परार्धान्तान्यष्टादश गणितस्थानानि । यथाहुः—

"एकदशशतसहस्राण्ययुतप्रयुताख्यलक्षमथ नियुतम् ।
अर्बुदकोटिन्यर्बुदपद्मे खर्वं निखर्वमिति दशभिः ॥
गुणनान्महाब्जशङ्कू समुद्रमध्यान्तमथ परार्धं च ।
खहतं परार्धममितं तत्खहतं भूयतोऽसङ्ख्यम् ॥"

प्रयुतसंज्ञं लक्षम् । अर्बुदसंज्ञा कोटिरित्यर्थः ॥

टीका० — पङ्क्तिशब्देन दशसंख्योच्यते । पङ्क्तेः प्रभृति दशगुणोत्तरक्रमेण शतसहस्रादि । तद् यथा— दश दशगु (णं ? णाः) शतं, शतं दशगुणं सहस्रं, सहस्रं दशगुणमयुतमित्यादि । तदुक्तम्—

"एकं दश शतमस्मात् सहस्रमयुतं ततः परं लक्षम् ।
प्रयुतं कोटिमथार्बुदमब्जं खर्वं निखर्वं च ॥
तस्मान्महासरोजं शङ्कुं सरितां पतिं ततस्त्वन्त्यम् ।
मध्यं परार्धमाहुर्यथोत्तरं दशगुणं तज्ज्ञाः" ॥

पौतवं द्रुवयं पाय्यमिति मानार्थकं त्रयम् ॥ ८५ ॥

क्षीर० — पुनातीति पोतुर्मानभाण्डशोधकः पोतवाध्यक्षाख्यः । तस्येदं पौतवम् । द्रोर्विकारो द्रुवयम् । 'द्रोश्च' (४. ३. १६१) । 'माने वयः' (४. ३. १६२) । पाति पाय्यम् । 'पाय्यसान्नाय्य—' (३. १. १२९) इति साधुः । मीयतेऽनेनेति मानम् । पौतवं तुलादि, द्रुवयं प्रस्थादि, पाय्यं हस्तादीति गौडो भ्रान्तः ॥

---

१. 'त्या कुपु' क. ख. पाठः. २. 'कौ' क. ग. घ. पाठः. ३. 'नि द्रु स' ग. पाठः.

टीका०—यौतवत्रयं मानसामान्ये । केचित्तु अनन्तरं 'मानं तुलाङ्गुलिप्रस्थैरि'ति वक्ष्यति, तद्दृष्ट्या यथाक्रमं यौतवं तुलादि, द्रुवयं‡ वितस्त्यादि, पाय्यं प्रस्थादीति सम्बध्नन्ति । तन्न युज्यते । तथाच वोपालितः—

"प्रस्थः सानौ द्रुवये चराचरे जङ्गमे भवने"

इति । यदि यथाक्रमं सम्बन्धः, तदा द्रुवये प्रस्थ इति न स्यात् । 'यु मिश्रणे' । बहुलवचनाद् भावे 'वसेस्तुन्' (उ० १.७८) इति तुन् । योतुः शोधनं, तदर्थतया तस्येदं यौतवं तुलादिशोधनोपाय इति यौतवाध्यक्ष इत्यध्याये चाणक्यटीकाकृतोक्तम् । द्रुर्वृक्षः, तद्विकारो द्रुवयम् । 'द्रोश्च' (४. ३. १६१) इत्यनुवृत्तौ 'माने वयः' (४. ३. १६२) इति वयः । यथाकथञ्चिद् व्युत्पादितिरियम् । रूढशब्दोऽयम् । मीयतेऽनेनेति पाय्यम् । 'पाय्यसान्नाय्य—' (३. १. १२९) इत्यादिना ण्यद् आदिपत्वं युगागमश्च निपात्यते । एवं पवर्गादिर्द्वितालव्यश्चेत्युपदेशपरम्परा ॥

मानं तुलाङ्गुलिप्रस्थैः

क्षीर०—मिमीते मानं मीयतेऽनेन च । तत्र तुलाद्युन्मानम्, अङ्गुल्यादि प्रमाणं, प्रस्थादि परिमाणम् । यदाहुः—

"ऊर्ध्वमानं किलोन्मानं परिमाणं तु सर्वतः ।
आयामस्तु प्रमाणं स्यात् सङ्ख्या भिन्ना[2] तु सर्वतः ॥"

'संख्या बाह्या[1] तु सर्वतः' इति पाठभेदः ॥

टीका०—तन्मानं वस्तुतस्त्रिधा, तुलाङ्गुलिप्रस्थभेदात् । तुलाग्रहणेनोन्मानाद्यु[3]पलक्ष्यते[4], अङ्गुल्या हस्तादि, प्रस्थेन द्रोणकादि ॥

गुञ्जाः पञ्चाद्यमाषकः ।

क्षीर०—गुञ्जा रक्तिका । आद्यो मुख्यः । 'धान्यकणा दश माषकः । तथा द्वे कृष्णले रूप्यमाषे' इति दर्शनात्[5] । अस्मिन् कालेऽद्य इत्येके । यदाहुः—"माषकं[6] सप्त कृष्णलाः" ॥

---

१. 'बाह्या तु', २. 'भिन्ना तु' क. पाठः. ३. 'न्यु', ४. 'न्ते' ठ. पाठः. ५. 'न' ख. पाठः. ६. 'सामकं' ङ. पाठः.

---

‡ अत्र सर्वत्र वप इत्यस्य स्थाने वय इत्येव पठितव्यं भाति ।

टीका० — पञ्च गुञ्जाः काकचिञ्चिकाः । आद्यः प्रथमः, शास्त्रीयो माषक इत्यर्थः । माषो मूर्धन्यषः । 'संज्ञायां कन्' (५. ३. ७५) । दशकृष्णलापेक्षया आद्यत्वम् ॥

ते षोडशाक्षः कर्षोऽस्त्री

क्षीर० — अक्ष्णोत्यक्षः । कर्षति कर्षः ॥

टीका० — ते माषकाः षोडश अक्षद्वयवाच्याः । अक्ष उक्तः । कृषोऽच् । कर्षः । अस्त्री ॥

पलं कर्षचतुष्टयम् ॥ ८६ ॥

क्षीर० — 'पल रक्षायाम्' ॥

टीका० — कर्षचतुष्टये पलम् ॥

सुवर्णविस्तौ हेम्नोऽक्षे

क्षीर० — सुवर्णमस्त्यस्य, अर्शआदित्वादच् । विस्यते विस्तः । 'विस उत्सर्गे'† । अक्षे[1] षोडशमाषके माने द्वौ वर्तेते । यत् स्मृतिः—

"पञ्चकृष्णलको माषस्ते सुवर्णस्तु[2] षोडश" ॥

टीका० — हेम्नोऽक्षे कर्षे सुवर्णद्वयम् । हेमजातिवचनस्तु सुवर्णशब्दः क्लीबे । विस्तः सकारतकारवान् ॥

कुरुविस्तस्तु तत्पले ।

क्षीर० — कुरुदेशे प्रसिद्धो विस्तः कुरुविस्तो हेमपलम् । यन्माला — 'पलेन हि सुवर्णस्य कुरुविस्तः' ॥

टीका० — तत्पले कुरुवि(न्दः? स्तः) ॥

तुला स्त्रियां पलशतं

क्षीर० — तोल्यते तुला । 'चिन्तिपूजि —' (३. ३. १०५) इति चकारादङ् । ङित्करणसामर्थ्याद् गुणाभावः ॥

---

१. 'क्षो' घ. पाठः. २. 'स्य' क. ग. घ. ङ. पाठः.

---

† उत्सर्ग इत्यर्थलेखनं बुसधातुभ्रान्त्या, यतो 'बिस प्रेरणे, बिस्यति' इत्येव तरङ्गिण्यां क्षीरस्वाम्याह ।

टीका० — कपित्थतुलेत्यर्थशास्त्रप्रयोगाद् यस्यकस्यचित् पलशतं तुला । 'तुल उन्माने' । चुरादिणिचोऽनित्यत्वाद् इगुपधलक्षणः कः, ततष्टाबिति धातुप्रदीपः ॥

भारः स्याद् विंशतिस्तुलाः ॥ ८७ ॥

क्षीर० — भ्रियते भारः । पुंसां हि द्वे पलसहस्रे वोढुं शक्येते ॥

टीका० — विंशत्या तुलाभिर्भारः । भृञो घञ् । भरश्चात्र । 'भरोऽतिशयभारयोः' इति रुद्रः ॥

आचितो दश भाराः स्युः शाकटो भार आचितः ।

क्षीर० — आचीयते आचितः । स च शकटेन वोढुं शक्यः । अन्ये[1] तु विंशतिपलसहस्राण्याचितमाहुः । शकटभारस्ततोऽतिरिक्तोऽप्याचित एवेति । अत एव शाकटाख्योऽप्याचित इति पुनराचितग्रहणेन द्योत्यते ॥

टीका० — दश भारा आचितम् । रूपभेदात्[2] क्लीबम् । 'शकटभरोऽप्याचितः प्रोक्तः' इति रत्नकोषायाम् । अतो दीर्घादिः । 'आचितो दशभिर्भारैरि'ति पुंस्काण्डे अमरमाला । प्रसङ्गादनेकार्थतां चाचितस्याह — शकटस्य यो भारः शकटोन्मेयः सोऽप्याचितः, पुमान् ॥

कार्षापणः कार्षिकः स्यात्

क्षीर० — कर्षसंबन्धिना आपण्यते व्यवह्रियतेऽनेन रूप्यरूपकेण स कार्षापणः । कर्षः प्रमाणमस्य[3] कार्षिकः ॥

टीका० — सुवर्णताम्रादेः शास्त्रीयपञ्चकृष्णलो माषः । रजतस्य द्विकृष्णलः । तथाच मनुः —

"द्वे कृष्णले समधृते विज्ञेयो रूप्यमाषकः" ।

एवम्भूतषोडशमाषकैर्यो रजतकर्षः, तत्कृतो व्यवहारः कार्षिकः ताम्रकार्षापणः । कर्षस्यायं कार्षिकः । अध्यात्मादित्वाट्ठञ् ।

"स्यात् कार्षिकः पुराणः कार्षापणमुभयतो नृशण्डत्वम्"

इति वोपालितः । अतः पुराणो[4]ऽप्यस्य पर्यायः । आद्यव्यवहारे रजतकृष्णलाया

---

१. 'न्ये विं' घ. पाठः. २. 'दि' क. पाठः. ३. 'स्य स का' घ. पाठः. ४. 'णोऽस्य' क. पाठः.

दश गण्डका मूल्यं, द्वात्रिंशता च रजतकृष्णलाभी रजतकर्षः, मिलित्वा षोडशकपर्दकपणा एव मूल्यम् । अत्रैव च लोके उपचारात् पुराणकार्षापणयोः प्रयोगः ॥

कार्षिके ताम्रिके पणः ॥ ८८ ॥

क्षीर०—ताम्रमयं कर्षप्रमाणं रूप्यं पणः। तन्मूल्यं चोपचाराद् अशीतिः श्वेतकाः ॥

टीका०—पञ्चकृष्णलकारब्धताम्रकार्षिके पणः। साधितः प्राक् । आद्यव्यवहारेण हि पञ्चगुञ्जामाषसङ्ख्यया ताम्रपलस्याशीतिगण्डका मूल्यं, कर्षस्य च विंशतिगण्डकाः। अत्रैव च लोकैरुपचारात् पणशब्दः प्रयुज्यते । कार्षिकवत् ताम्रिकः ॥

अस्त्रियावाढकद्रोणौ खारी वाहो निकुञ्चकः ।
कुडुबः प्रस्थ इत्याद्याः परिमाणार्थकाः पृथक् ॥ ८९ ॥

क्षीर०—पृथगिति एषामपर्यायत्वम् । परिमाणविशेषा एते । यदाहुः—

"पलं प्रकुञ्चकं मुष्टिः कुडुबस्तच्चतुष्टयम् ।
चत्वारः कुडुबाः प्रस्थश्चतुष्प्रस्थमथाढकम् ॥
अष्टाढको भवेद् द्रोणो द्विद्रोणः शूर्प उच्यते ।
स च शूर्पो भवेत् खारी द्विशूर्पा गोण्युदाहृता ॥
तामेव भारं जानीयाद् वाहो भारचतुष्टयम् ।
शुष्कमेयेष्विदं मानं द्विगुणं तद् द्रवेषु तु ॥"

तत्तद्देशभेदात् सङ्ख्यान्यथात्वम् । तथाच क्वचिच्चतुराढको द्रोणः । षोडशद्रोणा खारी । विंशतिद्रोणः कुम्भः । दशकुम्भो वाहः ॥

टीका०—आढकादयः सप्त प्रत्येकं परिमाणार्थकाः । दशाङ्गुलं वा सर्वतोमानमाढकम् । अपचयविवक्षायामाढकी । चतुराढको द्रोणः । षोडशद्रोणा खारी । वाहो विंशतिखारीकः । खारीपादो मानी । मानीपादो द्रोणः । द्रोणपाद आढकः । आढकपादः प्रस्थः । प्रस्थपादः कुडवः । कुडवपादो निकुञ्चः । अयं

च प्रसृतं इति ख्यातः । इतिशब्देनाद्य(त्वे ? र्थे)न मानी । प्रवर्तिकादय आद्याः । पृथग् भेदेन परिमाणार्थवाचकाः द्रव्याणां लौहानां दारवाणां वाचकाः, न तु पर्याया इत्यर्थः । प्रवर्तिश्च खारीपञ्चकम् । तथाच गणिते —

"वाहो विंशतिखारीभिर्भरिका स्यादनेन तु ।
प्रवर्तिः पञ्चखारीभिः सस्यमानं प्रकीर्तितम् ॥
निकुञ्जं यावदाखार्याः पादं पादावशेषितम् ।
मानीद्रोणाढकप्रस्थकुडवेषु भवेदिति ॥"

ये तून्मानार्थाः कुडवादयः, पलचतुष्टयं कुडवः, कुडवैश्चतुर्भिः प्रस्थः, प्रस्थाश्चत्वार आढकः, चत्वार आढका द्रोणः, षोडश द्रोणाः खारी, विंशतिर्द्रोणाः कुम्भः, कुम्भैर्दशभिर्वाह इत्यादयः शास्त्रान्तरे परिभाषिताः, ते तुलामात्र एवान्तर्भूताः ॥

अंशस्तुरीयः पादः स्याद्

क्षीर० — रूपकादेश्चतुर्थोऽशः पादः । 'पदरुज —' (३. ३. १६) इति कर्तरि घञ् ॥

टीका० — तुरीयो भागश्चतुर्थोऽशः पादाख्यः । 'अंशस्तुरीयो भागः स्यादि'ति प्रमादपाठः । तथा च —

"पादा ब्रध्नाङ्घ्रितुर्यांशरश्मिप्रत्यन्तपर्वताः" ।

नहि तुर्यभागोंऽशशब्दे दृश्यते ॥

अंशभागौ तु वण्टकः ।

क्षीर० — अंशतेऽशः । भज्यते भागः । वण्यते विभज्यते वण्टकः ॥

टीका० — अंशत्रयं भागे । स्कन्धे अंश उक्तः । भजेर्घञ् । भागः । 'वटि विभाजने' । घञ् । वण्टः । स्वार्थे कन् ॥

द्रव्यं वित्तं स्वापतेयमृक्थं रिक्थं धनं वसु ॥ ९० ॥
हिरण्यं द्रविणं द्युम्नमर्थरैविभवा अपि ।

क्षीर० — 'द्रव्यं च भव्ये' (५. ३. १०४) इति साधुः । विन्दन्त्यनेन वित्तम् । 'वित्तो भोगप्रत्यययोः' (८. २. ५८) इति साधुः ।

---

१. 'तिरि' ग. पाठः. २. 'तु माना' ठ. पाठः. ३. 'न्त्येतद् वि' ख. पाठः.

स्वापतेयं, 'पथ्यतिथिवसतिस्वपतेर्ढञ्' (४. ४. १०४)। ऋच्यते स्तूयते ऋक्थम्। एवं रिक्थम्। दधन्ति धनम्। वस्ते छादयति वसु, वसतीश्वरगृहे वा। ह्रियते हिरण्यम्। द्रवति द्रविणम्। द्यूयते द्युम्नम्। 'द्यु अभिगमने'। अर्थ्यतेऽर्थः। रान्त्येनां राः। स्त्रीत्येके। विभवति विभवः॥

टीका० — द्रव्यत्रयोदशकं धने। 'द्रोश्च' (४. ३. १६१) इति यत्। द्रव्यम्। 'वित्तो भोगप्रत्यययोः' (८. २. ५८) इति निपातनाद् विदेर्लाभार्थादुत्तरस्य निष्ठातो नत्वाभावः। वित्तम्। स्वपतौ धनपतौ साधु स्वापतेयम्। पाथेयवड्ढञ्। स्वागतादित्वादैज्निषेधः। 'रिचिर् विरेचने'। 'पातॄतुदिवचिरिचिसिचिभ्यः क्थन्' (उ० २. ७)। रिक्थम्। 'ऋच स्तुतौ'। बाहुलकात् क्थन्। ऋक्थम्। बाहुलके नकि ऋक्नमिति गोवर्धनः। 'धन धान्ये'। अच्। धनम्। वसतेः स्वरुवद् उः। वसु। 'हर्य्य गतिकान्त्योः'। हर्य्यतेः क्यन् हिरणादेशश्च धातोः। हिरण्यम्। 'द्रुदक्षिभ्यामिनन्' (उ० २. ५३)। द्रविणम्। दिवि आम्नायत इति द्युम्नम्। 'म्ना अभ्यासे'। 'घञर्थे कविधानम्' (वा० ३. ३. ५८) इति कर्मणि क इति धातुप्रदीपः। अर्तेः कुष्ठवत् थन्। अर्थः। 'रातेर्डैः' (उ० २. ६९) इति डैः। (रै ? राः)। विभव उक्तः॥

स्यात् कोशश्च हिरण्यं च हेमरूप्ये कृताकृते॥ ९१॥

क्षीर० — कूयते शब्द्यते कोशः। कुष्यते आकृष्यते आयस्थानेभ्यः कोष इत्येके। हेम कृताकृतं घटितमघटितं च॥

टीका० — कृताकृतं हेमरूप्यं च मिलितं कोष(त्र ? द्व)यवाच्यं, न तु यथाक्रमं सम्बन्धः। तथाच भागुरिः —

"कोषमाहुर्हिरण्यं च हेमरूप्यं कृताकृतम्"

इति। तत्र पिण्डीकृतमाहरीकृतम् आदितं(?)कृतम्। आकरोत्थम्, अजातकर्मे चूर्णादिरूपमकृतम्। कोशस्तालव्यशो मूर्धन्यषश्चेत्युक्तं प्राक्। अनेकार्थोऽयम्॥

---

१. 'पि' क. ड. ठ. पाठः. २. 'हा' ङ., 'भरणीकृ' ङ. पाठः.

ताभ्यां यदन्यत् तत् कुप्यं

क्षीर०—हेमरूप्याभ्यामन्यत् ताम्रादि । गोपनीयं कुप्यम् । 'राजसूयसूर्यमृषोद्यरुच्यकुप्य—' (३. १. ११४) इति साधुः ॥

टीका०—ताभ्यां हेमरूप्याभ्यां यदन्यत् तैजसं द्रव्यं ताम्रकांस्यादि यच्चातैजसं राजपट्टदारुवि(षया? षा)दिकम् असारद्रव्यं, तत् सर्वं कुप्यम् । तथाहि—कुप्याध्यक्षप्रचारे लोहवर्गश्चर्मवर्गो विषादिवर्गश्च दर्शितः । 'कुप्यमसारं[1] द्रव्य'मिति तट्टीकाकृतश्च । 'राजसूयसूर्यमृषोद्यरुच्यकुप्यकृष्टपच्याव्यथ्याः' (३. १. ११४) इति गुपेः क्यप् आदिकत्वं च निपात्यते । कुप्यम् ॥

रूप्यं तद्द्वयमाहृतम् ।

क्षीर०—रूपमाहन्यते स्म रूप्यम् । 'रूपादाहतप्रशंसयोर्यप्' (५. २. १२०) । द्वयं कुंप्याकुप्यम्[3] ॥

टीका०—तद्द्वयमिति हेमरूप्यम्[4] आहतं च परापरपुरुषरूपमुत्थापयितुं निघातिकया[5] ताडितं दीनारादिकं रूप्यशब्दवाच्यम् । 'रूपादाहतप्रशंसयोर्यप्' (५. २. १२०) इति यप् ॥

गारुत्मतं मरतकमश्मगर्भो हरिन्मणिः ॥ ९२ ॥

क्षीर०—गरुत्मत इदं जातं विषं हन्तुं गारुत्मतम् । मरं * तकन्त्यनेन मरतकम्[6] । अश्मनो गर्भोऽश्मयोनिः । हरिन्नील[7]वर्णो मणिः ॥

टीका०—गारुत्मतचतुष्कं **मरतके** । गरुडप्रभवत्वाद्[8] गारुत्मतम् ॥

शोणरत्नं लोहितकः पद्मरागः

---

१. 'रं, कुद्र' ग. ङ. पाठः. २. 'तु टीका' क. पाठः. ३. 'रू' घ. ङ. पाठः. ४. 'प्यं प' ग. ठ. पाठः. ५. 'नि' ठ. पाठः. ६. 'कतम्' क. ग. घ. पाठः. ७. 'लो म' ख. पाठः. ८. 'भत्वा' क. ख. ङ. पाठः.

---

* 'तक सहने । हसन इति दुर्गः ।' इति क्षीरतरङ्गिणी ।

क्षीर० — शोणं च तद् रत्नं च । लोहित[1] एव लोहितकः[2] । लोहितान्मणौ' (५. ४. ३०)। कन् ॥

टीका० — शोणरत्नत्रयं पद्मरागे । लोहितो मणिर्लोहितकः । 'लोहितान्मणा' (५. ४. ३०) इति कन् ॥

अथ मौक्तिकम् ।

मुक्ता

क्षीर० — विनयादित्वात् स्वार्थे[3] वा ठक् ॥

टीका० — मौक्तिकद्वयं मुक्तायाम् । विनयादित्वात् स्वार्थे ठकि मौक्तिकम् ॥

अथ विद्रुमः पुंसि प्रवालं[4] पुन्नपुंसकम्[5] ॥ ९३ ॥

क्षीर० — विशिष्टो द्रुमो विद्रुमः, विद्रवत्यर्थान् । प्रवते प्रबलते वा(र्थे ? ध्वेः) ऊर्ध्वे प्रवालम्[6] ।

"सूर्यकान्तस्त्वग्निमणिर्वैदूर्यं वालवायजम्" ॥

टीका० — विद्रुमद्वयं प्रवाले ॥

रत्नं मणिर्द्वयोर्[8]श्मजातौ मुक्तादिकेऽपि च ।

क्षीर० — रमन्तेऽस्मिन् रत्नम् । मण्यते शब्द्यते मणिः । पुंस्त्रीलिङ्गः । अश्मजातीयं मरतकेन्द्र[7]नीलादि । आदिशब्दाद् विद्रुमादि वज्रपद्मरागादि वा पानीयभाण्डत्वात् ॥

टीका० — अश्मजातौ मरतकपद्मरागस्फटिकादौ मुक्तावज्रादौ च रत्नद्वयम् । 'रमेस्त च' (उ० ३. १४) इति तः नोऽन्तादेशश्च । रत्नम् ॥

स्वर्णं सुवर्णं कनकं हिरण्यं हेम हाटकम् ॥ ९४ ॥

---

१. 'तमेव', २. 'कम् । ', ३. 'र्थे ठ' ख. पाठः. ४. 'लः', ५. 'कः ॥', ६. 'लः ।' क. पाठः. ७. 'कतेन्द्र' क. ख. पाठः. ८. 'दि प' क. पाठः.

तपनीयं शातकुम्भं गाङ्गेयं भर्म कर्बुरम् ।
चामीकरं जातरूपं महारजतकाञ्चने ॥ ९७ ॥
रुक्मं कार्तस्वरं जाम्बूनदमष्टापदोऽस्त्रियाम् ।

क्षीर० — शोभनो वर्णोऽस्य स्वर्णम् । समासे वर्णस्य(वा)वलोपमाहुः । यथा पञ्चार्णो मन्त्रः । कनति कनकम् । 'कन दीप्तौ' । हिनोति हेम । हटति हाटकम् । 'हट दीप्तौ' । ण्वुल् । तप्यते तपनीयम् । शतकुम्भे गिरौ भवं शातकुम्भम् । शातकौम्भमित्येके । तत्पक्षे अनुशतिकादित्वादुभयपदवृद्धिः । गङ्गाया अपत्यं गाङ्गेयम् । भ्रियते भार्यते वा भर्म । कर्वति लोहमध्ये दृप्यति कर्बुरं नानारूपं वा । चमीकरकृतस्वरावाकरौ । भवेऽण् । जातरूपम् अकृतकरूपं कुङ्कुदेशजम् । महच्च तद् रजतं रञ्जकम् । कन्चति काञ्चनम् । 'काचि दीप्तौ' । रोचते रुक्मम् । जम्बूनदे जम्बूफलरसोत्थे[10] नदे[11] जातं जाम्बूनदम् । अष्टासु लोहेषु पदं प्रतिष्ठास्याष्टापदम् । 'अष्टनः संज्ञायाम्' (६. ३. १२५) दीर्घः । कल्याणम् अर्जुनं कलधौतं गैरिकं भूरिचन्द्रं वसु च ॥

टीका० — स्वर्णादय एकोनविंशतिः[12] **स्वर्णे** । सुष्ठु दीप्यत इति स्वर्णम् । 'ऋणु दीप्तौ' । पचाद्यच् । शोभनं वर्णमस्येति सुवर्णम् । 'कनी[13] दीप्तौ' । क्वुन् । कनकम् । हिरण्यमुक्तम् । 'हि गतौ' । मनिन् । हेम । 'हट दीप्तौ' । ण्वुल् । हाटकम् । तपनं दाहमर्हतीति तपनीयम् । 'अर्हे कृत्यतृचश्च' (३. ३. १६९) इत्यनीयर् । शतकुम्भपर्वते भवं शातकुम्भम् । गङ्गायामग्निना न्यस्तस्य माहेश्वरबीजस्य तत्त्वेन भूतत्वाद् गाङ्गेयम् । 'शुभ्रादिभ्यश्च' (४. १. १२३) इति ढक्[14] ।

"यं गर्भं सुषुवे गङ्गा पावकाद् दीप्ततेजसम् ।
त(दर्थं ? दुल्बं) पर्वते न्यस्तं हिरण्यं समपद्यत ॥"

---

१. 'म्भ', २. 'ते भ' ग. पाठः. ३. 'ते भ' क. ख. घ. ङ. पाठः. ४. 'ध्ये क' क. पाठः. ५. 'क' घ. ङ. पाठः. ६. 'द् रञ्ज' क. ग. घ. ङ. पाठः. ७. 'ग्म' ख. ग. घ. ङ. पाठः. ८. 'द्वीपे ज' ङ. पाठः. ९. 'दीर्जे ज' क. पाठः. १०. 'त्थ', ११. 'र्यां' क. ङ. पाठः. १२. 'ऊन' ज. पाठः. १३. 'नि' क., 'न' ज. पाठः. १४. 'क् । भ्रू' ठ. पाठः.

इति वायुपुराणे । भृज्जो मनिन् । भर्म । कर्बुरमुरूम् । जातं रूपमस्येति जातरूपम् । 'कचि दीप्तिबन्धनयोः' । कर्तरि ल्युट् । पृषोदरादिदीर्घत्वम् । काञ्चनम् । रोचतेः युग्मवद् मक् । रुक्मम् ।

"स्थगयन्त्यमूः शमितचातकार्तस्वरा
जलदास्तटित्तुलितकान्तकार्तस्वराः ।" (स० ४. श्लो० २४)

इति माघयमकात् कार्तस्वरं दन्त्यसम् । जम्बूरसनिःष्यन्दप्रसवा नदी जम्बूनदी, तत्र जातं जाम्बूनदम् । अष्टौ पदान्युत्पत्तिस्थानान्यस्येत्यष्टापदम् । 'अष्टनः संज्ञायाम्' (६. ३. १२५) इति दीर्घः ॥

अलङ्कारसुवर्णं यच्छृङ्गीकनकमित्यदः ॥ ९६ ॥

क्षीर० — शृङ्ग्यलङ्कारकारिका, तदर्थं कनकम् ॥

टीका० — कनककुण्डलादेरलङ्कारस्य सुवर्णं शृङ्गीकनकं, केवलश्च शृङ्गीशब्दः । तथाच 'भूषणकनकं शृङ्गी'ति नाममाला । ह्रस्वान्तोऽपि शृङ्गिशब्दः । तथाच बाणः—

"वर्षसमूहमिवान्तःस्थितापरिमाणशृङ्गिहेमकूटम्"

राजकुलमिति सम्बन्धः । अद इति, एतत् ॥

दुर्वर्णं रजतं रूप्यं खर्जूरं श्वेतमित्यपि ।

क्षीर० — दुर्वर्णं सुवर्णापेक्षया । रज्यते हेम्ना रजतम् । रूप्यति रूप्यम् । 'रुप लुप विमोहने' । खर्जति खर्जूरम् । 'खर्ज व्यथने' । इतिशब्दात् सितादि । अपिशब्दात् तारं कलधौतं च ॥

टीका० — दुर्वर्णपञ्चकं रूप्ये । स्वर्णापेक्षया निन्दितं वर्णमस्येति दुर्वर्णम् । 'पृषिरञ्जिभ्यां कित्' (उ० ३. १११) इत्यतच् । रजतम् । शब्दत्रयं व्युत्पादितम् ॥

रीतिः स्त्रियामारकूटो न स्त्रियाम्

क्षीर० — रीयते स्रवति रीतिः । इयर्त्यारः, तस्य कूटं पित्तलाख्यम् । आरोऽपि । कपिलोहं च ।

---

१. 'ग्म' क. ग. पाठः. २. 'दी, त' ङ. पाठः. ३. 'द्र', ४. 'र्त्यन्यत्तामारः' क. ग. पाठः. ५. 'रू' क. पाठः.

"ब्राह्मी पिङ्गा ब्रह्मरीतिः कांस्यं लोहो द्विलोहकम्" ॥

टीका० — रीतिद्वयं पित्तले । 'री गत्यादौ' । क्तिन् । रीतिः । रेफोपधापीत्यन्यः ॥

अथ ताम्रकम् ॥ ९७ ॥

शुल्बं म्लेच्छमुखं द्व्यष्टवरिष्ठोदुम्बराणि च ।

क्षीर० — ताम्यति ताम्रम् । संवति द्रवति शुल्वम् । म्लेच्छदेशो मुखमुत्पत्तिरस्य । द्वे हेमरूप्ये अश्नुते द्व्यष्टम् । अतिशयेन वरं वरिष्ठम् । कालिकानिवृत्तं स्वर्णं हि तत् । अत एवोदुम्बरम् । उद्भूताम्बरमिति नैरुक्ताः । औदुम्बरमित्येके । रक्तधौतकं च ।

"सौराष्ट्रकं पञ्चलोहे वर्तलोहे तु वर्तकम्" ॥

टीका० — ताम्रषट्कं ताम्रे । आम्रवत् ताम्रम् । 'शुच शोके' । 'उल्वादयश्च' (उ० ४.९६) इति वन्, लत्वं, गुणाभावः । शुल्वम् । म्लेच्छमुखं समुदितं नाम । वरिष्ठं टवर्गद्वितीयान्तम् । 'औदुम्बरं च ताम्रमि'ति नाममालायांपाठादौकारवदौदुम्बरम् ।

"उच्यते गैरिकं धातुस्ताम्रं शुल्वमुदुम्बरम्"

इति हलायुधः ॥

लोहोऽस्त्री शस्त्रकं तीक्ष्णं पिण्डं कालायसायसी ॥ ९८ ॥
अश्मसारः

क्षीर० — लुनाति लोहं, 'लुह कत्थनादौ' वा । शस्यतेऽनेन शस्त्रम् । 'शसु हिंसायाम्' । तेज्यते तेजयति वा तीक्ष्णम् । शस्त्रान्तरच्छेदकत्वात् । वैकृन्तकाख्यं तत् । 'तिज निशाने' । पिण्ड्यते पिण्डम् । कालं च तदयः कालायसम् । 'अनोऽश्मायः—'(५. ४. ९४) इति टः । अयते भेद्यमयः । अश्मनः सारोऽश्मसारः । यत् स्मृतिः — "अश्मभ्यो लोहमुत्थितम्" । पारशवं घनं च ॥

---

१. 'शु' ख. पाठः. २. 'वृं' ग. घ. ङ. पाठः. ३. 'न्ताख्यं' ख., 'तका' ग. घ. ङ. पाठः.

टीका० — लोहसप्तकं लोहे । रुहेर्वञि लत्वे च लोहोऽस्त्री । शस्त्रमुक्तम् । स्वार्थिकोऽत्र कन् । तीक्ष्णपिण्डशब्दावुक्तौ । कालं च तदयश्चेति कालायसम् । 'अनोऽश्मायस्सरसां जातिसंज्ञयोः' (९. ४. ९४) इति समासान्तष्टच् । इणः 'असुन्' (उ० ४. १९०) इत्यसुनि अयः । अश्मनः सारोऽश्मसारः । अमरमालायामश्मसारं क्लीबम् ॥

अथ मण्डूरं सिंहानमपि तन्मले ।

क्षीर० — मण्डते मण्डूरम् । हिनस्ति सिंहानम् । ध्मायमानस्यायसो मलम् ॥

टीका० — तन्मले लोहमले मण्डूरद्वयम् । खर्जूरवन्मण्डूरम् । 'शिघि आघ्राणे' । 'आनकच् शीङ्भियः' (उ० ३. ८२) इत्यनुवृत्तौ '(आ ?) शिङ्घिधाञ्भ्यश्च' (उ० ३. ८३) इत्यानकच् । शिङ्घाणकः । पृषोदरादित्वात् कलोपः ॥

सर्वं स्यात् तैजसं लोहं

क्षीर० — तेजसो विकारस्तैजसम् । हेमाद्यपि लोहम् । यदाहुः—

> **"सुवर्णं रजतं ताम्रं रीतिः कांस्यं तथा त्रपु ।**
> **सीसं च (च ? त) मरं चैव अष्टौ लोहानि चक्षते ॥"**

शस्त्रं तु विशेषाल्लोहम् ॥

टीका० — सर्वं च तैजसं सुवर्णरजतताम्रारकूटकांस्यरङ्गसीसकायोरूपमष्टविधं लोहाख्यम् । तेजोऽस्मिन् विद्यत इति तैजसम् । 'अण्प्रकरणे ज्योत्स्नादिभ्य उपसंख्यानम्' (वा० ५. २. १०३) इत्यण ॥

विकारस्त्वयसः कुशी ॥ ९९ ॥

क्षीर० — कुत्सितं श्यति कुशी फालः । यच्छाश्वतः— 'कुशो दर्भः कुशी फालः'। 'जानपदकुण्डगोण —' (४. १. ४२) इत्ययोविकारे[1] कुशाद् ङीष् ॥

१. 'रे ङी' ख. पाठः.

टीका० — फालात्मकेऽयोविकारे कुशी। (तया वन्द्यो विकारो!) 'जानपदकुण्डगोण —' (४. १. ४२) इत्यादिना ङीप्।

"कुशा वल्गा कुशी फालः कुशो दर्भः कुशं जलम्"

इति व्याडिः॥

क्षारः काचः

क्षीर० — क्षरति गलति क्षारः। कचति काचः॥

टीका० — काचाख्ये मृत्तिकाविशेषे क्षारद्वयम्। 'क्षर सञ्चलने' 'कच बन्धने'। घञ्॥

अथ चपलो रसः सूतश्च पारते।

क्षीर० — चपलोऽस्थैर्यात्। रस्यते रसायनार्थिभी रसः। सूते हेमायुषी सूतः, शिवात् प्रसूतो वा। पिपर्ति पारतं, पारं तनोति वा॥

टीका० — चपलचतुष्कं पारदे। शब्दत्रयं साधितम्।

"रसेन्द्रः पारदः प्रोक्तः पारतोऽपि निगद्यते"

इति तारपालः।

"पारतस्तु मनाक् पाण्डुः सूतस्तु स सितो मनाक्।
शीतः सर्वे तुल्यगुणाः स्मृताः"

इति शब्दार्णवः॥

गवलं माहिषं शृङ्गम्

क्षीर० — गा अलति वारयत्यनेन गवलं, गवते वा॥

टीका० — महिषशृङ्गे गवलः॥

अभ्रकं गिरिजामले॥ १००॥

क्षीर० — अभ्रप्रतिकृतिरभ्रकम्। गिरिजं च तदमलं च गिरिजामलम्। गौर्या मल इति धातुविदः॥

टीका० — अभ्रकत्रयम् अभ्रके[1]। गिरौ जातं गिरिजम् । अमलमुक्तम् ॥

स्रोतोऽञ्जनं तु सौवीरं कापोताञ्जनयामुने ।

क्षीर० — अज्यतेऽक्ष्यनेनाञ्जनं,[2] यमुनास्रोतसो जातम् । सुवीरदेशे भवं सौवीरम् । कपोतवर्णं कापोताञ्जनम् । यमुनास्रोतसो जातं यामुनम् । धन्वन्तरिस्तु —

"अञ्जनं मेचकं कृष्णं सौवीरं स्यात् सुवीरजम् ।
कापोतकं यामुनं च स्रोतोऽञ्जनमुदाहृतम्" ॥

टीका० — स्रोतोऽञ्जनचतुष्कं स्रोतोऽञ्जने । नदीस्रोतोभवत्वात् स्रोतोऽञ्जनं, रात्र्यन्धोपयुक्तम् । काञ्जिके सौवीरमुक्तम् । एतत् पार्वतेयम् । अल्पभेदत्वादभेदः । कपोताख्यमञ्जनं कपोताञ्जनम् । यमुनाभवं यामुनम् ॥

तुत्थाञ्जनं शिखिग्रीवावितुन्नकमयूरकम् ॥ १०१ ॥

कर्परी

क्षीर० — तुदत्याक्षिरोगांस्तुत्थम् । शिखिग्रीवं मयूरग्रीवाभम् । वितुदति रोगान् वितुन्नकम् । मयूरप्रतिकृतिर्मयूरकम् । कल्पते रोगान् जेतुं कर्परी ॥

दार्विकाक्वाथोद्भवं तुत्थरसाञ्जनम् ।

रसगर्भं तार्क्ष्यशैलं

दारुहरिद्राक्वाथोत्थं, तुत्थं च तद् रसाञ्जनम् । दार्वी[3]रसस्य गर्भो रसगर्भम् । तार्क्ष्यशैले कुलूतायां भवम् । रसजातं रसाग्र्यं च ॥

टीका० — तुत्थाञ्जनचतुष्कं पुपातुत्थाञ्जनमिति ख्याते । 'तुद व्यथने' ।

---

१. 'आभ्र इति ख्याते । गि' ज., 'आह इति ख्याते । गि' ङ. पाठः. २. 'त ईक्ष्यतेऽन' ख. ग. घ. ङ. पाठः. ३. 'वीकर' क. ङ. पाठः. ४. 'का' ख. पाठः.

'पातृतुदिवचि—' (उ० २. ७) इत्यादिना क्थः । तुत्थं तदञ्जनं चेति तुत्थाञ्जनम् । मयूरकण्ठाभत्वाच्छिखिग्रीवम् । तुदेः क्थादि । वितुन्नकम् । **तस्मिन् तुत्थे काथोद्भवे आवर्तिते कर्परीद्वयम् ।**

"तुत्थाञ्जनं काथोद्भवं कर्परीदार्विके स्त्रियौ"

इति रभसश्च । तुत्थ इति ख्याते तुत्थाञ्जनम् । नामद्वयमित्यन्यः । रसाञ्जनत्रयं **रसाञ्जने ॥**

गन्धाश्मनि तु गन्धिकः ॥ १०२ ॥

सौगन्धिक[3]श्च

क्षीर० — **गन्धोऽस्यास्तीति गन्धिको गन्धपाषाणः । रसगन्धी गन्धकोऽयम् । सौगन्धिकं च ॥**

टीका० — गन्धाश्मत्रयं गन्धके । मत्वर्थीयठनि गन्धिक इत्य(प ! पि) पाठः । तेन जयतीति ठकि सौगन्धिको ना ।

"गन्धको गन्धपाषाणः पामघ्नश्च सुगन्धकः"

इति माधवः ॥

चक्षुष्याकुलाल्यौ तु कुलस्थि[6]का ।

क्षीर० — **चक्षुषे हिता चक्षुष्या दृक्प्रसादाख्या । कुलमलति कुलाली । कुले तिष्ठति कुलस्था[7] कुलस्थप्रतिकृतिर्वा । लोकोक्तौ तार्क्ष्य-कुल्या[9] । आह च —**

"कुलाली लोचनहिता दृक्प्रसादा कुलत्थिका" ॥

टीका० — **कुलस्थाकारप्रस्तरेऽञ्जनविशेषे** चक्षुष्यात्रयम् । 'शरीराव-यवाद् यत्' (५. १. ६) इति यति चक्षुष्या । कुलालीत्यर्थग्रहणम् । तेन कुम्भ-कारीत्यपि ।

---

१. 'त्थाञ्जनोञ्ज' ज. पाठः. २. 'न्ध', क. पाठः. ३. 'कं च ग' ख. पाठः. ४. 'न्ध' क. पाठः. ५. 'न्धी च' क. ग. घ. ङ. पाठः. ६. 'त्थि' ङ. पाठः. ७. 'स्थि-का कु' ख. पाठः. ८. 'त्थ' क. ग. घ. ङ. पाठः. ९. 'क' ङ. पाठः.

"चक्षुष्या कुम्भकारी च कुलाली च कुलत्थिका"

इति रत्नमाला च ॥

रीतिपुष्पं पुष्पकं तत् पौष्पकं कुसुमाञ्जनम् ॥ १०३ ॥

क्षीर० — रीतेर्ध्मायमानस्य पुष्पाभं मलं रीतिपुष्पम् । पुष्पप्रतिकृतिः पुष्पकम् । पक्षे स्वार्थेऽण् ॥

टीका० — रीतिपुष्पचतुष्कं कुसुमाञ्जने । रीतिः पित्तलं, तस्याः पुष्पं रजः, मलमिति यावत् । तथाच योगशतकव्याख्याने सनातनः — 'रीतिकायां ध्माय्यमानायां यदुत्पद्यते मलं, तत् पुष्पाञ्जनमि'ति । पुष्पकमित्येव नाम ॥

पिञ्जरं पीतनं तालमालं च हरितालके ।

क्षीर० — 'पिजि हिंसादौ' । पीयते पीतनं, पीतं वर्णं नयाति वा । आलाति शोभामालम्, अलति भूषयति वा । हरेः पीतवर्णस्य तालं प्रतिष्ठास्मिन् हरितालं, हरितमलयति भूषयति वा । तालं च भीमवत् । यद् धन्वन्तरिः —

"हरितालं तु गोदन्तं पीतकं नटमण्डनम् ।
आलं च तालं जैरं च पिञ्जरं विस्रगन्धिकम् " ॥

टीका० — पिञ्जरपञ्चकं हरिताले ॥

गैरेयमर्थ्यं गिरिजमश्मजं च शिलाजतु ॥ १०४ ॥

क्षीर० — गिरेरिदं गैरेयम् । अर्थ्यते रसायनार्थिभिरर्थ्यम् । शिलातः स्रवज्जत्वाकृति शिलाजतु ॥

टीका० — गैरेयपञ्चकं शिलाजतुनि । एतच्च वानरैर्भक्षिते तद्विष्ठायामौत्तरापथिकैः प्राप्यते । 'इतश्चानिञः' (४. १. १२२) इति ढकि गैरेयम् । 'धर्मपथ्यर्थन्यायादनपेते' (४. ४. ९२) यकि अर्थ्यम् । पाषाणजातत्वादश्मजम् ॥

बोलो गन्धरसप्राणपिण्डगोपरसाः समाः ।

---

१. 'त' क. ग. पाठः.

क्षीर०—बोल्यते बोलः। 'बुल निमज्जने'। गन्धप्रधानो रसोऽस्य गन्धरसः। प्राणित्यनेन प्राणः। पिण्ड्यते द्रव्यान्तरैः। पिण्डसहत्वात्[1] पिण्ड इत्येके। गां पाति रसोऽस्य गोपरसः। गोपो रसो भीमवत्। गोशशशाः समा इत्येके। गां श्यति गोशः। शशते शशः॥

टीका०—बोलषट्कं गन्धरसे। प्राणपिण्डशशा उक्ताः। गोसो दन्त्यसः॥

डिण्डीरोऽब्धिकफः फेनः

क्षीर०—डिण्डीति शब्दमीरयति डिण्डीरः। दादिर्वा[2]। डिर्डा-डिमवत्। अब्धेः कफ इवाधिक्ये बहिःप्रसरादब्धिकफः सागरमलाख्यः। नद्यास्तूपचारात्। स्फायते फेनः॥

टीका०—हिण्डीरत्रयं समुद्रफेने। 'हिडि गत्यनादरयोः'। 'कॄगॄ-शॄ—' इत्यादिना बहुलवचनादीरनि हिण्डीर[3] इति गोवर्धनीयोणादिवृत्तिः। रूपरत्नाकरे तु 'खादे रः, इड्(भ्य?), हिण्डेरादेश्च डः' इति रप्रत्यये इटि डत्वे च डिण्डीरः। 'टिण्डीरपिण्डपरिमण्डिते'त्यादिप्रयोगो बृहत्कथायाम्। पैशाचिके हि टवर्गस्यैव टकारादेशो भवति॥

सिन्दूरं नागसम्भवम्॥ १०५॥

क्षीर०—सिनोति बध्नाति चेतः सिन्दूरं, (सिन्दय?स्यन्द)ते वा। नागात् सीसात् सम्भवोऽस्य नागसम्भवम्। चीनपिष्टं गन्धपङ्कोऽपि[4]। धन्वन्तरिस्तु—

"सिन्दूरं रक्तरेणुश्च नागरक्तं च नागजम्।
शृङ्गारभूषणं श्रीमद्वसन्तोत्पलमण्डनम्॥
हंसपादो हिङ्गुलके"॥

टीका०—सिन्दूरद्वयं सिन्दूरे। 'स्यन्देः संप्रसारणं च' (उ० १. ६८) इत्यूरन्। सिन्दूरं दन्त्यसम्॥

---

१. 'ण्डं संहतत्वा' ख. पाठः. २. 'र्व्या.डिः। दाडि' च. पाठः. ३. 'डि' ठ. पाठः. ४. 'गान्धारप' क. पाठः.

नागसीसकयोगेष्टवप्राणि

क्षीर० —न न गच्छति चलत्वान्नागम् । सिनोति बध्नाति पारतं सीसकं, सीसपत्रं च । हेम्नो वर्णोत्कर्षार्थं योगे श्लेषे इष्टं योगेष्टम् । उप्यते वप्रम् । हेम्नो वर्णोत्कर्षे बीजत्वात् ॥

त्रपु पिच्चटम् ।

रङ्गवङ्गे

त्रपत इवाग्नेराशुद्रुतेस्त्रपु । पिच्च्यते[1] कुट्यते पिच्चटम् । रज्यतेऽनेन रङ्गम् । वङ्गति द्रवति वङ्गम् । आलीनमपि ॥

टीका० — नागषट्कं **सीसके** ।

"श्रेष्ठे च कद्रुजे नागः क्लीबं सीसकरङ्गयोः"

इत्यनेकार्थः । सीसमेव सीसकं द्विदन्त्यसम् । योगेष्टमित्येकं नाम । 'वैद्रो[2] ना सीसपत्रकम्' इत्यमरमाला ।

"स्यादारकूटो रीतिश्च सीसकं त्रपु बन्धकम् ।
नागं महाबलश्चैव योगेष्टं वसुनेष्टकम् ॥"

इति व्याडिः ।

"सीसपत्रं बहुमलं योगेष्टं पिष्टपिच्चटे ।
..................रङ्गसीसकयोस्त्रपु ॥"

इति रुद्रः । वसुवत् त्रपु । 'पिच्च कुट्टने' । 'शकादिभ्योऽटन्' (उ० ३. ८२) इत्यटन् । पिच्चटम् । रङ्गद्वयं रङ्गे । 'रगिवगी गत्यर्थौ' । पचादी । त्रपुचतुष्टयमेव रङ्ग इत्यन्यः ॥

अथ पिचुस्तूलः

क्षीर० —पिच्यते सूत्रमस्मात् पिचुः, पियति[3] वा । 'पिचु गतौ' । तूल्यते फलात् तूलः । 'तूल निष्कर्षे' । निर्बीजकार्पासो[4]ऽयम् । 'रङ्गवङ्गेऽथ[5] पिचु(रि'ल इ)ति प्रगृह्यसंज्ञाविस्मृतेः पाठः ॥

---

१. 'ते विकु' ग. पाठः. २. 'पत्रोणी सी' क. पाठः. ३. 'पिचय' ख. पाठः. ४. 'बीज' ख. पाठः. ५. 'ङ्गे अथ' क. पाठः.

टीका० — पिचुद्वयं कार्पासादितूलके। 'पिचु मर्दने'। बाहुलक उः। तुः सौत्रः। 'शूलादयश्च' इति क्तः दीर्घत्वं च। तूलः। पिचुतूल इति संघातोऽपि॥

"तूलः पिचुः पिचुतूलस्तर्कटी सूत्रतर्ककः"

इति रभसः॥

अथ कमलोत्तरम्॥ १०६॥

स्यात् कुसुम्भं वह्निशिखं महारजनमित्यपि।

क्षीर० — कमलेभ्य उत्तरं वर्णाधिक्यात् कमलोत्तरम्। कुस्यति कुसुम्भम्। 'कुसु श्लेषणे', कौ सुम्भ्यते (निकुञ्च्यते ?) वा। कुसिः सौत्रः (?)। वह्नेरिव शिखास्य वह्निशिखम्। महच्च तद् रजनं, रज्यतेऽनेनेति रजनरजकरजस्सूपसंख्यानान्नलोपः॥

टीका० — कमलोत्तरचतुष्कं कुसुम्भे वस्त्ररञ्जनद्रव्ये। 'कुसि श्लेषणे'। 'कुसेरूलोम्भोमेदेताः कित्'। (उ० ४. १०८) इति उम्भः। कुसुम्भो दन्त्यसः। वह्नेरिव शिखास्येति वह्निशिखम्। 'रञ्जेः क्युन्' (उ० २. ८१) इति क्युन्। महारजनम्॥

मेषकम्बल ऊर्णायुः

क्षीर० — काम्यते शीतार्तैः। 'कम्बलः कमनीयो भवती'ति निरुक्तम्। ऊर्णास्त्यस्योर्णायुः। 'ऊर्णाया युस्' (५. २. १२३)॥

टीका० — मेषरोमरचिते कम्बले मेषकम्बलद्वयम्। 'ऊर्णाया युस्' (५. २. १२३)। ऊर्णायुर्दीर्घादिः॥

शशोर्णं शशलोमनि॥ १०७॥

क्षीर० — शशस्योर्णा शशोर्णम्। गृहस्थूणवत् क्लीबे॥

टीका० — शशस्योर्णा लोम शशोर्णं क्लीबं शशलोमनि॥

मधु क्षौद्रं माक्षिकादि

---

१. स्तुभ्यते' क. पाठः. २. 'युः॥ श' क. पाठः.

क्षीर० — मह्यतेऽभिलष्यते मधु पुष्परसाख्यम्। क्षुद्राभिर्मक्षिकाभिश्च कृतम्। 'क्षुद्राभ्रमर —' (४. ३. ११९) इत्यञ्। आदिशब्दात् पौत्तिकभ्रामरादि। अगणितोऽवान्तरभेदो गजनिमीलिकयैव। यन्निमिः —

"माक्षिकं तैलवर्णं स्याद् घृतवर्णं तु पौत्तिकम्।
विज्ञेयं भ्रामरं श्वेतं क्षौद्रं तु कपिलं मतम्" ॥

टीका० — मधुशब्देन क्षौद्रमुच्यते माक्षिकादि च। आदिना भ्रामरवाटरपौत्तिकादि। क्षुद्राभिः कृतं क्षौद्रम्। 'क्षुद्राभ्रमरवटरपादपादञ्' (४. ३. ११९) इत्यञ्। मक्षिकया कृतं माक्षिकम्। एवं सारघम्। 'संज्ञायाम्' (४. ३. ११७) इत्यण् ॥

मधूच्छिष्टं तु सिक्थकम्।

क्षीर० — मधुना उच्छिष्यते त्यज्यते मधूच्छिष्टम्। सिञ्चति सिक्थकम् ॥

टीका० — मधूच्छिष्टद्वयं सिक्थ इति ख्याते। 'षिच क्षरणे'। पानृतुदिवचिरिचिसिचिभ्यः क्थन् (उ० २. ७)। ततः स्वार्थे कः ॥

मनश्शिला मनोगुप्ता मनोह्वा नागजिह्विका ॥ १०८ ॥

क्षीर० — मनोवाच्या[1] शिला। मनश्शब्देन ह्वयते मनोह्वा। नागजिह्वाप्रतिकृतिर्नागजिह्विका। शिला च ॥

टीका० — मनश्शिलाचतुष्टयं मनश्शिलायाम् ॥

नैपाली कुनटी गोला

क्षीर० — नेपालदेशे भवा मनश्शिला नैपाली द्विसंज्ञा। अभेदान्नेपाली[3] वा। कौ नटति कुनटी। गाः लाति गोला, गुडति वा। सप्तैकार्था इत्येके ॥

१. 'द्य' ख पाठः. २. 'च्या। म' क. ग. घ. ङ. पाठः. ३. 'ली। कौ' क. ग. घ. ङ. पाठः.

टीका० — नेपालदेशजा कुनटी मनश्शिला गोलाख्या। सप्तकमेव मनश्शिलायामित्यन्यः। तथाच श्लोकार्धपर्याये माधवः —

"मनश्शिला मनोज्ञा च नैपाली कुनटी शिला"

इति॥

यवक्षारो यवाग्रजः।

पाक्यः

क्षीर० — दग्ध्वा यवाङ्कुराज्जन्यते यवक्षारः। पचनीयः पाक्यः॥

टीका० — यवक्षारत्रयं यवक्षारे। पचेर्ण्यति पाक्यः॥

अथ सर्जिकाक्षारः कापोतः सुखबन्धकः॥१०९॥

सौवर्चलं स्याद् रुचकं

क्षीर० — रुच्यते दीप्यते जाठरोऽग्निरनेन रुचकम्। क्षारप्रसङ्गात् पुनरुक्तम्। एवं ग्रन्थिकप(त[1]श्रा)ङ्गादि॥

टीका० — सर्जिकाक्षारपञ्चकं सर्जिकाक्षारे। लवणप्रस्तावे तु अत्रैव सौवर्चलनामोक्तम्। सत्रयं दन्त्यम्॥

"कापोतः सर्जिका सार्जिः क्षुद्रिका च सुवर्चिका।
रुचकं कृष्णलवणमक्षं सौवर्चलं च तद्॥"

इति श्लोकपर्याये माधवः॥

त्वक्क्षीरा वंशरोचना।

क्षीर० — त्वचो वंशात् क्षीरमस्यास्त्वक्क्षीरा त्वक्क्षीरी च। वंशोत्था रोचना वंशरोचना। आह च —

"स्याद् वंशरोचना वांशी तुकाक्षीरी तुका शुभा।
त्वक्क्षीरी वंशजा शुभ्रा वंशक्षीरी च वैणवी"॥

टीका० — त्वक्क्षीराद्वयं[2] वंशरोचनायाम्। एतयोर्भेदे[3]ऽप्येकत्वमुक्तम्॥

---

१. 'ति मा', २. 'यं रो', ३. 'दे एकत्वम्॥' ख. पाठः.

शिग्रु च श्वेतमरिचं

क्षीर० — शिनोति तैक्ष्ण्याच्छिग्रु । सौभाञ्जनबीजम् ॥[1]

टीका० — शोभाञ्जनबीजे शिग्रुजद्वयम् ॥

मोरटं मूलमैक्षवम् ॥ ११० ॥

क्षीर० — मुरति मोरटम् । 'मुर संवेष्टने' ॥

टीका० — इक्षुमूले मोरटम् । 'मुर खण्डने' । 'शकादिभ्योऽटन्' (उ० ४. ८२) ॥

ग्रन्थिकं पिप्पलीमूलं चटकाशिर इत्यपि ।

क्षीर० — ग्रन्थिप्रतिकृति ग्रन्थिकम् । चटकाशिरोरूपत्वाच्चटकाशिरः ॥

टीका० — ग्रन्थिकचतुष्कं पिप्पलीमूले ।

"शिरो ना पिप्पलीमूले स्याद्धमन्यां च योषिति "

इति रभसः ॥

गोलोमी भूतकेशो ना

क्षीर० — गोरिव लोमान्यस्या गोलोमी । भूताः केशा अस्य भूतकेशः, भूतस्येव केशा अस्य वा । ना पुमान् ॥

टीका० — भूतकेशा इति ख्याते तृणे गोलोमीद्वयम् । गोलोमी ङयन्ता ॥

पत्राङ्गं रक्तचन्दनम् ॥ १११ ॥

क्षीर० — पत्राण्यङ्के पत्राङ्गम् ॥

---

१. 'स्तु' ख. पाठः. २. 'मुद्र' च. ज. पाठः. ३. ४. ५. 'टि' क. पाठः.

टीका० — **पत्राङ्गेति** ख्याते रक्तसारे रक्तचन्दनसदृशे पत्राङ्गद्वयम् ॥

त्रिकटु त्र्यूषणं व्योषं

क्षीर० — त्रीणि कटून्यूषणानि च शुण्ठीमरिचपिप्पल्याख्यानि समाहृतानि । विशेषेणौषति दहति व्योषम् । कटुत्रिकं च ॥

टीका० — त्रिकटुत्रयं **त्रिकटौ** ।

"त्र्युषणं त्रिकटु व्योषं रुचकः सौवर्चलः पुंसि"

इति रत्नकोशार्यापाठाद्धस्वादि त्र्युषणम् । 'अयस्तिलत्र्यूषणकोलभोगै'[1]रित्यादौ तु योगशतके दीर्घादिः । 'उष दाहे' । विपूर्वः । व्योषम् ॥

त्रिफला तु फलत्रिकम् ॥ १११½ ॥

क्षीर० — त्रयाणां फलानां हरीतक्यामलकविभीतकानां समाहारस्त्रिफला । अजादित्वाट्टाप् । वरा च ॥

इति वैश्यवर्गः ।

टीका० — हरीतकीविभीतक्यामलकानि फलत्रयं त्रिफला । अजादित्वाट्टाप् । 'तृफ तृम्फ तृप्तौ'[2] । 'कलप् तृफश्च' (उ० १. १०९) इति कलप्प्रत्ययेन तृफलेत्यपि । 'त्रिफला तृफलापि चे'ति त्रिकाण्डशेषश्च । आहिताग्न्यादेराकृतिगणत्वात् परनिपातविकल्पे फलत्रिकम् ॥

इति वन्द्यघटीयश्रीसर्वानन्दकृतौ टीकासर्वस्वे

वैश्यवर्गः ।

---

१. 'दिना तु' ङ. ज. पाठः. २. 'प्तौ तृ' ङ. ज. ठ. पाठः.

अथ शूद्रवर्गः ।

शूद्राश्चावरवर्णाश्च वृषलाश्च जघन्यजाः ।

क्षीर० — शु पूजितं कृत्वा उन्दन्ति सुरान् क्लेदयन्ति शूद्राः, शीयन्ते वा । वृषं लुनन्ति वृषलाः । नारदस्तु —

"वृषो हि भगवान् धर्मस्तस्य यः कुरुते लयम् ।
वृषलं तं विजानीयात्" ॥

जघन्याज्जाता जघन्यजाः । यच्छ्रुतिः— 'पद्भ्यां शूद्रो अजायत' । पज्जाः पद्याश्च ॥

टीका० — शूद्रचतुष्कं शूद्रे । 'शुच शोके' । 'शुचेर्दश्च' (उ० २. २१) इति रक्, दश्चान्तादेशः, उपधादीर्घत्वं च । शूद्रः । अवरवर्णः अधमवर्णः । 'वृषु सेचने' । 'वृषादिभ्यः कलच्' (उ० १. १११) । वृषलः । वृषं धर्मं लुनातीति वा सः । ब्रह्मणो जघन्याङ्गे पादे जाता जघन्यजाः ॥

आ चण्डालात् तु सङ्कीर्णा अम्बष्ठकरणादयः ॥ १ ॥

क्षीर० — चण्डालो ब्राह्मण्यां शूद्राज्जातोऽत्र । संकीर्णाः प्रतिलोमानुलोमजत्वान्मिश्राः । यत् स्मृतिः —

"विप्रान्मूर्धावसिक्तस्तु क्षत्रियायां विशः स्त्रियाम् ।
जातोऽम्बष्ठस्तु शूद्रायां निषादः पार्शवोऽपि च ॥
माहिष्योग्रौ प्रजायेते विट्च्छूद्राङ्गनयोर्नृपात् ।
शूद्रायां करणो वैश्याद् विना त्वेष विधिः स्मृतः ॥
ब्राह्मण्यां क्षत्रियात् सूतो वैश्याद् वैदेहकः स्मृतः ।
शूद्राज्जातस्तु चण्डालः सर्वधर्मबहिष्कृतः ॥

---

१. 'परिकीर्तितः । मा', २. 'करणात्' क. पाठः.

क्षत्रिया मागधं वैश्याच्छूद्रात् क्षत्तारमेव च ।
शूद्रादायोगवं वैश्या जनयामास वै सुतम् ॥
माहिष्येण करण्यां तु रथकारः प्रजायते ।
असत्सन्तस्तु विज्ञेयाः प्रतिलोमानुलोमजाः ॥"

टीका० — चण्डालं वक्ष्यति । तं व्याप्य वक्ष्यमाणाः करणादयः संकीर्णाः शूद्रजातयः ॥

क्षीर० — तदाह —

शूद्राविशोस्तु करणः

सिंहावलोकितेन सुत इत्येव । शूद्रायां वैश्याज्जातः । करोति प्रेष्यकर्माणि करणः । ल्युट् । एवं सर्वत्राध्याहार्यानुषङ्गादि ॥

टीका० — 'शूद्राविशोरि'त्यादिभिः षष्ठयन्तैः प्रत्येकं सुत इति वक्ष्यमाणः सम्बध्यते । शूद्रायां वैश्याज्जातः सुतः करणो लिपिलेखनवृत्तिः ॥

अम्बष्ठो वैश्याद्विजन्मनोः ।

क्षीर० — अम्बायां तिष्ठत्यम्बष्ठः । 'अम्बाम्बगोभूमि —' (८. ३. ९७) इति षत्वम् । ह्रस्वो निर्देशात् । द्विजन्मात्र विप्रः । वैश्येति । 'यञश्च' (४. १. १६) इति ङीब् नास्ति, लक्ष्यात् ॥

टीका० — वैश्यायां ब्राह्मणाज्जातोऽम्बष्ठश्चिकित्सावृत्तिः ॥

शूद्राक्षत्रिययोरुग्रः

क्षीर० — 'शूद्रा चामहत्पूर्वा —' (वा० ४. १. ४) इत्यजादित्वाट्टाप् । उचत्युग्रः । 'उच समवाये' ॥

टीका० — शूद्रायां क्षत्रियाज्जात उग्रः ॥

मागधः क्षत्रियाविशोः ॥ २ ॥

क्षीर० — मगध्यति स्तौति मागधः ॥

टीका० — क्षत्रियायां वैश्याज्जातो मागधः स्तुतिक्रियावृत्तिः ॥

माहिष्योऽर्याक्षत्रिययोः

क्षीर० — महिष्यां साधुर्माहिष्यः। स ह्यन्तःपुररक्षितेति स्मार्ताः। अर्येति वैश्या ॥

टीका० — वैश्यायां क्षत्रियाज्जातो माहिष्यः ॥

क्षत्तार्याशूद्रयोः सुतः।

क्षीर० — क्षदति द्वाःस्थत्वात् क्षत्ता। 'तृंस्तृचौ शंसिक्षदादिभ्यः—' (उ० २. ९४) इत्यनिट्। क्ष(त्त[1]दाति)स्त्वौणादिकपाठात् ॥

टीका० — शूद्रात् क्षत्रियायां जातः क्षत्ता। अर्या स्वामिनी। सा चेह क्षत्रियेति बोद्धव्यम्। क्षत्रियस्यैव क्षितिस्वामित्वं, सामान्यशब्दस्यार्थाद् विशेषोऽवगम्यते। यथा 'अञ्जलिना सूर्यमुपतिष्ठेत' 'अञ्जलिना पयः पिबती'त्यादावर्थानुरोधात् पाणिसन्निवेशविशेषः प्रतीयते, तथा।

"क्षत्ता शूद्रात् क्षत्रियाजे सारथिप्रतिहारयोः" ॥

ब्राह्मण्यां क्षत्रियात् सूतः

क्षीर० — सुवति प्रेरयत्यश्वान् सूतः ॥

टीका० — ब्राह्मण्यां क्षत्रियाज्जातः सूतः। हेतौ पञ्चमी।

"सूतः स्यात् क्षत्रियासूनुः शूद्राज्जातोऽथ वर्धकिः"

इति त्वमरमाला ॥

तस्यां वैदेहको विशः ॥ ३ ॥

क्षीर० — ब्राह्मण्यां वैश्याज्जातो वैदेहको वणिक्कर्मा ॥

टीका० — ब्राह्मण्यां वैश्याज्जातो वैदेहकः।

"वैदेहकं तु शूद्राज्जातं वैश्यासुतं ब्रुवते"

इति नाममाला ॥

---

१. 'था शूद्रः। क्ष' ङ. पाठः.

रथकारस्तु माहिष्यात् करण्यां यस्य सम्भवः ।

क्षीर० — माहिष्याद् वैश्याक्षत्रिययोर्जातात् करण्यां शूद्रावैश्यजातायां जातो रथकारस्तक्षा ॥

टीका० — करण्यां माहिष्याज्जातो रथकारः ॥

स्याच्चण्डालस्तु जनितो ब्राह्मण्यां वृषलेन यः ॥ ४ ॥

क्षीर० — चण्डमुग्रं कर्मालति पर्याप्नोति चण्डालः ॥

टीका० — ब्राह्मण्यां शूद्रसुतश्चण्डालः । 'चडि कोपे' । 'पतिचण्डिभ्यामालञ्' (उ० १. १२२) । चण्डालः । चण्डालात् पूर्वं सर्वत्र पाणिग्रहणपूर्वकमिति योज्यम् । पाणिग्रहणव्यतिरेकेणापि प्रमादतो जातः करणादिरेव । गर्हितः स इति परं विशेषः ॥

कारुः शिल्पी

क्षीर० — करोति कारुः ॥

टीका० — कारुद्वयं **शिल्पिनि** । करोतेः 'कृवापा —' (उ० १. १) इत्यादिना उण् । कारुः ॥

संहतैस्तैर्द्वयोः श्रेणिः सजातिभिः ।

क्षीर० — समानजातीयकारुसङ्घः श्रीयत इति श्रेणिः स्त्रीपुंलिङ्गः ॥

टीका० — सजातीयानां शिल्पिनां सङ्घातः श्रेणिः पङ्क्तौ व्युत्पादिता ॥

कुलकः स्यात् कुलश्रेष्ठी

क्षीर० — कुलं का(र?)यतीति कुलकः । कुलिक इत्येके । श्रेण्यादौ श्रेष्ठार्थः । कुले वणिग्वृन्दे श्रेष्ठत्वमस्त्यस्य कुलश्रेष्ठी ॥

टीका० — शिल्पिनां कुलेषु प्रधाने कुलिकद्वयम् । 'अत इनिठनौ' (५. २. ११५) इति ठनि कुलिकः । कुलश्रेष्ठी नान्तः । 'कुलश्रेष्ठी चे'ति त्रिकाण्डशेषः । कुलयोगादर्शआद्यचि कुलोऽपीत्यन्यः[1] ॥

---

१. 'लः' ठ. पाठः.

मालाकारस्तु मालिकः ॥ ५ ॥

क्षीर० — 'तदस्य पण्यम्' (४. ४. ५१) इति ठक् ॥

टीका० — मालाकारद्वयं मालाकारे । कर्मण्यणि मालाकारः । मालानिर्माणं शिल्पमस्येति मालिकः । 'शिल्पम्' (४. ४. ५५) इति ठक् ॥

कुम्भकारः कुलालः स्यात्

क्षीर० — कुलानि गृहाण्यलति कुलालः, कुं भूर्दं लालयति मृद्गाति वा ॥

टीका० — कुम्भकारद्वयं कुम्भकारे । मालाकारवत् कुम्भकारः । कुं लालयतीति कुलालः ॥

पलगण्डस्तु लेपकः ।

क्षीर० — पलेन मांसेनेव मृदादिना गण्ड(ते[1]ति) सचते पलगण्डो लेप्यकृत् ॥

टीका० — पलगण्डद्वय लेप्यकरे । लिपेर्ण्वुलि लेपकः ॥

तन्तुवायः कुविन्दः स्यात्

क्षीर० — तन्तून् वयति तन्तुवाय[2]ः । 'ह्वावामश्च' (३. २. २) इत्यण् । कुं विन्दति कुविन्दः ॥

टीका० — तन्तुवायद्वयं तन्तुवाये । वेञो 'ह्वावामश्च' (३. २. २) इत्यण् । तन्तुवायः । डुवपेः तन्तुवाप[3]शब्दोऽप्यत्र । 'कुपेर्वश्च' (उ० ४. ८६) इति किन्दच् वश्चादेशः । कुविन्दः ॥

तुन्नवायस्तु सौचिकः ॥ ६ ॥

क्षीर० — तुन्नं विद्धं वयति तुन्नवायः । सूच्यादि शिल्पमस्य सौचिकः ॥

---

१. 'इ' ग. घ. ङ. पाठः. २. 'यः । कुं' क. पाठः. ३. 'पोऽपि । कु' ठ. पाठः.

टीका० — तुन्नवायद्वयं सूचिकर्मोपजीविनि। तुन्नं त्रुटितं वयतीति तुन्नवायः। मालिकवत् सौचिकः। दन्त्यादिः॥

रङ्गाजीवश्चित्रकरः

क्षीर० — रङ्गाणि रक्तपीतादीन्याजीवति रङ्गाजीवः। चित्रं करोति 'दिवाविभा—' (३. २. २१) इति टः॥

टीका० — रङ्गाजीवद्वयं **चित्रकरे**। रज्यते शुक्लं रक्ततामापद्यतेऽस्मिन्निति रङ्गो हरितालमनःशिलादिः, तमाजीवतीति रङ्गाजीवः। दिवाकरवच्चित्रकरः॥

शस्त्रमार्जोऽसिधावकः।

क्षीर० — शस्त्रं मार्ष्टि तेजयति शस्त्रमार्जः। असिं धावयति शोधयति असिधावकः॥

टीका० — शस्त्रमार्जद्वयम् **असिधावके**[2]। शस्त्रं मार्ष्टि शोधयतीति शस्त्रमार्जः। अणन्तात् स्वार्थे कनि असिधावकः॥

पादूकृच्चर्मकारः[6] स्यात्

क्षीर० — पादूः[3] पादत्राणानि करोति[4] पादूकृत्। पादकृदित्येके॥

टीका० — पादुकृद्द्वयं **चर्मकारे**[7]। पादूमुपानहं करोतीति क्विप्। 'इको ह्रस्वोऽङ्यो गालवस्य' (६. ३. ६१) इति ह्रस्वः। पादुकृत्। चर्म करोति विकारतामापादयतीति अणि चर्मकारः॥

व्योकारो लोहकारकः॥ ७॥

क्षीर० — विशेषेणोकं समवायमियर्ति व्योकारः। 'व्यो इत्ययः[6]-पर्याय' इति श्रीभोजः॥

टीका० — व्योकारद्वयं **लोहकारे**[5]।

---

१. 'वः। शु' क. ग. पाठः. २. 'सिआर इति ख्याते। श' ज. पाठः. ३. 'दूं कृणाति' क. पाठः. ४. 'ति वा पा' क. ग. पाठः. ५. 'पदूकृ' ख. पाठः. ६. 'लेवमयः' क. पाठः. ७. 'कर्मका' ज. पाठः.

"व्योकारोऽयस्कारः क(र्मका?र्मा)रो लोहकारः स्याद्"

इति रत्नकोशः। अन्ये तु आकरोत्थं लोहं ध्मात्वा यो लोहं संस्करोति स लोहकारो व्योकारश्च। कोशलादावनेनैव नाम्ना प्रसिद्धः। व्यो इति लोहबीजस्य प्रसिद्धिः। तथाच हर्षचरिते आकरोत्थलोहसंस्कारिणि विन्ध्याटवीवर्णनायाम् 'ऊष्माणं क्वचिदन्यत्र ग्राहयन्तमिवाङ्गारीयदारुसङ्घादिह व्योकारैः' इति प्रयोगः। यस्तु संस्कृतं लोहं खड्गनाराचादिविकारमापादयति, स कर्मकारः। एतच्च क्रियाभेदमात्रम्। जातिरेकैव ॥

नाडिन्धमः स्वर्णकारः कलादो रुक्मकारके।

क्षीर० — नाडिं धमति नाडिन्धमः। 'नाडीमुष्ट्योश्च'[2] (३. २. ३०) इति खश्[3]। कला आदत्ते कलादः। कलं सुवर्णकालिकाम् आघ्रात्याखण्डयति वा। अत एव कलं धौतं यत्रेति कलधौतं रुक्मम्। हेममुष्टिकोऽपि॥

टीका० — नाडिन्धमचतुष्कं स्वर्णकारे। नाडी नलीति[4] ख्याता, तां मुखवायुना धमति शब्दयतीति 'नाडीमुष्ट्योश्च'। (३. २. ३०) इति खश्। नाडिन्धमः। कलां स्वर्णशिल्पमात्तवान् स्वीकृतवानिति[5] कलादः। मूलविभुजादेराकृतिगणत्वात् कः ॥

स्याच्छाङ्खिकः काम्बविकः

क्षीर० — कम्बुघटनं शिल्पमस्य काम्बविकः ॥

टीका० — शाङ्खिकद्वयं शाङ्खिके। 'तदस्य पण्यम्' (४. ४. ५१) इति ठक्। शाङ्खिकः। काम्बविके तु ओरन्तात् पूर्ववट्ठक्। अन्यथा 'इसुसुक्तान्तात् कः' (७. ३. ५१) इति कः स्यात् ॥

शौल्बिकस्ताम्रकुट्टकः ॥ ८ ॥

क्षीर० — शुल्बं ताम्रम्। कुट्टयति[7] छोदयति शौल्बिकः। मणिकारो वैकटिकः ॥

---

१. 'शश्च। अ' क. ख. ग. घ. ठ. पाठः. २. 'णि' ख. पाठः. ३. 'ति। अ' क. ग. ख. ङ. पाठः ४. नाली। तां, ५. 'निति' ट., 'न् हीत' क. पाठः. ६. 'कः॥ शौ' क. ग. पाठः ७. 'ति। म' ख. पाठः ८ 'तनिकः' ग. पाठः.

टीका० — शौल्विकद्वयं कांस्यकारे। शुल्बं ताम्रं, तत्कुट्टनं शिल्पमस्येति शौल्बिकः। ताम्रं कुट्टयतिच्छेदयतीत्यणि ताम्रकुट्टकः॥

तक्षा तु वर्धकिस्त्वष्टा रथकारश्च काष्ठतट्।

क्षीर० — तक्ष्णोति तक्षा। वर्धयतीति वर्धकिः। 'वर्ध छेदने'। त्वक्षति तनूकरोति दारूणि त्वष्टा। काष्ठं तक्ष्णोति काष्ठतट्। स्थपतिश्च॥

टीका० — तक्षपञ्चकं वर्धकौ। 'तक्षू त्वक्षू तनूकरणे'। कनिन्। तक्षा। त्वक्षेरेव तृच्। 'स्कोः —' (८. २. २९) इत्यादिना कलोपः। त्वष्टा। काष्ठं तक्षतीति[2] क्विपि काष्ठतट्॥

ग्रामाधीनो ग्रामतक्षः

क्षीर० — ग्रामस्यायत्त[3]स्तक्षा ग्रामतक्षः। 'ग्रामकौटाभ्यां च तक्ष्णः'। (५. ४. ९५) इति टच्॥

टीका० — ग्रामवर्धकौ ग्रामाधीनद्वयम्। 'ग्रामकौटाभ्यां च तक्ष्णः' (५. ४. ९५) इति समासान्ताचि ग्रामतक्षः॥

कौटतक्षोऽनधीनकः॥ ९॥

क्षीर० — कुट्यां भवः कौटः स्वतन्त्रः। नास्ति अधि उपरि इनः स्वाम्यस्यानधीनकः॥

टीका० — यस्तु स्वकर्माजीवी ग्राम एव व्यवस्थितः, तत्र कौटतक्षद्वयम्। कुट्यां भवः स्थितः कौटः। ततः कर्मधारयः। पूर्ववत् समासान्तः॥

क्षुरिमुण्डिदिवाकीर्तिनापितान्तावसायिनः।

क्षीर० — क्षुरमस्त्यस्य[4] क्षुरी। मुण्डयति[5] मुण्डी। दिवा कीर्त्यते दिवाकीर्तिः। रात्रौ क्षुरकर्मनिषेधात्। नाप्यते नापितः। नञ् प्रकृत्या। अन्तम् अवस्यत्यन्तावसायी। चण्डालकोऽपि। 'संवाहकोऽङ्गमर्दः स्यात्'॥

टीका० — क्षुरिपञ्चकं नापिते। मुण्डवान् मुण्डी। दिवा दिवसे कीर्ति-

१. 'ट्। ग्रा', २. 'ति क्वा', ३. 'यं तक्षा', ४. 'स्य। मु', ५. 'ति। दि' क. पाठः.

र्व्यापारोऽस्येति दिवाकीर्तिः । 'नञ्याप्नोतेरिट् च' (उ० ३. ८७) इति तन् इडागमश्च । नापितः । अन्तावसायी णिन्यन्तः ॥

निर्णेजकः स्याद् रजकः

क्षीर० — निर्णेनेक्ति¹ क्षालयति निर्णेजकः² । रञ्जयति रजकः । 'शिल्पिनि ष्वुन्'³ (३. १. १४५) । रजनरजकरजस्सूपसंख्यानान्नलोपः। क्वचिद् य एव धावकः स एव रजकः । स्मार्ते तु भिन्नावेतौ ॥

टीका० — निर्णेजकद्वयं रजके । 'णिजिर शौचे' । ण्वुल । 'उपसर्गादसमासेऽपि णोपदेशस्य' (८. ४. १४) इति णत्वम् । निर्णेजकः । रजक इत्यत्र 'शिल्पिनि ष्वुन्' (३. १. १४५) ॥

शौण्डिको मण्डहारकः ॥ १० ॥

क्षीर० — शुण्डा पानमदस्थानं सुरा वा पण्यमस्य शौण्डिकः । मण्डमच्छसुरां हरति मण्डहारकः । सुराजीवी कल्यपालाख्यः ॥

टीका० — शौण्डिकद्वयं शौण्डिके । शुण्डा पानस्थानम् । तात्स्थ्यात् सुरापि शुण्डा । 'तदस्य पण्यम्' (४. ४. ५१) इति ठकि शौण्डिकः । तालव्यादिः । अन्नसंबद्धं मण्डमग्रं हरति उद्धरतीति मण्डहारः ॥

जाबालः स्यादजाजीवः⁴

क्षीर० — जवमलति जवालश्छागः, तस्यायं जाबालः । अजापालापभ्रंशोऽयम् ॥

टीका० — जाबालद्वयं छागीवाले । अजां पालयतीति पृषोदरादित्वादकारलोपो बत्वं च । जाबालः । 'अजाबालमजाजीवमि'⁵ति रत्नमाला ॥

देवाजीवस्तु देवलः ।

क्षीर० — देवान् लाति देवलः ॥

टीका० — भोजनकेति ख्याते देवाजीवद्वयम् । देवान् जीविकार्थे लातवान् स्वीकृतवानिति कः । देवलः ॥

---

१. 'क्ति नि', २. 'कः क्षालयिता । र' क. पाठः. ३. 'न् । पूर्वौ वस्त्रधा'. ख पाठः. ४. 'वी' क. ग. घ. पाठः. ५. 'वितमि' ज. पाठः.

स्यान्माया शाम्बरी

क्षीर० — मात्यस्यां विश्वं माया । शम्बराख्यस्यासुरस्येयं शाम्बरी । शं वृणोति शंवरो व्याज इति तु युक्तम्[1]। इन्द्रजालं कुसृतिः कुहकश्च ॥

टीका० — मायाद्वयम् इन्द्रजालादिमायायाम् । मातेः छायावद् यः । माया । शम्बरासुरेण प्रणीतत्वान्मायायाः 'तस्येदम्' (४. ३. १२०) इत्यणि शाम्बरी[2] । शकार इति निरूपितं प्राक् ॥

मायाकारस्तु प्रातिहारिकः ॥ ११ ॥

क्षीर० — प्रतिहारो[3] व्याजः प्रयोजनमस्य प्रातिहारिकः ॥

टीका० — मायाकारद्वयमैन्द्रजालिके । प्रातिपूर्वाद् हृञो ण्वुलि प्रातिहारको दीर्घादिः ।

"मायाकारकसंज्ञः स्यात् प्रतिहारक इरम्मदोऽग्निः"

इति वररुचेरार्यायां[4] ह्रस्वादिरपि ॥

शैलालिनस्तु शैलूषा जायाजीवाः कृशाश्विनः ।
भरता इत्यपि नटाः

क्षीर० — शिलालिना कृशाश्वेन च प्रोक्तं नटसूत्रमधीते शैलाली कृशाश्वी च । 'पाराशर्यशिलालिभ्यां —' (४. ३. ११०) इति णिनिः। 'कर्मन्दकृशाश्वादिनिः' (४. ३. १११) । शिलूषस्यर्षेरपत्यं शैलूषः। भरतस्यापत्यम् । विदाद्यञ् । तस्य बहुत्वे 'यञञोश्च' (२. ४. ६४) इति लुक् । नटति नटः ॥

टीका० — शैलालिषट्कं नटे । शिलालिना प्रोक्तं नटसूत्रमधीयत इति शैलालिनः । 'पाराशर्यशिलालिभ्यां भिक्षुनटसूत्रयोः' (४. ३. ११०) इति

---

१. 'ति यु' ख. पाठः. २. 'री माया । श' ठ. पाठः. ३. 'रणं व्या' क. ग. पाठः. ४. 'र्यया ह्' ज. पाठः.

णिनिः । जायया जीवन्तीत्यचि जायाजीवाः । कृशाश्वप्रोक्तं नटसूत्रमधीयत इति कृशाश्विनः । 'कर्मन्दकृशाश्वादिनिः' (४. ३. १११) । भरतशिष्यतया भरताः । 'तस्येदम्' (४. ३. १२०) इत्यण् । संज्ञापूर्वकत्वान्न वृद्धिः । भरतगोत्रतया उत्साद्यञि बहुत्वलुगन्तो वा । एकद्वित्वयोस्तु भारतः भारतौ । 'नट नृत्तौ' । पचाद्यच् । नटाः ॥

चारणास्तु कुशीलवाः ॥ १२ ॥

क्षीर० — चरणस्य भ्रमणस्यायं चारणः, यतो देशान्तरभ्रमणाज्जीवति । कुत्सितं शीलं वाति कुशीलवः ॥

टीका० — चारणद्वयं **छात्रकथकादिषु** । दिगन्तेषु कीर्तिं चारयन्ति प्रापयन्तीति ल्युटि चारणाः । कुत्सितं शीलमस्येति कुशीलवः । वप्रकरणे* 'अन्यत्रापि दृश्यते' (वा० ५. २. १०९) इति वः ॥

मार्दङ्गिका मौरजिकाः

क्षीर० — मृदङ्ग[1]मुरजवादकं शिल्पमस्य मार्दङ्गिकः[2], मौरजिकः ॥

टीका० — **मुरजवादके** मार्दङ्गिकद्वयम् । 'शिल्पम्' (४. ४. ५५) इति ठक् ॥

पाणिवादास्तु पाणिघाः ।

क्षीर० — पाणिं हन्ति पाणिघः । 'पाणिघताडघौ शिल्पिनि' (३. २. ५५) इति साधुः ॥

टीका० — ये पाणिनैव पाण्यभ्यन्तरे मुरजादिवाद्यमुत्पादयन्ति **तत्र** पाणिवादद्वयम् । 'पाणिघताडघौ शिल्पिनि' (३. २. ५५) इति निपातनात् पाणिघाः ॥

वेणुध्माः स्युर्वैणविकाः

---

१. 'ङ्गवा', २. 'कः ॥' क. ग. पाठः.

---

* 'अन्येभ्योऽपि दृश्यते' इति मुद्रितवार्त्तिकपाठः ।

क्षीर० — वेणून् धमति वेणुध्माः[1]। वेणुर्वंशिका शिल्पमस्य ॥

टीका० — वेणुध्मद्वयं[2] वेणुवादके[3]। वेणुं धमति शब्दयतीति कः। वेणुध्मः। वेणुविकारो वैणवम्। तद्वादनं शिल्पमस्येति ठकि वैणविकः ॥

वीणावादास्तु वैणिकाः ॥ १३ ॥

क्षीर० — वीणावादनं शिल्पमस्य वैणिकः ॥

टीका० — वीणावादके वीणावादद्वयम् ॥

जीवान्तकः शाकुनिकः

क्षीर० — शकुनिं हन्ति शाकुनिकः। 'पक्षिमत्स्यमृगान् हन्ति' (४. ४. ३५) इति ठक् ॥

टीका० — वर्तनार्थं पक्षिघातके जीवान्तकद्वयम्। जीवानां पक्षिणामन्तको जीवान्तकः। 'पक्षिमत्स्यमृगान् हन्ति' (४. ४. ३५) इति ठकि शाकुनिकः ॥

द्वौ वागुरिकजालिकौ।

क्षीर० — एकार्थाविति शेषः। वागुरया मृगबन्धनरज्ज्वा चरति वागुरिकः। जालेन जालिकः ॥

टीका० — जालेन मृगहन्तरि वागुरिकद्वयम्। वागुरा मृगबन्धनजालम्। तया चरतीति वागुरिकः। 'पर्पादिभ्यः ष्ठन्' (४. ४. १०)। जालिकः ॥

वैतंसिकः कौटिकश्च मांसिकश्च समं त्रयम् ॥ १४ ॥

क्षीर० — वितंस्यते वितंसः प्राणिबन्धोपकरणम्। कूटं कूटयन्त्रम्। ताभ्यां चरति जीवति वेति ठक्। मांसं पण्यमस्य मांसिकः। सौनिकार्था इत्येके ॥

---

१. 'ध्मा वंशिकः ॥' ख. पाठः.　२. 'वांशिकारेति ख्याते वेणुध्मद्वयम्।', ३. 'यम्। वेणुं' ज. पाठः.

टीका० — कौटिकादिषु[1] वैतंसिकत्रयम् । मृगपक्ष्यादिबन्धनोपायो वीतंसः । दन्त्यान्तः । मृगपक्ष्यादिबन्धनयन्त्रं कूटम् । ताभ्यां चरतीति ठक् । वैतंसिकः कौटिकः । 'तदस्य पण्यम्' (४. ४. ५१) इति ठकि मांसिकः ॥

भृतको भृतिभुक् कर्मकरो वैतनिकश्च सः ।

क्षीर० — भ्रियते स्म भृतकः । स्वार्थे कन् । भृतिं वेतनं भुङ्क्ते भृतिभुक् । वेतनेन जीवति वैतनिकः । 'वेतनादिभ्यो जीवति' (४. ४. १२) इति ठक् ॥

टीका० — वेतनोपजीविनि कर्मकरे भृतकचतुष्कम् । वेतनेन क्रीतो भृतः, भृत एव भृतकः । 'अनुकम्पायाम्' (५. ३. ७६) । कन् । क्विपि भृतिभुक् । 'कर्मणि भृतौ' (३. २. २२) ति टः । कर्मकरः । ठकि वैतनिकः ॥

वार्तावहो वैवधिकः

क्षीर० — 'विभाषा विवधवीवधात्' (४. ४. १७) इति ठक् ॥

टीका० — वान्धारीति[2] ख्याते वार्तावहद्वयम् । धान्यमत्स्यादिवार्तां वहतीति पचाद्यच् । वार्तावहः । विवधः पर्याहारः । 'विभाषा विवधवीवधात्' (४. ४. १७) इति ठक् । विवधेन हरतीति वैवधिकः ॥

भारवाहस्तु भारिकः ॥ १५ ॥

क्षीर० — भारोऽस्त्यस्य भारिकः ॥

टीका० — भारवाहद्वयं भारिके । 'कर्मण्यण्' (३. २. १) भारवाहः । 'हरत्युत्सङ्गादिभ्यः' (४. ४. १५) इति ठकि भारिकः ॥

विवर्णः पामरो नीचः प्राकृतश्च पृथग्जनः ।
निहीनोऽपशदो जाल्मः क्षुल्लकश्चेतरश्च सः ॥ १६ ॥

क्षीर० — विरुद्धो वर्णोऽस्य विवर्णः, वर्णान्तरालत्वात् । पामाः

---

१. 'टादि' क, 'ट' ग. पाठः. २. 'कः ॥ वार्तावहद्वयं वैवधिके । धा' ठ. पाठः. ३. 'त्सा' क. पाठः.

सन्त्यस्यांधनत्वात्, पामरः। निम्नमञ्चति नीचः। प्रकृतौ भवः प्राकृतः गुणाद्यसंस्कृतः। पृथग् जनेभ्यः पृथग्जनः। नियतं हीयते निहीनः। अपशीयतेऽपशदः। जलति जाल्मः। *'जल धान्ये'। क्षुधं लाति क्षुल्लकः। इतरस्तुच्छत्वाद्, इतं राति वा। वर्वरो यथाजातोऽपि। भरतादौ रेफसकारौ॥

टीका० — विवर्णदशकं नीचे। विगतो वर्णो यशोऽस्येति विवर्णः। पामानं रातीति पामरः। न्यञ्चति न्यग्भवतीति नीचः। अञ्चेः क्विन्। ऊर्णनाभवदच् समासान्तः। 'अचः' (६. ४. १३८) इत्यकारलोपः। 'चौ' (६. ३. १३८) इति दीर्घः। प्रकृतौ यथाजातभावे भवोऽव्युत्पन्नः प्राकृतः। सज्जनेभ्यः पृथग्भूतो जनः पृथग्जनः। जहातेः क्तः। निहीनः। सदेः पचाद्यच्। अपसदः। क्षुधं लाति गृह्णातीति क्षुल्लः। ततोऽज्ञाताद्यर्थे कः।

"क्षुल्लकः पामरे स्तोके क्षारः काचे च भस्मनि"

इत्यजयः। रभसस्तु 'खुल्लकस्त्रिषु नीचेऽल्पे' इत्यादिना कवर्गद्वितीयादौ पठति। सज्जनेभ्योऽन्यतया इतरः॥

भृत्ये दासेरदासेयदासगोप्यकचेटकाः।
नियोज्यकिङ्करप्रैष्यभुजिष्यपरिचारकाः॥ १७॥
पराचितपरिस्कन्दपरजातपरैधिताः॥ १७½॥

क्षीर० — भरणीयो भृत्यः। 'भृञोऽसंज्ञायाम्' (३. १. ११२) इति क्यप्। दास्या अपत्यं दासेरो दासेयश्च। 'क्षुद्राभ्यो वा' (४. १. १३१) इति ढ्रक्ढकौ। दीयते दस्यते वा दासः। 'दसु उपक्षये'। गोपनीयो गोप्यः। चेटति चेटः। 'चिट परप्रेष्ये'। 'प्रयोज्यनियोज्यौ शक्यार्थे' (७. ३. ६८) इति साधुः। किं करोमीत्याज्ञाप्रतीक्षः किङ्करः। 'दिवाविभा—' (३. २. २१) इत्यादिना टः। प्रेषणीयः प्रैष्यः। 'प्रादू-

१. 'स्य पामवत्त्वात्' क. ग. पाठः. २. 'द' क. पाठः. ३. 'न्यङ् ही' ग. पाठः. ४. 'जघन्ये' ग. घ. ङ. पाठः. ५. 'ल्लः। तुच्छ' ग. पाठः. ६. 'कः। तुच्छ', ७. 'रात्येति', ८. 'वा इतरः। व' ख. पाठः.

* 'धान्यं जडत्वम्' इति क्षीरतरङ्गिणी।

होढोढ्येषैष्येषु' (वा० ६. १. ८९) इति वृद्धिः। 'इषु इच्छायाम्'। अस्मात्तु प्रेष्यः। भुङ्क्ते स्वाम्युच्छिष्टं भुजिष्यः। परैराचीयते वर्ध्यते[1] पराचितः। परिस्कन्दयते आक्रम्यते परिस्कन्दः। 'परिस्कन्दः प्राच्य-भरतेषु' (८. ३. ७५) इति साधुः। परैरेध्यते[2] वर्ध्यते परैधितः॥

टीका० — भृत्यैकादशकं भृत्ये। 'भृञोऽसंज्ञायाम्'(३. १. ११२) इति क्यप्। भृत्यः। दास्या अपत्यं दासेरः, दासेयश्च। 'क्षुद्राभ्यो वा' (४. १. १३१) इति ढ्रक्। 'दसि दंशदर्शनयोः'। 'दंसेष्टटनौ न आ च' (उ० ५. ९) इति टटनौ प्रत्ययौ नकारस्य चाकारः। एवं दासो दन्त्यसः। गुपेर्ण्यति 'अनुकम्पायाम्' (५. ३. ७६) कन्। गोप्यकः। 'चिट परप्रेष्यभावे'। घञ्। पूर्ववत् कन्। चेटकः। युजेः 'शकि लिङ् च' (३. ३. १७२) इति चकारात् कृत्प्रत्ययो ण्यत्। नियोज्यः। 'प्रयोज्यनियोज्यौ शक्यार्थे' (७. ३. ६८) इति कुत्वाभावः। किञ्चित् करोतीति 'किंयत्तद्बहुषु कृञोऽज्विधानम्' (वा० ३. २. २१) इत्यच्। तेन स्त्रियां टाप्। किञ्चिदर्थवृत्तिरत्र किं-शब्दः। 'इष गतौ' दैवादिकः। ण्यति लघूपधगुणः। 'प्रादूहोढोढ्येषैष्येषु वृद्धिर्वक्तव्या' (वा० ६. १. ८९) इति वृद्धौ प्रैष्यः। कर्मणि घञि प्रैषोऽपीति न्यासः। 'ईष उञ्छे', 'ईष गतिहिंसादानेषु'। घञि ण्यति च गुरूपधत्वाद् गुणाभावे प्रेषप्रेष्यौ। 'रुचिभुजिभ्यां किष्यन्' (उ० ४. ८०)। भुजिष्यो मूर्ध-न्यषः। चरतेर्ण्वुल्। परिचारकः। परसंवर्धिते पराचितचतुष्कम्। चिञः क्तः। पराचितः। स्कन्देः पचाद्यच्। 'परेश्च' (८. ३. ७४) इति षत्वविकल्पः। परिस्कन्दः। परेण पोषितत्वात् परस्माज्जात इव परजातः। परेणैधितः संवर्धितः परैधितः॥

मन्दस्तु तुन्दपरिमृज आलस्यः शीतकोऽलसोऽनुष्णः।

क्षीर० — मन्दते स्वपितीव मन्दः। अत एव 'मदि जाड्ये' इति चान्द्रो धातुः। तुन्दं परिमार्ष्टि तुन्दपरिमृजः। 'तुन्दशोकयोः परि-

---

१. 'ते नियुज्यते प' क. ग. पाठः. २. 'ते प' ग. पाठः.

मृजापनुदोः' (३.२.५) इति सूत्रे 'आलस्यसुखाहर(ण)योरि'ति वक्तव्यात् कः। आलस्यमस्त्यस्यालस्यः। अर्शआदित्वादच्। शीतादलसे 'शीतोष्णाभ्यां कारिणि' (५. २. ७२) इति कन्। न लसत्यलसः॥

टीका० — मन्दषट्कमलसे। 'मदि स्तुत्यादौ'। पचाद्यच्। मन्दः। 'तुन्दशोकयोः परिमृजापनुदोः' (३. २. ५) इति कः। तुन्दपरिमृजः। 'मृजेरजादौ संक्रमे विभाषा वृद्धिरिष्यत' इति वचनात् तुन्दपरिमार्ज इत्यपि। न लसतीत्यलसः। चातुर्वर्ण्यादित्वात् स्वार्थे ष्यञि आलस्यः। शीतं मन्दं करोतीति शीतकः। 'शीतोष्णाभ्यां कारिणि' (५. २. ७२) इति कन्॥

दक्षे तु चतुरपेशलपटवः सूत्थान उष्णश्च॥ १८½॥

क्षीर० — दक्षते दक्षः। चतते[२] कर्म चतुरः। पेशति पिशति वा पेशलः। 'पिश अवयवे', 'पिश गतौ'[३]* । पटति पाटयति वा पटुः। सुष्ठुत्थानम् उद्योगोऽस्य सूत्थानः। ओषति दहतीव उष्णः। उष्णकोऽपि॥

टीका० — दक्षषट्कं दक्षे। 'दक्ष वृद्धौ शीघ्रार्थे च'। पचाद्यच्। दक्षः। 'चते चदे याचने'। अङ्कुरवदुरच्। चतुरः। 'पिश अवयवे'। बाहुलकादलच्। पेशलः। 'पट गतौ'। हेतुमण्णिच्। 'फलिपाटिनमिमनिजनां गुक्पटिनाकिधतश्च' (उ० १. १८) इति उः, धातोश्च पटिरादेशः। पटुः। सुष्ठूत्थानमुद्योगोऽस्येति सूत्थानः॥

चण्डाले[५]प्लवमातङ्गदिवाकीर्तिजनङ्गमाः॥ १९॥
निषादश्वपचावन्तेवासिचाण्डालपुक्कसाः।

क्षीर० — चण्डते चण्डालः। प्लवते प्लवः। मा निषिद्धं तङ्गति मातङ्गः। 'अ मा नो न प्रतिषेधे'। मतङ्गापत्यमिति पौराणिकाः। दिवा कीर्त्यते दिवाकीर्तिः। रात्रौ भयदत्वात्[६]। जनं गच्छति जनङ्गमः। 'गमश्च' (३. २. ४७) इति खच्। निषण्णमस्मिन् पापमिति निषादः, निषीदति वा। ज्वलादित्वाण्णः। श्वानं पचति श्वपचः। पचादित्वाद-

१. 'स्यास्तीत्याल' ग. घ. पाठः. २. 'ते च' ग. पाठः. ३. 'तौ वा। प', ४. 'शोभनमुत्था' ख. पाठः. ५. 'ले' क ग. घ. पाठः. ६ 'करत्वा' ग. पाठः.

* 'पिसृ पेसृ गतौ' इति भ्वादौ क्षीरतरङ्गिणी।

णोऽपवादोऽच । ग्रामस्यान्ते वसत्यन्तेवासी, अन्तावसायी च । कुला-लवरुडचण्डालनिषादमित्रामित्रेभ्यश्छन्दस्युपसंख्यानात् स्वार्थेऽण् । चाण्डालः । बुत् कुत्सितं कसति बुत्कसः । बुकस इत्येके । अवान्तर-भेदोऽत्र नादृतः । यतः श्वपचो डोम्बः, बुत्कसो मृतपः ॥

टीका० — चण्डालदशकं चण्डाले । 'पतिचण्डिभ्यामालञ्' (उ० १. १२२) चण्डालः । प्रज्ञायणि चाण्डाल इत्युणादिवृत्तिः । प्लव उक्तः । दिवसस्य पुण्यकालत्वात् तत्राकीर्तनम्* अस्येति दिवाकीर्तिः । जनाद् गच्छतीति जनङ्गमः । '(जने?गम)श्च' (३. २. ४७) इति खच् । निषाद उक्तः । श्वानं पचतीति श्वपचः । पचादिषु श्वपचपाठादच्[३] । नगरादेरन्ते वसतीति णिनिः । सप्तम्या अलुक् । अन्तेवासी ॥

"अन्तेवासी च चण्डालो दिवाकीर्तिर्जनङ्गमः"

इत्यमरमाला । पुमांसं कसति गच्छतीति पुल्कसः, दन्त्यसः पृषोदरादिश्च ॥

भेदाः किरातशबरपुलिन्दा म्लेच्छजातयः ॥ २० ॥

क्षीर०—किराताद्याः तथा म्लेच्छजातीयाः कुल्गमेदादयः चण्डालभेदाः । किरति शरान् किरातः । शवत्यरण्यं शबरः । पोलति श्वयति पुलिन्दः । एतेऽरण्यचरा देशभेदाद् भिन्नाः । म्लेच्छत्यव्यक्तं वक्ति म्लेच्छः ।

निष्या माला भटा भिल्ला नाहलाश्चान्त्यजाः पृथक् ॥

टीका० — एते किरातादयस्त्रयश्चण्डालानां भेदाः । म्लेच्छन्ति अव्यक्तं भाषन्त इति म्लेच्छाः । 'म्लेच्छ अव्यक्तायां वाचि' । पचाद्यच् । तदुक्तं—

"गोमांसभक्षको यस्तु लोकबाह्यं च भाषते ।
सर्वाचारविहीनोऽसौ म्लेच्छ इत्यभिधीयते ॥"

---

१. 'कुटच' ग. घ. ङ. पाठः. २. 'तः ॥ भे' ख. पाठः. ३. 'चतिपा' ज. पाठः. ४. 'मी' ग. घ. ङ. पाठः.

---

* अत्र मानं मृग्यम् ।

तत्र मयूरपिञ्छपरिधानो म्लेच्छः। पत्रपरिधानः शबरः। पत्रशबरशब्दोऽप्यत्र वर्तते। ('श्रु ! शु) स्रु गतौ'। 'कृदरादयश्च' (उ० ५. ४१) इत्यरन्। शबरः। स्वभाषाव्यवहारी परभाषानभिज्ञः पुलिन्दः। 'पुल महत्त्वे'। *'कलिपुलिभ्यां किन्दच्' (उ० ४. ८६)। पुलिन्दः॥

"पुलिन्दः कथ्यते म्लेच्छः पुलिन्द्रोऽपि निगद्यते"

इति तारपालः॥

व्याधो मृगवधाजीवो मृगयुर्लुब्धकश्च सः।

क्षीर०—विध्यति व्याधः। 'श्याद्व्यधा—' (३. १. १४१) इति णः। मृगान् याति मृगयते वा मृगयुः। लुभ्यति गृध्यति मांसं लुब्धकः॥

टीका०—व्याधचतुष्कं व्याधे। स च म्लेच्छप्रकारो गीतादिना हरिणादीन् हन्ति। 'श्याद्व्यधा—' (३. १. १४१) इत्यादिना णः। व्याधः। मृगवधमाजीवतीति मृगवधाजीवः। मृगान् वधार्थं याति धावतीति मृगयुः। 'मृगय्वादयश्च' (उ० १. ३९) इति कुः। मृगेषु लुब्धः प्रसक्तो लुब्धकः॥

कौलेयकः सारमेयः कुक्कुरो मृगदंशकः॥ २१॥

शुनको भषकः श्वा स्याद्

क्षीर०—कुले गृहे भवः कौलेयकः। 'कुलकुक्षि[2]ग्रीवाभ्यः श्वास्यलङ्कारेषु' (४. २. ९६) इति ढकञ्। सरमाया अपत्यं सारमेयः। कोकते कुक् चोरग्राही, कुक्शब्दं वा कुरति कुकुरः। 'कुर शब्दे'। मृगान् दशति मृगदं[3]शकः। शुनति शुनकः। 'शुन गतौ'। भषति कुत्सितं भाषते भषकः। शवति श्वयति वा श्वा। मण्डली च। रथ्यामृगो देश्याम्॥

टीका०—कौलेयकसप्तकं कुक्कुरे। कौक्षेयकवद् ढकञ्। कौलेयकः। सरमा शुनी, तदपत्यं सारमेयः दन्त्यादिः। 'कुक वृक॰ आदाने'। 'मद्गुरादयश्च'

१. यौ', २. 'क्षीति', ३. 'शः। शु' ख. पाठः.

* 'कुणिपुल्योः किन्दच्' इति मुद्रितोणादिपाठः.

(उ० १. ४३) इति उरच् कुगागमश्च । एवमुणादौ कुक्कुरो मध्यरेफरहितो व्युत्पादितः । क्वुनि भषकः । 'श्वन्नुक्षन्—' (उ० १. १६५) इत्यादिना श्वयतेः श्वन् इति साधितः ॥

अलर्कस्तु स यो गरी ।

क्षीर०—सः श्वा सञ्जातगरप्रयोगः अल्यते वार्यते दंशनभयादलर्क उन्मत्तः श्वा ॥

टीका०— योगितो दत्तयोग उन्मत्तादिभावं प्रपन्नः श्वा अलर्कः ह्रस्वादिः ॥

श्वा विश्वकद्रुर्मृगयाकुशलः

क्षीर०—विश्वं कन्दत्याह्वयते विश्वकद्रुः । विगतं श्वकदनमस्येत्येके । विश्वकं द्रवति वा ॥

टीका०— आखेटकुशलः श्वा विश्वकद्रुः ॥

सरमा शुनी ॥ २२ ॥

क्षीर०—सरति सरमा देवशुनी । विशेषवृत्तिरपि सामान्येऽभिधानात् ॥

टीका०—कुक्कुर्यां सरमाद्वयम् । सर्तेर्बाहुलकात् 'प्रथेरमच्' (उ० ५. ६९) । सरमा ॥

विड्चरः सूकरो ग्राम्यः

क्षीर०—विषं गूथं चरति विड्चरः । सूयते बहून् सूकरः ॥

टीका०—ग्रामभवे सूकरे विड्चरः । विषं विष्ठां चरतीत्यच् ॥

बर्करस्तरुणः पशुः ।

क्षीर०—बर्कते बर्करः । 'बृक आदाने' ॥

टीका०—तरुणपशुसामान्ये वर्करः[2] । मतभेदाद् वर्करो मेषशावक इति रक्षितः । 'बृक आदाने' । 'ऋच्छररन्' (उ० ३. १३१) इति बाहुलकोऽरन् ॥

---

१. 'व' ख. ग. घ. पाठः. २. 'क' ज. पाठः.

आच्छोदनं मृगव्यं स्यादाखेटो मृगया स्त्रियाम्॥ २३॥

क्षीर० — आचोद्यन्ते भ्राम्यन्ते प्राणिनोऽत्राच्छोदनम्। चुदेश्छत्वम्। मृगान् व्ययति मृगव्यम्। मृगव्येति मुनिः। 'व्येञ् संवरणे'। आखेट्यन्ते प्राणिनोऽत्र आखेटः। 'खिट उत्त्रासने'। मृग्यन्तेऽस्यां प्राणिनो मृगया। मृगयाटाव्येति (यञ्? यक्शौ)। पापर्द्धिश्च॥

टीका० — आच्छोदनचतुष्कमाखेटके। मृगबाधो मृगव्यम्। 'व्यध ताडने'। 'अन्येष्वपि' इत्यपिशब्दाद् भावे डः। 'किट खिट उत्त्रासने'। घञ्। आखेटः। 'मृग अन्वेषणे'। चुरादिणिच्। 'परिचर्यापरिसर्यामृगयाटाटचर्यानामुपसंख्यानम्' (वा० ३.३.१०१) इति भावे शः। मृगया॥

दक्षिणारुर्लुब्धयोगाद् दक्षिणेर्मा कुरङ्गकः।

क्षीर० — लुब्धसंबन्धाद् दक्षिणे पार्श्वे अरुर्व्रणमस्य दक्षिणारुः। दक्षिणे ईर्म व्रणमस्य दक्षिणेर्मा। 'दक्षिणेर्मा लुब्धयोगे' (५.४.१२६) इति साधुः। 'व्रणोऽस्त्रियामीर्ममरुरि'त्युक्तम्॥

टीका० — लुब्धयोगाद् दक्षिणारुः लुब्धकेन दक्षिणाङ्गे कृतव्रणो मृगः। दक्षिणेर्मा। दक्षिणाङ्गे ईर्म व्रणमस्येति दक्षिणेर्मा नान्तः। 'दक्षिणेर्मा लुब्धयोगे' (५.४.१२६) इति समासान्तानिच्प्रत्ययान्तो निपातितः॥

चौरैकागारिकस्तेनदस्युतस्करमोषकाः॥ २४॥

प्रतिरोधिपरास्कन्दिपाटच्चरमलिम्लुचाः।

क्षीर० — चोरयति चोरः। स्वार्थेऽण्। चुराशीलो वा। छत्रादित्वाण्णः। एकस्मिन्नसहायेऽगारे भव ऐकागारिकः। 'ऐकागारिकट् चौरे' (५.१.११३) इति साधुः। स्तेनयति स्तेनः। 'स्तेन चौर्ये'। 'शास्त्या(न्नञ् विभ्यतः'? हृञ्विभ्यः) (उ० २.४८) इतीनचि स्त्येनः स्यात्। दस्यत्युपक्षिणोति दस्युः। तत् करोति तस्करः। 'तद्बृहतोः करपत्यो-

---

१. 'ट' क. पाठः. २. 'त्यादीना' ग. पाठः. ३. 'म्। दक्षिणेर्मा मृगः। दक्षिणमङ्गं व्रणितं व्याधेनेत्यर्थः॥ चौ', ४. 'र्ये। द' ख. पाठः.

श्चोरदेवतयोः सुट् तलोपश्च' (ग० ६. १. १५७)। मुष्णाति मोषकः। प्रतिरुणद्धि प्रतिरोधी। परानास्कन्दयति परास्कन्दी। पाटयंश्चरति पाटच्चरः। पटच्चरे जीर्णवस्त्रे भवो वा। मलिनं म्लोच(य?)ति मलिम्लुचः। 'म्लुच स्तेयकरणे'। पारिपन्थिकः पश्यतोहरश्च। 'वाग्दिक्पश्यद्भ्यो युक्तिदण्डहरेषु' (वा० ६. ३. २१) इति षष्ठ्या अलुक्।

व्यलीकं चातिसन्धानं वञ्चनं च प्रतारणम् ॥

टीका० — चौरदशकं चोरे। चुरा चौर्यं शीलमस्येति चौरः। 'छत्रादिभ्यो णः' (४. ४. ६२)। चुराशब्दे छत्रादिपाठादेव अङ्, णिज्लुक् च[1]। पचाद्यचि चोरशब्दोऽप्यत्र। णेऽपि क्वचिदण्कृतं कार्यं भवतीति स्त्रियां च ङीपि चौरी, तापसी च। एकमसहायं गृहं प्रयोजनमस्येति ऐकागारिकः 'ऐकागारिकट् चौरे' (५. १. ११३) इति निपातितः। टकारो ङीबर्थः। अपरे तु इकट्प्रत्ययं वृद्धिं च निपातयन्ति। मोषार्थिनो ह्येकागारं प्रयोजनम्। 'स्तेन चौर्ये'। चुरादिणिच्। पचाद्यच्। स्तेनः। 'दसु चे'त्यत्र 'यजिमनिशुन्धिदसिजनिभ्यो युः' (उ० ३. २०)। दस्युः। तत् करोतीति तस्करः। 'तद्बृहतोः करपत्योश्चोरदेवतयोः सुट् तलोपो वक्तव्यः' (ग० ६. १. १५७) इति पारस्करादित्वात् सुट्तलोपौ। 'मुष स्तेये'। ण्वुल्। मोषकः। प्रतिरोधिपरास्कन्दिनौ आवश्यकणिन्यन्तौ। पाटयंश्चरतीति पाटच्चरः। दीर्घवदादिः। मलिनं यथा स्यात् तथा म्लोचति गच्छतीति मलिम्लुचः। म्लुचेर्गत्यर्थाद् इगुपधलक्षणः कः। पृषोदरादित्वान्मलिननकारलोपः ॥

चौरिका स्तैन्यचौर्ये च स्तेयं

क्षीर० — चौरस्य भावश्चौरिका[3]। मनोज्ञादित्वाद् वुञ्। ब्राह्मणादित्वात् ष्यञि चौर्यम्। स्तेनस्य भावः कर्म वा स्तैन्यम्। 'स्तेनादि'ति योगविभागात् ष्यञ्। 'स्तेनाद्यन्नलोपश्च' (५. १. १२५) इति स्तेयम् ॥

टीका० — चौरिकाचतुष्कं चौरिकायाम्। चौरस्य कर्म चौरिका। मनोज्ञादित्वाद् वुञ्। स्तेनस्य कर्म स्तेयम्। 'स्तेनाद् यन्नलोपश्च' (५. १.

१. चेति। प', २. 'र इत्यपि। णे' ठ. पाठः. ३. 'का। द्वन्द्वम' ख. पाठः.

१२९) इति यत्। स्तेनादिति योगविभागात् ष्यञ्। स्तैन्यम्। चोरस्य कर्म चौर्यं ष्यञन्तम्॥

लोप्त्रं तु तद्धनम्॥ २५॥

क्षीर०— लोप्यते लोप्त्रं चौर्यधनम्॥

टीका०— तद्धनं चौरिकाधनं लोप्त्रम्। 'लुप्लृ छेदने'। ष्ट्रन्। *'लोप्त्रमश्रुणि चौरिकम्' इति कान्ते विश्वप्रकाशः॥

वितंसस्तूपकरणं बन्धनं मृगपक्षिणाम्।

क्षीर०— मृगादिबन्धननिमित्तं जालवागुरादिसाधनं वितन्यते वितंसः, वितंस्यते[1]ऽनेन वा। तंसिः सौत्रः॥

टीका०— मृगाणां बन्धनोपायः स्नाय्वादिपाशसङ्घातः, पक्षिणां च बालपाशादियुक्तो वितंसः। 'तसि भूष अलङ्कारे'। विपूर्वाद् घञ्। पक्षे दीर्घः। वीतंसः॥

उन्माथः कूटयन्त्रं स्याद्

क्षीर०— ऊर्ध्वयात्रा मथ्यतेऽनेन उन्माथः। छलेन यम्यतेऽनेन कूटयन्त्रम्। पाशयन्त्रमित्येके॥

टीका०—आमिषं दत्त्वा मृगपक्षिबन्धनार्थं यत् सन्धानयन्त्रं निवेश्यते तत्रोन्माथद्वयम्। 'मथे विलोडने'। 'ज्वलितिकसन्तेभ्यो णः' (३. १. १४०)। उन्माथः। कूटाख्यं यन्त्रं कूटयन्त्रम्॥

वागुरा मृगबन्धनी॥ २६॥

क्षीर०— रज्जुरिति शेषः। अवागूरयति मृगान् वागुरा। जालाकृतिः॥

टीका०—वागुराद्वयं **मृगबन्धनजाले**॥

शुम्बं वटाकरः स्त्री तु रज्जुस्त्रिषु वटी गुणः।

क्षीर०— शुः पूजार्थोऽव्ययम्। पूजितं मीयते शुम्बं शुल्बं वा। वट्यते वेष्ट्यते वटाकरः, वटी च। सृ[2]ज्यते रज्जुः। गुण्यतेऽभ्यस्यते

१. 'ते बध्यतेऽने' ख. पाठः. २. 'र' क. ख. पाठः.

* 'लोप्त्रं वस्तुनि चोरिते इति रान्ते विश्वप्रकाशः' इति पाठः स्यात्।

गुणः । वटी गुण इति पृथगाहुः । 'वट वेष्टने' । (यो[1]यैः) वेष्टनैं द्विगुणा त्रिगुणा वा रज्जुर्वेष्ट्यते, ते वटा गुणाश्चेत्येके ॥

टीका० — शुल्बपञ्चकं वलितगुणे । शुल्बं तालव्यादि, क्लीबम् । 'रज्जुः शुल्बा वटारो ना' इति स्त्रीकाण्डे रत्नकोषः । 'वट वेष्टने' । 'अङ्गिमन्दि —' (उ० ३. १३४) इत्यादिना बाहुलकादारन् । ततः स्वार्थे कः । वटारकः । 'सृजेरसुमुश्च' (उ० १. १९) इति उप्रत्ययः असुमागमः, चकारात् सलोपः । ऋकारस्य यणादेशः, सकारस्य जश्त्वेन दकारः, दकारस्य च चुत्वेन जकारः । रज्जुः । 'वट वेष्टने' । इन् । 'कृदिकारादक्तिनः' (ग० ४. १. ४५) इति ङीषि वटी ॥

उद्घाटनं घटीयन्त्रं सलिलोद्वाहनं प्रहेः ॥ २७ ॥

क्षीर ० — उद्घाट्यते प्रकाश्यते जलमनेनोद्घाटनम् । 'ऊर्ध्वं हन्यतेऽनेन उद्घा(ट[2]त)नम्[3]' इति कौटिल्यः । प्रहेः कूपादे[4]र्जलमूर्ध्वं वाह्यतेऽनेनोद्वाहनम् । पादावर्तोऽपि ॥

टीका० — प्रहेररघट्टकूपाद् येन यन्त्रेण जलमुत्तोल्यते, तत्रोद्घाटनद्वयम् । 'घट सङ्घाते' । चुरादिः । ल्युट् । उद्घाटनम् ॥

पुंसि वेमा वायदण्डः

क्षीर० — वयन्त्यनेन वेमा । ऊयते पीड्यते तन्तुसूत्रं येनेति वायः, तदर्थो दण्डः । वापदण्ड इति तु युक्तम् ॥

टीका० — वेमद्वयं वेमनि । 'वेञः सर्वत्र' (उ० ४. १५१) इति मन् । वेमा नान्तः ॥

सूत्राणि नरि तन्तवः ।

क्षीर० — सूयते सूत्र्यते वा पटोऽनेन सूत्रम् । तन्यतेऽनेन तन्तुः ॥

---

१. 'सकारलो' ठ. पाठः. २. 'जने' ग. घ. पाठः. ३. 'म् । उत्पाटनम्', ४. 'उदपानादेः' ग. घ. ङ. पाठः.

टीका० — सूत्रद्वयं सूत्रे। 'षिवु तन्तुसन्ताने'। 'सिविमुच्योष्टेरू च' (उ० ४. १६४) इति ष्ट्रन्, ऊकारश्च टेः। सूत्रम्। 'तनु विस्तारे'। सेतुवत् तुः। नरि पुंलिङ्गे तन्तुशब्द इत्यर्थः। छन्दःपूरणार्थं बहुत्वनिर्देशः। द्वित्वैकत्वयोरप्येतयोर्वृत्तिः॥

वाणिर्व्यूतिः स्त्रियौ तुल्ये

क्षीर० — वयनं[*] वाणिः। (व्यूतिः। 'ऊतियूति—' (३.३.९७) इति साधुः ?) व्यूत एव निष्प्रवाणिर्नवः पटः। वयनं वानिः। निवृत्ते वयेन निष्प्रवाणिः। पुंस्येव मन्यते नवः पटः। वयनं व्यूतिः। 'ऊतियूति—' (३. ३. ९७) इति साधुः। तुल्या च तुल्या च तुल्ये द्वे॥

टीका० — वाणि[2]द्वयं **वयनक्रियायाम्**। वेञो विपूर्वाद् 'ऊतियूतिजूतिसातिहेतिकीर्तयश्च' (३. ३. ९७) इति क्तिन्। संप्रसारणोकारस्य दीर्घत्वनिपातनाद् व्यूतिः। वृत्तौ तु अवतेरूतिरिति निपातितम्। तन्मते अवतेः क्तिन्। 'ज्वरत्वर—'(६. ४. २०) इत्यादिना ऊठ्। विपूर्वः॥

पुस्तं ले[3](ख्या?प्या)दिकर्मणि॥ २८॥

क्षीर० — पुस्यते मे[4]द्यते[5] मृदत्र पुस्तम्। पुस्तं[6] आदरे वा॥

टीका० — लेप्यादिकर्म पुस्तमुच्यते। आदिना काष्ठखननकर्म गृह्यते। 'पुस्त बुस्त आदरानादरयोः'। चुरादिणिच्। एरच्।

"मृदा वा दारुणा वाथ वस्त्रेणाप्यथ चर्मणा।
लोहरत्नैः कृतं वापि पुस्तमित्यभिधीयते"॥

पाञ्चालिका पुत्रिका स्याद् वस्त्रदन्तादिभिः कृता।

क्षीर० — पञ्चालदेशे भवा पाञ्चालिका, यया बालाः खेलन्ति। 'यावादिभ्यः कन्' (५. ४. २९) इत्यत्र 'कृत्रिम' इति कन्। पुत्रिका। पुत्रकृत्त्योरिकन्(वा)॥

१. 'त्वबहुत्वं', २. 'णी' क. पाठः. ३. 'व्येनादि' ग. घ., 'व्यूनादि' ङ. पाठः. ४. 'मृद्यते', ५. 'ते पु', ६. 'स' ख. पाठः.

* वयनशब्दो वेञ औणादिकेन शिता साध्यः।

टीका० — पाञ्चालिकाद्वयं पुत्तलीकेति ख्यातायाम्। 'पुत्र कृत्रिमे' इति यावादिगणसूत्रेण कन्। पुत्रिका। आदिना शृङ्गकाष्ठादिग्रहणम् ॥

स्यात् सालभञ्जिका स्तम्भे लेप्येनाञ्जलिकारिका ॥२९॥

जतुत्रपुविकारे तु जातुषं त्रापुषं त्रिषु।

क्षीर० — 'त्रपुजतुनोः षुक्' (४.३.१३८) ॥

पिटकः पेटकः पेटा मञ्जूषा

'पीड गहने'। 'पीङ् पाने'। अस्माद् वा पीडेति[१] श्रीभोजः (?)।* मञ्जु मनोज्ञं कृत्वा वस्त्राद्यैरुष्यतेऽत्र मञ्जूषा। आद्यौ पेटारिकायां, परौ महत्याम् ॥

टीका० — पिटकद्वयं पेडा इति ख्याते। 'पिट शब्दसङ्घातयोः'। यथाक्रमं कुन्ण्वुलौ। पेटाद्वयं काष्ठादिमञ्जूषायाम्। 'टु मस्जो शुद्धौ'। 'मस्जेर्नुं च' (उ० ४. ७८) इति ऊषन्नुमागमौ। मञ्ज्जूषा द्विजकारा। 'झरो झरि सवर्णे' (८. ४. ६५) इति सलोपपक्षे एकजकारा मञ्जूषा ॥

अथ विहङ्गिका ॥ ३० ॥

भारयष्टिः

क्षीर० — विहङ्गप्रतिकृतिश्चर्मादिमयी (वहित्यादौ!) लम्बमाना स्थाप्यते प्रयाणके च सञ्चार्यते। भारोद्वहनार्था यष्टिः। 'चतुर्दण्डिके'ति सभ्याः। शिक्याधारस्कन्धग्राह्यो लगुड[२] इति द्रमिडाः। विहङ्गमेत्येके ॥

टीका० — विहङ्गमाद्वयं बाहुकेति[३] ख्याते। पक्षिपर्याये विहङ्गमा साधिता। क्वचिद् विहङ्गिकेति पाठः ॥

तदालम्बः शिक्यं काचः

क्षीर० — तदालम्बो भारालम्बः, तस्या अवलम्बते वा। शक्नोति वोढुं शिक्यम्। अघ्न्यादि। कच्यतेऽनेन काचः। 'कच बन्धने'। यत्र रज्जुपञ्जरे वोढव्यमास्ते ॥

---

१. 'डयतीति' ग. घ. ङ. पाठः. २. 'कूट इ' ख. पाठः. ३. 'गे' क. पाठः.

---

* "पिट शब्दसंघातयोः'। पेटति। पिटकः पेटकः पेटा मञ्जूषा। पिटः पिटक कण्डोलः। पिठकं विस्फोटः।" इति क्षीरतरङ्गिणी।

टीका० — शिक्यद्वयं शिक्ये । शिक्यं तालव्यशम् ॥

अथ पादुका ।

पादूरुपानत् स्त्री

क्षीर० — पद्यतेऽनया पादूः । 'णित्कसिपद्यर्तेः' (उ० १. ८८) । स्वार्थे कः । 'केऽणः' (७. ४. १३) इति ह्रस्वः । पादुका । उपनह्यत इत्युपानत् । 'नहिवृति—' (६. ३. ११६) इति दीर्घः । पादत्राणं च ॥

टीका० — पादुकात्रयं पादुकायाम् । 'णित्कसिपद्यर्तेः' (उ० १. ८८) इति ऊः । णित्वाद् वृद्धिः । पादूरेव पादुका । स्वार्थे कन् । 'केऽणः' (७. ४. १३) इति ह्रस्वः । 'णह बन्धने' । सम्पदादिक्विप् । 'नहिवृति—' (६. ३. ११६) इत्यादिना पूर्वपददीर्घः । पदान्ते 'नहो धः' (८. २. ३४) इति हस्य धः । चर्त्वम् । तकारः । उपानत्, हान्ता ॥

सैवानुपदीना पदायता ॥ ३१ ॥

क्षीर० — अनुपदं पदायामेन बद्धा अनुपदीना । 'अनुपदसर्वा—' (५. २. ९) इति खः ॥

टीका० — पदायता पादप्रमाणा पादूः अनुपदीना । अनुपदसर्वान्नायानयं बद्धाभक्षयतिनेयेषु' (५. २. ९) इति खः ॥

नध्री वध्री वरत्रा स्यात्

क्षीर० — नह्यति बध्नाति नध्री । वर्धते दीर्घीभवति चर्मरज्जुत्वाद् वध्री । व्रियतेऽनया वरत्रा । 'वरत्रा (वैत्र) वैणवी'ति तु चाणक्यस्तन्त्राध्यक्षे* उपचारादाख्यत् ॥

टीका० — नध्रीत्रयं चर्मरज्ज्वाम् । 'णह बन्धने' । 'दाम्नीशसयुयुजस्तुतुदसिसिचमिहपतदशनहः करणे' (३. २. १८२) इति ष्ट्रन् । 'नहो धः' (८. २. ३४) इति धत्वम् । षित्वात् ङीष् । नध्री । 'वृधिवपिभ्यां रन्' (उ० २. ३०) इति वृधे रन् । गौरादिङीष् । वध्री । 'वार्ध्री दीर्घवदादिरि'ति हड्डचन्द्रः । 'वृञश्चित्' (उ० ३. १०७) इत्यत्रन् । वरत्रा ॥

---

* कौटिलीयार्थशास्त्रे सूत्राध्यक्षे अधि० २. अध्या० २३. प्रक० ४०.

अश्वादेस्ताडनी कशा ।

क्षीर० — कशति कशा चर्मयष्टिः ॥

टीका० — बामाठी[1]ति ख्यातायां कशा । ओदिना उष्ट्रादेः । कश-स्तालव्यान्तः सौत्रः । पचाद्यच् ॥

चाण्डालिका तु कण्डोलवीणा चाण्डालवल्लकी ॥ ३२ ॥

क्षीर० — चण्डालस्येयं चाण्डालिका । कव्यते तन्त्रीभिराव्रियते कण्डोलवीणा किन्नराख्या ॥

टीका० — चाण्डालिकात्रयं चण्डालवीणायाम् । चण्डालेन कृता चाण्डालिका । 'कुलालादिभ्यो वुञ्' (४. ३. ११८) । 'कटे वर्षावरणयोः' । कपोलवद् ओलच् । कटोलश्चण्डालः । तस्य वीणा कटोलवीणा ॥

नाराची स्यादेषणिका

क्षीर० — नरम् अञ्चति नराङ्, तस्येयं नाराची । अन्विष्यते (व्रणो?वर्णो)ऽनयेत्येषणिका । स्वर्णतुलेतीह युक्तम् ॥

टीका० — नाराचीद्वयं नाराचीकृतलोहतुलायाम् । इच्छतेः करणे ल्युट् । 'एषणात् करणे' (ग० ४. १. ४१) इति ङीप् । एषणी ॥

शाणस्तु निकषः कषः ।

क्षीर० — श्यति तनूकरोति शाणः । निकष्यत तत्र निकषः । 'गोचरसञ्चर —' (३. ३. ११९) इति चकारात् साधुः । पुंसि संज्ञायां घो वा । एवं कषः । निकषोपल इत्येके । पचाद्यच् । मणिकारादिभाण्डमाहुः । यन्मुनिः — 'शाणश्च निकषोपलः' ॥

टीका० — शाणत्रयं कषपट्टिकायाम् । 'शण श्रण दाने' । घञ् । शाणस्तालव्यादिः । निकषकषौ घप्रत्ययान्तौ ॥

---

१. 'डी', २. 'अश्वादेरित्यादिना उष्ट्रादेर्ग्रहणम् । कशः सौ' ठ. पाठः. ३. 'ण्ड्य' क. च. पाठः. ४. 'किन्दरा इति ख्यातायाम् । चण्डाले' क. च. ज. पाठः. ५. 'चा' ग. घ. ङ. पाठः. ६. 'च' ग. पाठः. ७. 'णः । नि' ठ. पाठः.

व्रश्चनः पत्रपरशुः

क्षीर० — वृश्चति छिनत्ति व्रश्चनः। पत्राकारः पत्राणां वा परशुः ॥

टीका० — व्रश्चनद्वयं स्वर्णादिच्छेदनिकायाम् । 'ओ व्रश्चू छेदने' । करणे ल्युट् । व्रश्चनः । पत्रमिव परशुः ॥

ईषिका तूलिका समे ॥ ३३ ॥

क्षीर० — ईषति ईषिका । 'ईष उञ्छे' । काष्ठलोहादिमयी शलाका । तूल्यते तूलिका । 'तूल निष्कर्षे' । इषीकेत्येके । 'शलाकेषिकयो-स्तूलिरि'ति भुग्नो भेदेनाह ॥

टीका० — सामान्येन वीरणादिशलाकायामिषीकाद्वयम् । केचित् चित्रकरकूर्चिकायाम् । आवर्तितमनावर्तितं वा सुवर्णं ज्ञातुं यन्निक्षिप्यते तत्रेत्यपरे । इषीका गजाक्षिकूटपर्याये व्युत्पादिता। 'तूल निष्कर्षे' । क्वुन् । तूलिका ॥

तैजसावर्तनी मूषा

क्षीर० — तैजसं हेमादि आवर्त्यते द्रवीक्रियतेऽस्यां तैजसावर्तनी । मूयतेऽस्यां मूषा । 'मूङ् बन्धने' ॥

टीका० — तैजसावर्तनीद्वयं मूषायाम् । मुषेः 'गुरोश्च हलः' (३. ३. १०३) इत्यप्रत्यये टापि 'अन्येषामपि —' (६. ३. १३७) इति दीर्घत्वे मूषा । 'मूषा त्वावर्तनी मूषी'ति शब्दार्णवः ॥

भस्त्रा चर्मप्रसेविका ।

क्षीर० — बभस्ति भक्षयतीव स्थाप्यं भस्त्रा । चर्ममयी, प्रसीव्यते, प्रसेविका । प्रसेवकोऽपि ॥

टीका० — भस्त्राद्वयं भस्त्रायाम् । 'भस भर्त्सनदीप्त्योः' । 'हुयामाश्रुभसिभ्यस्त्रन्' (उ० ४. १६९) । 'तितुत्र —' (७. २. ९) इत्यादिना इडभावः ॥

---

१. 'षि' क. ङ. पाठः. २. 'भाखीति ख्यातायां' क. ग. पाठः.

आस्फोटनी वेधनिका

क्षीर० — आस्फोट्यते विध्यतेऽनया मौक्तिकादि ॥

टीका० — मणिशङ्खादेर्वेधनी भ्रमः[1] । तत्र लास्फोटनीद्वयम् । लडति स्फोटयतीति लास्फोटनी । पृषोदरादिः ॥

कृपाणी कर्त्तरी समे ॥ ३४ ॥

क्षीर० — कल्प्यते भिद्यतेऽनया कृपाणी । कर्त्त्यतेऽनया कर्त्तरी ॥

टीका० — कृपाणीद्वयं पत्रीकृतसुवर्णादेः कर्तनोपाये[2] कासीति ख्याते, नापितकेशकर्तरिकायां[3] वा । 'कृती छेदने' । बाहुलकादरन् । गौरादिङीष् । कर्तरी ॥

वृक्षादनो वृक्षभेदी

क्षीर० — वृक्षोऽद्यते छिद्यतेऽनेन शस्त्रकेण वृक्षादनः ॥

टीका० — वृक्षादनद्वयं वृक्षभेदिनि[4] । वृक्षादनो नन्द्यादिः । वृक्षभेदी नान्तः ॥

टङ्कः पाषाणदारणः ।

क्षीर० — टङ्क्यतेऽनेन टङ्कः । 'टकि बन्धने' । हन्यमानः टंशब्दं कायतीति वा ॥

टीका० — टङ्कद्वयं पाषाणदारणे[4] । 'टकि बन्धने' । चुरादिणिच् । 'एरच्' (३. ३. ५६) । अतः परमार्याद्वयम् * ॥

क्रकचोऽस्त्री करपत्रं

क्षीर० — 'क्र' शब्दोच्चारणेन कचति क्रकचः । करसञ्चार्यं शस्त्रं करपत्रम् । करशब्दोच्चारणेन पतति वा ॥

---

१ 'मरः । त' ग. ठ. पाठः । २. 'ये । ना' ठ. पाठः. ३. 'नीआणेति ख्याते । वृ' ४. 'टङ्कीति ख्याते । ट' क. ग. पाठः.

---

* अत्र प्रथमार्या ''क्रकचोऽस्त्री करपत्रं स्यादारा चर्मभेदिका चैव । सूर्मी स्थूणा लोहप्रतिमा शिल्पं कलादिकं कर्म ॥ '' इति पाठेन सम्पाद्या ।

टीका० — क्रकचद्वयं करवर्त इति ख्याते। क्रकचोऽस्त्रीति सम्बन्धः। चवर्गान्तोऽयम्। नाममालायां तु क्लीबं क्रकचम्॥

स्यादारा चर्मभेदिका॥ ३५॥

क्षीर० — इयर्त्यनयेत्यारा। भिदादौ आरा शस्त्र्यां साधुः। चर्मसीवनी॥

टीका० — चर्मकाराणां चर्मवेधनं लोहद्रव्यम् आरा। 'ऋ गतौ'। आङ्पूर्वाद् भिदादिगणसूत्रेण 'आरा शस्त्र्याम्' (ग० ३. ३. १०४) इति निपातिता। अङ्प्रत्ययः। 'ऋदृशोऽङि गुणः' (७. ४. १६)। सवर्णदीर्घत्वम्। ततष्टाप्॥

सूर्मिः स्थूणायःप्रतिमा

क्षीर० — सुवति सूर्मिः। शोभनोर्मिरित्येके। तिष्ठति स्थूणा। यच्छाश्वतः — 'स्थूणा स्तम्भे च सूर्म्यां च'। अयोमयी प्रतिकृतिः। यत् स्मृतिः—

"सूर्मिं ज्वलन्तीमालिङ्गेन्मृत्यवे गुरुतल्पगः"॥

टीका० — सूर्मीत्रयं लोहप्रतिमायाम्।

"स्वच्छभिर्बलिभिरक्षदुन्दुभिर्नाभिगोमुरभिजानि(?)शूर्मयः"

इत्यरुणः। 'सृ गतौ'। 'ग्रीष्मजाल्मादय' इति मप्रत्यये सूरादेशे च गौरादिङीषि सूर्मी। 'चुल्लीति महान्यास' इति उपाध्यायसर्वस्वम्। तिष्ठतेः 'रास्नासास्नास्थूणा—' (उ० ३. १५) इत्यादिना नक्, अन्त्यस्योकारः, णत्वं च। स्थूणा॥

सिल्पं[3] कर्म कलादिकम्॥३५½॥

क्षीर० — सिनोति सिल्पम्। 'षिञ्[4] बन्धने'। 'सिल[5] उञ्छे'। अस्माद् वा। कला गीताद्याश्चतुष्षष्टिः। आदिशब्दः प्रकारे॥

टीका० — वात्स्यायनोक्तनृत्तवाद्यादिचतुष्षष्टिर्बाह्यक्रियाः, तथालि-

---

१. 'शू' ग. झ. पाठः. २. 'म्। सृ' ठ. पाठः. ३., ४., ५. 'शि' ग, घ, ङ. पाठः.

ङ्गनचुम्बनाद्याश्चाभ्यन्तराश्चतुष्षष्टिः क्रियाः कलाः । आदिना स्वर्णकारादिकर्म तत् सर्वं शिल्पम् । तालव्यादिः ॥

प्रतिमानं प्रतिबिम्बं प्रतिमा प्रतियातना प्रतिच्छाया । प्रतिकृतिरर्चा पुंसि प्रतिनिधिः

क्षीर० — प्रतिमीयतेऽनेन प्रतिमानं, प्रतिमा च । प्रतिबिम्ब्यते प्रतिबिम्बं, बिम्बसदृशं वा । प्रतियातयत्यनयो प्रतियातना । 'यत निकारोपसंस्कारयोः' । अर्च्यते अर्चा । प्रतिनिधीयते प्रतिनिधिर्मुख्यसदृशः । प्रतिरूपं प्रतिच्छन्दः प्रतिकायश्च ॥

टीका०— प्रतिमानाष्टकं मूर्त्तिसदृशशिलादिनिर्मितप्रतिरूपके । सर्वमेव साधितम् ॥

उपमोपमानं स्यात् ॥३६॥

क्षीर० — उपमितिरुपमा । केचिदेतत् पूर्वैः सम्बध्नन्ति ॥

टीका० — उपमाद्वयं येनोपमीयते या, सोपमितिस्तत्र । मातेः 'आतश्चोपसर्गे' (३. ३. १०६) इत्यङ् । उपमा ॥

वाच्यलिङ्गाः समस्तुल्यः सदृक्षः सदृशः सदृक् ॥ ३७ ॥

साधारणः समानश्च

क्षीर० — सह माति समः । तुलया सम्मितस्तुल्यः । 'नौवयोधर्म—' (४. ४. ९१) इति यत् । समान इव दृश्यते । 'त्यदादिषु दृशोऽनालोचने कञ्च' (३. २. ६०) इति 'समानान्ययोश्चे'ति वक्तव्यात् कञ् क्विंश्च । 'दृग्दृशवतुषु' (६. ३. ८९) इति समानस्य सः । समानम् आधारणं मानं चास्य साधारणः समानश्च ॥

टीका० — समसप्तकं तुल्ये । एते वाच्यलिङ्गाः । 'षम ष्टम शब्दे' । पचादिः । समः । तुलया सम्मितस्तुल्यः । 'नौवयोधर्म —' (४. ४. ९१) इत्यादिना यत् । समान इव दृश्यत इति सदृक्षः । सदृक् शान्तः । 'दृशे क्सनुप्रत्ययो वक्तव्यः' (वा० ३. २. ६०) इति क्सन् । व्रश्चादिना षत्वम् । 'षढोः कः सि' (८. २. ४१) इति कुत्वम् । 'दृक्षे चेति

१. 'यात्व' ग. घ. ङ. पाठः. २. 'या । य' ख. पाठः.

वक्तव्यम्' (वा० ६. ३. ८९) इति समानस्य सभावः। सदृक्षः। 'समानान्ययोश्चेति वक्तव्यम्' (वा० ३. २. ६०) इति कञ्क्विनौ। 'दृक्दृशवतुषु' (६. ३. ८९) इति समानस्य सभावः। सदृशः सदृक्। 'आग्नीध्रसाधारणादञ् वक्तव्यः' (वा० ५. ४. ३६) इति स्वार्थेऽञ्विकल्पः। तेन स्त्रियामञ्पक्षे टिड्ढाणञ्—' (४. १. १५) इत्यादिना ङीप्। साधारणी। कनि टापि साधारणा॥

स्युरुत्तरपदे त्वमी।
निभसङ्काशनीकाशप्रतीकाशोपमादयः॥ ३८॥

क्षीर०—वाच्यलिङ्गास्तुल्यार्थाश्चैते। यथा चन्द्रनिभं मुखम्, पद्मसङ्काशम्। नियतं भाति निभम्। समं काशते सङ्काशम्। आदिशब्दाच्चन्द्रप्रतिमः, पतिरूपः, आयामभूतः इत्यादि। चन्द्रेण निभ इत्यादौ न भवति। समास एवोत्तरपदत्वस्य रूढेः॥

टीका०—निभादयस्तूत्तरपदभूताः सन्तः सदृशवचनाः, वाच्यलिङ्गा इति परं पूर्वस्माद् विशेषः। उदाहरणं तु पितृनिभः, मातृसंकाशः। 'काशृ दीप्तौ'। तालव्यान्तः। घञि संकाशः। पचाद्यचि 'इकः काशे' (६. ३. १२३) इति पूर्वपददीर्घत्वे नीकाशः। घञि प्रतीकाशः। आदिना भूतरूपकल्पानां ग्रहणम्। यथा पितृकल्पः पितृरूपः पितृभूतः॥

कर्मण्या तु विधाभृत्याभृतयो भर्म वेतनम्।
भरण्यं भरणं मूल्यं निर्वेशः पण इत्यपि॥ ३९॥

क्षीर०—कर्मणि साधुः कर्मण्या। विधीयतेऽनया विधा, लक्ष्ये भोजनपिण्डे रूढा। भ्रियतेऽनयेति 'संज्ञायां समज—' (३. ३. ९९) इति क्यपि साधुः। 'स्त्रियां क्तिन्' (३. ३. ९४)। मनिन्। ल्युट् तुट् च, वीयतेऽनेन वेतनम्। 'वी गत्यादौ'। भरणे साधु भरण्यम्। मूलेनानाम्यं मूल्यम्। नौवयोधर्म—' (४. ४. ९१) इति यत्। निर्विश्यते भुज्यते निर्वेशः। पण्यते आभाष्यते पणः। 'नित्यं पणः परिमाणे' (३. ३. ६६) इति साधुः॥

---

१. 'ण्या, भरण्यं वा। वि' ग. घ. ङ, 'ण्या। अनुवि' ख. पाठः.

टीका० — कर्मण्यैकादशकं वेतने । कर्मणा संपद्यत इति कर्मण्या । 'कर्मवेशाद् यत्' (५. १. १००)। 'ये चाभावकर्मणोः' (६. ४. १६८) इति प्रकृतिभावः । धाञोऽङ् । विधा । भृञः 'संज्ञायां समज —' (३. ३. ९९) इत्यादिना क्यप् । भृत्या । 'कर्मणि भृतौ' (३. २. २२) इति निपातनात् क्तिनि भृतिः । मनिना भर्म । 'वी गत्यादौ' । 'वीपथिभ्यां तनन्' (उ० ३. ५१) । वेतनम् । 'राजेरन्यः' (उ० ३. १००) इति बाहुलकोऽन्यः । भरण्यम् । ल्युटि भरणम् । मूल्यपणौ साधितौ । वेश उक्तः । निर्पूर्वाद् निर्वेशः ॥

सुरा हलिप्रिया हाला परिस्रुद् वरुणात्मजा ।
गन्धोत्तमा प्रसन्नेरा कादम्बर्यो परिस्रुता ॥ ४० ॥
मदिरा कश्यमद्ये चापि

क्षीर० — **सूयते परिवास्यते सुरा । हलिनो बलस्य प्रिया । जहाति लज्जामनया हाला । हलति विलिखति वाङ्गम् । ज्वलादित्वाण्णः । परिस्रवति परिस्रुत् । परिस्रुता च । वरुणात्मजा वारुणी, समुद्रोत्थत्वात् । गन्धेनोत्तमा गन्धोत्तमा । प्रसीदति प्रसन्ना, अच्छसुरा । एति भ्राम्यत्यनया इरा । कुत्सिताम्बरस्य नीलवाससः इयं कादम्बरी । सहार्थे तृतीया । माद्यन्त्यनया मदिरा । कशिदेशे भवं कश्यम् । मदे साधु मद्यं, माद्यत्यनेन वा । 'कृत्यल्युटो बहुलम्' (३. ३. ११३) इति करणे 'गदमद—' (३. १. १००) इति यत् । स्वादुरसा मादिष्ठा, कल्या, हारहूरा, कापिशायनं च ॥**

टीका० — सुरात्रयोदशकं मद्ये । सुपूर्वाद् रातेरङि सुरा । बलभद्ररुच्यत्वाद् हलिप्रिया । 'स्रु गतौ' । क्विपि परिस्रुत् तान्ता । मथनकाले सागरादियं वरुणसुता जातेत्यतो वरुणात्मजा । तदुक्तं —

"वरुणस्य ततः कन्या प्रार्थ्यमाना परिग्रहम्"

इति । सीदतेः क्तः । प्रसन्ना । इः कामः, तं रातीति इरा ह्रस्वादिः । 'आतोऽनुपसर्गे कः' (३. २. ३) । गोमन्तपर्वते कदम्बकोटरजत्वात् कादम्बरी । तदुक्तं —

१. 'ङ् । अनुवि' ग. पाठः. २. 'ल' क. पाठः. ३. 'चार्यतेऽनया सु' ग. घ. ङ. पाठः. ४. 'मा । प्र' ख. पाठः.

"कदम्बकोटराज्जाता नाम्ना कादम्बरी तु सा ।"

नैरुक्तो वर्णसङ्घातलोपः । मुदिरवत् किरचि मदिरा । कशिः सौत्रस्ताल-व्यान्तः । 'जनेर्यक्' (उ० ४. ११२) इति बाहुलको यक् । कश्यम् । 'गदमद-चरयमश्चानुपसर्गे' (३. १. १००) इति मद्यम् ॥

अवदंशस्तु भक्षणम् ।

क्षीर० — अवदश्यते पानरुचिजननार्थमवदंशः खरविदंशमभ्य-वहार्यम् । चर्वणमुपदंशश्च ॥

टीका० — ओडशिकायामुपदंशः ॥

शुण्डा पानमदस्थानं

क्षीर० — शु(ण्ड्य ? ण्य)ते शुण्डा । 'शुण गतौ' । पानमदयो-रास्पदं कल्यापालगृहैकदेशः । शाश्वतस्तु —

"कुञ्जराणां करः शुण्डा शुण्डा कादम्बरी मता" ॥

टीका० — शुण्डात्रयं पानागारे । पिबन्त्यस्मिन्निति पानम् । शुण्डा ताल्व्यादिः । पिबतां मदस्तत्रोपजायत इति मदस्थानम् ॥

मधुवारा मधुक्रमाः ॥ ३९ ॥

क्षीर० — क्रमेण मधुपानावसराः ॥

टीका० — असकृन्मधुपानक्रमे मधुवारद्वयम् । वारः क्रमः परिपा-टिरिति पर्यायाः । षष्ठीसमासः । बहुत्वाद् बहुवचनम् ॥

क्षीर० — "गौडी पैष्टी च माध्वी च (प ? फ)लोत्था च सुरा स्मृता" इति सुराया भेदानाह —

मध्वासवो माधवकः

माक्षिकमिश्रम् आसूयते मध्वासवः । मधुनो विकारो मधुकृतो वा माधवकः । कुलालादित्वाद् वुञ् ॥

---

१. 'क्षीरमि' ग. घ. पाठः.

मधु माद्वीकमद्ययोः ।

मद्यते मधु माद्यत्यनेन वा । मृद्वीकाया विकारो माद्वीकम् । माध्वीकमित्युपाध्यायः । मद्यस्योक्तत्वादद्वयोरित्येके पेठुः । तन्न । सामान्यविशेषरूपत्वात् ॥

टीका०—मधूकपुष्पकृते मद्ये मध्वासवचतुष्कम् । मधूकपुष्पं मधु, तस्यासवः सन्धानं मध्वासवः । मधुना कृतो माधवकः । 'कुलालादिभ्यो वुञ्' (४. ३. ११८) । मधुप्रकृतित्वान्मधु । मृद्वीका द्राक्षा, तस्या विकारो माद्वीकम् । एतत् तु 'पचाम मधु माध्वीकमि'त्यत्र टीकाकृतोक्तम् । न द्वयोः नपुंसकमेवेत्यर्थः ॥

मैरेयमासवः शीधुः

क्षीर०—मिरायां देशे भवो गौड्याः सुराया विशेषो मैरेयः । शेरतेऽनेन शीधुः । शीधोरित्येके पठित्वा शीधुप्रकृतिक इति व्याख्यन् । यदाहुः—'मध्वासवस्तु मैरेयम्' । तन्न । यन्माला—'मैरेयो गदितः शीधुः' । पक्वरसोऽपि ॥

टीका०—मैरेयत्रयं मद्यविशेषे । यद्यपि—

"शीधुरिक्षुरसैः पक्वैरपक्वैरासवो भवेत् ।
मैरेयं धातकीपुष्पगुडधानाम्बुसंहितम् ॥"

इति माधवः, तथापि सूक्ष्मभेदमनादृत्यैतदुक्तम् । 'शीङ्स्थुक्लक्वलञ्वालञः' (उ० ४. ३८) इति धुक्प्रत्ययः । अर्धर्चादिपाठात् पक्षे क्लीबम् । शीधोः परेण सम्बन्ध इत्यन्यः ॥

मेदको जगलः समौ ॥ ४० ॥

क्षीर०—मेद्यति स्निह्यत्यनेन मेदकः । भृशं गलतीति जगल सुरायाः सन्धानद्रव्यपङ्कः ॥

---

१. 'न्य' ग. घ. ङ. पाठः. २. 'मि' क. पाठः. ३. 'मू । य' क. ख. पाठः. 'च' क ङ. ढ. पाठः. ५. 'को धुक्', ६. 'धु' ङ. ज. पाठः.

टीका० — मेदकद्वयं सुराकल्के। जगलः चवर्गादिः।

"मद(नादौ? नद्रौ) पिष्टमद्ये जगले धूर्तमेदके"

इति रभसः॥

सन्धानं स्यादभिषवः

क्षीर० — सन्धीयते सन्धानं, वंशाङ्कुरफलादीन् बहुकालं सन्धाय यत् क्रियते। अभिषूयते चिरं क्लेद्यते अभिषवः। भावसाधनो वा। सुरासन्धौ वर्तते[1]॥

टीका० — सुरासन्धानेऽभिषवद्वयम्। धाञो ल्युट्। सन्धानम्। स्नानेऽभिषव उक्तः॥

किण्वं[2][3] पुंसि तु नग्नहूः।

क्षीर० — कणति[4] कीयते[5] वा सुरानेन किण्वं, माषदलव्योषादि सुराबीजाख्यम्। नग्नेन(हू? ह्व)यते स्पर्धते सुरास्वादनाभावाद्[6] नग्नहूः। नग्नहुर्मालायाम्॥

टीका० — नानाद्रव्यकृते सुराबीजे किण्वद्वयम्। नग्नमाह्वयत इति नग्नहूः नग्नह्वौ नग्नह्वः। 'ह्वयतेश्च' इति क्विप्। अव्युत्पन्नोऽयमुकारान्त इत्यन्यः।

"विद्याद् देयमृणं परिवृत्ते नग्नहुं किण्वम्"

इति नाममाला। 'क्लीबे किण्वं च नग्नहुरि'त्यमरमाला[7] च॥

कारोत्तमः सुरामण्डः

क्षीर० — कारेण क्रियया वश्यान्मुख्यः कारोत्तमः। सुरो[8](त्थाः? त्थः) स्वच्छभागः॥

टीका० — सुराया मण्डेऽग्रभागे कारोत्तरः॥

---

१. 'र्ते' क. पाठः. २. 'कि' ख. पाठः. ३. 'ण्वः' ग. घ. ङ. पाठः. ४. 'कि', ५. 'की', ६. 'च्छा' क. ग. घ. पाठः. ७. 'ला॥' ग. पाठः. ८. 'रापार्थो मूर्छाभा' ग. घ. ङ. पाठः.

मधु मार्द्वीकमद्ययोः ।

मद्यते मधु माद्यत्यनेन वा । मृद्वीकाया विकारो मार्द्वीकम् । माध्वीकमित्युपाध्यायः । मद्यस्योक्तत्वादद्वयोरित्येके पेठुः । तन्न । सामान्यविशेषरूपत्वात् ॥

टीका० —मधूकपुष्पकृते मद्ये मध्वासवचतुष्कम् । मधूकपुष्पं मधु, तस्यासवः सन्धानं मध्वासवः । मधुना कृतो माधवकः । 'कुलालादिभ्यो वुञ्' (४. ३. ११८) । मधुप्रकृतित्वान्मधु । मृद्वीका द्राक्षा, तस्या विकारो मार्द्वीकम् । एतत् तु 'पचाम मधु माध्वीकामि'त्यत्र टीकाकृतोक्तम् । न द्वयोः नपुंसकमेवेत्यर्थः ॥

मैरेयमासवः शीधुः

क्षीर० —मिरायां देशे भवो गौड्याः सुराया विशेषो मैरेयः । शेरतेऽनेन शीधुः । शीधोरित्येके पठित्वा शीधुप्रकृतिक इति व्याख्यन् । यदाहुः—'मध्वासवस्तु मैरेयम्' । तन्न । यन्माला—'मैरेयो गदितः शीधुः' । पक्वरसोऽपि ॥

टीका० —मैरेयत्रयं मद्यविशेषे । यद्यपि—

"शीधुरिक्षुरसैः पक्वैरपक्वैरासवो भवेत् ।
मैरेयं धातकीपुष्पगुडधानाम्बुसंहितम् ॥"

इति माधवः, तथापि सूक्ष्मभेदमनादृत्यैतदुक्तम् । 'शीङस्थुक्लक्वलञ्वालञः' (उ० ४. ३८) इति धुक्प्रत्ययः । अर्धर्चादिपाठात् पक्षे क्लीबम् । शीधोः परेण सम्बन्ध इत्यन्यः ॥

मेदको जगलः समौ ॥ ४० ॥

क्षीर० —मेद्यति स्निह्यत्यनेन मेदकः । भृशं गलतीति जगलः सुरायाः सन्धानद्रव्यपङ्कः ॥

---

१. 'न्य' ग. घ. ङ. पाठः. २. 'मि' क. पाठः. ३. 'मू । य' क. ख. पाठः. ४. 'च' क ङ. ठ. पाठः. ५. 'को धुक्', ६. 'धु' ङ. ज. पाठः.

टीका० — मेदकद्वयं सुराकल्के । जगलः चवर्गादिः ।

"मद(नादौ ? नद्रौ) पिष्टमद्ये जगले धूर्तमेदके"

इति रभसः ॥

सन्धानं स्यादभिषवः

क्षीर० — सन्धीयते सन्धानं, वंशाङ्कुरफलादीन् बहुकालं सन्धाय यत् क्रियते । अभिषूयते चिरं क्लेद्यते अभिषवः । भावसाधनो वा । सुरासन्धौ वर्तेते[1] ॥

टीका० — सुरासन्धानेऽभिषवद्वयम् । धाञो ल्युट् । सन्धानम् । स्नानेऽभिषव उक्तः ॥

कि[2]ण्वं[3] पुंसि तु नग्नहूः ।

क्षीर० — कणति[4] कीयते[5] वा सुरानेन किण्वं, माषदल्व्योषादि सुराबीजाख्यम् । नग्नेन(हू ? ह्व)यते स्पर्धते सुरास्वादनाभावाद् नग्नहूः । नग्नहुर्मालायाम्[7] ॥

टीका० — नानाद्रव्यकृते सुराबीजे किण्वद्वयम् । नग्नमाह्वयत इति नग्नहूः नग्नहौ नग्नहुः । 'ह्वयतेश्च' इति क्विप् । अव्युत्पन्नोऽयमुकारान्त इत्यन्यः ।

"विद्याद् देयमृणं परिवृत्ते नग्नहुं किण्वम्"

इति नाममाला । 'क्लीबे किण्वं च नग्नहुरि'त्यमरमाला च ॥

कारोत्तमः सुरामण्डः

क्षीर० — कारेण क्रियया वश्यान्मुख्यः कारोत्तमः । सुरो[8](त्थाः ? त्थः) स्वच्छभागः ॥

टीका० — सुराया मण्डेऽग्रभागे कारोत्तरः ॥

---

१. 'र्ते' क. पाठः. २. 'क्वि' ख. पाठः. ३. 'ण्वः' ग. घ. ङ. पाठः. ४. 'क्वि', ५. 'क्री', ६. 'च्छा' क. ग. घ. पाठः. ७. 'ला ॥' ग. पाठः. ८. 'रापार्थो मूर्छाभा' ग. घ. ङ. पाठः.

आपानं पानगोष्ठिका ॥ ४१ ॥

क्षीर० — आपीयतेऽस्मिन्नापानम् । पानाय गोष्ठी आसनं पानगोष्ठी । गावो नाना[1]विधा वाचस्तिष्ठन्त्यत्रेति ॥

टीका० — आपानद्वयं संभूय यत्र पीयते, तत्र ॥

चषकोऽस्त्री पानपात्रं

क्षीर० — चषन्त्यनेन चषकः । गल्वर्कोऽपि ॥

सरकोऽप्यनुत[2]र्षणम् ।

विवक्षातो विध्यनुवादौ[3] । सरति सरकः । अनु[4]तृष्यत्यनेनानुत[5]र्षणं[6] सुरापरिवेषणम् । चषकपर्यायावेतावित्येके । यन्मुनिः — 'चषकश्चानुतर्षश्च सरकः' ॥

टीका० — चषकचतुष्कं मद्यपानपात्रे । अपिशब्दात् सरकोऽप्यस्त्री । 'सरकं वा ना । अनुतर्षो ने'ति तु रत्नकोषः । 'चष भक्षणे' । मूर्धन्यषः । 'सृ गतौ' । 'कृञादिभ्यो वुन्' (उ० ५. ३५) । चषकसरकौ । 'ञितृषा पिपासायाम्' । ल्युट् । अनुतर्षणम् ॥

धूर्तोऽक्षदेवी कितवोऽक्षधूर्तो द्यूतकृत् समाः ॥ ४२ ॥

क्षीर० — धूर्वति हिनस्ति धूर्तः । अक्षैर्दीव्यति[7] विजिगीषते तच्छीलोऽक्षदेवी । किं तवास्तीति पणते कितवः ॥

टीका० — धा[8]र्तपञ्चकं द्यूतकारे । द्यूतविषये धृतिरवस्थानमस्यास्तीति धार्तः । मत्वर्थे ज्योत्स्नादित्वादण् । अक्षदेवी णिन्यन्तः । किं तवास्तीति वदतीति कितवः । पृषोदरादिः ॥

स्युर्लग्नकाः प्रतिभुवः सभिका द्यूतकारकाः ।

क्षीर० — लगति लग्नकः । प्रतिनिधिर्भवति प्रतिभूः । सभा

---

१. 'नावा' ख. पाठः. २. 'क' ग. ङ. पाठः. ३. 'दः' ग. पाठः. ४. 'कृ', ५. 'क' ङ. पाठः. ६. 'णम् । च' ख. पाठः. ७. 'ति जि' ग. घ. ङ. पाठः. ८. 'धू' ङ. ज. पाठः.

द्यूतशालाऽस्त्यस्य सभिकः। द्यूतकारकः। द्वौ द्वौ भिन्नार्थौ। आद्ययोः सर्वसामान्यत्वात्[1] ॥

टीका०—लग्नकद्वयं लग्नके। 'ओ लजी ओ लस्जी व्रीडे'। क्तः। कन्। लग्नकः। क्विपि प्रतिभूः। सहिकद्वयं सहिअरे इति ख्याते। द्यूतसहयोगात् सहिकः। व्रीह्यादित्वात् ठन् ॥

द्यूतोऽस्त्रियामक्षवती कैतवं पण इत्यपि ॥ ४३ ॥

क्षीर०—दीव्यते स्म द्यूतम्। कितवस्य कर्म कैतवम्। पणनं पणः। दरोदरं नानार्थे ॥

टीका०—द्यूतचतुष्कं द्यूते। दिवेः क्तः। द्यूतः। 'दिवोऽविजिगीषायाम्' (८. २. ४९) इति निष्ठानत्वं न भवति। अक्षाः पाशका अत्रोपायत्वेन सन्तीति मतुपि अक्षवती। स्वभावात् स्त्रीत्वम्। कितवकर्म कैतवम्। युवादित्वादण्। पणयोगादर्शआद्यचि पणः ॥

पणोऽक्षेषु ग्लहः

क्षीर०—पण्यते पणो बन्धकः। गृह्यते ग्लहः। 'अक्षेषु ग्लहः' (३. ३. ७०) इत्यप्[2] ॥

टीका०—अक्षेषु द्यूतेषु आढ इति ख्याते ग्लहः। 'अक्षेषु ग्लहः' (३. ३. ७०) इति निपातनाद् ग्रहेरपि लत्वम् ॥

अक्षास्तु देवनाः पाशकाश्च ते।

क्षीर०—अक्ष्णोत्यक्षः। दीव्यत्यनेन देवनः। पाश्यते बध्यतेऽनेन पाशकः। प्रासक इत्येके ॥

टीका०—अक्षत्रयं पाशके। विभीतकादावप्यक्षः। पाशकस्ताल्व्यशः ॥

परिणायस्तु शारी[3]णां समन्तान्नयने

क्षीर०—वामदक्षिणयोः शारी[4]णां परिणयनं परिणायः। 'परि-

१. 'न्यात् ॥' ग. घ. ङ. पाठः. २. 'ति साधुः ॥' ख. पाठः. ३, ४. 'रा' ग. घ. ङ. पाठः.

न्योर्णीणोर्द्यूताभ्रेषयोः' (३.३.३७) इति घञ्। शृणाति शारिः[1] विखेलनी ॥

टीका० — वामदक्षिणयोरग्रतश्च शारीणां नयनं परीणायः । 'परिन्योर्णीणोर्द्यूताभ्रेषयोः' (३. ३. ३७) इति घञ् । 'उपसर्गस्य घञ्यमनुष्ये बहुलम्' (६. ३. १२२) इति पक्षे दीर्घत्वम् ॥

अस्त्रियाम् ॥४४॥

अष्टापदं शारिफलं

क्षीर० — अष्टौ पदान्यत्राष्टापदम् । शारयः[2] फलन्त्यत्र शारि[3]फलं[4] खेलनाधारश्चतुरङ्गफलकादि । आकर्षो नानार्थे ॥

टीका० — अष्टापदद्वयं शारिपट्टे । एतावस्त्रियौ । प्रतिपङ्क्ति अष्टौ पदान्यस्येत्यष्टापदम् । 'अष्टनः संज्ञायाम्' (६. ३. १२५) इति पूर्वपददीर्घत्वम् । देशान्तरे चतुरङ्गस्यैव पीठिकायां शकद्यूतकमपि प्रवर्तते । 'शॄ हिंसायाम्' । 'शृणातेः शकुनौ' इतीञ् । शारिः । तालव्यादिरुक्तः । ईश्वरा हि प्रायः पट्ट एव दीव्यन्ति ॥

प्राणिद्यूतं समाह्वयः[5] ।

क्षीर० — प्राणिभिर्मेषकुक्कुटादिभिर्द्यूतं प्राणिद्यूतम् । संघर्षेणाह्वयन्तेऽत्र समाह्वयः ॥

टीका० — प्राणिद्यूतद्वयं मेषकुक्कुटादियुद्धे । तदुक्तम् —

"अप्राणिभिर्यत् क्रियते तल्लोके द्यूतमुच्यते ॥
प्राणिभिः क्रियते यत् तु स विज्ञेयः समाह्वयः ॥"

इति ॥

---

१. 'रः', २. 'राः फ', ३. 'र' ग. घ. ङ. पाठः. ४. 'लं लेखना' ख., लं खल' ग. पाठः. ५. 'णात्राह्वयन्ते स' ख. पाठः.

उक्ता भूरिप्रयोगत्वादेकस्मिन् येऽत्र यौगिकाः ॥ ४९ ॥
ताद्धर्म्यादन्यतो वृत्तावूह्या लिङ्गान्तरेऽपि ते ॥ ४९½ ॥

क्षीर० — अत्र शूद्रवर्गे ये सम्बन्धिशब्दा लक्ष्यबाहुल्यादेकस्मिन् लिङ्गे उक्ताः, ते तद्गुणयोगादन्यत्र वर्तमाना लिङ्गान्तरेऽप्युत्प्रेक्ष्याः। यथा — कर्मण्या भृतिः कर्मण्यं वेतनं, हलिप्रिया सुरा[1] हलिप्रियं मद्यम्, अक्षवती सभा अक्षवद् द्यूतम्। एवं मालाकारी स्त्री। अक्षदेवनी स्त्री। तथा अनुपदीनं पा(द)त्रम् ॥

इति श्रीक्षीरस्वाम्युत्प्रेक्षितेऽमरकोशोद्घाटने भूम्यादिकाण्डो

द्वितीयः।

टीका० — समस्तलिङ्गप्रहादेव संपूर्णतां परिहरति — अत्र च वर्गे ये यौगिकाः शब्दाः मायाकारमार्दङ्गिकवैणविककर्मकरनियोज्यचौराक्षदेविप्रभृतयः पुंसि प्रचुरप्रयोगदर्शनाद् एकस्मिन् लिङ्गे पुंस्यभिहिताः, ते ताद्धर्म्यात् तद्योगवशादेकक्रियाकारित्वात् ततोऽन्यत्र स्त्र्यादौ वृत्तौ सत्यां लिङ्गान्तरेऽप्यूह्याः। तद् यथा — कर्मकरी स्त्री, कर्मकरं ब्रह्मवृन्दमित्यादि। ये त्वयौगिकाः करणमालिककुम्भकारादयः, ते जातिवचनत्वाच्छूद्रादिवदेव स्त्रीपुंसयोरिति ॥

इति बन्द्यघटीयश्रीसर्वानन्दकृतौ
टीकासर्वस्वे शूद्रवर्गः ॥

काण्डश्च द्वितीयः समाप्तः।

---

१. 'रा ग. घ. ङ. पाठः.

TRIVANDRUM SANSKRIT SERIES.

No. LII

THE

NÂMALINGÂNUSÂSANA

OF

AMARASIMHA

With the commentary

Ṭîkâsarvaswa

of

VANDYAGHATÎYA-SARVÂNANDA

EDITED BY

T. GANAPATI SÂSTRÎ

Curator of the Department for the publication of Sanskrit Manuscripts, Trivandrum.

Part IV. - 3rd Kânda.

PUBLISHED UNDER THE AUTHORITY OF THE GOVERNMENT OF HIS HIGHNESS THE MAHARAJAH OF TRAVANCORE.

TRIVANDRUM:
PRINTED BY THE SUPERINTENDENT. GOVERNMENT PRESS
1917.

अनन्तशयनसंस्कृतग्रन्थावलिः।

ग्रन्थाङ्कः ५२.

नामलिङ्गानुशासनं

श्रीमदमरसिंहविरचितं

वन्द्यघटीयसर्वानन्दप्रणीतया
टीकासर्वस्वाख्यया व्याख्यया समेतं

संस्कृतग्रन्थप्रकाशनकार्याध्यक्षेण
त. गणपतिशास्त्रिणा
संशोधितम्।

चतुर्थः सम्पुटः—तृतीयं काण्डम्।

तच्च
अनन्तशयने
महामहिमश्रीमूलकरामवर्मकुलशेखरमहाराजशासनेन
राजकीयमुद्रणयन्त्रालये तदध्यक्षेण
मुद्रयित्वा प्रकाशितम्।

कोलम्बाब्दाः १०९२, क्रैस्ताब्दाः १९१७.

स्मृता ग्रन्थाः ।

स्मृता ग्रन्थकर्तारः।

शुद्धिपत्रम् ।

९७तमस्य पृष्ठस्य सर्वाः, ९८तमस्य पृष्ठस्य सप्त च पङ्क्तय आवृत्ताः ।

॥ श्रीः ॥

श्रीमदमरसिंहविरचितं

नामलिङ्गानुशासनं

वन्द्यघटीयश्रीसर्वानन्दप्रणीतया टीकासर्वस्वाख्यया

व्याख्यया समेतम् ।

तृतीयं काण्डम् ।

अथ विशेष्यनिघ्नवर्गः ।

विशेष्यनिघ्नैः सङ्कीर्णैर्नानार्थैरव्ययैरपि ।
लिङ्गादिसङ्ग्रहैर्वर्गाः सामान्ये वर्गसंश्रयाः ॥ १ ॥

विशेष्यनिघ्नैरित्यादि । वक्ष्यमाणे सामान्ये काण्डे विशेष्यनिघ्नैः विशेष्यायत्तैः सुकृतिप्रभृतिभिः, सङ्कीर्णैः परस्परविजातीयार्थैः कर्मपारायण-परस्परप्रभृतिभिः, अनेकार्थैः नाकादिभिः, अव्ययैः आङादिभिः, लिङ्गस-ङ्ग्रहैः 'स्त्रियामीदूद्विरामैकाज्' इत्यादिभिः, आदिशब्देन नामसङ्ग्रहैश्च लङ्का-शेफालिकादिभिः । ते च पूर्ववर्गसंश्रयाः पूर्ववर्गानुगताः । तथाहि — सुकृति-प्रभृतयोऽमरमनुष्यादिषु विशेषणतया सम्बद्धाः, कर्मोदयस्तद्व्यापारतया, नाका-दयो वाचकतया, आङादयोऽवध्यादिद्योतकतया, स्त्रियामीदूदित्यादयश्च तत्त-ल्लिङ्गादिप्रतिपादकतया । अत एव साधारणत्वात् सामान्यकाण्डमिदम् ॥

G. P. T. 541. 500-5-7-91. 19

स्त्रीदाराद्यैर्यद् विशेष्यं यादृशैः प्रस्तुतं पदैः ।
गुणद्रव्यक्रियाशब्दास्तथा स्युस्तस्य भेदकाः ॥ २ ॥

इह शास्त्रे रूपभेदात् प्रायशो लिङ्गनिर्णयः । सोऽत्रापि वर्गे रूपभेदादेवेति भ्रमनिरासार्थमाह— स्त्रीदाराद्यैः स्त्रीदारकलत्राद्यैः पदैर्यादृशैर्लिङ्गैः स्त्रीत्वादियुक्तैर्यदर्थरूपं विशेष्यं विशेषणीयं प्रक्रान्तं, तस्य विशेष्यस्य भेदका गुणादिशब्दाः तथा स्युः तल्लिङ्गा एव भवेयुः । एतदुक्तं भवति— यदा विशेष्यं स्त्रीलिङ्गेन विशेष्यपदेन प्रस्तूयते, तदा गुणादिशब्दोऽपि सुकृतिप्रभृतिः तस्य विशेषकः स्त्रीलिङ्गः । यदा पुँल्लिङ्गेन प्रस्तूयते, तदा पुँल्लिङ्गः । यदा क्लीबलिङ्गेन प्रस्तूयते, तदा क्लीबलिङ्गः । विशेष्यनिघ्नत्वेन विशेष्यगतमेव लिङ्गं विशेषणान्याददत इति यावत् । तद्यथा— सुकृतिनी स्त्री, सुकृतिनो दाराः, सुकृति कलत्रमित्यादि ॥

सुकृती पुण्यवान् धन्यः

सुकृतित्रयं **सुकृतिनि** । 'धनगणं लब्धा' (४. ४. ८४) इति यत् । धन्यः ॥

महेच्छस्तु महाशयः ।

महेच्छद्वयं **महाशये** । महाशयो महामनाः ॥

हृदयालुः सहृदयः

प्रकृष्टहृदये हृदयालुद्वयम् । 'हृदयाच्चालुरन्यतरस्याम्' (वा० ५. २. १२२) इत्यालुः ॥

महोत्साहो महोद्यमः ॥ ३ ॥

महोत्साहद्वयं **महाध्यवसाये** ॥

प्रवीणनिपुणाभिज्ञविज्ञनिष्णातशिक्षिताः ।
वैज्ञानिकः कृतमुखः कृती कुशल इत्यपि ॥ ४ ॥

प्रवीणदशकं **सुज्ञे** । 'पुण कर्मणि शुभे' । इगुपधलक्षणः कः । निपुणः । 'निनदीभ्यां स्नातेः कौशले' (८. ३. ८९) इति षत्वे निष्णातः ।

शिक्षा सञ्जातास्येति तारकादित्वाद् इतच् । शिक्षितः । विज्ञानेन व्यवहरतीति वैज्ञानिकः । 'चरति' (४. ४. ८) इति ठक् । मत्वर्थीयठनि विज्ञानिको वा पाठः । कृतमभ्यस्तं मुखम् उपायोऽनेनेति कृतमुखः । कृती इन्नन्तः । कुशेस्तालव्यात् सौत्राद् वृषादिकलचि कुशलः ॥

पूज्यः प्रतीक्ष्यः

पूज्यद्वयं **पूज्ये** ॥

सांशयिकः संशयापन्नमानसः ।

सांशयिकद्वयं **संशयविषयस्थाणवादौ** । 'संशयमापन्नः' (५. १. ७३) इति ठक्, न तु संशयवति पुरुष इति न्यासः । अतः मतम्यर्थे बहुव्रीहिः । संशयकर्तरि पुरुष एवेति तद्ग्रन्थमतिः ॥

दक्षिणीयो दक्षिणार्हस्तत्र दक्षिण्य इत्यपि ॥ ५ ॥

दक्षिणीयत्रयं **दक्षिणायोग्ये** । 'कडङ्करदक्षिणाच्छ च' (५. १. ६९) इति छयत्प्रत्ययाभ्यां दक्षिणीयदक्षिण्यौ ॥

स्युर्वदान्यस्थूललक्षदानशौण्डा बहुप्रदे ।

वदान्यचतुष्कं **बहुप्रदे** । 'वदेरान्यः' (उ० ३. १०४) । वदान्यः । दाने शौण्डः प्रसक्तो दानशौण्डः ॥

जैवातृकः स्यादायुष्मान्

जैवातृकद्वयं **दीर्घायुषि** । चन्द्रे जैवातृक उक्तः ॥

अन्तर्वाणिस्तु शास्त्रवित् ॥ ६ ॥

अन्तर्वाणिद्वयं **शास्त्रज्ञे** । अन्तः अन्तश्शरीरे वाणी शास्त्रशरीरभूता अधिदैवतभूता अस्येत्यन्तर्वाणिः । समासान्तस्यानित्यत्वाद् 'नद्यृतश्च' (५. ४. १५३) इति न कप् । 'गोस्त्रियोरुपसर्जनस्य' (१. २. ४८) इति ह्रस्वत्वम् ॥

परीक्षकः कारणिकः

परीक्षकद्वयं **निरूपके** । कारणं हेतुः, तेन व्यवहरति । 'चरति' (४. ४. ८) इति ठकि कारणिकः ॥

वरदस्तु समर्धकः ।

यो देवतादिर्वरं वाञ्छितं फलं ददाति, तत्र वरदद्वयम् । समृध्यति समृद्ध्या युज्यत इति ण्वुलि समर्धकः ॥

हर्षमाणो विकुर्वाणः प्रमना हृष्टमानसः ॥ ७ ॥

हृष्टहृदये हर्षमाणचतुष्कम् । 'ताच्छील्यवयोवचनशक्तिषु चानश्' (३. २. १२९)। हर्षमाणविकुर्वाणौ । अथवा विकुर्वाणे 'अकर्मकाच्च' (१. ३. ३५) इति तङ् । प्रमनाः सान्तः ॥

दुर्मना विमना अन्तर्मनाः

वैमनस्ययुक्ते दुर्मनस्त्रयम् । त्रयमेव सान्तम् ॥

स्यादुत्क उन्मनाः ।

सोत्कण्ठे उत्कद्वयम् । 'उत्क उन्मनाः' (५. २. ८०) इति निपातितम् । उच्छब्दात् तद्गाति कन्प्रत्ययः । उन्मनाः सान्तः ॥

दक्षिणे सरलोदारौ

दक्षिणत्रयम् ऋज्वाशये । वनौषधौ सरल उक्तः ॥

सुकलो दातृभोक्तरि ॥ ८ ॥

एक एव दाता च भोक्ता च स सुकलः । त्यागभोगयुक्त इत्यन्यः । सुष्ठु कल्पत इति सुकलः । पृषोदरादिः ॥

तत्परे प्रसितासक्तौ

तत्परे तात्पर्यवति प्रसितद्वयम् । 'षिञ् बन्धने' । 'षञ्ज सङ्गे' । क्तः ॥

१, 'आत्मनेपदम् । प्र' क. ञ. पाठः.

इष्टार्थोद्युक्त उत्सुकः ।

इष्टार्थे अभिमतप्रयोजने उद्युक्त उद्यतः उत्सुकः ॥

प्रतीते प्रथितख्यातवित्तविज्ञातविश्रुताः ॥ ९ ॥

धनादिना ख्याते प्रतीतषट्कम् । विदिर्लाभे। 'वित्तो भोगप्रत्यययोः' (८. २. ५८) इति निपातनाद् न नत्वम् । वित्तः ॥

गुणैः प्रतीते तु कृतलक्षणाहतलक्षणौ ।

त्यागशौर्यादिगुणैः ख्याते कृतलक्षणद्वयम्। 'लक्षणं नामचिह्नयोः' । कृतमभ्यस्तमनुरागाद् लक्षणं नामास्येति कृतलक्षणः । आहतं गुणितम् असकृदुच्चारितं नामास्येत्याहतलक्षणः ॥

इभ्य आढ्यो धनी

बहुधने इभ्यत्रयम् । इभमर्हतीति इभ्यः । 'दण्डादिभ्यो यत्' (५. १. ६६)। एत्यैनं ध्यायन्तीत्याढ्यः । घञर्थे कः । पृषोदरादिढत्वम् ॥

स्वामी त्वीश्वरः पतिरीशिता ॥ १० ॥

अधिभूर्नायको नेता प्रभुः परिवृढोऽधिपः ।

स्वामिदशकं **प्रभौ** । 'स्वामिन्नैश्वर्ये' (५. २. १२६) इति मत्वर्थे निपातनात् स्वामी । 'अश्नोतेराशुकर्मणि वरट् च' (उ० ५. ५८) इति वरट् अकारस्य च ईकारः । ईश्वरः । 'पातेर्डतिः' (उ० ४. ५८) । पतिः । ईशितृनेतारौ तृन्नन्तौ । क्विपि अधिभूः । 'प्रभौ परिवृढः' (७. २. २१) इति परिवृढो निपातितः । बृंहेः क्तः इडागमाभावः नकारहकारयोर्लोपः परस्य च ढत्वं निपात्यते । अधिपातीत्यधिपः ॥

अधिकर्द्धिः समृद्धः स्यात्

अधिकर्द्धिद्वयम् अतिशयितसम्पद्युक्ते ॥

कुटुम्बव्यापृतस्तु यः ॥ ११ ॥
स्यादभ्यागारिकस्तस्मिन्नुपाधिश्च पुमानयम् ।

कुटुम्बं पोष्यवर्गादि । तत्र व्यापृतः पोषणादिव्यग्रो यः, तत्र अभ्यागारिकद्वयम् । अगारं भक्तिः सेव्यमस्येत्यागारिकः । 'अचित्ताददेशकालाट्ठक्§' (४. ३. ९६) । अभ्यधिक आगारिकोऽत्यन्तागारशरणोऽभ्यागारिकः । उपादधाति कुटुम्बमित्युपाधिः । आविष्टलिङ्गत्वादयं योषिदादौ च पुमान् ॥

वराङ्गरूपोपेतो यः सिंहसंहननो हि सः ॥ १२ ॥

यः प्रत्येकमवयवशुद्धया रूपवान् सुन्दरः, स सिंहसंहननः ॥

निर्वार्यः कार्यकर्ता यः सम्पतन् सत्त्वसम्पदा ।

व्यसने यदविकारकं, तत् सत्त्वम् । तत्सम्पदा सम्पतन् उद्यमं कुर्वन् यः कार्यकर्ता, स निर्वार्यः । क्वचित् 'संयुत' इति पाठः ॥

अवाचि मूकः

अवाग्द्वयं बोब्बेति ख्याते । अवाक् चान्तः ॥

अथ मनोजवः स पितृसन्निभः ॥ १३ ॥

मनोजवद्वयं पितृतुल्ये । जुः सौत्रः । लोकानां मनो जवति प्रविशतीति अच् ॥

सत्कृत्यालङ्कृतां कन्यां यो ददाति स कूकुदः ।

परिणेत्रे योऽलङ्कृत्य कन्यां सत्कृतां ददाति, स कूकुदः । दीर्घादिः ॥

लक्ष्मीवाल्लँक्ष्मणः श्लीलः श्रीमान्

---

§ 'ठञ्' इति मुद्रिताष्टाध्यायीपाठः ।

लक्ष्मीवच्चतुष्कं **सम्पद्युक्ते शोभायुक्ते** च । 'लक्ष्म्या अच्च' (ग० ५. २. १००) इति पामादिपाठाद् नः अकारश्चान्तादेशः । लक्ष्मणः । सिध्मादिलचि श्रीलः । 'कपिलकादीनां रो लत्वमापद्यते' (वा० ८. २. १५) इति लत्वम् ॥

स्निग्धस्तु वत्सलः ॥ १४ ॥

स्निग्धद्वयं **स्निग्धे** । 'वत्सांसाभ्यां कामबले' (५. २. ९८) इति मत्वर्थलचि वत्सलः ॥

स्याद् दयालुः कारुणिकः कृपालुः सूरतः समाः ।

दयालुचतुष्कं **कृपालौ** । 'स्पृहिगृहिपतिदयिनिद्रातन्द्राश्रद्धाभ्य आलुच्' (३. २. १५८) । दयालुः । कारुण्ययोगात् कारुणिकः । 'अत इनिठनौ' (५. २. ११५) इति ठन् । 'हलस्तद्धितस्य' (६. ४. १५०) इति यलोपः । कृपां लातीति कृपालुः । 'डुप्रकरणे मितद्र्वादिभ्य उपसङ्ख्यानम्' (वा० ३. २. १८०) इति डुः । सूरतो दीर्घादिः ॥

स्वतन्त्रोऽपावृतः स्वैरी स्वच्छन्दो निरवग्रहः ॥ १५ ॥

स्वतन्त्रपञ्चकं **स्वतन्त्रे** । स्वतन्त्रः स्वप्रधानः । स्वेन आत्मना ईर्ते प्रचरतीति णिनिः । 'स्वादीरेरिणोर्वृद्धिर्वक्तव्या' (वा० ६. १. ८९) इति वृद्धिः । स्वैरी । स्वच्छन्दः स्ववशः । निरवग्रहः परेणानियम्यः ॥

परतन्त्रः पराधीनः परवान् नाथवानपि ।
अधीनो निघ्न आयत्तोऽस्वच्छन्दो गृह्यकोऽप्यसौ ॥ १६॥

परतन्त्रनवकं **परायत्ते** । परस्मिन् अधीनः पराधीनः । 'सप्तमी शौण्डैः' (२. १. ४०) इति समासः । 'अषडक्षाशितंग्वलङ्कर्मालंपुरुषाध्युत्तरपदात् खः' (५. ४. ७) इति खः । परशब्दः श्रेष्ठवचनः । अधिगत इनः ईश्वरोऽनेनेति अधीनः । ह्रस्वादिः । निहन्यत इति

निघ्नः। 'स्थाघ्नापाव्यधिहनियुध्यर्थम्' इति घञर्थे कः। 'यती प्रयत्ने'। क्तः। आयत्तः॥

खलपूः स्याद् बहुकरः

खलपूद्वयं सम्मार्जनकारिणि कोळगोमीति[1] ख्याते। खलं भूस्थानकण्ठेषु। तत् पुनातीति क्विप्। खलपूः। बहु करोति सम्मार्ष्टीति 'किंयत्तद्बहुषु कृञोऽज्विधानम्' (वा० ३. २. २१) इत्यच्। बहुकरः॥

दीर्घसूत्रश्चिरक्रियः।

स्वल्पकालसाध्ये कर्मणि चिरेण कार्यकारिणि दीर्घसूत्रद्वयम्। दीर्घं सूत्रमस्येति दीर्घसूत्रः। चिरं क्रिया अनुष्ठानमस्येति चिरक्रियः॥

जाल्मोऽसमीक्ष्यकारी स्यात्

गुणदोषानपरामृश्य यः करोति स जाल्मः॥

कुण्ठो मन्दः क्रियासु यः ॥१७॥

क्रियासु व्यापारेषु मन्दः कुण्ठः। 'कुठि च' इत्यतः पचाद्यच्॥

कर्मक्षमोऽलङ्कर्मीणः

अनायासेन कर्मनिष्पादके कर्मक्षमद्वयम्। पराधीनवत् खप्रत्ययेन अलङ्कर्मीणः॥

क्रियावान् कर्मसूद्यतः।

कर्म कर्तुमुद्यते क्रियावान् तान्तः॥

स कार्मः कर्मशीलो यः

१. 'गो' म. पाठः.

कार्मद्वयं कर्मशीले। 'कार्मस्ताच्छील्ये' (६. ४. १७२) इति निपातनात् साधुः ॥

कर्मशूरस्तु कर्मठः ॥ १८ ॥

कर्मशूरद्वयं कर्मठे। 'कर्मणि घटोऽठच्' (५. २. ३५)। कर्मठः ॥

भरण्यभुक् कर्मकरः

भरण्यं वेतनं यो भुङ्क्ते, स कर्मकरः। अयं शूद्रविशेषाभिधानप्रस्तावेऽभिहितः। इह तु क्रियाशब्दप्रक्रमेण भरण्यभुगिति पर्यायान्तरदर्शनार्थं कर्मकारेण सह विषयभेदप्रदर्शनार्थं चानूदितः ॥

कर्मकारस्तु तत्क्रियः।

तत्क्रियः वेतनं विना कर्मक्रियो दासादिः कर्मकारः। 'कर्मण्यण्' (३. २. १) ॥

अपस्नातो मृतस्नातः

मृतमुद्दिश्य स्नाते अपस्नातद्वयम् ॥

आमिषाशी तु शौष्कलः ॥ १९ ॥

आमिषाशिद्वयं मत्स्यमांसभक्षणशीले। शौष्कलस्तालव्यादिमूर्धन्यमध्यः ॥

बुभुक्षितः स्यात् क्षुधितो जिघत्सुरशनायितः।

बुभुक्षितचतुष्कं जातबुभुक्षे। त्रिषु तारकादित्वाद् इतच्। अत्तमिच्छतीति जिघत्सुः ॥

परान्नः परपिण्डादः

---

१. 'याप्र' च. छ. पाठः.

परान्नोपजीविनि परान्नद्वयम् । परस्यान्नमस्येति वैयधिकरण्येन बहुव्रीहिः । परपिण्डमत्तीति अण् । परपिण्डादः ॥

भक्षको घस्मरोऽद्मरः ॥ २० ॥

भक्षकत्रयं **भक्षणपरे** । 'सृघस्यदः क्मरच्' (३. २. १६०) । घस्मरः । अद्मरः ॥

आद्यूनः स्यादौदरिको विजिगीषाविवर्जिते ।

आद्यूनद्वयम् **उदरपूरके** । 'दिवोऽविजिगीषायाम्' (८. २. ४९) इति निष्ठातकारस्य नत्वे आद्यूनः । 'उदराट्ठगाद्यूने' (५. २. ६७) इति ठक् । औदरिकः । विजिगीषाविवर्जित इति, योऽत्यन्तक्षुधया बाध्यमान उदर एव प्रसक्त इत्यर्थः ॥

उभावात्मंभरिः कुक्षिंभरिः स्वोदरपूरके ॥ २१ ॥

पोष्यवर्गं विहाय स्वोदरमात्रपूरके आत्मंभरित्रयम् । 'फलेग्रहिरात्मंभरिश्च' (३. २. २६) इति निपातितः । चकारात् कुक्षिंभरिरपि । भृञ इन् उपपदस्य (तु? मु) मागम इति जयादित्यः । भाष्ये तु कुक्षिंभरिसिद्ध्यर्थम् अत्यल्पमिदमुच्यते भृञः कुक्ष्यात्मनो(र्नुं? र्मुं) (चेति) वक्तव्यमिति चकाराद् उदरंभरिमपि समा(स? दध)ते । 'आत्मोदरकुक्षिषु भृञः ख च' इति कातन्त्रे वररुचिसूत्रम् ॥

सर्वान्नीनस्तु सर्वान्नभोजी

चतुर्णामपि वर्णानां योऽन्नं भुङ्क्ते, तत्र सर्वान्नीनद्वयम् । 'अनुपदसर्वान्नायानयं बद्धाभक्षयतिनेयेषु' (५. २. ९) इति खः । सर्वान्नीनः ॥

गृध्नुस्तु गर्धनः ।
लुब्धोऽभिलाषुकस्तृष्णक्

गृध्नुपञ्चकं **लुब्धे** । 'त्रसिगृधिधृषिक्षिपेः क्नुः' (३. २. १४०) । गृध्नुः । 'जुचङ्क्रम्य—' (३. २. १५०) इत्यादिना युचि गर्धनः ।

लुभेः क्तः। लुब्धः। 'लष कान्तौ'। 'लषपत—' (३.२.१५४) इत्यादिना उकञ्। अभिलाषुकः। 'स्वपितृषोर्नजिङ्' (३. २. १७२) इति नजिङि तृष्णक्। जान्तः। 'तत् करोति—' (ग० ३.१.२६) इति ण्यन्ताद् ण्वुलि तृष्णकोऽजन्तोऽपीष्यते ॥

समौ लोलुपलोलुभौ ॥ २२ ॥

अतिशयलुब्धे लोलुपद्वयम्। लुपेर्लुभेश्च यङ्। पचाद्यच्। 'यङोऽचि च' (२. ४. ७४) इति यङो लुक्। 'न धातुलोप आर्धधातुके' (१. १. ४) इति गुणनिषेधः ॥

उन्मदस्तून्मदिष्णुः स्याद्

उन्मदद्वयम् **उन्मादशीले**। उद्गतो मदोऽस्येत्युन्मदः। 'अलंकृञ्-निराकृञ्—' (३. २. १३६) इत्यादिनेष्णुचि उन्मदिष्णुः ॥

अविनीतः समुद्धतः।

अविनीतद्वयम् **अविनीते**। हन्तेः क्तः। समुद्धतः ॥

मत्ते शौण्डोत्कटक्षीबाः,

मत्तचतुष्कं **मत्ते**। शुण्डा पानागारं, तत्र भवा स्थितिरस्येति 'शेषे' (४.२.९२) अण्। शौण्डः। 'संप्रोदश्च कटच्' (५.२.२९) इति कटच्। उत्कटः। 'अनुपसर्गात् फुल्लक्षीब—' (८.२.५५) इति निपातितः। 'क्षीबृ मदे'। क्तः। तत्र तकारलोप इडभावश्च निपात्यते ॥

कामुके कमितानुकः ॥ २३ ॥

कम्रः कामयिताभीकः कमनः कामनोऽभिकः।

कामुकनवकं **कामुके**। कमेः पूर्ववदुकञ्। कामुकः। 'आयादय आर्धधातुके वा' (३. १. ३१) इति णिङन्ताददन्ताच्च तृन्। कामयिता

कमिता च । 'अनुकाभिकाभीकः कमिता' (५. २. ७४) इति निपातनात् त्रयं निपातितम् । तत्र कमितेत्यर्थे कप्रत्ययान्ता एते निपात्यन्ते । 'नमिकम्पिस्म्य-जसकमहिंसदीपो रः' (३. २. १६७) । कम्रः ।'अनुदात्तेतश्च हलादेः' (३. २. १४९) इति युच् । कमनः । 'कमेर्णिङ' (३. १. ३०) इति णिङ् । कामनः ॥

विधेयो विनयग्राही वचनेस्थित आश्रवः ॥ २४ ॥

विधेयचतुष्कं विधेये । 'स्यादाश्रवो विधेय' इति रत्नकोषः । विनयं विधिनिषेधवचनं ग्रहीतुं शीलमस्येति णिनिः । विनयग्राही । वचनेस्थित इत्यलुक्समासः । वाक्यमेव वा । आदिष्टं श्रृणोतीति अच् । आश्रवः ॥

वश्यः प्रणेयः

वश्यद्वयं वशंगते । वशम् आयत्तिं गतो वश्यः । 'वशं गतः' (४. ४. ८६) इति यत् । प्रणेतुं शक्यः प्रणेयः ॥

निभृतविनीतप्रश्रिताः समाः ।

निभृतत्रयं विनीते । श्रिञः क्तः । प्रश्रितः ॥

धृष्टे धृष्णग् वियातश्च

धृष्टत्रयं निर्लज्जे । 'धृषेश्चेति वक्तव्यम्' (वा० ३. २. १७२) नजिङ् । धृष्णक् । धृष्णुगिति पाठे 'त्रसिगृधि—' (३. २. १४०) इत्यादिना क्नुः । 'या प्रापणे' । क्तः । वियातः ॥

प्रगल्भः प्रतिभान्वितः ॥ २५ ॥

प्रत्युत्पन्नमतित्वं प्रतिभा, तदन्विते प्रगल्भः ॥

स्यादधृष्टे तु शालीनः

अधृष्टद्वयं सलज्जे । 'शालीनकौपीने अधृष्टाकार्ययोः'(५. २. २०) इत्यनेन शालाशब्दात् खप्रत्ययो निपातितः । शालीनस्तालव्यादिः ॥

विलक्षो विस्मयान्विते ।

विलक्षद्वयं **वैलक्ष्ययुक्ते** ॥

अधीरे कातरः

व्यसनादावाकुलहृदये अधीरद्वयम् ॥

त्रस्नुर्भीरुभीरुकभीलुकाः ॥ २६ ॥

त्रस्नुचतुष्कं **भयशीले** । 'त्रसिगृधिधृषिक्षिपेः क्नुः'(३.२. १४०) । त्रस्नुः । 'भियः क्रुक्लुकनौ' (३. २. १७४) । भीरुभीलुकौ । 'भियः क्रुकन् वक्तव्यः' (वा० ३. २. १७४) । भीरुकः ॥

आशंसुराशंसितरि

आशंसुद्वयम् **आशंसनशीले** । प्रियार्थस्य प्राप्तुमिच्छा आशंसा । तच्छील आशंसुः । 'सनाशंसभिक्ष उः' (३. २. १६८) । आशंसुः ॥

गृहयालुर्ग्रहीतरि ।

ग्रहयालुद्वयं **ग्रहणशीले** । 'ग्रह ग्रहणे' । चुरादिणिचि 'स्पृहिगृहि —' (३. २. १५८) इत्यादिना आलुच् । 'अयामन्ताल्वाय्येत्न्विष्णुषु' (६. ४. ५५) इति णेः अयादेशः ॥

श्रद्धालुः श्रद्धया युक्ते

श्रद्धायुक्ते श्रद्धालुः । दयालुवदालुच् ॥

पतयालुस्तु पातुके ॥ २७ ॥

पतनशीले पतयालुद्वयम् । ग्रहयालुवत् पतयालुः । 'लषपत —' (३. २. १५४) इत्यादिना उकञ् । पातुकः ॥

लज्जाशीलोऽपत्रपिष्णुः

लज्जाशीलद्वयं **लज्जाशीले**। 'अलंकृञ्निराकृञ्—' (३.२.१३६) इत्यादिना इष्णुच्। अपत्रपिष्णुः॥

स्याद् वर्धिष्णुस्तु वर्धनः।

अपत्रपिष्णुवद् वर्धिष्णुः। 'अनुदात्तेतश्च हलादेः (३. २. १४९) इति युचि वर्धनः॥

उत्पतिष्णुस्तूत्पतिता

उत्पतनशीले उत्पतिष्णुद्वयम्। उत्पूर्वात् पतेः अपत्रपिष्णुवद् उत्पतिष्णुः॥

अलंकरिष्णुस्तु मण्डनः॥ २८॥

अलंकरिष्णुद्वयमलंकरणशीले। अपत्रपिष्णुवदलंकरिष्णुः। 'क्रुधमण्डार्थेभ्यश्च' (३. २. १५१) इति युचि मण्डनः॥

भूष्णुर्भविष्णुर्भविता

भूष्णुत्रयं **भवनशीले**। 'ग्लाजिस्थश्च ग्स्नुः' (३. २. १३९) इति चकाराद् ग्स्नुः। 'भुवश्च' (३. २. १३८) इतीष्णुचि भविष्णुः। छान्दसोऽप्ययं भाषायां निबद्धः॥

वर्तिष्णुर्वर्तनः समौ।

वर्तिष्णुद्वयं **वर्तनशीले**। अपत्रपिष्णुवद् वर्तिष्णुः। वर्धनवद् युचि वर्तनः॥

निराकरिष्णुः क्षिप्नुः स्यात्

निराकरिष्णुद्वयं **निराकरणशीले**। अपत्रपिष्णुवदिष्णुचि निराकरिष्णुः। त्रस्नुवत् क्षिप्नुः॥

सान्द्रस्निग्धस्तु मेदुरः॥ २९॥

सान्द्रस्निग्धद्वयं **नवमेघवदतिस्निग्धे**। 'भञ्जभासमिदो घुरच्' (३. २. १६१)। मेदुरः॥

ज्ञाता तु विदुरो विन्दुः

ज्ञातृत्रय **ज्ञानशीले** । तृनि ज्ञाता । 'विदिभिदिच्छिदेः कुरच्' (३. २. १६२) । विदुरः । 'विन्दुरिच्छुः' (३. २. १६९) इत्यनेन विदेर्ज्ञानार्थाद् विन्दुर्निपातितः ॥

विकासी तु विकस्वरः ।

विकासिद्वयं **विकसनशीले** । 'कस गतौ' । विपूर्वः । 'वौ कसलषकत्थस्रम्भः' (३. २. १४३) इति घिनुण् । विकासी । 'स्थेशभासपिसकसो वरच्' (३. २. १७५) । विकस्वरः । दन्त्यसः ॥

विसृत्वरो विसृमरः प्रसारी च विसारिणि ॥ ३० ॥

विसृत्वरचतुष्कं **प्रसरणशीले** । 'इण्नशजिसर्तिभ्यः क्वरप्' (३. २. १६३) । विसृत्वरः । 'सृघस्यदः क्मरच्' (३. २. १६०) । विसृमरः । 'प्रे लपसृद्रुमथवदवसः' (३. २. १४५) इति घिनुण् । प्रसारी । मत्स्ये विसारी उक्तः ॥

सहिष्णुः सहनः क्षन्ता तितिक्षुः क्षमिता क्षमी ।

सहिष्णुषट्कं **क्षमाशीले** । अलंकरिष्णुवत् सहिष्णुः । वर्तनवत् सहनः । 'क्षमूष् सहने' । तृन् । क्षन्ता । इट्पक्षे क्षमिता । 'शमित्यष्टाभ्यो घिनुण्' (३. २. १४१) । क्षमी ॥

क्रोधनोऽमर्षणः कोपी

क्रोधनत्रयं **क्रोधने** । मण्डनवत् क्रोधनः । न मर्षयतीत्यमर्षणः । आवश्यकणिनौ कोपी ॥

चण्डस्त्वत्यन्तकोपनः ॥ ३१ ॥

चण्डद्वयम**तिकोपने** । 'चडि कोपे' । चण्डः । पचाद्यच् । क्रोधनवत् कोपनः ॥

जागरूको जागरिता

जागरणशीले जागरूकद्वयम् । 'जागरूकः' (३. २. १६५) इत्यनेन ऊकगुणौ निपातितौ ॥

घूर्णितः प्रचलायितः ।

घूर्णितद्वयं **निद्राघूर्णिते** । 'घुण घूर्ण भ्रमणे' । क्तः । घूर्णितः । प्रचल इवाचरतीति क्यङन्तात् क्तः । प्रचलायितः ॥

स्वप्नक् शयालुर्निद्रालुः

स्वप्नक्त्रयं **निद्राशीले** । 'स्वपितृषोर्नजिङ्' (३. २. १७२) । स्वप्नक् । जान्तः । 'शीङश्चेति वक्तव्यम्' (वा० ३. २. १५८) इत्यालुः । शयालुः । दयालुवन्निद्रालुः ॥

निद्राणशयितौ समौ ॥ ३२ ॥

निद्रां गते निद्राणद्वयम् । 'संयोगादेरातो धातोर्यण्वतः' (८. २. ४३) इति निष्ठातकारस्य नत्वे निद्राणः । शेतेः क्तः । शयितः ॥

पराङ्मुखः पराचीनः

पराङ्मुखद्वयं **विमुखे** । 'विभाषाञ्चेरदिक्स्त्रियाम्' (५. ४. ८) इति खः । पराचीनः ॥

स्यादवाङप्यधोमुखः ।

अवाङ्मुखद्वयम**धोमुखे** । अञ्चतेः ऋत्विगादिना क्विन् । अवाङ् । चान्तः । स्त्रियामवाची ॥

देवानञ्चति देवद्र्यङ्

देवान् गच्छति पूजयति वा देवद्र्यङ् । चान्तः । 'विष्वग्देवयोश्च टेरद्र्यञ्चतावप्रत्यये' (६. ३. ९२) इत्यद्र्यादेशः । स्त्रियां देवद्रीची ॥

विष्वद्र्यङ् विष्वगञ्चति ॥ ३३ ॥

विष्वक् समन्ताद् गच्छति यः, स विष्वद्र्यङ् । विष्वक्सेनप्रस्तावे षकारो निरूपितः । सर्वं देवद्र्यङ्वत् ॥

यः सहाञ्चति सध्र्यङ् सः

सह तुल्यं गच्छतीति सध्र्यङ् । चान्तः । 'सहस्य सध्रिः' (६. ३. ९५) इति सध्र्यादेशः । स्त्रियां सध्रीची ॥

स तिर्यङ् यस्तिरोऽञ्चति ।

वक्रं गच्छति यः स तिर्यङ् । चान्तः । 'तिरसस्तिर्यलोपे' (६. ३. ९४) इति तिरःशब्दस्य तिरीत्यादेशः ॥

वदो वदावदो वक्ता

वदत्रयं **वक्तरि** । पचाद्यच् । वदः । 'चरिचलिपतिवदीनामच्याक् चाभ्यासस्य' (वा० ६. १. १२) इत्यागागमः द्विर्वचनं च । वदावदः । तृचि वक्ता ॥

वागीशो वाक्पतिः समौ ॥ ३४ ॥

निरवद्योदामवाणीके वागीशद्वयम् ॥

वाचोयुक्तिपटुर्वाग्ग्मी

वचनयुक्तिज्ञे वाचोयुक्तिपटुद्वयम् । 'वाग्दिक्पश्यद्भ्यो युक्तिदण्डहरेषूपसङ्ख्यानम्' (वा० ६. ३. २१) इत्यलुकि वाचोयुक्तिपटुः । नाममालायां तु वाचोयुक्तिरित्येव नाम । 'वाचो ग्मिनिः' (५. २. १२४) इति वाग्ग्मी । द्विगकारवान् ॥

वावदूकोऽतिवक्तरि ।

अत्यन्तवक्तरि वावदूकः । वदेर्यङन्ताद् 'यजजपदशां यङः'

(३. २. १६६) इति बहुवचननिर्देशादन्यतोऽप्यूक इति धातुपारायणम्। 'चेक्रीयीतान्तानां यजिजपिदंशिवदाम्' इत्यूक इति कालापाः ॥

स्याज्जल्पाकस्तु वाचालो वाचाटो बहुगर्ह्यवाक् ॥ ३५ ॥

जल्पाकचतुष्कं **गर्ह्यभाषिणि**। 'जल्पभिक्षकुट्टलुण्टवृङः षाकन्' (३. २. १५५)। 'आलजाटचौ बहुभाषिणि' (५. २. १२५) इत्यालजाटच्प्रत्ययाभ्यां वाचालवाचाटौ। एतौ कुत्सार्थे प्रत्ययौ ॥

दुर्मुखे मुखराबद्धमुखौ

दुर्मुखत्रय**मप्रियवादिनि**। निन्दितमुखो दुर्मुखः। खरवन्मुखरः। अबद्धमुखो ह्रस्वादिः ॥

शक्लः प्रियंवदे।

शक्लद्वयं **प्रियंवदे**। 'शक्लृ शक्तौ'। †'मूङ्पूङ्शकिभ्यः क्लः' (उ० ४. ११०)। शक्लः। 'प्रियवशे वदः खच्' (३. २. ३८)। प्रियंवदः ॥

लोहलः स्यादस्फुटवाग्

लोहलद्वय**मव्यक्तवचने** ॥

गर्ह्यवादी तु कद्वदः ॥ ३६ ॥

निन्द्यवादिनि गर्ह्यवादिद्वयम्। कुत्सितं वदतीति 'रथवदयोश्च' (६. ३. १०२) इति कोः कद्भावः। कद्वदः ॥

समौ कुवादकुवदौ

परदोषकथनशीले कुवादद्वयम्। कर्मण्यणि कुवादः। पचाद्यचि कुवदः ॥

स्यादसौम्यस्वरोऽस्वरः।

काकस्वरादिरसौम्यस्वरोऽस्वरः ॥

---

† 'मूशक्यबिभ्यः क्लः' इति मुद्रितोणादिपाठः।

रवणः शब्दनः

शब्दकारिणि रवणद्वयम्। उभयत्र 'चलनशब्दार्थादकर्मकाद्युच्' (३. २. १४८) ॥

नान्दीवादी नान्दीकरः समौ ॥ ३७ ॥

भेरीसमाननान्दीवादनशीले नान्दीवादिद्वयम्। अथवा नान्दीश्लोकपठनकारिणि। तथाच भरताचार्यः—

"आशीर्वचनसंयुक्ता स्तुतिर्यस्मात् प्रवर्तते।
देवद्विजनृपादीनां तस्मान्नान्दीति सा स्मृता ॥"

णिनिः। नान्दीवादी। दिवाकरवत् टः। नान्दीकरः। 'मदकलकलविङ्कीकाकुनान्दीकरेभ्यः' इति मुरारिः ॥

जडोऽज्ञे

जडद्वयं **जडे**। तदुक्तम्—

"इष्टं वाऽनिष्टं वा सुखदुःखे वा न वेत्ति यो मोहात्।
तूष्णीकः परवशगः स भवति जडसंज्ञकः पुरुषः" ॥

अनेडमूकस्तु वक्तुं श्रोतुमशिक्षिते।

वचनश्रवणरहितेऽनेडमूकः। कृतनञ्समासोऽवयवार्थशून्य एव रूढः।

'त्रिलिङ्गोऽनेडमूकः स्याच्छठवाक्छ्रुतिवर्जिते'

इति रभसश्च। केचित्तु एडश्चासौ मूकश्चेत्येडमूकमिच्छन्ति। पूर्वं पृथक् कथितत्वात् तयोः समुदायेऽपि रूपमूह्यमिति कृत्वा नेच्छन्ति ॥

तूष्णींशीलस्तु तूष्णीकः

मौनशीले तूष्णींशीलद्वयम्। *'तूष्णींशीले को मलोपश्च वक्तव्यः' (वा० ५. ३. ७२) इति को मलोपश्च ॥

---

* 'शीले को' इति मुद्रितवार्त्तिकपाठः।

नग्नोऽवासा दिगम्बरः ॥ ३८ ॥

परिधानवस्तुशून्ये नग्नत्रयम् । ओलस्जिधातोर्लग्न एव वर्णव्यत्यया-न्नग्नः । अवासाः सान्तः ॥

निष्कासितोऽपकृष्टः स्याद्

निष्कासितद्वयं **निःसारिते** । निष्कासिते प्रथमो मूर्धन्यो द्वितीयो दन्त्यसः ॥

अपध्वस्तस्तु धिक्कृतः ।

कृतधिक्कारेऽपध्वस्तद्वयम् ॥

आत्तगर्वोऽभिभूतः स्याद्

अरिणा भग्नदर्पे आत्तगर्वद्वयम् । आत्तो गृहीतो गर्वोऽस्येत्यात्तगर्वः । **'बत्त गन्ध अर्दने'** । आत्तगन्ध इति पाठ इत्यन्यः ॥

दापितः साधितः समौ ॥ ३९ ॥

धनादिकं दापितद्वयम् । ददातेर्ण्यन्तात् पुकि दापितः । **'दय दानग-तिरक्षणहिंसादानेषु'** । ण्यन्तादिति पुरुषोत्तमः ॥

अधिक्षिप्तः प्रतिक्षिप्तः

अधिक्षिप्तद्वयं **कृताक्षेपे प्रेषिते वा** । तदुक्तम्—

''आहूय प्रेष्यते यस्तु प्रतिक्षिप्तः स उच्यते''

इति ॥

बद्धे कीलितसंयतौ ।

कीलेन निश्चलीकृते कीलितद्वयम् । रज्ज्वा तु बद्धे वक्ष्यति ॥

आपन्न आपत्प्राप्तः स्यात्

आपन्नद्वयमापद्ग्रस्ते ॥

कान्दिशीको भयद्रुतः ॥ ४० ॥

भयोपद्रुते कान्दिशीकद्वयम् । कां दिशं गच्छामीति चिन्तयन् पलायितः कान्दिशीकः । पृषोदरादिः ॥

आक्षारितः क्षारितोऽभिशस्ते

परस्त्रियाः परपुरुषस्य वा मैथुनं प्रति दूषिते आक्षारितत्रयम् । मैथुनं प्रत्याहूत इत्यन्यः ॥

संकसुकोऽस्थिरे।

असन्देहविषयेऽपि यः सन्देहकृत्, तत्र संकसुकद्वयम् । 'कस गतौ' । 'समि कस उकन्' (उ० २. ३२) इत्युकन् । संकसुको द्विदन्त्यो ह्रस्वमध्यः ॥

व्यसनार्तोपरक्तौ द्वौ

दैवी मानुषी वा पीडा व्यसनं, तदार्ते व्यसनार्तद्वयम् । चन्द्रार्कौ राहुग्रस्तावुपरक्तावुभौ ॥

विहस्तव्याकुलौ समौ ॥ ४१ ॥

शोकादिभिरितिकर्तव्यताशून्ये विहस्तद्वयम् ॥

विक्लवो विह्वलः

विक्लवद्वयं स्वकीयाङ्गधारणाशक्ते ॥

स्यात्तु विवशोऽरिष्टदुष्टधीः।

आसन्नमरणमरिष्टं, तेन दूषितबुद्धिर्विवशः ॥

कश्यः कशार्हे

कशामश्वताडनीमपराधाद् योऽर्हति, तत्र कश्यद्वयम् । 'दण्डादिभ्यो यः' (५. १. ६६) । कश्यः ॥

सन्नद्धे स्यादाततायी वधोद्यते ॥ ४२ ॥

कृतसन्नाहे हन्तुमुद्यते आततायी ॥

द्वेष्ये त्वक्षिगतः

द्वेष्यद्वयं द्वेष्ये ॥

वध्यः शीर्षच्छेद्य इमौ समौ ।

वध्यद्वयं वध्ये । कश्यवद् वध्यः । 'शीर्षच्छेदाद् यच्च' (५. १. ६५) । शीर्षच्छेद्यः ॥

विष्यो विषेण यो वध्यः

विषेण वध्यो विष्यः । 'नौवयोधर्म—' (४. ४. ९१) इत्यादिना यत् ॥

मुसल्यो मुसलेन यः ॥ ४३ ॥

मुसलेन वध्यो मुसल्यः । कश्यवद् यः ॥

शिश्विदानः कृष्णवर्त्मा

कृष्णवर्त्मा पापाचारः । शिश्विदानः द्वितालव्यः । 'श्विता वर्णे' । 'श्वितेर्दश्च' (उ० २. ९३) इत्यानच् सनो लुग् दश्चान्तादेशः ॥

चपलश्चिकुरः समौ ।

चपलद्वयं चपले ।

"अविमृश्य तु यः कार्यं पुरुषो वधबन्धनाद्यमाचरति ।
अविनिश्चितकारित्वात् स तु खलु चपलो बुधैर्ज्ञेयः ॥"

दोषैकदृक् पुरोभागी

दोषैकद्रष्टा पुरोभागी, नान्तः ॥

निकृतस्त्वनृजुः शठः ॥ ४४ ॥

निकृतत्रयं वक्राशये । 'शठ कैतवे' । तालव्यादिः । पचादिः । शठः ॥

कर्णेजपः सूचकः स्यात्

कर्णेजपद्वयम**नुचितादौ परोचके** । 'स्तम्बकर्णयो रमिजपोः' (३. २. १३) इति 'हस्तिसूचकयोरिति वक्तव्यम्' (वा० ३. २. १३) इत्यच् । कर्णेजपः । 'सूच पैशुन्ये' । ण्वुल् । सूचकः । दन्त्यादिः ॥

पिशुनो दुर्जनः खलः ।

परस्परभेदनशीले पिशुनत्रयम् । पिडिकाख्यशाखे पिशुनोक्ता ॥

नृशंसो घतुाकः क्रूरः पापः

नृशंसचतुष्कं **परद्रोहाचरणशीले** । 'शसु हिंसायाम्' । नैरुक्तो वर्णागमः । नृशंसः । ण्वुलि घातकः । पूर्वमुक्त्वा हिंसाशील उक्तः । 'कृती छेदने' । *'कृतेः क्रू च' (उ० २. २३)इति रक क्रू चादेशः । क्रूरः ॥

धूर्तस्तु वञ्चकः ॥ ४५ ॥

धूर्तद्वयं **प्रतारणशीले** । धुर्वीधातोर्हस्तवत् तः । धूर्तः । सृगालेऽपि वञ्चक उक्तः ॥

अज्ञे मूढयथाजातमूर्खवैधेयबालिशाः ।

अज्ञषट्कं **मूर्खे** । यादृशो जातो विवेकशून्यो यथाजातः । विधेय-शब्दाद् ज्योत्स्नाद्यणि वैधेयः । परदत्तं[1] श्यतीति बलिशः । बलिश एव बालिशः ॥

कदर्ये कृपणक्षुद्रकिम्पचानमितम्पचाः ॥ ४६ ॥

कदर्यपञ्चकं **कृपणे** । उग्रवत् क्षुद्रः । कुत्सितं पचानः कि-

---

१. 'त्तं पश्य' ङ. छ. पाठः.

---

* 'कृतेश्छः क्रू च' इति मुद्रितोणादिपाठः ।

म्पचानः । 'ताच्छील्यवयोवचनशक्तिषु चानश्' (३. २. १२९) । 'मितनखे च'(३. २. ३४) इति खश् । मितम्पचः । मितशब्देनार्थग्रहणात् 'पान्तावल्पम्पचान् मुनीन्' (स० ६. श्लो० ९६) इति भट्टिरिति रक्षितः ॥

निःस्वस्तु दुर्विधो दीनो दरिद्रो दुर्गतोऽपि सः ।

निःस्वपञ्चकं दरिद्रे । निष्क्रान्तः स्वाद् निःस्वः । **विधा समृद्धिर्दुःस्थास्येति** दुर्विधः । 'इण्सिञ्जिदीङुष्यविभ्यो नक्' (उ० ३. २) **इति दीङो नक्** । दीनः । पचाद्यचि दरिद्रः । दुःपूर्वो गमिर्निःस्वे ॥

वनीयको याचनको मार्गणो याचकार्थिनौ ॥ ४७ ॥

वनीयकपञ्चकं प्रार्थके । 'वनु याचने' । ध्वनिवद् इः । वनीमिच्छतीति क्यचि ण्वुल् । वनीयकः । एवमन्तःस्थयमध्यः ।

"नवकदम्बकदम्बकसन्ततप्रसवनीपवनीपकषट्पदः"

(न गच्छति?) इति कप्फिणाभ्युदये यमकादोष्ठ्यमध्यः । **'मार्ग अन्वेषणे'** । **ल्युट्** । मार्गणः । याचतेर्ण्वुल् । याचकः । 'अर्थाच्चासन्निहिते' (वा० ५. २. १३५) इतीनिः । अर्थी ॥

अहङ्कारी स्यादहंयुः

अहङ्कारिद्वयमहङ्कारयुक्ते । 'अहंशुभमोर्युस्' (५. २. १४०) इति युस् । अहंयुः । सकारः 'सिति च' (१. ४. १६)इति पदसंज्ञार्थः । **'वा पदान्तस्य'** (८. ४. ५९) इति परसवर्णविकल्पः ॥

शुभंयुस्तु शुभान्वितः ।

शुभंयुद्वयं शुभान्विते ॥

दिव्योपपादुका देवाः

दिवि भवा दिव्याः । मात्रादिकारणमनपेक्ष्याद्दृष्टवशादुत्पद्यन्त इति दिव्योपपादुकाख्या देवाः । कर्मधारयसमासः । देवनामस्वेऽप्यस्य त्रिलिङ्गत्वादिह वर्गे पाठः ॥

नृगवाद्या जरायुजाः ॥ ४८ ॥

नृगवादयो जरायुजशब्देनोच्यन्ते । आद्येन खराश्वप्रभृतयः ॥

स्वेदजाः कृमिदंशाद्याः

कृमिदंशाद्याः स्वेदजाः। ऊष्मा स्वेदः । आद्येन शकाद्याः ॥

पक्षिसर्पादयोऽण्डजाः ।

पक्षिमत्स्यसर्पादयोऽण्डजाः ॥

उद्भिदस्तरुगुल्माद्याः

तृणतरुगुल्माद्या उद्भिद उच्यन्ते ॥

उद्भिच्छब्दस्याभिधेयमुत्पाद्यास्य पर्यायमाह—

उद्भिदुद्भिज्जमुद्भिदम् ॥ ४९ ॥

उद्भित्त्रयं **तरुगुल्मादिषु** । उद्भिनत्तीति क्विप् । उद्भित् । भूमेरुद्भेदनमुद्भित्, ततो जातमुद्भिज्जम् । सम्पदादिक्विबन्ताज्जनेर्डः । इगुपधलक्षणः कः । उद्भिदम् । कामचारात् क्लीबनिर्देशः ॥

सुन्दरं रुचिरं चारु सुषमं साधु शोभनम् ।
कान्तं मनोरमं रुच्यं मनोज्ञं मञ्जु मञ्जुलम् ॥ ५० ॥

सुन्दरद्वादशकं **शोभने** । ङीपि सुन्दरी । दारुवच्चारु । 'सुविनिर्दुर्भ्यः—' (८. ३. ८८) इति षत्वे सुषमम् । 'राजसूय—' (३. १. ११४) इत्यादिना रोचतेः क्यबन्ताद् रुच्यं निपातितम् ॥

तदसेचनकं तृप्तेर्नास्त्यन्तो यस्य दर्शनात् ।

बहुशो दर्शनेऽप्यधिकां प्रीतिमुत्पादयति, असेचनकम् । ह्रस्वादि ॥

अभीष्टेऽभीप्सितं हृद्यं दयितं वल्लभं प्रियम् ॥ ५१ ॥

अभीष्टषट्कं प्रिये। 'हृदयस्य प्रियः' (४. ४. ९५) इति यत्। हृद्यम्। 'हृदयस्य हृल्लेखयदण्लासेषु' (६. ३. ५०) इति हृदादेशः। वल्लतेः रासभवद् वल्लभः॥

निकृष्टप्रतिकृष्टार्वरेफयाप्यावमाधमाः।
कुपूयकुत्सितावद्यखेटगर्ह्याणकाः समाः॥ ५२॥

निकृष्टत्रयोदशकं जात्यादिना निन्दिते। कृषेः क्तः। निकृष्टप्रतिकृष्टौ। अश्वनाम्नि अर्वा नान्त उक्तः। *'रिफ कत्थ्क बुद्धादौ'(?)। कर्मणि घञ्। रेफः। अदन्तः।

"रवर्णे पुंसि रेफः स्यात् कुत्सिते वाच्यलिङ्गवत्"

इति रभसश्च। रेपाः सान्तोऽपि पवर्गप्रथमवान्। तथाच माघे—'राजतः पुपुविरे †विरेपसः' (स० १४. श्लो० ३५) इति। 'या प्रापणे'। 'अर्तिह्री—' (७. ३. ३६) इत्यादिना पुक्। 'अचो यत्' (३. १. ९७)। याप्यः। अवशब्दादधःशब्दाच्च $'अवाधसोर्लोपश्च' इति भावार्थे मक्। अवमाधमौ। 'पूयी विसरणे'। अच्। कुपूयः। कुत्सा सञ्जातास्येति तारकादित्वादितचि कुत्सितः। 'अवद्यपण्य—' (३. १. १०१) इत्यादिना नञ्पूर्वाद् वदेर्यत्प्रत्ययान्तादवद्यं निपातितम्। 'खिट उत्रासने'। अच्। खेटः। 'गर्ह गल्ह कुत्सायाम्'। ण्यत्। गर्ह्यः। अणतेः क्वुन्। अणको ह्रस्वादिः॥

मलीमसं तु मलिनं कचरं मलदूषितम्।

मलीमसचतुष्कं मलिने। 'ज्योत्स्नातमिस्रा—' (५. २. ११४) इत्यादिना मलशब्दान्मत्वर्थे इनजीमसच्प्रत्ययान्तौ मलिनमलीमसौ निपातितौ। 'रथवदयोश्च' (६. ३. १०२) इति चकारात् कोः कति पचाद्यच्। कच्चरम्॥

---

* 'रिफ कत्थनयुद्धनिन्दाहिंसादानेषु' इति मुद्रितधातुपाठे दृश्यते। † 'निरेनसः' इति मुद्रितमाघे दृश्यते। $ 'अवद्यावमाधमार्वरेफाः' इति मुद्रितोणादौ दृश्यते।

पूतं पवित्रं मेध्यं च

पूतत्रयं **पवित्रे**। 'मेधृ सङ्गमे'। ण्यत्। मेध्यम्। ब्रह्मवर्गेऽपि पवित्रनाम प्राणिविषयमुक्तम् ॥

वीध्रं तु विमलार्थकम् ॥ ५३ ॥

स्वभावनिर्मलं वस्तुमात्रं वीध्रम्। विपूर्वादिन्धेः 'वाविन्धेः* क्रन्' (उ० २. २९) इति क्रन्। कित्त्वादनुनासिकलोपः ॥

निर्णिक्तं शोधितं मृष्टं निःशोध्यमनवस्करम् ।

निर्णिक्तपञ्चकं **प्रक्षालिते**। णिजिरः क्तः। 'उपसर्गादसमासेऽपि णोपदेशस्य' (८. ४. १४) इति णत्वम्। निर्णिक्तम्। 'शुध शौचे'। क्तः। शोधितम्। 'मृजू शुद्धौ'। क्तः। मृष्टम्। निष्क्रान्तं शोध्यं क्षालनीयं निःशोध्यम् ॥

असारं फल्गु

फल्गुद्वयमसारे। 'फल निष्पत्तौ'। वैल्गुवद् उः गुगागमश्च। फल्गु ॥

शून्यं तु वशिकं तुच्छरिक्तके ॥ ५४ ॥

शून्यचतुष्कं **शून्ये**। शून्यवशिकौ तालव्यशौ। रिक्तमेव रिक्तकम् ॥

क्लीबे प्रधानं प्रमुखप्रवेकानुत्तमोत्तमाः ।
मुख्यवर्यवरेण्याश्च प्रबर्हानवरार्ध्यवत् ॥ ५५ ॥
परार्ध्याग्रप्राग्रहरप्राग्र्याग्र्याग्रीयमग्रियम् ।

प्रधानसप्तदशकं **प्रधाने**। क्लीब इति निर्देशादजहल्लिङ्गता। तेन

१. 'नाकुव' ग. पाठः.

* 'वाविन्धेः' इत्येव मुद्रितोणादिपाठः ।

स्त्री प्रधानमित्येव भवति। 'न जाने सप्रधानो मे' इति चण्डीपाठः, सह प्रधानेन वर्तत इति साधुः। प्रकृष्टं मुखमारम्भोऽस्येति प्रमुखम्। 'शाखादिभ्यो यः' (५. ३. १०३)। मुख्यः। 'वर इच्छायाम्'। चुरादिरदन्तः। 'अचो यत्' (३. १. ९७)। वर्यः। ‡'वृङ एण्यः' (उ० ३. ९८)। अवरस्मिन्नर्धे भवम् अवरार्ध्यम्। 'परावराधमोत्तमपूर्वाच्च' (४. ३. ५) इति यत्। नञा अनवरार्ध्यम्। 'अग्राद् यत्' (४. ४. ११६)। 'घच्छौ च' (४. ४. ११७) इति यथाक्रमं यद्घच्छप्रत्ययाः। अग्र्यम् अग्रियम् अग्रीयं च।

"अग्रं प्राग्रहरं श्रेष्ठं मुख्यं वर्यं प्रहर्षणम्"

इति त्रिकाण्डे पाठादेकविंशतिरेव श्रेष्ठ इत्यन्यः॥

श्रेयान् श्रेष्ठः पुष्कलः स्यात् सत्तमश्चातिशोभने॥५६॥

श्रेयःपञ्चकमतिप्रशस्ये। ईयसुन्नन्तः श्रेयान्। 'पुषः कित्' (उ० ४. ४) इति कलच्। पुष्कलः॥

स्युरुत्तरपदे व्याघ्रपुङ्गवर्षभकुञ्जराः।
सिंहशार्दूलनागाद्याः पुंसि श्रेष्ठार्थगोचराः॥५७॥

व्याघ्रादयः सप्त उत्तरपदीभूताः श्रेष्ठार्थविषयाः पूर्वपदार्थस्य श्रेष्ठत्ववाचकाः पुँल्लिङ्गाश्च स्युः। तद् यथा—पुरुषव्याघ्रः। आद्येन वृषभादयः॥

अप्राग्र्यं द्वयहीने द्वे अप्रधानोपसर्जने।

अप्राग्र्यत्रयमप्रधाने। द्वयहीने क्लीबलिङ्गे॥

विशङ्कटं पृथु बृहद् विशालं पृथुलं महत्॥५८॥
वड्रोरु विपुलं

विशङ्कटनवकं महति। 'वेः शालच्छङ्कटचौ' (५. २. २८)। विशङ्कटविशालौ तालव्यशौ। भृगुवत् पृथु। पृषदादौ महद्बृहती अतिप्रत्य-

‡ 'वृञः' इति मुद्रितोणादिपाठः।

यान्ते निपातिते। सिध्मादिलचि पृथुलम्। वदेः 'स्फायितञ्चिवञ्च—' (उ० २. १३) इत्यादिना रक्। वद्रः। 'महति ह्रस्वश्च' (उ० १. ३२) इत्यनेन ऊर्णोतेः कुः। उरु। 'पुल महत्त्वे'। इगुपधलक्षणः कः। विपुलम्॥

पीनपीव्नी तु स्थूलपीवरे।

पीनचतुष्कं **स्थूले**। उपचितमांसं विपुलम् आयतमाका(शा[१]रा)दिति भेदः। ओप्यायीतः क्तः। 'ओदितश्च' (८. २. ४५) इति तो नः। 'प्यायः पी' (६. १. २८) इति पीभावः। पीनम्। 'प्यैङ् वृद्धौ'। 'ध्याप्योः सम्प्रसारणं च' (उ० ४. ११६) इति कनिप्। 'हलः' (६. ४. २) इति दीर्घः। पीवा। स्त्रियां 'वनो र च' (४. १. ७) इति ङीब्रेफौ। पीवरी। 'स्थूल परिबृंहणे'। चुरादिपचादी। स्थूलम्। 'छित्वर—' (उ० ३. १) आदिसूत्रेण पीवरं निपातितम्॥

स्तोकाल्पक्षुल्लकाः सूक्ष्मश्लक्ष्णदभ्रं कृशं तनु॥ ५९॥
स्त्रियौ मात्रात्रुटी पुंसि लवलेशकणाणवः।

स्तोकचतुर्दशकमल्पे।

"अल्पं दभ्रं स्तोकं लवाणुलेशा नरे श्लक्ष्णम्"

इति रत्नकोषः। चातकेऽपि स्तोक उक्तः। क्षुल्लकोऽपि पामरे। 'सूच पैशुन्ये'। 'सूचेः स्मन्' (उ० ४. १७८)। सूक्ष्मम्। दन्त्यादिः। 'श्लिष आलिङ्गने'। 'श्लिषेरच्चोपधायाः' (उ० ३. १९) इति क्स्नः उपधाया अकारश्च। श्लक्ष्णम्। 'कृश तनूकरणे'। इगुपधलक्षणः कः। कृशम्। दन्भे रकि दभ्रम्। 'माङ् माने'। 'हुयामाश्रुसुहासिभ्यस्त्रन्' (उ० ४. १६९)। मात्रा। त्रुटिरुक्तः स्वर्गवर्गे। 'लिश अल्पीभावे'। घञ्। लेशः॥

प्रभूतं प्रचुरं प्राज्यमदभ्रं बहुलं बहु॥ ६०॥
पुरुहं पुरु भूयिष्ठं स्फिरं भूयश्च भूरि च।

प्रभूतद्वादशकं **प्रचुरे**। प्राङ्पूर्वाद् अजेः क्यप्। प्राज्यम्। बहूनर्थान् लाति बहुलम्। पुरून् हन्तीति पुरुहम्। 'अन्येष्वपि—'

१. 'दिभे' ङ. छ. पाठः.

(३. २. १०१) इति डः। 'पृभिदिव्यधिगृधिधृषिभ्यः' (उ० १.२३) इति कुः। पुरु। 'इष्ठस्य यिट् च' (६. ४. १५९) इति बहोर्भूभाव इडागमश्च। भूयिष्ठम्। शिशिरवत् स्फिरशब्दो निपातितः। भूयः ईयसुन्नन्तम्। अद्रिवत् क्रिन्। भूरि ॥

परश्शताद्यास्ते येषां परा सङ्ख्या शतादिकात् ॥ ६१ ॥

यच्छताद् बहु, तत् परश्शतम्। द्वितालव्यम्। शतादेरर्थादुत्तराः सङ्ख्या येषां सङ्ख्येयानां, ते पराः शतात् परश्शताः। आदिना पराः सहस्रात् परस्सहस्राः। परा अयुतात् परायुताः। तथाच नाममाला —

"अश्वसहस्रादश्वीयं परस्सहस्रं सहस्रतोऽप्यधिकम्"

इति। 'पञ्चमी' (२. १. ३७) इति योगविभागात् समासः। राजदन्तादित्वात् शतशब्दस्य परनिपातः। पारस्करादित्वात् सुट्। सुटश्चाभक्तत्वाद् विसर्जनीयो न भवति। श्चुत्वमेव भवति। परस्सहस्रे तु द्विदन्त्य एव।

"आलोकयामास हरिर्महीधरानधिश्रयन्तीर्गजताः परश्शताः"

इति माघः। (स० १२. श्लो० ५०)

"ब्रह्मादयो ब्रह्महिताय तप्त्वा परस्सहस्राः शरदस्तपांसि"

इति परस्सहस्रस्य भवभूतेः स्त्रीलिङ्गप्रयोगः। सङ्ख्यानमात्रेऽपि शतादिकं वर्तत इति परश्शतं गवां, परस्सहस्रं गवामिति नपुंसकत्वमेव। शतादधिका सङ्ख्या गवामित्यर्थः ॥

गणनीये तु गणेयं

गणयितुं शक्ये गणनीयद्वयम्। 'गण सङ्ख्याने'। चुरादिण्यन्ताद् 'अचो यत्' (३. १. ९७)। गणेयम्। 'क्यस्य विभाषा' (६. ४. ५०) इत्यतोऽनुवृत्तस्य विभाषाग्रहणस्य व्यवस्थितविभाषात्वाद् 'णेरनिटि' (६. ४. ५१) इति न णिलोप इति धातुप्रदीपटीका। गण्यं तु चिन्त्यम् ॥

सङ्ख्याते गणितम्

गणिते सङ्ख्यातद्वयम् ॥

अथ समं सर्वम्।

विश्वमशेषं कृत्स्नं समस्तनिखिलाखिलानि निःशेषम् ॥
समग्रसकलाखण्डपूर्णादीन्यप्यनूनके।

समचतुर्दशकं **सर्वस्मिन्** । समशब्दः सर्वनामसंज्ञकः । सर्तेः 'सर्वनिघृष्वरिष्व—' (उ० १. १५९) इत्यादिना वन्प्रत्ययान्तः सर्वशब्दो निपातितः। गणदेवतायां विश्व उक्तः। कृतेः 'कृत्यशूभ्यां क्स्नः' (उ० ३. १७)। कृत्स्नम्। अग्रेण शिखरेण सङ्गतं समग्रम्। दन्त्यादिः। पूरीधातोः पूर्णम् ॥

घनं निरन्तरं सान्द्रं

घनत्रयं **घने**। सान्द्रं दन्त्यादि ॥

पेलवं विरलं तनु ॥ ६३ ॥

पेलवत्रय **विरले** ॥

समीपे निकटासन्नसन्निकृष्टसनीडवत्।
सदेशाभ्याससविधसमर्यादसवेशवत् ॥ ६४ ॥
उपकण्ठान्तिकाभ्यर्णाभ्यग्रा अप्यभितोऽव्ययम्।

समीपपञ्चदशकं **समीपे** । सङ्गता आपोऽस्मिन् इति समीपम्। 'ऋक्पूरब्धूःपथामानक्षे' (५. ४. ७४) इति अः समासान्तः । 'द्व्यन्तरुपसर्गेभ्योऽप ईत्' (६. ३. ९७) इतीत्त्वम्। निकटादिवत् सदेशादिवच्च उपकण्ठादयः समीपे इति वच्छब्दार्थः। अभ्यासो दन्त्यसः। 'समीपेऽभ्यसनेऽभ्यासः' इति दन्त्यादौ रभसः। तालव्यान्तस्तु चिन्त्यः। कण्ठं सामीप्यमुपगत उपकण्ठः। 'अभेश्चाविदूर्ये' (७. २. २५) इतीण्निषेधे अभ्यर्णः। 'पर्यभिभ्यां च' (५. ३. ९) इति तसिः। अभितः ॥

संसक्ते त्वव्यवहितमपटान्तरमित्यपि ॥ ६५ ॥

संसक्तत्रयं **संलग्ने**। सञ्जेः संसक्तम् ॥

नेदिष्ठमन्तिकतमं

अतिसमीपे नेदिष्ठद्वयम् । 'अन्तिकबाढयोर्नेदसाधौ' (५. ३. ६३) इत्यन्तिकस्य नेदादेशः इष्ठन्प्रत्ययश्च । नेदिष्ठम् । अतिशायने तमपि अन्तिकतमम् । ननु च 'अन्तिकस्य तमपि कादिलोपः, आद्युदात्तत्वं च' इत्यनुवृत्तौ, 'तमे तादेश्च' इति तमप्रत्यये 'अन्तिकस्य तकाद्योः' तकारादेः ककारादेश्च लोपो भवति । तत्र तादिलोपे अन्तिकं, कादिलोपे अन्तिमं वा प्राप्नोति । कथमन्तिकतमम् । उच्यते । 'कादिलोपे बहुलम्' इति वचनात् पक्षे लोपः । अन्तिकस्य तम इव सदि वा तादेर्लोपवचनम् ।

"अन्तिकतमोऽतिसन्निधिरन्तिसदन्तिकसदन्तमोऽन्तिकतमः"

इति रत्नकोषः ॥

स्याद् दूरं विप्रकृष्टकम् ।

दूरद्वयं **दूरमात्रे** । 'इण् गतौ' । 'दुरीणो लोपश्च' (उ० २. २२) इति दुस्पूर्वादिणो रक्, इणो लोपश्च । 'रो रि' (८. ३. १४) इति रेफलोपः । 'ढ्रलोपे पूर्वस्य दीर्घोऽणः' (६. ३. १११) इति दीर्घत्वम् ॥

दवीयश्च दविष्ठं च सुदूरे

दवीयस्त्रय**मतिदूरे** । दूरशब्दस्य 'स्थूलदूर—' (६. ४. १५६) इत्यादिना ईयसुन्निष्ठनोर्यणादिभागलोपौ गुणश्च । दवीयः दविष्ठं च ॥

दीर्घमायतम् ॥ ६६ ॥

दीर्घद्वयं **दीर्घे** ॥

वर्तुलं निस्तलं वृत्तं

वर्तुलत्रयं **वर्तुले** । वृतेर्बहुलवचनाद् 'हृषेरुलच्' (उ० १. १०१) । वर्तुलम् ॥

बन्धुरं तून्नतानतम् ।

स्वभावाद् यदुन्नतम्, उपाधिवशादीषन्नतं, तद् बन्धुरम् ।

*"बन्धुरं बन्धुरे रम्ये नदे हंसे तु बन्धु(रम्रः)"

इति रभसः ॥

उच्चप्रांशून्नतोदग्रोच्छ्रितास्तुङ्गे

उच्चषट्कमुच्चे । उच्चिनोतेर्डः[1] । उच्चः । प्रकृष्टोंऽशुर्दीप्तिरस्येति प्रांशुः । उद्गतं नतमुन्नतम् । ऊर्ध्वं श्रित उच्छ्रितः ॥

अथ वामने ॥ ६७ ॥

न्यङ्नीचखर्वह्रस्वाः स्युः

न्यक्पञ्चकं **खर्वसामान्ये** । नृवर्गे तु 'खर्वो ह्रस्वश्च वामनः' इति **नरवचना उक्ताः** । निपूर्वादञ्चेः ऋत्विगादिना क्विन् । 'क्विन्प्रत्ययस्य कुः' (८. २. ६२) इति कुत्वम् । न्यक् चान्तः । स्त्रियां नीची । पामरे **नीच उक्तः** । 'खर्व माने' । पचाद्यच् । खर्वः ॥

अवाग्रेऽवनतानतम् ।

अवाग्रत्रय**मवनताग्रे** । अवनतमग्रमस्येत्यवाग्रम् ॥

अरालं वृजिनं जिह्ममूर्मिमत् कुञ्चितं नतम् ॥ ६८ ॥

आविद्धं कुटिलं भुग्नं वेल्लितं वक्रमित्यपि ।

अरालैकादशकं **वक्रे** । ऊर्मिर्भङ्गः, तद्योगान्मतुपि ऊर्मिमत् । कुटिं कुटिलतां लातीति कः । कुटिलम् । 'भुजो कौटिल्ये' । क्तः । 'ओदितश्च' (८. २. ४५) इति नत्वम् । भुग्नम् ॥

ऋजावजिह्मप्रगुणौ

ऋजुत्रय**मवक्रे** ॥

व्यस्ते त्वप्रगुणाकुलौ ॥ ६९ ॥

व्यस्तत्रयं **व्यस्ते** । यथा आकुलाः केशपाशाः ॥

शाश्वतस्तु ध्रुवो नित्यसदातनसनातनाः ।

---

१. 'च्चरते' छ. पाठः.

---

* "बन्धूरबन्धुरौ रम्ये नम्रे हंसे तु बन्धुरः" इति भानुजि सम्मतः पाठः ।

शाश्वतपञ्चकं कालत्रयव्यापिनि। शश्वच्छब्दाद् भवार्थाणि शाश्वतः। द्वितालव्यः। ठञि शाश्वतिकोऽप्यत्र। 'सायंचिरं —' (४. ३. २३) इत्यादिना ट्युट्युलौ तुट् च। सदातनः॥

स्थास्नुः स्थिरतरे स्थेयान्

स्थास्नुत्रयमतिस्थिरे। जिष्णुवत् स्थास्नुः। 'प्रियस्थिर—' (६. ४. १५७) इत्यादिना स्थिरशब्दस्य स्थादेशे स्थेयान्। शाश्वताष्टकमेव स्थिर इति कश्चित्॥

एकरूपतया तु यः॥ ७०॥

कालव्यापी स कूटस्थः

एकेनैव स्वभावेन निरवधिकालस्य व्यापक आकाशादिः कूटस्थः॥

स्थावरो जङ्गमेतरः।

जङ्गमेतरः प्राणितोऽन्यः स्थावरः। ईश्वरवद् वरच्॥

चरिष्णुजङ्गमचरत्रसमिङ्गं चराचरम्॥ ७१॥

चरिष्णुषट्कं जङ्गमे। गमेः 'नित्यं कौटिल्ये गतौ' (३. १. २३) इति यङ्। 'नुगतोऽनुनासिकान्तस्य' (७. ४. ८५) इति नुक्। तस्य चानुस्वारः। पचाद्यच्। 'यङोऽचि च' (२. ४. ७४) इति यङो लुक्। जङ्गमम्। त्रस्यति चलतीति त्रसम्। पचाद्यजन्तम्। इङ्गति गच्छतीति इङ्गम्। वदावदवच्चराचरम्॥

चलनः कम्पनः कम्प्रः

चलनत्रयं चलनशीले। 'चलनशब्दार्थादकर्मकाद् युच्' (३. २. १४८)। चलनः। कम्रवत् कम्प्रः॥

चलं लोलं चलाचलम्।
चञ्चलं तरलं चैव पारिप्लवपरिप्लवे॥ ७२॥

चलसप्तकं चलमात्रे। 'लुड इत्येके' इत्यतः पचाद्यचि लोलम्। लोलतिरपरिपठितधातुरिति माधटीकाकृत्। वदावदवच्चलाचलम्। चञ्चतेः कलच्।

चञ्चलम् । 'अन्येषामपि—' (६. ३. १३७) इति दीर्घत्वे पारिप्लवम् । पचाद्यच् । परिप्लवम् ॥

अतिरिक्तः समधिकः

अतिरिक्तद्वयमधिके ॥

दृढसन्धिस्तु संहतः ।

दृढसन्धिद्वयं दृढसन्धाने । हन्तेः क्तः । संहतः ॥

कर्कशं कठिनं क्रूरं कठोरं निष्ठुरं दृढम् ॥ ७३ ॥

जरठं मूर्तिमन्मूर्तं

कर्कशनवकं कठिने । 'कठ कृच्छ्रजीवने'। 'बहुलमन्यत्रापि' (उ० २. ५१) इतीनच् । कठिनम् । घातके क्रूर उक्तः । 'काठिचकिभ्यामोरच्' (उ० १. ६७) । कठोरम् । 'दृढः स्थूलबलयोः' (७. २. २०) इत्यत्र परिबृढवद् दृढो निपातितः । मूर्तिः काठिन्यं, तद्योगान्मूर्तिमत् । 'तदस्यास्त्यस्मिन्निति मतुप्' (५. २. ९४) । अर्शआद्यचि मूर्तम् ॥

प्रवृद्धं प्रौढमेधितम् ।

प्रवृद्धत्रयं प्रौढे । प्रैषवद् वृद्धौ प्रौढः । एधेः क्तः । एधितः ॥

पुराणप्रतनप्रत्नपुरातनचिरन्तनाः ॥ ७४ ॥

पुराणपञ्चकं पुरातने । 'सायंचिरं—' (४. ३. २३) इत्यादिना ट्युः । पुराणम् । 'पुराणप्रोक्तेषु ब्राह्मणकल्पेषु' (४. ३. १०५) इति निपातनान्न तुट् । 'अबाधकान्यपि निपातनानि भवन्ति' इति पक्षे तुटि पुरातनम् । 'प्रान्नश्च पुराणे' (बा० ५. ४. ३०) इति प्रशब्दान्नप्रत्ययः । चकारात् (त्नप्) तनप्[1] (च) । प्रत्नं प्रतनं च ॥

प्रत्यग्रोऽभिनवो नव्यो नवीनो नूतनो नवः ।

नूत्नश्च

---

1. 'त्न्' क. ग. पाठः.

प्रत्यग्रसप्तकं नवे । प्रतिगतोऽग्रोऽस्य प्रत्यग्रः । 'पादार्घाभ्यां च' (५. ४. २५) इति चकाराद् यत् । नव्यः । 'नवशब्दस्य नूआदेश-स्त्नप्तनखाश्च प्रत्यया वक्तव्याः' (वा०५. ४. ३०) इति यथाक्रमं स्त्नतन-प्तनप्प्रत्ययाः । नवीननूतननूत्नाः ॥

सुकुमारं तु कोमलं मृदुलं मृदु ॥ ७५ ॥

सुकुमारचतुष्कं कोमले । मृदुलं सिध्मादि । पृथुवन्मृदु ॥

अन्वगन्वक्षमनुगेऽनुपदं क्लीबमव्ययम् ।

अन्वक्चतुष्टयमनुगन्तरि । अनु पश्चादञ्चतीत्यन्वक्, चान्तः । स्त्रियामनूची । अनुगतं पादेन्द्रियमन्वक्षम् । पदस्य पश्चादनुपदम् । 'अव्ययं विभक्ति —' (२. १. ६) इत्यादिना समासः ॥

प्रत्यक्षं स्यादैन्द्रियकम्

इन्द्रियग्राह्ये वस्तुनि प्रत्यक्षद्वयम् । अक्षं प्रति प्रत्यक्षम् । आभिमु-ख्येऽव्ययीभावः । कुलालादेराकृतिगणत्वाद् वुञ् । ऐन्द्रियकम् ॥

अत्यध्यक्षमतीन्द्रियम् ॥ ७६ ॥

अत्यध्यक्षद्वयमप्रत्यक्षे । अतिक्रान्तमध्यक्षमत्यध्यक्षम् ॥

एकतानोऽनन्यवृत्तिरेकाग्रैकायनावपि ।
अप्येकसर्ग एकाग्र्योऽप्येकायनगतोऽपि च ॥ ७७ ॥

एकतानसप्तकमेकाग्रे । एकस्मिन् तानोऽस्यैकतानः । 'तन यज्ञोपक-रणयोः' । चुरादिण्यन्ताद् 'एरच्' (३. ३. ५६) । तानः ॥

पुंस्यादिः पूर्वपौरस्त्यप्रथमाद्याः

आदिपञ्चकमादौ । 'दक्षिणापश्चात्पुरसस्त्यक्' (४. २. ९८) । पौर-स्त्यः । दिगादित्वाद् यत् । आद्यः ॥

अथास्त्रियाम् ।

अन्तो जघन्यं चरममन्त्यपाश्चात्यपश्चिमम् ॥ ७८ ॥

अन्तषट्कमन्ते । जघन्यान्त्यौ दिगादी । पौरस्त्यवत् पाश्चात्यः ।

अनचि च' (८. ४. ४७) इति द्वित्वे द्वितकारः । शाकल्यमते त्रितकारम् । ‡'अग्रपश्चाड्डिमच्' (वा० ४. ३. २३) । पश्चिमम् ॥

मोघं निरर्थकं

मोघद्वयं **निष्फले** ॥

स्पष्टं स्फुटं प्रव्यक्तमुल्बणम् ।

स्पष्टचतुष्कं **व्यक्ते** । अञ्जेः क्तः । व्यक्तम् ॥

साधारणं तु सामान्यम्

यदेकमनेकसंबन्धि, तत्र साधारणद्वयम् । पूर्वं तु 'सदृक् । साधारणः' इत्युक्तम् । तुल्ये साधारणः साधितः, स्त्रियां साधारणी साधारणा च । स्वार्थिकष्यञि सामान्यम् । तेन जातेरन्यत्रापीति प्रयोगः । 'सामान्योऽयं धर्मसेतुर्नृपाणाम्' । सामान्यं धनम् । सामान्या भूमिः ॥

एकाकी त्वेक एककः ॥ ७९ ॥

एकाकित्रयमेकके । 'एकादाकिनिच्चासहाये' (५. ३. ५२) इत्याकिनिच् । एकाकी । चकारात् पक्षे कन्लुकौ च । एककः एकश्च ॥

भिन्नार्थका अन्यतर एकस्त्वोऽन्येतरावपि ।

अन्यतरादयः पञ्च भिन्नार्थवाचकाः । पञ्चैव सर्वनामसंज्ञकत्व इत्येव नाम ॥

उच्चावचं नैकभेदम्

उच्चावचद्वयमनेकप्रकारे । उदक् चासाववाक् चेत्युच्चावचं, मयूरव्यंसकादिषु निपातितम् । 'उच्चावचा वीचयः' इति प्रयोगः । न एको भेदोऽत्रेति त्रिपदो बहुव्रीहिः । 'सुप् सुपा' इति नशब्देन सह समासः ॥

उच्चण्डमविलम्बितम् ॥ ८० ॥

उच्चण्डद्वयं तूर्णे ॥

---

‡ 'अग्रादिपश्चाड्डिमच्' इति मुद्रितवार्त्तिकपाठः ।

अरुन्तुदं तु मर्मस्पृग्

अरुन्तुदद्वयं मर्मपीडाकरे । विधुन्तुदवदरुन्तुदः । क्विनि मर्मस्पृक्, शान्तम् ॥

अबाधं तु निरर्गलम् ।

अबाधद्वयमनिवारिते ॥

प्रसव्यं प्रतिकूलं स्यादपसव्यमपष्ठु च ॥ ८१ ॥

प्रसव्यचतुष्कं प्रतिकूले । पुञः 'अचो यत्' (३. १. ९७) । प्रसव्यापसव्यौ । 'अपदुस्सुषु स्थः' (उ० १. २९) इति तिष्ठतेः कुः । 'अम्बाम्ब—' (८. ३. ९७) इत्यादिना षत्वम् । अपष्ठु ॥

वामं शरीरे सव्यं स्याद्

शरीरे वाममङ्गं(सव्यम्) । 'सव्यं वामे च दक्षिणे' इति त्वजयः ॥

अपसव्यं तु दक्षिणम् ।

दक्षिणमङ्गमपसव्यम् । 'द्विवकार' इति वर्णदेशना ॥

सङ्कटं ना तु सम्बाधः

सङ्कटद्वयमल्पावकाशे । 'सम्प्रोदश्च कटच्' (५.२.२९)। सङ्कटम् । घञि सम्बाधः । पुल्लिङ्ग एव नान्यलिङ्गः ॥

कलिलं गहनं समे ॥८२॥

दुष्प्रवेशे, दुर्विवेक इति यावत् । तत्र कलिलद्वयम् । यथा गहनं शास्त्रम् । सलिलवत् कलिलम् ॥

सङ्कीर्णे सङ्कुलाकीर्णे

जनादिना निरन्तरव्याप्ते सङ्कीर्णद्वयम् । द्वयं दन्त्यादि । 'शङ्केरुलचि तालव्यादी'ति तु गोवर्धनः ॥

मुण्डितं परिवापितम् ।

मुण्डितद्वयं कृतकेशखण्डने । यथा मुण्डितं शिरः । 'मुडि खण्डने' । क्तः । मुण्डितः । वपेरनेकार्थत्वाद् मुण्डनेऽपि वृत्तिः । तथाच भाष्यं—

"वपिः प्रकिरणे दृष्टो मुण्डने चापि दृश्यते" ।

स्वार्थिकणिचि परिवापितम् ॥

ग्रथितं सन्दितं दृब्धं

ग्रथितत्रयं ग्रथिते । 'ग्रन्थ सन्दर्भे' । क्र्यादिः । क्तः । ग्रथितम् । 'ग्रथि कौटिल्ये' । भूवादिः । 'इदितो नुम् धातोः' (७. १. ५८) इति नुमि ग्रन्थितमिति वा पाठः । 'सृद क्षोदे' । अनेकार्थत्वाद् धातूनां ग्रन्थनेऽपि वृत्तिः । णिच् । क्तः । सन्दितः । 'दृभि ग्रन्थे' । क्तः । दृब्धम् ॥

विसृतं विस्तृतं ततम् ॥ ८३ ॥

लब्धप्रसरे विसृतत्रयम् । 'सृ गतौ' । 'स्तृञ् आच्छादने' । ह्रस्वादिः । 'तनु विस्तारे' । क्तः । विसृत-विस्तृत-ततानि ॥

अन्तर्गतं विस्मृतं स्यात्

अन्तर्गतद्वयं विस्मृते ॥

प्राप्तप्रणिहिते समे ।

प्राप्तद्वयं प्रकर्षेण निहिते । अधिक्षिप्ते इति केचित् । लब्धपर्याये च प्राप्तं वक्ष्यते । 'नेर्गद—' (८. ४. १७) इत्यादिना णत्वे प्रणिहितम् ॥

वेल्लितप्रेङ्खिताधूतचलिताकम्पिता धुते ॥ ८४ ॥

वेल्लितषट्कं कम्पिते । 'धू विधूनने' । आधूतः । 'धुञ् कम्पने' । ह्रस्वादिः । धुतः ॥

नुत्तनुन्नास्तनिष्ठ्यूताविद्धक्षिप्तेरिताः समाः ।

नुत्तसप्तकं प्रेरिते । 'नुदविदोन्दत्राघ्राह्रीभ्योऽन्यतरस्याम्' (८. २. ५६) इति निष्ठानत्वविकल्पे नुत्तनुन्नौ ॥

परिक्षिप्तं तु निवृतं

परिखादिना वेष्टिते परिक्षिप्तद्वयम् । वृञो निवृतम् ॥

मुषितं मूषितार्थकम् ॥ ८५ ॥

मुषितद्वयं मुषिते । 'मुष स्तेये' । क्रैयादिको ह्रस्वोपधः । 'मूष स्तेये' । भौवादिको दीर्घोपधः ॥

प्रवृद्धप्रसृते

प्रवृद्धद्वयं **प्रसरणे**। प्रपूर्वो वृधिः प्रसरणे।

"तस्मादयं प्रववृधे पृथिवीपतीनामुद्गीतपुण्यचरितो भुवनेषु वंशः"
इति भवभूतिश्च। प्राक् प्रौढेऽपि प्रवृद्ध उक्तः। इत आरभ्य समे इति वक्ष्यमाणं योज्यम्॥

न्यस्तनिसृष्टे

न्यस्तद्वयं **न्यस्ते**। निक्षिप्त इति यावत्॥

गुणिताहते।

गुणितद्वयं **गुणिते**। यथा पञ्चधा गुणिता द्वादशसंख्या षष्टिर्भवति।

निदिग्धोपचिते

निदिग्धद्वयम**ुपचिते**। दिहेः क्तः॥

गूढगुप्ते

कृतसङ्गोपने गूढद्वयम्॥

गुण्डितरूषिते॥ ८९॥

गुण्डितद्वयं **धूलिप्रक्षिप्ते**। गुण्डिर्वेष्टने। रूषिस्तु मूर्धन्यान्तो भूवादेरपरिसमाप्तत्वाज् ज्ञेयः॥

द्रुतावदीर्णे

जातद्रवीभावे मांसादौ द्रुतद्वयम्॥

उद्गूर्णोद्यते

उद्यते शस्त्रादौ उद्गूर्णद्वयम्। 'गुरी उद्यमे'। क्तः। उद्गूर्णः॥

काचितशिक्यिते।

काचितद्वयं **शिक्यारोपिते**। 'प्रातिपदिकाद् धात्वर्थे बहुलमिष्ठवच्च' इति णिजन्तात् क्तान्तद्वयम्। काचितम्। शिक्यितम्॥

घ्राणघ्राते

(जिघ्रि)घ्रीते पुष्पादौ घ्राणद्वयम्। नुन्नवद् विभाषा नत्वम्॥

दिग्धलिप्ते

दिग्धद्वयं **चन्दनादिलिप्ते**॥

समुदक्तोद्धृते समे ॥ ८७ ॥

कूपादेरुद्धृते जलादौ समुदक्तद्वयम् ॥

वेष्टितं स्याद् वलयितं संवीतं रुद्धमावृतम् ।

नदीप्राकारादिना वेष्टिते वेष्टितपञ्चकम् ॥

रुग्णं भग्ने

रुग्णद्वयं भग्ने । 'रुजो भङ्गे'[1] । 'भञ्जो आमर्दने' । क्तः ॥

अथ निशितक्ष्णुतशातानि तेजिते ॥ ८८ ॥

शाणादौ तीक्ष्णीकृते निशितचतुष्कम् । 'शो तनूकरणे' । 'शाच्छोरन्यतरस्याम्' (७. ४. ४१) इति इत्त्वविकल्पः । निशितम् । 'क्ष्णु तेजने' । 'तिज निशाने' । चुरादिः ॥

स्याद् विनाशोन्मुखं पक्वं

विनाशोन्मुखे पक्वम् । परिणते च वक्ष्यति । 'पचो वः'(८. २. ५२) इति निष्ठावत्वम् । यथा पक्वो वटुः । विनाशोन्मुख इत्यर्थः ॥

ह्रीणह्रीतौ तु लज्जिते ।

ह्रीणत्रयं लज्जिते । नुन्नवद् विकल्पेन नत्वे ह्रीणह्रीतौ । लज्जितस्तारकादिः ॥

वृते तु वृत्तवावृत्तौ

वृतादित्रयं वृत्ते । सूत्रादेर्विवरणं[2] वृत्तिरुच्यते । दिवादौ 'तप ऐश्वर्ये' इत्यनन्तरं 'वावृतु वर्तने' इति पठ्यते । यत्प्रयोगो भट्टौ—

"ततो वावृत्यमानासौ रामशालां न्यविक्षत "

इति । अत्र रामं वृण्वतीत्यर्थः । ततः क्तः । वावृत्तः ॥

संयोजित उपाहितः ॥ ८९ ॥

पदार्थे पदार्थान्तरेण संयुक्तीकृते संयोजितद्वयम् ॥

प्राप्यं गम्यं समासाद्यं

---

१. 'जाभ्यां क्तः' ख. ग. घ., 'जिभ्यां क्तः' क. पाठः. २. 'दौ व' ग. घ. पाठः,

प्राप्तुं शक्ये प्राप्यत्रयम् । ण्यति प्राप्यम्। 'पोरदुपधात्' (३. १.९८) इति यति गम्यम् ॥

स्यन्नं रीणं स्रुतं स्नुतम्।

स्रुते जलादौ स्यन्नचतुष्कम् । 'स्यन्दू प्रस्रवणे' । क्तः । स्यन्नम् । 'स्नु प्रस्रवणे' । क्तः । स्नुतम् ॥

सङ्कूढः स्यात् सङ्कलितः

लेखकादिना (संवृतकृती[1]ति?) सङ्कूढद्वयम् ॥

अवगीतः ख्यातगर्हणे ॥ ९० ॥

ख्याता प्रसिद्धा गर्हणा यस्य सोऽवगीतः ॥

विविधः स्याद् बहुविधो नानारूपः पृथग्विधः ।

विविधचतुष्कं नानाप्रकारे ॥

अवरीणो धिक्कृतश्चापि

अवरीणद्वयं कृतधिक्कारे । पूर्वोक्तस्यैव चा[2]धिक्कृतस्य अवरीण इति पर्यायान्तरं दृश्यते ॥

अवध्वस्तोऽवचूर्णितः ॥ ९१ ॥

द्र[3]व्यचूर्णे(?) लेखादौ अवध्वस्तद्वयम् । 'सत्यापपाश—' (३. १. २५) इत्यादिना णिच् । क्तः ॥

अनायासकृतं फाण्टं

अनायाससाध्यं फाण्टम् ।

"द्रव्यादा[4]यो[5]त्थितात् तोये[6] प्रतप्ते चैव संस्थिते ।
रसो निर्याति यः सद्यः स फाण्ट इति संस्तुतः" ॥

'क्षुब्धस्वान्त—' (७. २. १८) इत्यादिना 'फण गतौ' इत्यतो निष्ठायामिडभावे फाण्टं निपातितम् ॥

---

१. 'ति' ङ. पाठः. २. 'वाधिकक्' क. पाठः. ३. 'सा' ङ. पाठः. ४. 'द' घ. च. पाठः. ५. 'य' ङ. पाठः. ६. 'स्कृ' ज. पाठः.

स्वनितं ध्वनितं समे।

कृतस्वने स्वनितद्वयम् ॥

बद्धे सन्दानितं मूर्णमुदितं सन्दितं सितम्॥ ९२॥

बद्धषट्कं **बद्धे** । सन्दानितं तारकादि । 'मुर्वी बन्धने' । क्तः । वलोपदीर्घनत्वानि । मूर्णम् । मूत इति पाठे 'मूञ् बन्धने' । क्तः । 'दो अवखण्डने' । उद्दितसन्दितौ । 'षिञ् बन्धने' । क्तः । सितम् ॥

निष्पक्वं क्वथितं

निष्पक्वद्वयं **क्वथिते** । 'क्वथ निष्पाके' । क्तः । क्वथितम् ॥

पाके क्षीराज्यहविषां श्रृतम्।

क्षीरादीनां पाके श्रृतम् । 'श्रा पाके' । 'श्रृतं पाके' (६. १. २७) इति निपातितम् । पाकेऽभिधेये श्रातेर्निष्ठायां श्रृभावो निपात्यते ॥

निर्वाणो मुनिवह्न्यादौ

'निर्वाणोऽवाते' (८. २. ५०) इति निष्ठानत्वम् । निर्वाणो **मुनिः** । निर्वाणो वह्निः । निर्वाणो हस्ती । मुक्तो, नष्टो, मग्नश्चेति यथाक्रमं **निर्वाणशब्दार्थाः** ॥

निर्वातस्तु गतेऽनिले॥ ९३॥

वाते तु नत्वाभावाद् निर्वातो **गते वायौ** ॥

पक्वं परिणते

पक्वद्वयं **परिणते** । यथा परिणता बुद्धिः ॥

गूनं हन्ने

कृतमलोत्सर्गे गूनद्वयम् । 'गु पुरीषोत्सर्गे' । 'दुग्वोर्दीर्घत्वं चेति वक्तव्यम्' (वा० ८. २. ४४) इति निष्ठानत्वं दीर्घत्वं च । गूनम् । हदेः क्तः । हन्नम् ॥

मीढं तु मूत्रिते।

मीढद्वयं **मूत्रिते**। 'मिह सेचने'। क्तढत्वष्टुत्वढलोपदीर्घत्वानि॥

पुष्टे तु पुषितं

पुष्टद्वयं **पुष्टे पक्ष्यादौ**। 'पुष पुष्टौ'। दिवादिरनिट्। भूवादेस्तु सेटः पुषितम्॥

सोढे क्षान्तम्

सोढद्वयं **क्षान्ते**। यथा सोढोऽपराधः। 'सहिवहोरोदवर्णस्य' (६. ३. ११२)। सोढः॥

उद्धानमुद्धते॥९४॥

उद्धानद्वयमुद्धते। 'ओहाङ् गतौ'। उत्पूर्वः। ओदित्वान्नत्वम्। उद्धानम्॥

दान्तस्तु दमिते

पूर्वं तपःक्लेशसह उक्तम्। इदानीं सामान्येन **वहनादिक्लेशसहे** दान्तद्वयम्॥

शान्तः शमिते

शान्तद्वयं **शान्ते**। णिचि 'वा दान्त—' (७. २. २७) इत्यादिना विभाषेट्। शान्तशमितौ॥

प्रार्थितेऽर्दितः।

प्रार्थितद्वयं **प्रार्थिते**। 'अर्द गतौ याचने च'। क्तः। अर्दितः॥

ज्ञप्तस्तु ज्ञपिते

ज्ञप्तद्वयं **विनेश**[1] इति ख्याते। 'ज्ञा मारणतोषणनिशामनेषु'। एतेष्वेवार्थेष्वित्यन्यः। पूर्ववद् विभाषेट्॥

---

१. 'नाशन इ' ङ. छ. पाठः.

छन्नश्छादिते

छन्नद्वयं **छन्ने**। यथा मेघच्छन्नं नभः ॥

पूजितेऽञ्चितः ॥ ९५ ॥

पूजितद्वयं **पूजिते**। 'अञ्चेः पूजायाम्' (७. २. ५३) इतीट्। 'नाञ्चेः पूजायाम्' (६. ४. ३०) इत्युपधानलोपाभावः। अञ्चितः ॥

पूर्णस्तु पूरिते

पूर्णद्वयं **पूरिते** ॥

क्लिष्टः क्लिशिते

क्लिष्टद्वयं **क्लिष्टे**। 'क्लिशू विबाधने'[1]। 'क्लिशः क्त्वानिष्ठयोः' (७. २. ५०) इतीड्विकल्पः। क्लिष्टक्लिशितौ ॥

अवसिते सितः।

अवसितद्वयं **समाप्ते**। 'षो अन्तकर्मणि'। क्तः ॥

प्रुष्टप्लुष्टोषिता दग्धे

प्रुष्टचतुष्कं **दग्धे**। 'श्रिषु प्रुषु प्लुषु दाहे'। 'उष दाहे'। क्तः। 'दह भस्मीकरणे'। क्तः ॥

तष्टत्वष्टौ तनूकृते ॥ ९६ ॥

तष्टत्रयं **वें[2]चतेति** ख्याते। 'तक्षू त्वक्षू तनूकरणे'। 'स्कोः संयोगाद्योरन्ते च' (८. २. २९) इति कलोपः ॥

वेधितच्छिद्रितौ विद्धे

वेधितत्रयं **वेधिते**। ण्यन्तात् क्तः। वेधितः। द्वौ तारकादी ॥

---

१. 'लोडने' क. ख. ग. घ. पाठः. २. 'प' छ., 'च' ज., 'चश्चते' ट. पाठः.

विन्नवित्तौ विचारिते।

विन्नत्रयं **विचारिते**। 'विद विचारणे'। नुन्नवद् विभाषा निष्ठानत्वम्॥

निष्प्रभे विगतारोकौ

निष्प्रभत्रयं **प्रभाशून्ये**। रुचेर्घञि नञ्समासे अरोकः॥

विलीने विद्रुतद्रुतौ॥९७॥

घृतादौ विलीने विलीनत्रयम्॥

सिद्धे निर्वृत्तनिष्पन्नौ

सिद्धत्रयं **सिद्धे**॥

दारिते भिन्नभेदितौ।

दारितत्रयं **विदारिते**॥

ऊतं स्यूतमुतं चेति त्रितयं तन्तुसन्तते॥९८॥

ऊतत्रयं **सन्तते वस्त्रादौ**। 'ऊयी तन्तुसन्ताने'। क्तयलोपौ। ऊतम्। 'षिवु तन्तुसन्ताने'। स्यूतम्। वेञ उतम्॥

स्यादर्हिते नमस्यितनमसितमपचायितार्चितापचितम्।

अतः परमावर्गमार्याच्छन्दः। अर्हितषट्कं **नमस्कृते**। 'नमोवरिवश्चित्रङः क्यच्' (३. १. १९)। 'क्यस्य विभाषा' (६. ४. ५०) इति यलोपविकल्पः। नमस्यितनमसितौ। 'चायृ पूजानिशामनयोः'। अपचायितम्। 'अपचितश्च' (७. २. ३०) इति निपातनाद् अपचितम्। अपपूर्वाच्चायतेर्निष्ठायामनिट्त्वं चिभावश्च निपात्यते॥

वरिवसिते वरिवस्यितमुपासितं चापचारितं च॥९९॥

कृतपरिचर्ये वरिवसितचतुष्कम्। नमस्यितद्वयवद् वरिवस्यितद्वयम्। 'आस उपवेशने'। उपासितम्॥

सन्तापितसन्तप्तौ धूपितधूपायितौ च दूनश्च।

सन्तापितपञ्चकमध्वादिश्रान्ते। 'गुपूधूपविच्छि—' (३. १. २८) इत्यादिना 'आयादय आर्धधातुके वा' (३. १. ३१) इति आयविकल्पे धूपितधूपायितौ। 'टुदु उपतापे' । 'दुग्वोर्दीर्घश्च' (वा० ८. २. ४४) इति नत्वम् । दूनम् ॥

हृष्टो मत्तस्तृप्तः प्रह्लन्नः प्रमुदितः प्रीतः ॥ १०० ॥

प्रीतियुक्ते हृष्टषट्कम् । 'हृषु अलीके' । अनेकार्थत्वाद् हृष्टः । 'न ध्याख्या —' (८. २. ५७) इत्यादिना नत्वनिषेधे मत्तः । 'ह्लादो निष्ठायाम्' (६. ४. ९५) इत्युपधाह्रस्वत्वे प्रह्लन्नः ॥

छिन्नं छातं लूनं कृत्तं दातं दितं छितं वृक्णम् ।

छिन्नाष्टकं **छिन्ने** । 'शाच्छोरन्यतरस्याम्' (७. ४. ४१) इतीत्त्वविकल्पे छातं छितं च। 'दाप् लवने' । दातम् । 'दो अवखण्डने' । 'द्यतिस्यतिमास्थामित् ति किति' (७. ४. ४०) इतीत्त्वम् । दितम् । 'ओव्रश्चू छेदने' । क्तः । वृक्णम् ॥

स्रस्तं ध्वस्तं भ्रष्टं स्कन्नं पन्नं च्युतं गलितम् ॥ १०१ ॥

स्रस्तसप्तकं **च्युते** । 'स्रन्सु भ्रन्सु ध्वन्सु अवस्रंसने' । क्तः । स्रस्तत्रयम् । 'गड सेचने' । गलितम् ॥

लब्धं प्राप्तं विन्नं भावितमासादितं च भूतं च ।

लब्धषट्कं **लब्धे** । विदिर्लाभे । विन्नम् । 'भू प्राप्तावात्मनेपदी' । 'आ धृषाद् वा' इति पक्षे चुरादिणिच् । भावितम् । भूतम् । 'षद्लृ विशरणादौ' । आङः षदेः पद्यर्थे णिच् । आसादितम् ॥

अन्वेषितं गवेषितमन्विष्टं मार्गितं मृगितम् ॥ १०२ ॥

अन्वेषितपञ्चकमन्वेषिते । 'एषृ हेषृ गतौ', 'गवेष मार्गणे', 'इषु इच्छायां', 'मार्ग अन्वेषणे', 'मृग अन्वेषणे' । क्तः ॥

आर्द्रं सार्द्रं क्लिन्नं तिमितं स्तिमितं समुन्नमुत्तं च ।

आर्द्रसप्तकं **स्तिमिते** । आर्द्रत्वेऽप्यार्द्रम् । तेन सह वर्तमानं सार्द्रम् । 'क्लिदू आर्द्रभावे' । क्लिन्नम् । 'तिम ष्टिम आर्द्रभावे' । तिमितस्तिमिते । 'उन्दी क्लेदने' । नुन्नवद् विकल्पेन नत्वे समुन्नम्, उत्तं च ॥

त्राणं त्रातं रक्षितमवितं गोपायितं गुप्तम् ॥ १०३ ॥

त्राणषट्कं **रक्षिते** । नुत्तनुन्नवत् त्रातत्राणे । 'अव रक्षणे' । अवितम् । धूपायितवद् गोपायितम् ॥

अवगणितमवमतावज्ञाते अवमानितं च परिभूते ।

अवगणितपञ्चकं **परिभूते** । अवपूर्वो गणिरवज्ञायाम् । 'मान पूजायाम्' । चुरादिः ॥

त्यक्तं हीनं विधुतं समुज्झितं धूतमुत्सृष्टम् ॥ १०४ ॥

त्यक्तषट्कं **त्यक्ते** । 'ओहाक् त्यागे' । हीनम् । 'धुञ् कम्पने' । ह्रस्वादिः । 'धू विधूनने' । दीर्घादिः, तुदादिः ॥

उक्तं भाषितमुदितं जल्पितमाख्यातमभिहितं लपि-[तम् ।

उक्तषट्कम**भिहिते** । वदेः उदितम् ॥

बुद्धं बुधितं मनितं विदितं प्रतिपन्नमवसितावगतम् ॥

बुद्धसप्तकं **बुद्धे** । 'बुध अवगमने' । बुद्धम् । 'बुध बोधने' । बुधितम् । मनःशब्दात् 'तत् करोति—' इति णिचि टिलोपः । मनितम् । 'विद ज्ञाने' । विदितम् । 'षो अन्तकर्मणि' । अवसितम् ॥

ऊरीकृतमुररीकृतमङ्गीकृतमाश्रुतं प्रतिज्ञातम् ।
सङ्गीर्णविदितसंश्रुतसमाहितोपश्रुतोपगतम् ॥ १०६ ॥

ऊरीकृतैकादशकम**ङ्गीकृते** । ऊरीकृतं दीर्घादि । अन्यथार्याभङ्गः ।

"क्रीडयापि न वैद्येन वितथा वागुरीकृता ।
हन्तुं चारिमृगान् बाणसन्ततिर्वागुरीकृता ॥"

इति कीचकवधे यमकाद् ह्रस्वादि च । शृणोतेः, आश्रुतसंश्रुतोपश्रुताः । 'गॄ शब्दे' । दीर्घादिः । गीर्णम् ॥

ईडितशस्तपणायितपनायिताः प्रणुतपणितपनितानि ।
अभिगीर्णवर्णिताभिष्टुतेडितानि स्तुतार्थानि ॥ १०७॥

ईडितद्वादशकं **स्तुते** । 'ईड स्तुतौ' । ईडितम् । इडितं च । 'पन स्तुतौ' । 'पण व्यवहारे' । धूपायितधूपितवत् पणायितपनायितपणितपनितानि । नौतेः प्रणुतम् ॥

भक्षितचर्वितलिप्तप्रत्यवसितगिलितखादितप्सातम् ।
अभ्यवहृतान्नजग्धग्रस्तग्लस्ताशितं भुक्ते ॥ १०८ ॥

भक्षितचतुर्दशकं **भक्षिते** । प्रत्यवपूर्वः स्यतिरभ्यवहारे । 'गिल अदने' । गिलितम् । 'प्सा भक्षणे' । प्सातम् । 'अन्नाण्णः' (४. ४. ८५) इति निपातनाद् जग्ध्यादेशाभावपक्षे अन्नम् । 'अदो जग्धिर्ल्यप् ति किति' (२. ४. ३६) इति जग्धादेशः । जग्धम् । 'ग्रसु ग्लसु अदने' । ग्रस्तं ग्लस्तं च ॥

क्षेपिष्ठक्षोदिष्ठप्रेष्ठवरिष्ठस्थविष्ठबंहिष्ठाः ।
क्षिप्रक्षुद्राभीप्सितपृथुपीवरबहुप्रकर्षार्थाः ॥ १०९ ॥

क्षेपिष्ठादयः षड् **यथाक्रमं क्षिप्रादीनामतिशये** । प्रकर्षोऽतिशयः । तद् यथा—अतिशयितः क्षिप्रः क्षेपिष्ठः । अतिशयितं क्षुद्रं क्षोदिष्ठमित्यादि ॥

साधिष्ठद्राघिष्ठस्फेष्ठगरिष्ठह्रसिष्ठवृन्दिष्ठाः ।
बाढव्यायतबहुगुरुवामनवृन्दारकातिशये ॥ ११० ॥

साधिष्ठादयः* षड् यथाक्रमं **बाढादीनामतिशये** । अतिशयेन चातिशयी लक्ष्यते । तद् यथा—अतिशयेन बाढं दृढं साधिष्ठम् ।

अतिशयेन दीर्घं द्राघिष्ठमित्यादि । इष्ठनि, 'स्थूलदूरयुवह्रस्वक्षुद्रक्षिप्राणां यणादिपरं पूर्वस्य च गुणः' (६. ४. १५६)। (प्रेष्ठादि?) 'प्रियस्थिरस्फिरोरुबहुलगुरुवृद्धतृप्रदीर्घवृन्दारकाणां प्रस्थस्फवर्बंहिगर्वर्षित्रब्द्राघिवृन्दाः'(६. ४. १५७) इति प्रेष्ठादि । 'अन्तिकबाढयोर्नेदसाधौ' (५. ३. ६३) इति साधादेशे साधिष्ठः ॥

इति वन्द्यघटीयश्रीसर्वानन्दकृतौ टीकासर्वस्वे
विशेष्यनिघ्नवर्गः ॥

अथ सङ्कीर्णवर्गः ।

प्रकृतिप्रत्ययार्थाद्यैः सङ्कीर्णे लिङ्गमुन्नयेत् ।

सङ्कीर्ण इति । लिङ्गसङ्कीर्णे भिन्नजातीयेन संसृष्टे रूपभेदादिना निश्चेतुमशक्ये इह चान्यत्र च प्रकृतिप्रत्ययार्थैर्लिङ्गमुन्नयेत्, लिङ्गविशेषमवधारयेदित्यर्थः । प्रकृत्यर्थवशेन यथा—अपरस्पराः सार्था गच्छन्तीत्यादेर्वाच्यलिङ्गता । प्रत्ययार्थवशेन यथा—शान्तिः दान्तिः । क्तिन्नन्तत्वात् स्त्रीत्वम् । प्रायेणात्र प्रकृतिप्रत्ययार्थाद्यैर्लिङ्गं समुन्नीयत इत्यत्रैव चेदमुक्तम् । यद्यप्यत्र रूपभेदादिनैव लिङ्गनिर्णयः, (?) तथाप्यभ्युच्चयार्थमुक्तम् । अपरस्परा इत्यादौ न रूपभेदादिना विवक्षितलिङ्गप्रतीतिः । तथाहि, अत्र पुँल्लिङ्गमात्रप्रतीतेः । प्रकृत्यर्थेन लिङ्गमुन्नयेदिति वचनादपरस्पराणि ब्राह्मणकुलानि वहन्तीति नपुंसकत्वमपि । एवं स्यूत्यादीनामपि न रूपभेदाल्लिङ्गावगतिः, अपितु स्त्रीप्रत्ययार्थेनैव । अत्र च सङ्कीर्ण इत्युपलक्षणम् । तेन पूर्ववर्गेऽपि क्वचित् प्रकृतिप्रत्ययार्थाद्यैर्लिङ्गमुन्नयेत्, यत्र रूपभेदादिना लिङ्गनिश्चयाभावः । तद् यथा—'मुत् प्रीतिः प्रमदो हर्षः' इत्यादौ मुत्प्रीत्यादीनां स्त्रीत्वादिकम् । यच्चोक्तं लिङ्गादिसङ्ग्रहे 'स्त्रीभावादावनिक्तिन्' इत्याद्यूर्ध्वं, तत एव स्यूत्यादीनां स्त्रीत्वादिकमवगम्यते । तत् किमत्र प्रत्ययार्थेन लिङ्गमुन्नयेदित्युच्यते । तन्न । यतस्तदेवानेन स्मर्यते । आद्यशब्देन व्यक्तलिङ्गेन सामानाधिकरण्यं लिङ्गशास्त्रं परस्परसाहचर्यादि च गृह्यते । तेन 'शुचिस्त्वय

---

१. 'रा' क. ख. ग. ङ. छ. ञ. ट. पाठः.

माषाढे' 'तस्य बृन्दमि'त्यौपगवादिषु शुच्चैःपगवादीनां पुंस्त्वक्लीबत्वमवधार्यते। अथ कथमयं सङ्कीर्णवर्ग इत्युच्यते। सङ्कीर्णैः सङ्कीर्णार्थैः शब्दैरारब्धत्वात्। कथमेत एव सङ्कीर्णार्थाः। भिन्नार्थत्वात्। भिन्नजात्यर्थसंसर्ग एव हि सङ्करः। पूर्वं च सत्क्रियाज्ञानां (?) वर्णानां भूम्यादेश्च वस्तुनः प्रकरणबद्धाः समानार्थाः शब्दाः क्रमेणोक्ताः। एते च नैकप्रकरणबद्धाः। तथाच क्रियत इति कर्म। मनिनन्तः कर्मशब्दः। कृतिः क्रियेति 'कृञः श च' (३. ३. १००) इति भावप्रत्ययान्तः क्रियाशब्दः। 'अपरस्पराः क्रियासातत्ये' (६. १. १४४) इति क्रियासातत्ये गम्यमाने सततगमनादिक्रियासाधने सार्थादावपरस्परशब्दो वर्तते अपरे च परे च अपरस्पराः सार्था गच्छन्तीति। यद्येवं क्रमाभावादिह लिङ्ग-सङ्करो न युक्तः। यदुक्तं—'न सङ्करः, कृतोऽत्र भिन्नलिङ्गानाम्' इति, उच्यते। यद्यपि वस्त्वर्थानां क्रमेणाभिधानमिह नास्ति, तथापि भावाभावा-भिधायिनोऽत्र निबद्धा इत्यस्त्येव शब्दानां क्रमाभिधानमिति॥

कर्म क्रिया

कर्मद्वयं **क्रियायाम्**।

"कर्म व्याप्ये क्रियायां च पुन्नपुंसकयोर्मतम्"

इति रुद्रः।

"क्षपयत्यशुभं कर्म कर्मणां चिनुते शुभम्"

इति च। क्रिया प्राक् साधिता॥

तत्सातत्ये गम्ये स्युरपरस्पराः॥ १॥

तच्छब्देन क्रिया परामृश्यते। अविच्छेदेन क्रियासमापकेषु सार्थादिषु अपरस्पराः।

"निर्दिष्टं कर्मसातत्ये सुधीभिरपरस्परम्"

इति भागुरिः।

"अपरस्परा गदिता क्रियासातत्यवाचिका"

इत्यमरमाला। एतद्वर्गादिस्थश्लोकव्याख्याने अपरस्परं सुव्यक्तम्। अत्र सकृदर्थे न सुट्। अपरपरा अपरपरे इत्येव रूपम्॥

---

१. 'नाः श' म. पाठः. २. 'चेति' घ. ङ. पाठः.

साकल्यासङ्गवचने पारायणपरायणे ।

यथाक्रमं साकल्यवचनं पारायणम् , आसङ्गवचनं परायणम् । पारं पर्यन्तमयते गच्छत्यत्रेति पारायणम् । यथा धातुपारायणम् ।

"रत्नपारायणं नाम लङ्केयं मम मैथिलि!"

(स० ५. श्लो० ८९)

इति भट्टिप्रयोगादाविष्टलिङ्गम् । अत्र सकलरत्नार्थो गम्यत इति साकल्यवचनत्वम् । परम् अयनम् आसक्तिस्थानं परायणम् । यथा धर्मपरायणो धर्मासक्त इत्यर्थः । 'अथ मोहपरायणा' (कुमा० स० ४. श्लो० १) इति कालिदासः ॥

यदृच्छा स्वैरिता

यदृच्छाद्वयं स्वाच्छन्द्ये ॥

हेतुशून्या त्वास्या विलक्षणम् ॥ २ ॥

हेतुना कारणेन शून्या निष्प्रयोजना आस्या स्थितिः विलक्षणम् ॥

शमथस्तु शमः शान्तिः

कामक्रोधादिप्रध्वंसे शमथत्रयम् । बाहुलकोऽथः । शमथः । शत्रयं तालव्यम् ॥

दान्तिस्तु दमथो दमः ।

ब्रह्मचर्यादिक्लेशसहिष्णुतायां दान्तित्रयम् ॥

अवदानं कर्म वृत्तं

वृत्तं विशुद्धं कर्म, तदवदानम् । 'दैप् शोधने' । ल्युट् ॥

काम्यदानं प्रचारणम् ॥ ३ ॥

तन्त्रेण काम्यशब्दो द्विरावर्त्यते । तेन काम्यस्य वस्तुनः कामनापूर्वकं दानं प्रचारणम् । महादानं च तदुच्यते । 'प्रचारणं महादानम्' इति त्रिकाण्डम् ॥

वशक्रिया संवदनं

मणिमन्त्रादिभिर्वशीकरणे वशक्रियाद्वयम् । भावल्युटि संवदनम् ।

---

१. 'ना' घ. पाठः.

करणल्युटि वशक्रियासाधनेऽपि मन्त्रादौ । तथाच—'जयश्रियः संवदनं यतस्तत्' (स० १६. श्लो० ७४) इति रघुः ॥

मूलकर्म तु कार्मणम् ।

कामणेति ख्याते मूलकर्मद्वयम् । मूलकर्म नान्तम् । 'तद्युक्तात् कर्मणोऽण्' (५. ४. ३६) इति स्वार्थेऽण्। 'अन्' (६. ४. १६७) इति प्रकृतिभावः । कार्मणम् ॥

विधूननं विधुवनं

विधूननद्वयं **कम्पने** । 'धूञ्प्रीञोर्नुग् वक्तव्यः' (वा० ७. ३. ३७) इति नुक् । विधूननम् । कुटादित्वाद् गुणाभावः । एवं स्फुटनस्फुरणगुरणेषु ॥

तर्पणं प्रीणनावने ॥ ४ ॥

तर्पणत्रयं **प्रीणने** । विधूननवन्नुक् । प्रीणनम् । 'अव रक्षणगतिप्रीत्यादौ' । अनेकार्थत्वाल्ल्युट् । अवनम् ॥

पर्याप्तिः स्यात् परित्राणं हस्तधारणमित्यपि ।

मरणोद्यतस्य निषेधे पर्याप्तित्रयम् । यथा—'पर्याप्तो नु सुहृदं महाभागः' इति ॥

सेवनं सीवनं स्यूतिः

सेवनत्रयं **सीवनक्रियायाम्** । 'अन्येषामपि—' (६. ३. १३७) इति दीर्घत्वे सीवनम् ॥

विदरः स्फुटनं भिदा ॥ ५ ॥

वस्त्रादेः स्फुटने विदरत्रयम् । दरवद् विदरः । स्फुटनं कुटादि । भिदाद्यङि भिदा ॥

आक्रोशनमभीषङ्गः

आक्रोशनद्वयं शापे । 'सञ्ज सङ्गे' । घञि षत्वे अभीषङ्गः ॥

संवेदो वेदना न ना ।

संवेदद्वयमनुभवे । 'घट्टि*वादिविदिभ्य उपसङ्ख्यानम्' (वा० ३. ३. १०७) इति युचि वेदना । न ना न पुमानित्यर्थः ॥

संमूर्छनमभिव्याप्तिः

सर्वतो व्यापने संमूर्छनद्वयम् । 'मुर्छा मोहसमुच्छ्राययोः' ॥

याच्ञा भिक्षार्थनार्दना ॥ ६ ॥

याच्ञाचतुष्कं याचनायाम् । 'अर्द गतौ याचने च' । 'हेतुमति च' (३. १. २६) इति चकारात् स्वार्थणिचि अर्दना ॥

वर्धनं छेदने

वर्धनद्वयं छेदने । 'वर्धच्छेदनपूरणयोः' । चुरादिः । वर्धनम् ॥

अथ द्वे आनन्दनसभाजने ।
आप्रच्छनम्

आनन्दनत्रयं संवर्गणे । संवर्गणं च बान्धवादेरालिङ्गनचुम्बनस्वागतभाषणादि । आमन्त्रणमिति क्वचित् पाठः । 'सभाज प्रीतिसेवनयोः' । चुरादिणिच् । सभाजनम् ॥

अथाम्नायः संप्रदायः

शिष्यपरम्परागते सदुपदेशे आम्नायद्वयम् । 'म्ना अभ्यासे' । घञ् ॥

क्षये क्षिया ॥ ७॥

क्षयद्वयमपचये । क्षय उक्तः । षित्त्वादङि क्षिया ॥

---

* 'वन्दिवि' इति मुद्रितवार्तिकपाठः ।

ग्रहे ग्राहः

ग्रहद्वयं **ग्रहणे निबन्धे** च। बाहुलकाद् घञ्। ग्राहः। तथाच 'कण्ठे स्वयंग्राहनिषक्तबाहुम्' इति॥

वशः कान्तौ

वशद्वयमिच्छायाम्। 'वश कान्तौ'। 'वशिरण्योरुपसङ्ख्यानम्' (वा० ३. ३. ९८) इत्यप्। वशः॥

रक्ष्णस्त्राणे

रक्ष्णद्वयं **रक्षणे**। 'यजयाच—' (३. ३. ९०) इत्यादिना नङ्। रक्ष्णः॥

रणः क्वणे।

क्वणने शब्दकरणे रणद्वयम्। वशवदप्। रणः॥

व्यधो वेधे

व्यधद्वयं **वेधने**। जपवद् व्यधः। 'विध विधाने'। घञ्। वेधः॥

पचा पाके

पचाद्वयं **पचने**। षित्त्वादङ्। पचा। घञि पाकः॥

हवो हूतौ

हवद्वयं **हवने**॥

वरो वृतौ॥ ८॥

वरद्वयं **वरणे**। वेष्टने प्रार्थनाविशेषे चेत्यन्यः॥

ओषः प्लोषे

ओषद्वयं **दाहे**। घञ्॥

नयो नाये

नयद्वयं **नीतौ**। बाहुलकाद् 'एरच्' (३. ३. ५६)। नयः। 'श्रिणीभुवोरनुपसर्गे' (३. ३. २४) इति घञि नायः॥

ज्यानिर्जीर्णौ

ज्यानिद्वयं **जीर्णतायाम्** । 'ग्लाम्लाज्याहाभ्यो निः' (वा० ३. ३. ९५) । ज्यानिः । 'जॄ्‌ वयोहानौ' । क्तिन् । §'ॠकारल्वादिभ्यः क्तिन् निष्ठावद् भवतीति वक्तव्यम्' (वा० ८. २. ४४) इति निष्ठातिदेशाद् नत्वम् । जीर्णिः ॥

भ्रमिर्भ्रमे ।

भ्रमिद्वयं **भ्रमणे**। *'इक् कृष्यादिभ्यः' (वा० ३. ३. १०८) इतीक् । भ्रमिः । तत्र भ्रमी गौरादिरपि ॥

स्फातिर्वृद्धौ

स्फातिद्वयं **वृद्धौ** । 'स्फायी ओप्यायी वृद्धौ' । क्तिन् । स्फातिः ॥

प्रथा ख्यातौ

प्रथाद्वयं **ख्यातौ** । 'घटादयः षितः' । षित्त्वादङ् । प्रथा ॥

स्पृष्टिः पृक्तौ

स्पृष्टिद्वयं **स्पर्शे** । 'पृची संपर्के' । क्तिन् । पृक्तिः ॥

स्नवः स्रवे ॥ ९ ॥

स्नवद्वयं **स्रवणे** । 'ॠदोरप्' (३. ३. ५७) । स्नवः । 'स्रु गतौ' । स्रवः । बाहुलकघञि स्रावोऽपि ॥

विधा समृद्धौ

विधाद्वयं **समृद्धौ** । विधानं विधा । 'आतश्चोपसर्गे' (३. ३. १०६) इत्यङ् ॥

स्फुरणं स्फरणे

स्फुरणद्वयं **किञ्चिच्चलने** । 'स्फुर स्फुरणे' । कुटादिः । उदुपधान्तः । ल्युट् । स्फुरणम् । अदुपधान्तः स्फर इत्येके । ल्युट् । स्फरणम् ॥

---

§ 'ॠल्वा', * 'इत् कृ' इति मुद्रितवार्त्तिकपाठः ।

प्रमितौ प्रमा ।

तत्त्वानुभूतौ प्रमितिद्वयम् । बाहुलकात् क्तिन् । प्रमितिः । **अङि** प्रमा ॥

प्रसूतिः प्रसवे

प्रसूतिद्वयं **प्रसवे** ॥

श्च्योते प्राघारः

श्च्योतद्वयं **घृतादिक्षरणे** । 'श्च्युतिर् क्षरणे' । श्च्योतः । **'घृ घृ सेचने'** । घञि 'उपसर्गस्य घञ्यमनुष्ये बहुलम्' (६. ३. १२२) इति **दीर्घत्वे** प्राघारः ॥

क्लमथः क्लमे ॥ १० ॥

क्लमथद्वयं **प्रयासे** ॥

उत्कर्षोऽतिशये

उत्कर्षद्वयमतिशये । कृषेर्घञ् । उत्कर्षः । शीङोऽतिशयः ॥

सन्धिः श्लेषे

सन्धिद्वयं **सन्धाने** ॥

विशय आशये ।

यथा आमाशयो जलाशयः । **शेतेरच्** । विशयः आशयः । **आश्रय इति** पाठे श्रिञो रूपम् ॥

क्षिपायां क्षेपणं

क्षिपाद्वयं **प्रेरणे** । 'क्षिप प्रेरणे' । भिदादिः ॥

गीर्णिर्गिरौ

गीर्णिद्वयं गिलने । जीर्णिवद् गीर्णिः । गिरिः कृष्यादिः ॥

गुरणमुद्यमे ॥ ११ ॥

गुरणद्वयमुद्यमने । †'गुरॆ[1] उद्यमने' । कुटादिः । ल्युटि गुरणम् । दीर्घोपधपाठे 'गूर उद्यमने' इत्यत्र चुरादौ[2] व्युत्पाद्यः । यमेर्घञि उद्यमः । 'अड उद्यमे' इति निपातनाद् वृद्ध्यभावः ॥

उन्नाय उन्नये

उन्नायद्वयमुन्नायने । 'अवोदोर्नियः' (३. ३. २६) इति घञि उन्नायः । बाहुलकाद् 'एरच्' (३. ३. ५६) । उन्नयः ॥

श्रायः श्रयणे

श्रायद्वयमाश्रयणे । 'श्रिणी—' (३. ३. २४) इत्यादिना घञि श्रायः ॥

जयने जयः ।

जयनद्वयं जये । 'जि जिये' । ल्युडचौ ॥

निगादो निगदे

निगादद्वयं शब्दने । 'नौ गदनद —' (३. ३. ६४) इत्यादिना पक्षेऽच् ॥

मादो मदे

मादद्वयं दर्पे । उत्तरपदाधिकारे 'सधमादस्थयोश्छन्दसि' (६. ३. ९६) इति निपातनाद् घञि मादः । 'मदोऽनुपसर्गे' (३. ३. ६७) इत्यप् । मदः ॥

उद्वेग उद्भ्रमे ॥ १२ ॥

उद्वेगद्वयं चमत्कारे ॥

---

१. 'रू' ज., 'रु' क. ख. पाठः. २. 'दौ ल्युड् व्यु' ङ. पाठः.

---

† 'गुरी' इति मुद्रितधातुपाठः ।

विमर्दनं परिमले

विमर्दनद्वयं **कुङ्कुमादिमर्दने** । परिमलः । 'मल मल्ल धारणे' । घञ् । संज्ञापूर्वकत्वाद् न वृद्धिः ॥

अभ्युपपत्तिरनुग्रहः ।

अभ्युपपत्तिद्वयं **दानाद्यनुग्रहे** ॥

निग्रहस्तु निरोधः स्याद्

अननुग्रहे निग्रहः ॥

अभियोगस्त्वभिग्रहः ॥ १३ ॥

अभियोगद्वयमु**द्योगे** । येनाभियुक्तश्चात्र इत्युच्यते । आभिमुख्येन युद्धादिनिमित्तं प्रवृत्तिरित्यपरे ॥

मुष्टिबन्धस्तु सङ्ग्राहः

मुष्टिबन्धद्वयं **मुष्टेर्बन्धने** । दृढत्वे 'समि मुष्टौ' (३. ३. ३६) इति घञ् ।

"स्वादयन्तः फलरसं मुष्टिसंग्राहपीडितम्"

(स० ७. श्लो० ४०)

इति भट्टिः । 'खटको मुष्टिः स्त्रियां च संग्राह' इति वोपालितो मुष्टावेव पठति ॥

डिम्बे डमरविप्लवौ ।

परचक्रादिजे महाभये चाटक इति ख्याते डिम्बत्रयम् । डिम्बं **मूर्धन्यादि** पवर्गतृतीयवच्च ॥

बन्धनं प्रसितिश्चारः

येन निगडादिना बध्यते, तत्र बन्धनत्रयम् । 'समे तूद्दानबन्धने' इत्यनेन बन्धनक्रियायां प्रागुक्तः । 'षिञ् बन्धने' । क्तिन् । प्रसितिः । चार उक्तः । 'बन्धापसर्प्ययोश्चार' इति रुद्रः ॥

स्पर्शः स्प्रष्टोपतप्तरि ॥ १४ ॥

स्पर्शत्रयं **रोगे** । तथाच रुद्रः — 'रुजायां स्पर्शो दानस्पर्शयोरपि' इति । 'स्पृश उपताप इति वक्तव्यम्' (वा० ३. ३.१६) इति घञ् । स्पर्शः । वासरूपविधिना च तृच् । 'अनुदात्तस्य चर्दुपधस्यान्यतरस्याम्' (६. १. ५९) इति पक्षे स्प्रष्टा । उपतापकमात्रे स्पर्शत्रयमित्यन्यः । कश्चित् पुनरिदमाह — चरणानां कर्मणि चारस्पर्शौ । स्प्रष्टृद्वयमुपतापकारिणि ॥

निकारो विप्रकारः स्याद्

निकारद्वयम**पकारे** । कृञो घञ् ॥

आकारस्त्विङ्ग इङ्गितम् ।

आकारत्रय**मिङ्गिते** । अन्यस्तु अप्रियार्थसूचके चक्षुरादिचेष्टाविशेष इङ्गितं, भ्रुकुटिमुखरागादौ आकार इति मन्यते ।

"इङ्गितं चेष्टितादन्यदाकारस्त्वङ्गवैकृतम्"

इति तन्त्रान्तरं च ।

"तस्य संवृतमन्त्रस्य गूढाकारेङ्गितस्य च"

(रघु० स० १. श्लो० २०)

इति कालिदासोऽपि ॥

परिणामो विकारे

परिणामद्वयं **विकारे** । प्रकृतेश्चान्यथात्वं विकारः । यथा मृत्पिण्डविकारो घटः, काष्ठस्य भस्म ॥

द्वे समे विकृतिविक्रिये ॥ १५ ॥

विकृतिद्वयं **प्रकृतेरन्यथात्वमात्रे** । तच्च नावश्यं परिणामरूपमेव । यथा मुखस्य विकृतिः । 'अमार्गे[1] विक्रिया स्त्रियाम्' इत्यमरमाला । अत उन्मार्गे द्वयमित्यन्यः । चत्वारोऽप्येकार्थे इत्यपरः ॥

---

१. 'र्गै' ज. पाठः.

अपहारस्त्वपचयः

अपहारद्वयमपचये ॥

समाहारः समुच्चयः ।

समाहारद्वयं कूटीकरणे । यथा श्लोकसमुच्चयादिः ॥

प्रत्याहार उपादानं

विषयेभ्य इन्द्रियाहरणे प्रत्याहारद्वयम् ॥

विहारस्तु परिक्रमः ॥ १६ ॥

पद्भ्यां गमने विहारद्वयम् ॥

अभिहारोऽभिग्रहणं

अन्नाहारेऽभिहारद्वयम् । चौर्यकरणे वा । अभिमुखग्रहणे वेत्यन्यः[2] ॥

निर्हारोऽभ्यवकर्षणम् ।

शल्यादेरुत्पाटने निर्हारद्वयम् ॥

अनुकारोऽनुहारः स्याद्

अनुकारद्वयं सादृश्ये ॥

अर्थस्यापगमे[1] व्ययः ॥ १७ ॥

अर्थस्यापगमे व्ययः । 'व्यय वित्तसमुत्सर्गे' । चुरादिणिच् । 'अतो लोपः' (६. ४. ४८) इत्यकारलोपः ॥

प्रवाहस्तु प्रवृत्तिः स्यात्

जलादीनामविच्छिन्नायां सन्ततौ प्रवाहद्वयम् । प्रवाहो घञन्तः ॥

प्रवहो गमनं बहिः ।

---

१. 'कटिक' घ. ञ., 'कु' ङ. पाठः. २. 'चे' ञ. पाठः.

गृहनगरादेर्बाह्यगमनं यात्रा प्रवहो बाहुलकादपि। 'प्रवहः स्याद् बहिर्यात्रा' इति त्रिकाण्डः ॥

वियामो वियमो यामो यमः संयामसंयमौ ॥ १८ ॥

वियामषट्कं **संयामे** । 'यमः समुपनिविषु च' (३. ३. ६३) इति पक्षेऽप् ॥

हिंसाकर्माभिचारः स्याद्

अथर्ववेदोक्तं हिंसात्मकं कर्माभिचारः ॥

जागर्या जागरा द्वयोः ।

जागर्याद्वयं **जागरे** । 'जागर्तेरकारो वेति वक्तव्यम्' (वा० ३. ३. १०१) इति शप्रत्ययाकारप्रत्ययौ । शपक्षे 'सार्वधातुके यक्' (३.१. ६७) इति यक् । 'जाग्रोऽविचिण्णल्ङित्सु' (७. ३. ८५) इति गुणे जागर्या । परत्वाद् 'रिङ् शयग्लिङ्क्षु' (७.४.२८) इति रिङि जाग्रियेति धातुपारायणम् । अकारप्रत्ययपक्षे जागरेति ॥

विघ्नोऽन्तरायः प्रत्यूहः

विघ्नत्रयं **विघ्ने** । 'घञर्थे कविधानम्' (वा० ३. ३. ५८) इति कः । **विघ्नः** ॥

स्यादुपघ्नोऽन्तिकाश्रये ॥ १९ ॥

समीपभूत आश्रये उपघ्नः । 'उपघ्न आश्रये' (३. ३. ८५) इत्यप्रत्ययान्तो निपातितः ॥

निर्वेश उपभोगः स्यात्

निर्वेशद्वयमुपभोगे । घञ् ॥

परिसर्पः परिक्रिया ।

परिजनादिवेष्टने परिसर्पद्वयम्। 'गम्लृ सृप्लृ गतौ'। घञि परिसर्पः॥

विधुरं तु प्रविश्लेषः

दुःस्थितकाद् विक्लवत्वे विधुरद्वयम्। प्रकृष्टो विश्लेषः प्रविश्लेषः।

"वैकल्येऽपि च विश्लेषे विधुरं विकले त्रिषु"

इति त्रिकाण्डशेषः॥

अभिप्रायश्छन्द आशयः॥ २०॥

अभिप्रायत्रय**मभिप्राये**। छन्दोऽदन्तः। 'अभिप्रायवशौ छन्दौ' इत्यनेकार्थे वक्ष्यति। सान्तोऽप्यभिप्रायवाची छन्दश्शब्द इति जयादित्यः॥

संक्षेपणं समसनं

विस्तीर्णस्य संक्षेपे संक्षेपणद्वयम्॥

पर्यवस्था विरोधनम्।

पर्यवस्थाद्वयं **विरोधने**। अङि पर्यवस्था॥

परिसर्या परीसारः

भूमौ सर्वतो भ्रमणे परिसर्याद्वयम्। परिचर्यावत् परिसर्या। 'उपसर्गस्य—' (६. ३. १२२) इत्यादिना दीर्घत्वे परीसारः॥

स्यादास्या त्वासना स्थितिः॥ २१॥

आस्यात्रय**मुपवेशने**। 'आस उपवेशने'। भावे ण्यत्। आस्या। 'ण्यासश्रन्थो युच्' (३. ३. १०७)। आसना। 'स्थागापापचो भावे' (३. ३. ९५) इति क्तिन्। स्थितिः॥

विस्तारो विग्रहो व्यासः

विस्तारत्रयं **पटादीनां विस्तीर्णतायाम्**। 'प्रथने वावशब्दे' (३. ३. ३३) इति घञ्। विस्तारः। 'असु क्षेपणे'। घञ्। व्यासः॥

स तु शब्दस्य विस्तरः ।

स च व्यासो न शब्दसम्बन्धी विस्तारः । शब्दविषये तु अशब्द इति निषेधादवेव भवति । यथा वाचां विस्तरः ॥

स्यान्मर्दनं संवाहनं

मर्दनद्वयं मर्दने । 'वाहृ प्रयत्ने' । भावे ल्युट् । संवाहनम् । संवहनमित्यपपाठः । वहेर्मर्दने वृत्त्यभावात् ॥

विनाशः स्याददर्शनम् ॥ २२ ॥

विनाशद्वयं लु(क्ता?प्ता)यने । तथाहि नश्यतिरदर्शने वर्तते । प्रयुक्तं च भट्टिना — 'ननाश शत्रुर्ददृशे सुवेलः' इति । तिरोबभूवेत्यर्थः ॥

संस्तवः स्यात् परिचयः

संस्तवद्वयं परिचये ॥

प्रसरस्तु विसर्पणम् ।

स्वल्पविटपादेर्वर्धने प्रसरद्वयम् ॥

नीवाकस्तु प्रयामः स्यात्

महार्घाद् धान्यादिषु जलादीनामतिशये नीवाकद्वयम् । 'वच परिभाषणे' । घञि दीर्घत्वे नीवाकः ॥

संनिधिः संनिकर्षणम् ॥ २३ ॥

संनिधिद्वयं संनिधौ । संनिधिर्ना ॥

लवोऽभिलावो लवने

लवत्रयं धान्यादीनां छेदने । 'ऋदोरप्' (३. ३. ५७) । लवः । 'निरभ्योः पूल्वोः' (३. ३. २८) इति घञि अभिलावः ॥

निष्पावः पवने पवः ।

धान्यादीनां पूतीकरणे वहुलीकरणादौ निष्पावत्रयम् । घञ्-ल्युडपः ॥

प्रस्तावः स्यादवसरः

प्रस्तावद्वयमवसरे । 'प्रे द्रुस्तुस्रुवः' (३. ३. २७) इति घञ् । प्रस्तावः ॥

त्रसरः सूत्रवेष्टनम् ॥ २४ ॥

तन्तुवायानां तसल्लीति ख्याते तसरद्वयम् । 'तन्यृषिभ्यां क्सरन्' (उ० ३. ७५) । एवं तसरोऽसंयोगादिरुणादावुक्तः । 'त्रसी उद्वेगे' । बाहुलकोऽरः । त्रसर इत्यन्यः ॥

प्रजनः स्यादुपसरः

स्त्रीगवीषु पुंगवानां प्रथमगमने प्रजनद्वयम् । भावे घञि 'जनिवध्योश्च' (७. ३. ३५) इति वृद्धिप्रतिषेधः । प्रजनः पुमान् । क्लीबं त्वपपाठः । 'प्रजने सर्तेः' (३. ३. ७१) इत्यप् । उपसरः ॥

प्रसरः प्रणयः समौ ।

प्रसरद्वयं प्रश्रये ॥

धीशक्तिर्निष्क्रमः

"शुश्रूषा श्रवणं चैव ग्रहणं धारणं तथा ।
ऊहापोहार्थविज्ञानं तत्त्वज्ञानं च धीगुणाः ॥"

धीगुण एव धीशक्तिः, तत्र निष्क्रमः ॥

अस्त्री तु संक्रमो दुर्गसंचरः ॥ २५ ॥

संक्राम इति ख्याते संक्रमद्वयम् ॥

प्रत्युत्क्रमः प्रयोगार्थः

---

१. 'ति' ज. पाठः. २. 'री' ज. पाठः. ३. 'निषेधे प्रज' ङ. पाठः.

प्रकृष्टप्रयोगो युद्धं, तदर्थं यत् प्रत्युपक्रमणं तत् प्रत्युत्क्रमः। 'प्रत्युत्क्रमः प्रयुद्धार्थम्' इति भागुरिः॥

प्रक्रमः स्यादुपक्रमः।

प्रथमारम्भे प्रक्रमद्वयम्॥

स्यादभ्यादानमुद्घात आरम्भे

आरम्भमात्रेऽभ्यादानत्रयम्। पञ्चैवारम्भमात्रे इत्यन्यः॥

संभ्रमस्त्वरा ॥२६॥

संभ्रमद्वयं संभ्रमे। घटादेः षित्त्वादङ्। त्वरा॥

प्रतिबन्धः प्रतिष्टम्भः

कार्यप्रतीघाते प्रतिबन्धद्वयम्। 'स्तन्भेः' (८. ३. ६७) इति षत्वे प्रतिष्टम्भः॥

अवनायस्तु नियातनम्।

अधोनयेऽवनायद्वयम्। 'अवोदोर्नियः' (३. ३. २६) इति घञ्। अवनायः॥

उपलम्भस्त्वनुभवः

उपलम्भद्वयमनुभवे। उपलम्भादौ 'उपसर्गात् खल्घञोः' (७. १. ६७) इति नुम्॥

समालम्भो विलेपनम् ॥२७॥

कुङ्कुमादिना गात्रघर्षणे समालम्भद्वयम्॥

विप्रलम्भो विप्रयोगः

स्त्रीपुंसयोर्विरहे विप्रलम्भद्वयम्॥

विलम्भस्त्वतिसर्जनम्।

विलब्धौ विलम्भद्वयम्॥

विश्रावस्तु प्रविख्यातिः

अतिशयितायां प्रसिद्धौ विश्रावद्वयम्। 'वौ क्षुश्रुवः' (३. ३. २५) इति घञ्। विश्रावः॥

अवेक्षा प्रतिजागरः ॥ २८ ॥

अवेक्षाद्वयं प्रत्यवेक्षणे ॥

निपाठनिपठौ पाठे

निपाठत्रयं पठने ॥

तेमस्तेमौ समुन्दने ।

तेमत्रयमार्द्रीभवने । 'तिम ष्टिम आर्द्रभावे' । घञ् । 'उन्दी क्लेदने' । ल्युट् ॥

आदीनवास्रवौ क्लेशे

आदीनवत्रयं रोगादिक्लेशे । अत्यन्तदीना दरिद्राः सन्त्यत्रेति आदीनवः । वप्रकरणे 'अन्येभ्योऽपि—' (वा० ५. २. १०९) इति मत्वर्थीयो वः ॥

मेलके सङ्गसंगमौ ॥ २९ ॥

मेलकत्रयं सङ्गमे । 'मिल सङ्गे' । घञ् । स्वार्थे कः । मेलकः ॥

संवीक्षणं विचयनं मार्गणं मृगणा मृगः ।

अपहृतवस्तुनस्तात्पर्यान्वेषणे संवीक्षणपञ्चकम् । 'मार्ग अन्वेषणे' । मार्गणम् । 'मृग अन्वेषणे' । चुरादिरदन्तः । युचि मृगणा । ण्यन्ताद् घञि णिलोपः । मृगः ॥

परिरम्भः परिष्वङ्गः संश्लेष उपगूहनम् ॥ ३० ॥

परिरम्भचतुष्टयमालिङ्गने । 'रभेरशब्लिटोः' (७. १. ६३) इति नुम् । परिरम्भः । 'उपसर्गात् सुनोति—' (८. ३. ६५) इत्यादिना षत्वे परिष्वङ्गः । 'गुहू संवरणे' । लघूपधगुणः । तस्य च 'ऊदुपधाया गोहः' (६. ४. ८९) इत्यूत्त्वम् । उपगूहनम् ॥

निर्वर्णनं तु निध्यानं दर्शनालोकनेक्षणम् ।

निर्वर्णनपञ्चकं दर्शने ॥

प्रत्याख्यानं निरसनं प्रत्यादेशो निराकृतिः ॥ ३१ ॥

प्रत्याख्यानचतुष्कं निराकरणे । 'असु क्षेपणे' । निरसनम् ॥

उपशायो विशायश्च पर्यायशयनार्थकौ ।

उपशायद्वयं क्रमात् प्रहरिकादीनां शयने । 'व्युपयोः शेतेः पर्याये' (३. ३. ३९) इति घञ् ॥

अर्तनं च ऋतीया च हृणीया च घृणार्थके ॥ ३२ ॥

घृणा जुगुप्सा तदर्थे अर्तनत्रयम् । ऋतिः सौत्रः । ल्युट् । अर्तनम् । 'ऋतेरीयङ्' (३. १. २९) इतीयङि ऋतीया । 'हृणीङ् लज्जायाम्' । कण्ड्वादिः । ततो यगन्तादप्रत्यये हृणीया । ऊष्मादिः ॥

स्याद् व्यत्यासो विपर्यासो व्यत्ययश्च विपर्यये ।

अन्यस्यान्यस्य रूपेण ग्रहे विपर्यासचतुष्कम् । अस्यतेर्घञ् । विपर्यासः । 'इण् गतौ' । 'एरच्' (३. ३. ५६) । विपर्ययः ॥

पर्ययोऽतिक्रमस्तस्मिन्नतिपात उपात्ययः ॥ ३३ ॥

पर्ययचतुष्कं व्यतिक्रमे । पूर्वमानुपूर्(र्वे ? र्वी)प्रक्रमेणानुक्रमादय उक्ताः, इह तु व्यत्ययप्रक्रमेण पर्ययः । 'परावनुपात्यय—' (३. ३. ३८) इत्यनुक्रमे घञ् । इह तु 'एरच्' (३.३. ५६) । पर्ययः ॥

प्रेषणं यत् समाहूय तत्र स्यात् प्रतिशासनम् ।

(भर्तारान्विता ? भृत्यादीनां) यत् प्रेषणं, तत् प्रतिशासनम् ॥

संस्तावस्तु क्रतुषु या स्तुतिभूमिर्द्विजन्मनाम् ॥ ३४ ॥

यज्ञे स्तुतिं कुर्वतां ब्राह्मणानामवस्थानभूमौ संस्तावः । 'यज्ञे समि स्तुवः' (३. ३. ३१) इति घञ् ॥

निधाय तक्ष्यते यत्र का[illegible]ं स उद्घनः ।

काष्ठतक्षणार्थमधःस्थापितकाष्ठे उद्घनः । 'उद्घनोऽत्याधानम्' (३. ३. ८०) इति निपातितः । हन्तेरप्, हकारस्य च घकारः ॥

स्तम्बघ्नस्तु स्तम्बघनः स्तम्बो येन निहन्यते ॥ ३५ ॥

---

१. 'पूर्वक' छ. पाठः. २. 'का' ट., 'कारं पित्वा य' ञ., 'कारं बित्वा य' घ. पाठः.

तृणादिगुच्छोन्मूलनकारिणि खनित्रादौ स्तम्बघ्नद्वयम्। 'स्तम्बे क च' (३. ३. ८३) इति कापौ प्रत्ययौ घत्वं च॥

आविधो विध्यते येन तत्र

येन भ्रमरादिना विध्यते, **तत्र** आविधः। 'घञर्थे कविधानम्' (वा० ३. ३. ५८) इति कः॥

विष्वक्समे निघः।

विष्वक्समे **समन्तात् समारोहपरिणाहे वृक्षादौ** निघः। 'निघो निमितम्' (३. ३. ८७) इति निपातितः। हन्तेरप्, टिलोपः, घत्वं च॥

उत्कारश्च निकारश्च द्वौ धान्यक्षेपणार्थकौ॥ ३६॥

धान्यस्योर्ध्वप्रेरणे उत्कारद्वयम्। 'कॄ धान्ये' (३. ३. ३०) इति घञ्॥

निगारोद्गारविक्षावोद्ग्राहा निगरणादिषु।

निगारचतुष्टयं यथाक्रमं **निगरणोद्गारणक्षवणोद्ग्रहणेषु**। एतच्च **आदिशब्देन गृह्यते**। तत्र निगारोऽभ्यवहारः। उद्गार उद्गार इति ख्यातः। क्षवः कासः। उद्ग्राह उद्ग्राहणीति ख्यातः। ऊर्ध्वीकृत्यापि ग्रहणमित्यन्यः। 'उन्न्योर्ग्रः' (३. ३. २९) इति घञि निगारोद्गारौ। 'वौ क्षुश्रुवः' (३. ३. २५) इति घञि विक्षावः। 'उदि ग्रहः' (३. ३. ३५) इति घञि उद्ग्राहः। यद्यपि गीर्णिर्गिराविव्युक्तः, तथापि शब्दान्यत्वादुद्गारशब्दप्रसङ्गाच्च निगारोऽपि निग(र इति ? रण इव) पुनरुच्यते॥

आरत्यवरतिविरतय उपरामे

अथार्याद्वयम्। आरतिचतुष्टयमुपरतौ। आङादिपूर्वाद् रमेः क्तिनि त्रयम्। 'यमु उपरमे' इति निपातनाद् घञि अवृद्धौ उपरमः। 'अबाधकान्यपि निपातनानी'ति उपरामः॥

वा स्त्रियां तु निष्ठेवः॥ ३७॥

निष्ठ्यूतिर्निष्ठीवनं निष्ठेवनमित्यभिन्नानि ।

मुखादिना श्लेष्मादिनिःसरणे निष्ठेवचतुष्कम् । 'वा स्त्रियाम्' इति पाठात् स्त्रियामङि निष्ठेवा । अथवा 'उपरामे च' इति पाठे चकारादारक्तावप्यारतिशब्दः । अवरतिविरतिशब्दौ विरामेऽपि ॥

जवने जूतिः

जवनद्वयं वेगे । जुः सौत्रो वेगे । 'ऊतियूतिजूतिसातिहेतिकीर्त्तयश्च' (३. ३. ९७) इति निपातनात् क्तिनि दीर्घः ॥

सातिस्त्ववसानं स्याद्

सातिद्वयमवसाने । क्रियासमाप्तावित्यन्यः । जूतिवत् स्यतेः सातिः ॥

अथ ज्वरे जूर्तिः ॥ ३८ ॥

ज्वरद्वयं **ज्वरणे** । ज्वररोगे इति यावत् । ज्वरयतेर्घञ् । ज्वरः । घटादित्वान्न वृद्धिः । 'ज्वरत्वरस्त्रिव्यविमवामुपधायाश्च' (६. ४. २०) इत्यूठि जूर्तिः ॥

उदजस्तु पशुप्रेरणम्

गवादिपशूनां प्रेरणे उदजद्वयम् । 'समुदोरजः पशुषु' (३. ३. ६९) इत्यप् । उदजः ॥

अकरणिरित्यादयः शापे ।

शापे आक्रोशे, क्रियाक्षेपे इति यावत् । अकरणिः, अजननिरित्यादयोऽनिप्रत्ययान्ताः शब्दा बोद्धव्याः । आदिना 'आक्रोशेऽवन्योर्ग्रहः' (३. ३. ४५) इति घञन्तश्च । 'आक्रोशे नञ्यनिः' (३. ३. ११२) । अकरणिः । यथा—'अकरणिस्ते वृषल ! भूयात्' ।

"तस्याजननिरेवास्तु जननीक्लेशकारिणः" (माघ० स० २. श्लो० ४५) इति । 'अवग्राहोऽद्य ते वृषल ! भूयाद्' इति । 'निग्राहोऽद्य वृषल ! भूयाद्' इति ॥

गोत्रान्तेभ्यस्तस्य वृन्दमित्यौपगवकादिकम् ॥ ३९ ॥

गोत्रप्रत्ययान्तेभ्य औपगवादिभ्यस्तस्य वृन्दमित्यर्थे 'गोत्रोक्षोष्ट्रोरभ्र—' (४.२.३९)इत्यादिना वुञि कृते औपगवकम्। आदिना कापटवकमित्यादि विज्ञेयम्। वृन्दम् इत्ययमधिकारो वर्गसमाप्तिर्यावत्॥

आपूपिकं शाष्कुलिकमेवमाद्यमचेतसाम्।

अचेतसाम् अप्राणिनाम्। अपूपानां वृन्दम् आपूपिकम्। शाष्कुलिकम्। आदिना आपौपिकप्रभृतयः। 'अचित्तहस्तिधेनोष्ठक्' (४. २. ४७)॥

माणवानां तु माणव्यं

माणवा बालाः, तेषां समूहो माणव्यम्। 'ब्राह्मणमाणवबाडवाद् यत्' (४. २. ४२)॥

सहायानां सहायता॥४०॥

सहायानां समूहे सहायता। 'ग्रामजनबन्धुसहायेभ्यस्तल्' (४. २. ४३)॥

हल्या हलानां

हलानां समूहे हल्या। 'पाशादिभ्यो यः' (४. २. ४९)॥

ब्राह्मण्यबाडव्ये तु द्विजन्मनाम्।

ब्राह्मणानां समूहे ब्राह्मण्यद्वयम्। माणव्यवद् यत्॥

द्वे पर्शुकानां पृष्ठानां पार्श्वं पृष्ठ्यमिति क्रमात्॥४१॥

पर्शुकानां पार्श्वास्थिखण्डानां समूहः पार्श्वम्। *'पर्शोर्णस् वक्तव्यः' (वा० ४. २. ४३) इति णस्प्रत्ययः। 'सिति च' (१. ४. १६) इति पदसंज्ञायाम् 'ओर्गुणः' (६. ४. १४६) इति न गुणः। पृष्ठानां स्तोत्राणां वृन्दं पृष्ठ्यम्। न त्वधमावयववचनः। 'पृष्ठादुपसङ्ख्यानम्' (वा० ४. २. ४२) इति यत्॥

खलानां खलिनी खल्यापि

खलो धान्यसंचयस्थानम् । **तेषां समूहे** खलिनीद्वयम् । '**इनित्रकट्यचश्च**' (४. २. ५१) इतीनिः । खलिनी । यति खल्या ॥

अथ मानुष्यकं नृणाम् ।

नृणां समूहे मानुष्यकम् । 'गोत्रोक्षोष्ट्र—' (४. २. ३९) इत्यादिना वुञ् ॥

ग्रामता जनता धूम्या पाश्या गल्या पृथक् पृथक् ॥ ४२ ॥
अपि साहस्रकारीषवार्मणाथर्वणादिकम् ।

ग्रामादिसमूहे यथाक्रमं ग्रामतादिपञ्चकम् । सहायतावत् तलि द्वयम् । अपरं पाशादियदन्तम् । पाशादिषु पोटगलेति पठ्यते । तत्र पोटशब्दात् पृथगेव गलशब्द इति प्रतिपन्ने गल्येत्युदाहृतम् । अन्ये त्वाहुः— एक एवायं पोटगलशब्दः । तत्र पोटगल्येति रूपं साधु, न तु गल्येति । ततश्च पोटगल्येत्यत्र बोद्धव्यम् । तथाहि तत्र पाल्यकीर्तिविवरणं पोटगलो बृहत्काशः । पृथगित्यनेन ग्रामतादीनां पर्यायतां निरस्यति । पृथक् पृथगिति सम्बन्धप्रतिपादनार्थमपिशब्दः । सहस्राणां समूहः साहस्रम् । करीषः शुष्कगोमयः, तत्समूहे कारीषम् । वर्म कवचं, तत्समूहे वार्मणम् । भिक्षादिपाठादण् । 'आथर्वणिकस्येकलोपश्च' (४. ३. १३३) इति अणि इकलोपे आथर्वणम् । आदिना अङ्गाराणां समूह आङ्गारम् । चर्मणां समूहे चार्मणम् ॥

इति वन्द्यघटीयश्रीसर्वानन्दकृतौ टीकासर्वस्वे

सङ्कीर्णवर्गः ।

नानार्थाः केऽपि कान्तादिवर्गेष्वेवात्र कीर्तिताः ।
भूरिप्रयोगा ये येषु पर्यायेष्वपि तेषु ते ॥ १ ॥

ननु य एव पूर्ववर्गेणोक्ताः, त एवात्रापि कान्तादिवर्गेऽभिहिताः । अथावश्यमनेकार्थवर्गारम्भः कार्यः, तदा ते किमिति पर्यायेषूक्ता इति

शङ्कायामाह — **नानार्था** इत्यादि । अत्रैव कान्तखान्तादिवर्गे **नानार्था** **अनेकार्थाः** शब्दा उक्ताः, न पूर्वपर्यायवर्गे । यथा—

"मारुते वेधसि ब्रध्ने पुंसि कः कं शिरोम्बुनोः"

इति । केऽपीति वचनात् केऽप्यत्र नोक्ता एव । यथा घोण्टा सृगालकोलौ पूगे च पूर्ववर्ग एवोक्ताः । ये तु शब्दा येष्वर्थेषु भूरिप्रयोगाः काव्यादिषु दृष्टाः, ते तु पर्यायेष्वपि तेषु तेष्वर्थेषूक्ताः । अत्रापि यथा — नाकशब्दः स्वर्गे, अत्राप्याकाशे कीर्तितः । कीर्तनं चाध्येतुः स्मरणार्थम् । अतः सर्वं सुस्थम् ॥

आकाशे त्रिदिवे नाकः

त्रिदिवे स्वर्गे ॥

लोकस्तु भुवने जने ।

भुवनं स्वर्गादि । जनो मनुष्यादिः ॥

पद्ये यशसि च श्लोकः

पद्यं चतुष्पदी । 'श्लोकृ सङ्घाते' । घञि श्लोकः ॥

शरे खड्गे च सायकः ॥ २ ॥

सायको दन्त्यादिः ॥

जम्बुकौ क्रोष्टुवरुणौ

वरुणो दिक्पतिः ॥

पृथुकौ चिपिटार्भकौ ।

चिपिटः 'चिडउ' इति ख्यातः ॥

आलोकौ दर्शनोद्द्योतौ

चक्षुर्विज्ञानं दर्शनम्, उद्द्योत आतपः ॥

भेरीपटहमानकौ ॥ ३ ॥

---

१. 'तु तेषु तेष्वर्थेषु पर्यायवर्गेषू' क. ख. घ. ङ. छ. ट. पाठः. २. 'तः सम्य-' गध्ये' ठ. पाठः.

'द्वन्द्वश्च प्राणितूर्यसेनाङ्गानाम्' (२. ४. २) इत्येकवद्भावे भेरीपटहम् ॥

उत्सङ्गचिह्नयोरङ्कः

उत्सङ्गः क्रोडम् ॥

कलङ्कोऽङ्कापवादयोः ।

अङ्कश्चिह्नम् ॥

तक्षको नागवर्धक्योः

नागो नागविशेषः ॥

अर्कः स्फटिकसूर्ययोः ॥ ४ ॥

अर्को वृक्षभेदोऽपि ॥

मारुते वेधसि ब्रध्ने पुंसि कः कं शिरोम्बुनोः ।

पुंसि आत्मनीत्यर्थः । तथाच रभसः—'प्रजापत्यात्मवातार्के कः' इत्यादि । रूपभेदादेव शिरोम्बुनोः कं क्लीबम् ॥

स्यात् पुलाकस्तुच्छधान्ये संक्षेपे भक्तसिक्थके ॥ ५ ॥

तुच्छधान्ये वातानेति ख्याते । संक्षेपे क्षुद्रे । तथाच बुद्धचरितं—
"निबोध किञ्चित्तु पुलाकमात्रं वाक्यं मुनेर्वाक्यविदां वरस्य"

इति । भक्तसिक्थके भक्तगुडके[1] । 'पुल महत्त्वे' । 'पिनाकादयश्च' (उ० ४. १५) इति आकः । पुलाकः ॥

उलूके करिणः पुच्छमूलोपान्ते च पेचकः ।

पुच्छमूलोपान्ते गुदस्याच्छादके मांसपिण्डे ॥

कमण्डलौ च करकः

वनौषधौ 'करकदाडिमौ' इत्युक्तम् । तदपेक्षया कमण्डलौ चेति समुच्चयः ॥

---

१. 'के । भक्तजाडि काचत् । पु' क. ख. ग. घ. ङ. च. छ. ज. ट. पाठः.

सुगते च विनायकः ॥ ६ ॥

चकाराद् गणपतौ च ॥

किष्कुर्हस्ते वितस्तौ च

"किष्कुर्हस्ते वितस्तौ च प्रकोष्ठेऽप्यनपुंसकम्"

इति रुद्रः ॥

शूककीटे च वृश्चिकः।

चकाराद् गोमये वृश्चिके च वृश्चिकः ॥

प्रतिकूले प्रतीकस्त्रिष्वेकदेशे च पुंस्ययम् ॥ ७ ॥

प्रतिकूले प्रतीपे त्रिषु। एकदेशे अवयवे नरि ॥

स्याद् भूतिकं तु भूनिम्बे कत्तृणे भूस्तृणेऽपि च।

भूनिम्बः चिराइतेति ख्यातः। कत्तृणे रामकर्पूराख्ये। भूस्तृणे गन्धरवेड इति ख्याते ॥

ज्योत्स्निकायां च घोषे च कोशातकी

ज्योत्स्निका पजिरालीति ख्याते। घोषको लताविशेषः ॥

अथ कट्फले ॥ ८ ॥

सिते च खदिरे सोमवल्कः स्याद्

सित इति खदिरविशेषणम् ॥

अथ सिह्लके।

तिलकल्के च पिण्याकः

तिलकल्का तिलखलिः ॥

बाह्लिकं रामठेऽपि च ॥ ९ ॥

'बाह्लीकं धीरहिङ्गुनोर्नाभ्रदेशयोः'। धीरं कुङ्कुमम् ॥

महेन्द्रगुग्गुलूलूकव्यालग्राहिषु कौशिकः ।

महेन्द्रः ॥

रुक्तापशङ्कास्वातङ्कः

रुग् रोगः । शङ्का भयम् ॥

स्वल्पेऽपि क्षुल्लकस्त्रिषु ॥ १० ॥

स्वल्पे कनिष्ठे । स्तोके चेत्यन्यः । अपिना नीचेऽपि ॥

जैवातृकः शशाङ्केऽपि

दीर्घायुषि च जैवातृकः ॥

खुरेऽप्यश्वस्य वर्तकः ।

"पक्षिभेदे नरि क्लीबं खुरेऽप्यश्वस्य वर्तकः" ॥

व्याघ्रेऽपि पुण्डरीको ना

"पुण्डरीकं सितच्छत्रे सिताम्भोजेऽपि कीर्तितम् ।
पुण्डरीको व्याघ्रभेदे दिग्गजेक्षुप्रभेदयोः ॥"

इत्यजयः ॥

यवान्यामपि दीप्यकः ॥ ११ ॥

जीरकेऽपि दीप्यकः ॥

शालावृकाः कपिक्रोष्टुश्वानः

शालावृकस्तालव्यादिः ॥

स्वर्णेऽपि गैरिकम् ।

शिलाविकारे च गैरिकम् ॥

पीडार्थेऽपि व्यलीकं स्याद्

अप्रियाकारवैलक्ष्येष्वपि व्यलीकम् । दीर्घमध्यम् ॥

अलीकं त्वप्रियेऽनृते ॥ १२ ॥

दीर्घमध्यमलीकम् ॥

शीलान्वयावनूके द्वे

शीलं स्वभावः । अन्वयो वंशः ॥

शल्कं शकलवल्कले ।

तालव्यादि शकलं खण्डवाचि । 'शल्कं तु वल्कले खण्डे' इत्यजयः । 'शशाङ्कशल्काकृतिपाण्डरेण' (स० १७. श्लो० ६१) इति भारविप्रयोगः । अथवा शकलं मत्स्यानां कवचप्राया त्वक्, तद्योगात् शकली मत्स्यः । वल्कलं वृक्षादित्वक् ॥

साष्टे शते सुवर्णानां हेम्न्युरोभूषणे पले ॥ १३ ॥

दीनारेऽपि च निष्कोऽस्त्री

सहाष्टभिर्वर्तत इति साष्टम् । साष्टं च तत् शतं चेति साष्टशतम ष्टोत्तरशतम् । हेम्नीति स्वर्णमात्रे । उरोभूषणे मुखखण्डाख्ये । पले इति हेमपले । दीनारे देशान्तरे स्वनामप्रसिद्धे ॥

कल्कोऽस्त्री समलैनसोः ।

दम्भेऽपि

समलः पापाशयः ।

"त्रिषु पापाशये कल्कोऽस्त्री विट्किट्टभदम्भयोः"

इति रुद्रः ॥

अथ पिनाकोऽस्त्री शूलशङ्करधन्वनोः ॥ १४ ॥

शूलोऽस्त्रभेदः ॥

धेनुका तु करेण्वां च

करेणुः हस्तिनी । नवप्रसूतगवीषु च धेनुका ॥

मेघजाले च कालिका ।

मेघजाले मेघवृन्दे ।

"धूमरीयोगिनीभेदे मानवाब्देषु कालिका ।
क्रयदेये वस्तुमूल्ये कार्ष्ण्ये काल्यां घनावलौ ॥"

इति रभसः । धूमरीह हेतिका । काल्याः कृष्णत्वम् ॥

कारिका यातनावृत्त्योः

यातना तीव्रवेदना । वृत्तिः सूत्रप्रायो बह्वर्थः प्रक्षिप्तो विवरश्लोकः ॥

कर्णिका कर्णभूषणे ॥ १५ ॥

करिहस्ताङ्गुलौ पद्मबीजकोश्यां

कर्णभूषणं तालपत्रम् ॥

त्रिषूत्तरे ।

उत्तरे वृन्दारकादयः कान्तवर्गोक्तास्त्रिषु । अवधेरनिर्देशेऽपि कान्तविजातीयतया न मयूखादयः ॥

वृन्दारकौ रूपिमुख्यौ

रूपिस्वरूपिमनोज्ञा इति पर्यायः । मुख्यो वृन्दारकः । पुरुषवृन्दारको योषिद्वृन्दारिका कलत्रवृन्दारकम् ॥

एके मुख्यान्यकेवलाः ॥ १६ ॥

प्रधानान्यैकाकिनाम् एकशब्दः । मुख्ये यथा — 'सर्वसार्थैकबन्धुः' । अन्यार्थे यथा —'एके आचार्याः' । केवलार्थे यथा — एकाकिभिः क्षुद्रैर्ज्ञातम्' ॥

स्याद् दाम्भिके कौकुटिको यश्चादूरेरितेक्षणः ।

---

१. 'म' ज. ठ., 'ध्य' च पाठः.

कुहनावृत्तिर्दाम्भिकः । पादविक्षेपदेशे चक्षुः संयम्य यो भिक्षुर्गन्ता सोऽदूरेक्षगो भिक्षुः । तौ कौक्कुटिकाख्यौ ।

"मिथ्याचर्या कुक्कुटिरीर्यापथकल्पना कुहना"

इति रत्नकोषः । 'संज्ञायां ललाटकुक्कुट्यौ पश्यति' (४. ४. ४६) इति ठक् ॥

लालाटिकः प्रभोः फालदर्शी कार्याक्षमश्च यः ॥ १७ ॥

यः सेवकः कोपचिह्नसंलक्षणाय प्रभोर्ललाटमेव पश्यति, स्वामिकार्ये च यो नोपयुज्यते, तौ लालाटिकौ । कौक्कुटिकवट्ठक् ॥

कान्तः ।

मयूखस्त्विट्करज्वालासु

त्विड् दीप्तिः । करः किरणः ॥

अलिबाणौ शिलीमुखौ ।

अलिः भ्रमरः ॥

शङ्खो निधौ ललाटास्थि कम्बौ न स्त्री

निधौ निधिभेदे ललाटास्थि च । न स्त्री पुंनपुंसकम् ॥

इन्द्रियेऽपि

"खशब्दः शून्यबिन्दौ च स्वर्गाकाशेन्द्रियेषु च"

इति व्याडिः ॥

घृणिज्वाले अपि शिखे

शिखा चूडादावपि ॥

खान्तः ।

शैलवृक्षौ नगावगौ ।

नगशब्देन अगशब्देन च शैलवृक्षावुच्येते ॥

आशुगौ वायुविशिखौ

विशिखो बाणः ॥

शरार्कविहगाः खगाः ॥ १९ ॥

अर्को रविः ॥

पतङ्गौ पक्षिसूर्यौ च

शालिभेदे शलभे च पतङ्गः ॥

पूगः क्रमुकबृन्दयोः ।

क्रमुको गुवाकवृक्षः । एतत्फले तु क्लीबम् ॥

पशवोऽपि मृगाः

हरिणाः सर्वपशवश्च मृगाः ॥

वेगः प्रवाहजवयोरपि ॥ २० ॥

विष्ठादेर्बहिर्निर्गमे प्रवाहः । किम्पाकवृक्षेऽपि महाकालाख्ये वेगः ॥

सर्गः स्वभावनिर्मोक्षनिश्चयाध्यायसृष्टिषु ।

स्वभावः प्रकृतिः । निर्मोक्षस्त्यागः । निश्चये यथा— 'गृहाण शस्त्रं यदि सर्ग एष ते' । अध्याये काव्यपरिच्छेदे । सृष्टिर्निर्माणम् ॥

योगः सन्नहनोपायध्यानसंगतियुक्तिषु ॥ २१ ॥

सन्नहनं कवचम् । उपायः सामभेदादिः । सङ्गतिः सङ्गमः ॥

भोगः सुखे स्त्र्यादिभृतावहेश्च फणकाययोः ।

स्त्र्यादीत्यादिशब्देन हस्त्यादीनामपि भृतौ ॥

चातके हरिणे पुंसि सारङ्गः शबले त्रिषु ॥ २२ ॥

शबले कर्बुरे । पक्षिवाची सारङ्गो दन्त्यादिः । हरिणे तु तालव्यादिरपि ॥

कपौ च प्लवगः

भेकेऽपि प्लव(मातङ्गः?गः) ॥

शापे त्वभिषङ्गः पराभवे।

मिथ्याभिशंसनं शापः।

"आक्रोशे शपथेऽपि स्यादभिषङ्गः पराभवे"

इति रुद्रः ॥

यानाद्यङ्गे युगः पुंसि युगं युग्मे कृतादिषु ॥ २३ ॥

यानं रथः। आदिना शकटलाङ्गलादेः। कृतादिषु कृतत्रेताद्वापरकलिषु ॥

स्वर्गेषुपशुवाग्वज्रदिङ्नेत्रघृणिभूजले।
लक्ष्यदृष्ट्या स्त्रियां पुंसि गौः

लक्ष्यदृष्ट्या प्रयोगदर्शनात् स्त्रियां पुंसि च गोशब्द उन्नेयः।

"स्वर्गे वज्रे च रश्मौ च बलीवर्दे च गौः पुमान्।
स्त्री बाणरोहिणीदृग्वाग्भूष्वप्सु[1] च ककुप्सु च ॥"

इति त्रिकाण्डशेषः ॥

लिङ्गं चिह्नशेफसोः ॥ २४ ॥

चिह्नं लक्षणम् ॥

शृङ्गं प्राधान्यसान्वोश्च

प्राधान्यं प्रभुत्वम्। चकारात् पश्ववयवादौ च ॥

वराङ्गं मूर्धगुह्ययोः।

"गुडत्वचि वराङ्गं स्याद् योनिमस्तकहस्तिषु।"

इति रभसः ॥

---

१. 'प्सु भूम्नि च ॥' क. ख. ङ. च. छ. ज. ट. ठ., 'प्सु च भूम्नि च' घ. पाठः.

भगः श्रीकाममाहात्म्यवीर्ययत्नार्ककीर्त्तिषु ॥ २५ ॥

काम इच्छा । यत्नो हितैषिता, यद्योगाद् भगिनीति प्रयोगः ।

"ज्ञानवैराग्ययोर्योनौ भगमर्क्षी तु भास्करे"

इति रुद्रः ॥

गान्तः ।

परिघः परिघातेऽस्त्रेऽपि

परिघातो हननम् । अस्त्रे अस्त्रविशेषे । लोहबद्धलगुडे अर्गलेऽपि परिघः ॥

ओघो बृन्देऽम्भसां रये ।

द्रुतनृत्येऽपि ओघः ॥

मूल्ये पूजाविधावर्घः

मूल्ये यथा — महार्घः पटः ॥

अंहोदुःखव्यसनेष्वघम् ॥ २६ ॥

व्यसनं रागद्वेषादि अघम् ॥

त्रिष्विष्टेऽल्पे लघुः

त्रिषु इष्टे रुच्ये ।

"कृष्णागुरुणि शीघ्रे च लघु क्लीबेऽगुरौ त्रिषु ।
निःसारे च मनोज्ञे च पृक्कायां च लघुः स्त्रियाम् ॥"

इति रभसः ॥

घान्तः ।

काचाः शिक्यमृद्भेदद्दग्रुजः ।

शिक्यमुत्कचनद्रव्यम् । मृद्भेदः काच इत्येवाख्यातः । दृग्रोगः पटलप्रायः ॥

विपर्यासे विस्तरे च प्रपञ्चः

विपर्यासे वैपरीत्ये ॥

पावके शुचिः ॥ २७ ॥

मास्यमात्ये चात्युपधे पुंसि मेध्ये सिते त्रिषु।

मासि आषाढे। धर्माद्यैः परीक्षणमुपधा, तामतिक्रान्ते अमात्ये सचिवे, उपधाशुद्ध इत्यर्थः। मेध्ये पवित्रे ॥

अभिषङ्गे स्पृहायां च गभस्तौ च रुचिः स्त्रियाम्॥ २८॥

अभिषङ्गे अत्यासक्तौ। स्पृहायां यथा — अन्ने रुचिः ॥

चान्तः।

ककिताक्ष्यावहिभुजौ

अहीन् भुङ्क्ते इति क्विप्। अहिभुक्। जान्तः ॥

दन्तविप्राण्डजा द्विजाः।

विप्र इत्युपलक्षणम्। क्षत्रियवैश्ययोरपि द्विजः ॥

अजा विष्णुहरच्छागाः

"द्वयोश्छागे हरब्रह्मविश्वस्मरहरिष्वजः"

इति रभसः ॥

गोष्ठाध्वनिवहा व्रजाः ॥ २९ ॥

निवहः सङ्घः ॥

धर्मराजौ जिनयमौ

जिनो बुद्धः ॥

कुञ्जो दन्तेऽपि न स्त्रियाम्।

लतापिहितोदरेऽपि कुञ्जः ॥

वलजे क्षेत्रपूर्द्वारे वलजा वल्गुदर्शना ॥ ३० ॥

क्षेत्रे नगरद्वारे च वलजं क्लीबम्। † (वल्गुदर्शना वाकुस्त्रीति?)। तत्र ‡ रूपभेदात् स्त्रियाम् ॥

समे क्ष्मांशे रणेऽप्याजिः

समे क्ष्मांशे समे भूभाग इति यावत् ॥

प्रजा स्यात् सन्ततौ जने।

सन्ततिरपत्यम् ॥

अब्जौ शङ्खशशाङ्कौ च

धन्वन्तरौ चाब्जः ॥

स्वके नित्ये निजं त्रिषु॥ ३१॥

'स एषां ग्रामणीः' (५. २. ७८) इति कन्। स्वक आत्मीयः ॥

जान्तः।

पुंस्यात्मनि प्रवीणे च क्षेत्रज्ञो वाच्यलिङ्गकः।

प्रवीणो निपुणः ॥

संज्ञा स्याच्चेतना नाम हस्ताद्यैरर्थसूचना॥ ३२॥

चेतना धीः। नाम आख्या। हस्ताद्यैरर्थसूचनेति। युद्धे वस्त्राक्रियादौ (?) च हस्तादिव्यवहार उपांशु क्रियेते, सापि संज्ञा। आदिना भ्रूलोचनादिग्रहणम्। सूर्यपत्नी च संज्ञा ॥

ञान्तः।

काकेभगण्डौ करटौ

कटैकादशाहश्राद्धयोरपि करटः ॥

गजगण्डकटी कटौ।

शवेऽपि कटोऽकारान्तः ॥

---

१. 'न्ती' ख. ठ., 'स्ती' ङ., 'स्मितं त' घ. पाठः. २. 'यः सोऽपि' क ख. पाठः.

† 'क्लीबमि'त्येतदनन्तरं 'तत्र' इत्यतः पूर्वं 'वा तु स्त्रीति। वल्गुदर्शना' इति पठनीयम्। ‡ तत्र वल्गुदर्शनायां रूपभेदाद् 'वलजा' इति रूपस्य पुन्नपुंसकव्यावृत्तत्वादित्यर्थः। क्षेत्रपूर्द्वारयोस्तु 'वलजे' इति निर्दिष्टरूपस्य स्त्रीक्लीबसाधारणत्वमुभयलिङ्गत्वगमकमित्यभिप्रायः।

शिपिविष्टस्तु खलतौ दुश्चर्मणि महेश्वरे ॥ ३३ ॥

खिलिन (?) इत्युणादिः। इकारान्तस्त्वत्र पाठः। (खलति खल्वितः !) निष्कुषितमेढ्रमलो दुश्चर्मा। शिपिविष्टस्तालव्यादिः ॥

देवशिल्पिन्यपि त्वष्टा

देवशिल्पी विश्वकर्मा। वर्धकौ च त्वष्टा ॥

दिष्टं दैवेऽपि न द्वयोः।

दिष्टं प्राक्तनं कर्म। कालेऽपि दिष्टो ना ॥

रसे कटुः कट्वकार्ये त्रिषु मत्सरतीक्ष्णयोः ॥ ३४ ॥

रसे पिप्पल्यादिरसे। अकार्ये अकरणार्हे रूपभेदात् कटु क्लीबम् ॥

रिष्टं क्षेमाशुभाभावेषु

क्षेमं कल्याणम्। अशुभं पापम्। अभावो विनाशः। खड्गेऽपि रिष्टो ना ॥

अरिष्टे तु शुभाशुभे।

"क्लीबं शुभे(ऽशुभे) तक्रे सूत्यगारान्तचिह्नयोः।
अरिष्टो लशुने काके निम्बफेनिलवृक्षयोः ॥"

इति रभसः ॥

मायानिश्चलयन्त्रेषु कैतवानृतराशिषु ॥ ३५ ॥
अयोघने शैलशृङ्गे सीराङ्गे कूटमस्त्रियाम्।

मायेन्द्रजालादि। निश्चलमाकाशादि। यन्त्रं यन्त्रविशेषः, येन मृगो बध्यते। राशिः पुञ्जः। अयो लोहं येन हन्यते, सोऽयोघनः हाथइडेति ख्यातः। सीराङ्गं फालः ॥

सूक्ष्मैलायां त्रुटिः स्त्री स्यात् कालेऽल्पे संशयेऽपि सा ॥

कालेऽत्यन्तसूक्ष्मकाले ॥

अत्युत्कर्षाश्रयः कोट्यो मूले लग्नकचे जटा ।

लग्नकचे जटा मांस्यां च ॥

व्युष्टिः फले समृद्धौ च

फले हेतुकृते, न तु सस्ये । 'नियमादिफले व्युष्टिः समृद्धौ च स्त्रियाम्' इति हि रभसः ।

"तस्यैव तपसो व्युष्ट्यां प्रसादाच्च स्वयम्भुवः ।
नासुरेभ्यो न देवेभ्यो (हं ? भयं मम कदाचन) ॥"

इति प्रयोगोऽपि ॥

दृष्टिर्ज्ञानेऽक्ष्णि दर्शने ॥ ३७ ॥

दर्शनं वीक्षणम् । (सिद्धान्तः निश्चयः ?) ॥

इष्टिर्यागेच्छयोः

बाहुलकात् क्तिनि इष्टिः ॥

सृष्टं निश्चिते बहुनि त्रिषु ।

बहुनि प्रचुरे ॥

कष्टे तु कृच्छ्रगहने

दुरधिगमान्तःपातं गहनम् ॥

दक्षामन्दागदेषु तु ॥ ३८ ॥

पटुर्द्वौ वाच्यलिङ्गौ च

दक्षोऽनलसः । अमन्दस्तीक्ष्णः । अगदो नीरुक् । द्वौ कष्टपटू वाच्यलिङ्गौ ॥

टान्तः ।

नीलकण्ठः शिवेऽपि च ।

दात्यूहग्रामचटकखञ्जरीटमयूरेष्वपि नीलकण्ठः ॥

पुंसि कोष्ठोऽन्तर्जठरं कुसूलोऽन्तर्गृहं तथा ॥ ३९ ॥

---

1. 'छ्या।मिति प्रयोगः । दर्शनं' ख. पाठः.

अन्तर्जठरमुदरमध्यम्। कुसूलो मरावः। 'कुस संश्लेषणे'। 'कुसेः कूल—' इत्यादिना ऊलः। कुसूलः। एवं दन्त्यसः। गृहस्यान्तरमन्तर्गृहम्॥

निष्ठा निष्पत्तिनाशान्ताः

नाशोऽदर्शनम्। अन्तो विनाशः॥

काष्ठोत्कर्षे स्थितौ दिशि।

स्थितिर्मर्यादा॥

त्रिषु ज्येष्ठोऽतिशस्तेऽपि

अतिशस्तेऽतिशयप्रशस्ते। अपिनाप्रजातिवृद्धयोश्च। वृद्धप्रशस्ययोरिष्ठनि 'वृद्धस्य च', 'ज्य च' (५. ३. ६२. ६१) इति ज्यादेशः॥

कनिष्ठोऽतियुवाल्पयोः॥ ४०॥

अतियूनि अत्यल्पे च कनिष्ठः। 'युवाल्पयोः कनन्यतरस्याम्' (५. ३. ६४) इति कनादेशः॥

ठान्तः।

दण्डोऽस्त्री लगुडेऽपि स्याद्

"दण्डो यमे मानभेदे चण्डांशोः पारिपार्श्विके।
दण्डो लगुडमन्थानदमसैन्येषु वाजिनि॥"

इति धरणिः॥

गुडो गोलेक्षुपाकयोः।

गोलो मृत्तिकादिगुडकः। इक्षुपाको गुडाख्य एव॥

सर्पमांसात्पशू व्याडौ

मांसात्पशुर्व्याघ्रादिः[1]॥

---

1. 'हिंस्रपशु' ग. पाठः.

भूगोवाचस्त्विडा इलाः ॥४१॥

गौः स्त्रीगवम् । संक्षेपार्थं डान्तवर्ग एवोक्ता[1] ॥

क्ष्वेडा वंशशलाकापि

सिंहनादे क्ष्वेडा । 'ना तु ध्वनौ विषे' इति रुद्रः ॥

नाडी कालेऽपि षट्क्षणे ।

षट्क्षणात्मके काल इत्यर्थः । सिरायां शाकादिनाले च नाडी ॥

काण्डोऽस्त्री दण्डबाणार्ववर्गावसरवारिषु ॥ ४२ ॥

दण्डे यथा—कदलीकाण्डः । अर्वा कुत्सितः । वर्गे यथा—त्रिकाण्डोऽमरकोषः । अवसरो निर्व्यापारस्थितिः । क्षण इति यावत् । वारिणि यथा—'शरत्काण्डसमद्युतिः' ॥

स्याद् भाण्डमश्वाभरणेऽमत्रे मूलवणिग्धने ।

सुवर्णादिकृतमश्वाभरणसामान्यं भाण्डम् । अमत्रं पात्रम् । वणिजां मूलधनं भाण्डमित्येव ख्यातम् ॥

डान्तः ।

भृशप्रतिज्ञयोर्बाढं

प्रतिज्ञा अभ्युपगमः ॥

प्रगाढं भृशकृच्छ्रयोः ॥ ४३॥

कृच्छ्रं गहनम् ॥

1. 'क्ता । एवं शशशल्यसिं' ग. पाठः.

शक्तस्थूलौ त्रिषु दृढौ व्यूढौ विन्यस्तसंहतौ ।

संहते यथा—व्यूढोरस्कः ॥

ढान्तः ।

भ्रूणोऽर्भके स्त्रैणगर्भे

अर्भको बालः । स्त्रिया अपत्यं स्त्रैणः, स्त्रैणश्चासौ गर्भश्चेति कर्मधारयः ॥

बाणो बलिसुते शरे ॥ ४४ ॥

बलिसुतो बाणासुरः । झिण्ट्यां तु बाणा द्वयोः ॥

कणोऽतिसूक्ष्मे धान्यांशे

अतिसूक्ष्मे अत्यल्पे । पृथगेवेदं नाम । धान्यांशः कण इत्येव ख्यातः ॥

संघाते प्रमथे गणः ।

संघाते वृन्दे । प्रमथाः रुद्रानुचराः ॥

पणो द्यूतादिषूत्सृष्टे भृतौ मूल्ये धनेऽपि च ॥ ४५ ॥

द्यूतादिषूत्सृष्टे अङ्क इति ख्याते । आदिना मेषकुक्कुटादौ धनोत्सृष्टे, तत्राप्यङ्कः क्रियते । भृतौ वेतने । धने अर्थे ॥

मौर्व्यां द्रव्याश्रये सत्त्वशुक्लसन्ध्यादिके गुणः ।

'द्रव्यं भव्ये गुणाश्रये' इति वक्ष्यति । तत्र भव्योऽभिप्रेतानां पात्रम् । गुणाश्रयस्तु पृथिव्यादिः । (तऽ?अ)त्रोभयोर्ग्रहणम् । तेन भव्याश्रिते त्यागशौर्यादिके पृथिव्या(द्या)श्रिते च रूपरसादिके गुणः । आदिशब्दस्य सत्त्वादिभिः प्रत्येकमभिसम्बन्धः । सत्त्वादीनि सत्त्वरजस्तमांसि । शुक्लादिः शुक्लकृष्णलोहितादिः । सन्ध्यादिः सन्धिविग्रहयानासनसंश्रयद्वैधीभावाः षट् ॥

निर्व्यापारस्थितौ कालविशेषोत्सवयोः क्षणः ॥ ४६ ॥

'क्षणो व्यापारशून्यत्वे' इति रुद्रः । कालविशेषो मुहूर्तस्य द्वादशो भागः ॥

वर्णो द्विजादौ शुक्लादौ स्तुतौ वर्णं तु वाक्षरे ।

आदिना क्षत्रविट्शूद्रा नीललोहितादयश्च । अक्षरे वा क्लीबं, पक्षे पुमान् ॥

ग्रामणीर्नापिते पुंसि श्रेष्ठे ग्रामाधिपे त्रिषु ॥ ४७ ॥

श्रेष्ठं प्रधानम् । अधिपः पतिः ॥

ऊर्णा मेषादिलोम्नि स्यादावर्ते चान्तरा भ्रुवौ ।

आदिना शशकोष्ट्रप्रभृतीनां ग्रहणम् । भ्रूमध्यलोमावर्तविशेषेऽपि च ऊर्णा । एतच्च महापुरुषलक्षणम् । 'अन्तरान्तरेण युक्ते' (२. ३. ४) इत्यनेन भ्रुवौ इत्यत्र द्वितीया ॥

हरिणी स्यान्मृगी हेमप्रतिमा हरिता च या ॥ ४८ ॥

सुवर्णस्य प्रतिमा । या हरितवर्णा, सापि हरिणी ॥

त्रिषु पाण्डौ च हरिणः

चकारान्मृगे ॥

स्थूणा स्तम्भेऽपि वेश्मनः ।

लोहप्रतिमायां च स्थूणा ॥

तृष्णे स्पृहापिपासे द्वे

तृष्णेत्युपलक्षणम् । तृष्णा तृट् तर्ष इत्येतेऽपि लिप्सापिपासयोः ॥

जुगुप्साकरुणे घृणे ॥ ४९ ॥

जुगुप्सा निन्दा ॥

वणिक्पथेऽपि विपणिः

वणिक्पथो हट्टः ।

"आपणे पण्यवीथ्यां च पण्ये च विपणिः स्त्रियाम्"
इति रुद्रः ॥

सुरा प्रत्यक् च वारुणी ।

प्रत्यक् प्रतीची दिक् ॥

करेणुरिभ्यां स्त्री नेभे

इभ्यां हस्तिन्यां स्त्री करेणुः । इभे तु हस्तिनि ना पुमानित्यर्थः ॥

द्रविणं तु धनं बलम् ॥ ५० ॥

बलं पराक्रमः ॥

शरणं गृहरक्षित्रोः

शरणं तालव्यादि ॥

श्रीपर्णं कमलेऽपि च ।

अग्निमन्थेऽपि श्रीपर्णम् ॥

विषाभिमरलोहेषु[1] तीक्ष्णं क्लीबं खरे त्रिषु ॥ ५१ ॥

अभिमरो युद्धम् । यः शीघ्रं कार्यकारी स खरस्त्रिषु ॥

प्रमाणं हेतुमर्यादाशास्त्रेयत्ताप्रमातृषु ।

येनाग्निरनुमीयते, स हेतुः धूमादिः । मर्यादा सीमा । शास्त्रे यथा — आर्षं प्रमाणम् । इयत्ता मानम् । प्रमाता यथार्थानुभवयुक्तः ॥

करणं साधकतमे क्षेत्रगात्रेन्द्रियेष्वपि ॥५२ ॥

साधकतमं कारकभेदः ॥

प्राण्युत्पत्तौ संसरणमसंबाधचमूगतौ ।
घण्टापथे

प्राणिनामुत्पत्तौ जन्मनि । असंकटेन रथाश्वादिगमनमसंबाधचमूगतिः । घण्टापथो नगरस्योपनिर्गमः ॥

---

१. 'हि' क. ख. ङ. च. पाठः.

अथ वान्तान्ने समुद्धरणमुन्नये ॥ ५३ ॥

वान्तान्ने भुक्तोज्झिते । उन्नय उत्तोलनम् ॥

अतस्त्रिषु विषाणं स्यात् पशुशृङ्गेभदन्तयोः ।

अतः परं णकारान्तास्त्रिषु । विषाणं मूर्धन्यषम् ॥

प्रवणः क्रमनिम्नोर्व्यां प्रह्वे ना तु चतुष्पथे ॥ ५४ ॥

क्रमनिम्नोर्व्यां वाच्यलिङ्गतया त्रिषु त्रिलिङ्गः । पूर्वप्रवणा भूः । पूर्वप्रवणो देशः । पूर्वप्रवणं स्थलम् । ना त्विति त्रिष्वित्यस्य बाधकः ॥

संकीर्णौ निचिताशुद्धौ

निचितं व्याप्तम् ॥

इरिणं शून्यमूषरम् ।

इरिणं ह्रस्वादि' दीर्घादि च ॥

णान्तः ।

देवसूर्यौ विवस्वन्तौ

देवो देवसामान्यम् ॥

सरस्वन्तौ नदार्णवौ ॥ ५५ ॥

"सरस्वती स्यात् स्त्रीरत्ने नद्यां नद्यन्तरे गवि"

इत्यजयः ॥

पक्षितार्क्ष्यौ गरुत्मन्तौ

पक्षिसामान्यं पक्षी ॥

शकुन्तौ भासपक्षिणौ ।

'कोष्ठकुक्कुटको भासः' इत्यमरमाला ॥

अग्न्युत्पातौ धूमकेतू

उत्पातः प्रसिद्धः । धूमः केतुश्चिह्नमस्येति धूमकेतुः अग्निः ॥

जीमूतौ मेघपर्वतौ ॥ ५६ ॥

देवताल्याख्यौषधे[1] च जीमूतः ॥

हस्तौ तु पाणिनक्षत्रे

नक्षत्रं तारकाभेदः ॥

मरुतौ पवनामरौ ।

अमरे, मरुत्वानिन्द्रः ॥

यन्ता हस्तिपके सूते

सूते सारथौ ॥

भर्ता धातरि पोष्टरि ॥ ५७ ॥

धातरि यथा,— वज्रस्य भर्ता ॥

यानपात्रे शिशौ पोतः

यानपात्रे वहित्रे ॥

प्रेतः प्राण्यन्तरे मृते ।

प्राण्यन्तरं प्रेताख्यमेव ॥

ग्रहभेदे ध्वजे केतुः

ध्वजश्चिह्नम् ॥

पार्थिवे तनये सुतः ॥ ५८ ॥

पार्थिवो राजा ॥

---

१. 'धिविशेषे च' ठ. पाठः.

स्थपतिः कारुभेदेऽपि

बृहस्पतिसवयाजी कञ्चुकी च स्थपतिः ॥

भूभृद् भूमिधरे नृपे ।

भूमिधरः पर्वतः ॥

मूर्धाभिषिक्तो भूपेऽपि

क्षत्रियमात्रे प्रधानेऽपि मूर्धाभिषिक्तः ॥

ऋतुः स्त्रीकुसुमेऽपि च ॥५९॥

हेमन्तादावपि ऋतुः ॥

विष्णावप्यजिताव्यक्तौ

"त्रिषु स्यादस्फुटोऽव्यक्तः क्लीबं तु परमात्मनि"
इति रुद्रः[1] ॥

सूतस्त्वष्टरि सारथौ ।

त्वष्टा वर्धकिः ॥

व्यक्तः प्राज्ञेऽपि

स्फुटेऽपि व्यक्तः ॥

दृष्टान्तावुभौ शास्त्रनिदर्शने ॥६०॥

शास्त्रं व्याकरणशास्त्रादि । निदर्शनमुदाहरणम् ॥

क्षत्ता स्यात् सारथौ द्वाःस्थे क्षत्रियायां च शूद्रजे ।

द्वाःस्थे प्रतिहारे । क्षत्रियायामिति[2] पाठः । वैश्यायामित्यपपाठः ॥

वृत्तान्तः स्यात् प्रकरणे प्रकारे कात्स्न्यवार्तयोः ॥६१॥

---

१. 'रभसः ॥' ग. पाठः. २. 'ति द्वि या' क. ख. ग. पाठः.

प्रकरणं प्रक्रिया। प्रस्ताव इत्यन्यः। प्रकारो विशेषः॥

आनर्तः समरे नृत्तस्थाननीवृद्विशेषयोः।

नृत्तस्थानं मण्डपादि। नीवृद्विशेषो जनपदभेदः॥

कृतान्तो यमसिद्धान्तदैवाकुशलकर्मसु॥ ६२॥

दैवं जन्मान्तरीयं शुभाशुभकर्म। अकुशलकर्म पापकर्म॥

श्लेष्मादि रसरक्तादि महाभूतानि तद्गुणाः।

इन्द्रियाण्यश्मविकृतिः शब्दयोनिश्च धातवः॥ ६३॥

श्लेष्मादीत्यादिशब्देन वातपित्ते। रसः आहारस्य परिणामः विकारः सारो भागः। रक्तमसृक्। आदिना मांसादिः। महाभूतानि पृथिव्यप्तेजोवाय्वाकाशानि। तद्गुणाः पृथिव्यादीनामाश्रिता गन्धरसरूपस्पर्शशब्दाः। इन्द्रियाणि घ्राणजिह्वाचक्षुःस्पर्शश्रोत्राणि। अश्मविकृतिर्गैरिकमनःशिलादिः। शब्दयोनिः भूवादिः। एते धातुवाच्याः॥

कक्ष्यान्तरेऽपि शुद्धान्तो नृपस्यासर्वगोचरे।

कक्ष्यान्तरे प्रकोष्ठान्तरे। नृपस्यासर्वगोचर इत्येतदस्यैव[1] विशेषणम्।

"शुद्धान्तोऽन्तःपुरे गुह्ये कक्ष्याभेदे च भूपतेः"

इत्यजयः॥

कासूसामर्थ्ययोः शक्तिः

कासूः शर्वला॥

मूर्तिः काठिन्यकाययोः॥ ६४॥

काठिन्यं दृढता॥

विस्तारवल्ल्योर्व्रततिः

---

१. 'त्वस्यै' क. ग. छ. पाठः.

विस्तारो विस्तीर्णता ॥

वसती रात्रिवेश्मनोः ।

स्थितावपि वसतिः । सर्वत्रेयं स्त्री ॥

क्षयार्चयोरपचितिः

क्षयो हानिः । अर्चा पूजा ॥

सातिर्दानावसानयोः ॥ ६५ ॥

अवसानमन्तः ॥

अर्तिः पीडाधनुःकोट्योः

अर्तिः ह्रस्वादिः । धनुःकोटिरटनिः ॥

जातिः सामान्यजन्मनोः ।

जन्म जननम् । चुल्ल्यामपि जातिः ॥

प्रचारस्यन्दयो रीतिः

प्रचारो व्यवहारः । स्यन्दः प्रस्रवणम् । लोहकिट्टे च रीतिः ॥

ईतिर्डिम्बप्रवासयोः ॥ ६६ ॥

डिम्ब उपप्लवः । स च षड्विधः । तदुक्तम्—

"अतिवृष्टिरनावृष्टिः शरभा मूषिकाः खगाः ।
प्रत्यासन्नाश्च राजानः षडेता ईतयः स्मृताः ॥"

'ई गतौ' । दीर्घादिः । क्तिनि ईतिः ॥

उदयेऽधिगमे प्राप्तिः

उदय उद्गमः । अधिगमो लाभः ॥

कक्ष्यान्तरे प्रकोष्ठान्तरे । नृपस्यासर्वगोचर इत्येतदस्यैव विशेषणम् ।

"शुद्धान्तोऽन्तःपुरे गुह्ये कक्ष्याभेदे च भूपतेः"

इत्यजयः ॥

कासूसामर्थ्ययोः शक्तिः

कासूः शर्वला ॥

मूर्तिः काठिन्यकाययोः ॥

काठिन्यं दृढता ॥

विस्तारवल्ल्योर्व्रततिः

विस्तारो विस्तीर्णता ॥

वसती रात्रिवेश्मनोः ।

स्थितावपि वसतिः । सर्वत्रेयं स्त्री ॥

क्षयार्चयोरपचितिः

क्षयो हानिः । अर्चा पूजा ॥

सातिर्दानावसानयोः ॥ ६५ ॥

अवसानमन्तः ॥

अर्तिः पीडाधनुष्कोट्योः

अर्तिर्हिंस्वादिः । धनुष्कोटिरटनिः ॥

जातिः सामान्यजन्मनोः ।

जन्म जननम् । चुल्ल्यामपि जातिः ॥

प्रचारस्यन्दयो रीतिः

प्रचारो व्यवहारः । स्यन्दः प्रस्रवणम् । लोहकिट्टे च रीतिः ॥

---

१. 'स्यस्यै' क. ग. छ. पाठः.

ईतिर्डिम्बप्रवासयोः ॥ ६६ ॥

डिम्ब उपप्लवः । स च षड्विधः । तदुक्तम् —

"अतिवृष्टिरनावृष्टिः शलभा मूषिकाः खगाः ।
प्रत्यासन्नाश्च राजानः षडेता ईतयः स्मृताः ॥"

'ई गतौ' । दीर्घादिः । क्तिनि ईतिः ॥

उदयेऽधिगमे प्राप्तिः

उदय उद्गमः । अधिगमो लाभः ॥

त्रेता त्वग्नित्रये युगे ।

गार्हपत्याद्यग्नित्रयं त्रेता ॥

वीणाभेदेऽपि महती

नारदस्य वीणाभेदः । महत्त्वयुक्तायां च महती ॥

भूतिर्भस्मनि संपदि ॥ ६७॥

अणिमादिगुणेऽपि भूतिः ॥

नदीनगर्योर्नागानां भोगवती

नागनदी नागनगरी च भोगवती ॥

अथ सङ्गरे ।

सङ्गे सभायां समितिः

सङ्गरो युद्धम् । सङ्गः सङ्गमः ॥

क्षयावासावपि क्षितिः ॥ ६८ ॥

क्ष्मापि क्षितिः ॥

रवेरर्चिश्च शस्त्रं च वह्निज्वाला च हेतयः ।

हन्तेर्हेतिशब्दः क्तिन्नन्तः । 'निर्मार्ष्टसौ नीतिमयेन हेतिना' इति कप्फिणाभ्युदये । ततः शस्त्रे बाहुलकात् पुंस्यपि ॥

जगती जगतिच्छन्दोविशेषेऽपि क्षितावपि ॥ ६९ ॥

जगति भुवने । छन्दोविशेषे द्वादशाक्षरपादे ॥

पङ्क्तिश्छन्दोऽपि दशमं

दशमं छन्दो दशाक्षरपादकम् । राजिदशसंख्ययोरपि पङ्क्तिः ॥

स्यात् प्रभावेऽपि चायतिः ।

दीर्घत्वागामिकालयोरप्यायतिः ॥

पत्तिर्गतौ च

"पत्तिर्ना पतगे सैन्यविशेषे तु स्त्रियां मता" ॥

मूले तु पक्षतिः पक्षभेदयोः ॥ ७० ॥

पक्षभेदयोरिति षष्ठी । एकः पक्षो मासार्धं, तस्य मूले प्रतिपदीत्यर्थः । द्वितीयो विहगावयवः । तन्मूलं कक्षस्थानम् ॥

प्रकृतिर्योनिलिङ्गे च

योनिरुत्पत्तिकारणम् । लिङ्गं स्त्रीत्वादि ।

"पौरामात्यादिलिङ्गेषु स्वभावे प्रकृतिर्मता ।
सत्त्वरजस्तमसां च समवस्थापि दृश्यते ॥"

इति व्याडिः ॥

कैशिक्याद्याश्च वृत्तयः ।

"भारती सात्त्वती चैव कैशिक्यारभटी तथा ।
चतस्रो वृत्तयस्त्वेतास्तासु नाट्यं प्रतिष्ठितम्"॥

सिकताः स्युर्वालुकापि

वालुकायां सिकताः बहुत्वे । 'बहवश्च समाः सिकताः' इति वामनः । सिकतामयदेशश्च सिकता ॥

वेदे श्रवसि च श्रुतिः ॥ ७१ ॥

श्रवसि कर्णे । वार्तायां च श्रुतिः ॥

वनिता जनितात्यर्थानुरागायां च योषिति ।

जनितात्यर्थानुरागायां योषिति योषिन्मात्रेऽपि वनिता ॥

गुप्तिः क्षितिव्युदासेऽपि

क्षितिव्युदासो गर्तार्थं क्षितेरुत्खननम् । गोपनेऽपि गुप्तिः ॥

धृतिर्धारणधैर्ययोः ॥ ७२ ॥

सुखे योगान्तरे यागे च धृतिः ॥

बृहती क्षुद्रवार्ताकीच्छन्दोभेदे महत्यपि ।

छन्दोभेदो नवाक्षरपादः । महती विपुला । कण्टकारिकायामुत्तरीयेऽपि बृहती ॥

वाशिता स्त्रीकरेण्वोश्च

स्त्रीति स्त्रीमात्रम् ॥

वार्ता वृत्तौ जनश्रुतौ ॥ ७३ ॥

वार्तं फल्गुन्यरोगे च त्रिषु

वृत्तौ वर्तने । किंवदन्ती जनश्रुतिः । फल्गुन्यसारे क्लीबम् । अरोगे नीरोगे त्रिषु ॥

अप्सु च घृतामृते ।

आज्ये च घृतम् ।

"अयाचिते यज्ञशेषे निर्वाणे चापि सुन्दरे ।
अमृतं वारिणि प्रोक्तमतिहृद्ये च वस्तुनि ॥"

इति व्याडिः ॥

कलधौतं रूप्यहेम्नोः

रूप्यमन्तस्थावत् ॥

निमित्तं हेतुलक्ष्मणोः ॥ ७४ ॥

'निमित्तं कारणे चिह्ने' इत्यजयः ॥

श्रुतं शास्त्रावधृतयोः

अवधृते आकलिते ॥

युगपर्याप्तयोः कृतम् ।

युगं (सत्य)युगम् । पर्याप्तं निवारणम् ।

"शक्तौ निवारणे तृप्तौ पर्याप्तं स्याद् यथेप्सिते"

इति रुद्रः ॥

अत्याहितं महाभीतिः कर्म जीवानपेक्षि च ॥ ७५ ॥

कर्म जीवानपेक्षीति साहसं कर्म ॥

युक्ते क्ष्मादावृते भूतं प्राण्यतीते समे त्रिषु ।

युक्तं न्याय्यम् । क्ष्मादौ महाभूतपञ्चके । ऋते सत्ये । प्राणीति प्राणिमात्रम् । अतीते वृत्ते । भूतं क्लीबम् । उत्तरपदभूतो भूतशब्दः समे सदृशे वर्तते । यथा पितृभूतो मातृभूतः ।

"क्ष्मा(दौ च तौ? दावृते) च भूतं स्यात् पिशाचादौ नृशण्डयोः"

इत्यमरमाला ॥

वृत्तं पद्ये चारित्रे त्रिष्वतीते दृढनिस्तले ॥ ७६ ॥

श्लोकचरित्रयोर्वृत्तं क्लीबम् ॥

महद्राज्यं च

महद् बृहदपि ॥

अवगीतं जन्ये स्याद् गर्हिते त्रिषु ।

जन्ये जनापवादे क्लीबम् ॥

श्वेतं रूप्येऽपि

सितेऽपि श्वेतम् ॥

रजतं हेम्नि रूप्ये सिते त्रिषु ॥ ७७ ॥

हेमरूप्ययोः क्लीबम् ॥

अवदातः सिते पीते शुद्धे

शुद्धे विशुद्धेऽवदातं कर्म ॥

बद्धार्जुनौ सितौ ।

बद्धः । अर्जुनः धवलः ॥

युक्तेऽतिसंस्कृते मर्षिण्यभिनीतः

युक्ते न्याय्ये । मर्षः क्षमा ॥

अथ संस्कृतम् ॥

कृत्रिमे लक्षणोपेतेऽपि

क्रियया निर्वृत्तं कृत्रिमं । घटादि । लक्षणोपेते पाणिनीयादिलक्षण-युक्ते शब्दे साककह इति ख्याते ॥

अनन्तोऽनवधावपि ।

अवधिशून्ये । दुरालभा वि (शापू ? शल्या दू) र्वा (पि ?) उत्पलशा-(लिनी ? रिवा) ।

"अनन्तो ना हरौ शेषे नगे क्लीबं विहायसि" ॥

ख्याते हृष्टे प्रतीतः

हृष्टः सन्तुष्टः ॥

अभिजातस्तु कुलजे बुधे ॥ ७९ ॥

कुलजः कुलीनः ॥

विविक्तौ पूतविजनौ

विगतजनसङ्घातो विजनः ॥

मूर्च्छितौ मूढसोच्छ्रयौ ।

मूढो मूर्खः । सोच्छ्रयो वृद्धियुक्तः ॥

द्वौ चाम्लपरुषौ शुक्तौ

'शुक्तं पूताम्लनिष्ठुर' इति तालव्यादौ रभसः । अम्लविशेषेऽपि शुक्तम् । यदाह —

"मृन्मयादिशुचौ भाण्डे सक्षौद्रगुडकाञ्जिके ।
धान्यराशौ त्रिरात्रस्थं चुक्रं तच्छुक्तमुच्यते" ॥

शिती धवलमेचकौ ॥ ८० ॥

'शितिर्धवलकोष्णयोरि'ति तालव्यादावजयः । स्त्रियां शिती ॥

सत्ये साधौ विद्यमाने प्रशस्तेऽभ्यर्हिते च सत् ।

सत्ये यथासंभूते । अभ्यर्हिते अर्चिते ॥

पुरस्कृतः पूजितेऽरात्यभियुक्तेऽग्रतः कृते ॥ ८१ ॥

अरात्यभियुक्तः शत्रुणाक्रान्तः । अग्रतः कृतः पुरो व्यवस्थापितः ॥

निवातावाश्रयावातौ शस्त्राभेद्यं च वर्म यत् ।

आश्रयो निवासः । अवातो वातशून्यो देशः ॥

जातोन्नद्धप्रवृद्धाः स्युरुच्छ्रिताः

जात उत्पन्नः । उन्नद्ध उन्नतः । प्रवृद्धो बहलतां गतः ॥

उत्थितास्त्वमी ॥

वृद्धिमत्प्रोद्यतोत्पन्नाः

वृद्धिमदादिषु त्रिषु उत्थितः । प्रोद्यते यथा — समुत्थितो राजा ॥

आदृतौ सादरार्चितौ* ।

---

* अत्र तान्तसमाप्तिर्मातृकासु न दृश्यते ।

अर्थोऽभिधेयरैवस्तुप्रयोजननिवृत्तिषु ॥ ८३ ॥

निदानागमयोस्तीर्थमृषिजुष्टजले गुरौ ।

निदानमादिकारणम् । आगमो मुनिवचनम् । ऋषिसेवितजलं वाराणस्यादि ॥

समर्थस्त्रिषु शक्तिस्थे सम्बद्धार्थे हितेऽपि च ॥ ८४ ॥

शक्तिस्थे शक्तियुक्ते । सम्बद्धोऽर्थोऽस्येति सम्बद्धार्थः ॥

दशमीस्थौ क्षीणरागवृद्धौ

क्षीणरागो नष्टबीजः ॥

वीथी पदव्यपि ।

पदवी मार्गः । पङ्क्तिर्गृहाङ्गं रूपकं च वीथी ॥

आस्थानीयत्नयोरास्था

आस्थानी सभा ॥

प्रस्थोऽस्त्री सानुमानयोः ॥ ८५ ॥

मानं परिमाणविशेषश्च ॥

थान्तः ।

अभिप्रायवशौ छन्दौ

अभिप्राय आशयः । वशो यथा स्वच्छन्दाश्छात्राः ॥

अब्दौ जीमूतवत्सरौ ।

पर्वतभेदेऽप्यब्दः ॥

अपवादौ तु निन्दाज्ञे

आज्ञा निदेशः ॥

दायादौ सुतबान्धवौ ॥ ८६ ॥

बान्धवो ज्ञातिः ॥

पादा रश्म्यङ्घ्रितुर्यांशाः

तुर्यांशश्चतुर्थांशः ॥

चन्द्राग्न्यर्कास्तमोनुदः ।

अर्कः सूर्यः ॥

निर्वादो जनवादेऽपि

जनवादो निन्दा । अवज्ञानिश्चितवादयोरपि निर्वादः ॥

शादो जम्बालशष्पयोः ॥ ८७ ॥

शष्पं नवतृणम् ॥

आरावे रुदिते त्रातर्याक्रन्दो दारुणे रणे ।

आर्तध्वनिराराव:, तत्सहिते रुदिते आक्रन्दः । त्रातरि यथा—निराक्रन्दं जगत् । दारुणे इति रणविशेषणम् ॥

स्यात् प्रसादोऽनुरोधेऽपि

कार्यप्रमाणप्रसक्तिषु प्रसादः ॥

सूदः स्याद् व्यञ्जने त्रिषु ॥ ८८ ॥

सूपकारोऽपि सूदः ॥

गोष्ठाध्यक्षेऽपि गोविन्दः

हरौ च गोविन्दः ॥

हर्षेऽप्यामोदवन्मदः ।

यथा आमोदशब्दो हर्षे तथा मदशब्दश्च । अतिनिर्हारिगन्धोऽप्यामोदः । गर्वगजदानयोश्च मदः ॥

प्राधान्ये राजलिङ्गे च वृषाङ्गे ककुदोऽस्त्रियाम् ॥ ८९ ॥

प्रधानमेव प्राधान्यम् । राजलिङ्गं राजचिह्नं कनकदण्डादि । ककुच्छब्दोऽप्येषु ॥

स्त्री संविज्ज्ञानसम्भाषाक्रियाकाराजिनामसु ।

क्रियायाः कारो निश्चयः । आजिः युद्धम् । स्त्रीति उपनिषदा शरदा च सम्बध्यते ॥

धर्मे रहस्युपनिषत्

वेदान्तेऽप्युपनिषत् ॥

स्याद्वतौ वत्सरे शरत् ॥ ९० ॥

ऋतुविशेषे ऋतौ ॥

पदं व्यवसितित्राणस्थानलक्ष्माङ्घ्रिवस्तुषु ।

व्यवसितिश्च व्यवसायः । लक्ष्मं व्याजः । 'पदं स्थानेऽपदेशे चे'त्यादिना धरणिश्च । लक्ष्मपाठे तु लक्ष्म चिह्नम् । तथाहि—

"पदं स्थाने परित्राणे व्यवसायापदेशयोः" (?)

इत्यजयः ॥

गोष्पदं सेविते माने

सेविते गोभिरेव सेविते देशे । मीयतेऽनेनेति मानं गोखुरश्वभ्रं गोष्पदमात्रक्षेत्रम् । गोष्पदं मूर्धन्यवत् ।

"गोष्पदं गोपदश्वभ्रे गवां च गतिगोचरे"

इति रभसः ॥

प्रतिष्ठा कृत्यमास्पदम् ॥ ९१ ॥

प्रभुत्वं स्थानमात्रकं च प्रतिष्ठा । कृत्यं कार्यम् ॥

त्रिष्विष्टमधुरौ स्वादू

इष्टो मृष्टः । दान्तवर्गावधि त्रिष्वित्यधिकारः ॥

मृदू चातीक्ष्णकोमलौ ।

अतीक्ष्णो मन्दः ॥

मूढाल्पापटुनिर्भाग्या मन्दाः स्युः

मूढो मूर्खः ॥

द्वौ तु शारदौ ।

प्रत्यग्राप्रतिभौ

प्रत्यग्रोऽभिनवः । अधृष्टोऽप्रतिभः । शारदस्तालव्यादिः ॥

विद्वत्सुप्रगल्भौ विशारदौ ।

विद्वान् पण्डितः ॥

क्षान्तः ।

व्यामो वटश्च न्यग्रोधौ

व्यामो विआम इति ख्यातः । वटो वृक्षभेदः ॥

उत्सेधः काय उन्नतिः ॥ ९३ ॥

उन्नतिः उच्छ्रायः । 'सिधु गत्याम्' । घञ् । उत्सेधः ॥

पर्याहारश्च मार्गश्च विवधौ वीवधौ च तौ ।

पर्याहार[1]ः भो[2]त्स इति ख्यातः ॥

परिधिर्यज्ञियतरोः शाखायामुपसूर्यके ॥ ९४ ॥

यज्ञियतरुरुदुम्बरादिः, तच्छाखायां परिधिः । उपसूर्यमादित्यमण्डलम् ॥

बन्धकं व्यसनं चेतःपीडाधिष्ठानमाधयः ।

बन्धकं भूम्यादिबन्धकम् । अधिष्ठानमाक्रमणम् ॥

स्युः समर्थननीवाकनियमाश्च समाधयः ॥ ९५ ॥

दुर्घटप्रतिविधानं समर्थनम् । धान्यादिष्वादरो नीवाकः । नियम इन्द्रियसंयमः ॥

दोषोत्पादेऽनुबन्धः स्यात् प्रकृत्यादिविनश्वरे ।
मुख्यानुयायिनि शिशौ प्रकृतस्यानिवर्तने ॥ ९६ ॥

चतुर्षु अनुबन्धः । प्रकृतिप्रत्ययादेर्योऽदर्शनीयो लोप्यस्वभावो वर्णः, सोऽनुबन्धः । यथा — तिपः पकारः । विवाहामन्त्रणयात्रायां यो मुख्यं पित्रादिकमनुयाति शिशुः, तत्राप्यनुबन्धः । प्रकृतस्यानिवर्तने निवर्तनाभावे । यथा—वैरानुबन्धः । अनुवर्तनमिति क्वचित् पाठः ॥

विधुर्विष्णौ चन्द्रमसि

चन्द्रमसि चन्द्रे ॥

---

१. 'रः प्रसिद्धः ॥ य' ठ. पाठः. २. 'ए' क., 'ना' अ. पाठः.

परिच्छेदे बिलेऽवधिः ।

परिच्छेदः सीमा ॥

विधिर्विधाने दैवेऽपि

विधानं क्रिया । दैवं कर्म ॥

प्रणिधिः प्रार्थने चरे ॥ ९७॥

प्रार्थनचरौ सुप्रसिद्धौ ॥

बुधवृद्धौ पण्डितेऽपि

सुगते बुधितेऽपि बुधः । स्थविरेऽपि वृद्धः । शैलेये तु क्लीबम् ॥

स्कन्धः समुदयेऽपि च ।

समुदयः समूहः ।

"प्रकाण्डेंऽशे नृपे स्कन्धः समुदायसमूहयोः"

इति रुद्रः ॥

देशे नदविशेषेऽब्धौ सिन्धुर्ना सरिति स्त्रियाम् ॥ ९८॥

देशे देशविशेषे ॥

विधा विधौ प्रकारे च

विधानं विधिः । राजवेतने हस्त्यन्नेऽपि विधिः ॥

साधु रम्येऽपि च त्रिषु ।

रम्यं मनोहरम् । वार्धुषिके सज्जने च साधुः ॥

वधूर्जाया स्नुषा स्त्री च

जाया स्वभार्या । स्नुषा पुत्रादिभार्या । स्त्रीति स्त्रीमात्रम् । वधूः नवोढा, पृक्का शटी च ॥

सुधा लेपोऽमृतं स्नुहिः ॥ ९९॥

लेपः सौधादिलेपनद्रव्यम् । स्नुहिः सिन्धुः ॥

---

१ 'सी' ञ ट. ज. पाठः. २. 'पः छभु इति व्याख्या: । स्नु' ड. पाठः.

सन्धा प्रतिज्ञा मर्यादा

प्रतिज्ञायां यथा — सत्यसन्धः । मर्यादायां यथा —

"उपकारिणि विश्रब्धे शुद्धमतौ यः समाचरति पापम् ।
तं जनमसत्यसन्धं भगवति ! वसुधे ! कथं वहसि" ॥

श्रद्धा सम्प्रत्ययः स्पृहा ।

स्पृहा काङ्क्षा ॥

मधु मद्ये पुष्परसे क्षौद्रेऽपि

"दैत्यचैत्रवसन्तेषु पुंसि क्लीबे च ना मधुः" ॥

अन्धं तमस्यपि ॥ १०० ॥

अक्षिहीनेऽप्यन्धः ॥

अतस्त्रिषु

अतः परे धान्तवर्गान्तास्त्रिषु ॥

समुन्नद्धौ पण्डितंमन्यगर्वितौ ।

पाण्डित्याभिमानयुक्तः पण्डितंमन्यः ॥

ब्रह्मबन्धुरधिक्षेपे निर्देशे

अधिक्षेपे यथा — ब्रह्मबन्धो ! किमिदं त्वमित्यादि। निर्देश इति। यस्य द्वेषाद् नाम न ग्रहीतव्यं, स ब्रह्मबन्धुर्निर्दिश्यत इत्यर्थः ॥

अथावलम्बितः ॥ १०१ ॥

अविदूरोऽप्यवष्टब्धः

अवलम्बित आश्रितः । अविदूर आस(न्नः) नातिदूरश्च ॥

प्रसिद्धौ ख्यातभूषितौ ।

भूषितोऽलङ्कृतः ॥

धान्ताः ।

सूर्यवह्नी चित्रभानू

वह्निरग्निः ॥

भानू रश्मिदिवाकरौ ॥ १०२ ॥

रश्मिः किरणः ॥

भूतात्मानौ धातृदेहौ

भूतानां प्राणिनां परमात्मत्वाद् ब्रह्मा भूतात्मा । पृथिव्यादिभूतस्वभावाद् देहोऽपि ॥

मूर्खनीचौ पृथग्जनौ ।

नीचो हीनजातिः ॥

ग्रावाणौ शैलपाषाणौ

अभेदाच्छैलेऽपि ग्रावा ॥

पत्रिणौ शरपक्षिणौ ॥ १०३ ॥

श्येनाख्यविहगोऽपि पत्री ॥

तरुशैलौ शिखरिणौ

अपामार्गे शिखरी ॥

शिखिनौ वह्निबर्हिणौ ।

बर्हिणो मयूरः ॥

प्रतियत्नावुभौ लिप्सोपग्रहौ

लिप्सा तृष्णा । उपग्रहो बन्दीग्रहणादिः । सतो गुणान्तराधानेऽपि प्रतियत्नः ॥

अथ सादिनौ ॥ १०४ ॥

द्वौ सारथिहयारोहौ

हयारोहोऽश्ववा(वा?)रः ॥

वाजिनोऽश्वेषुपक्षिणः ।

इषुः काण्डः ॥

कुलेऽप्यभिजनो जन्मभूम्यामपि

कुलस्थानेऽप्यभिजनः ॥

अथ हायनाः ॥ १०५ ॥

वर्षार्चिर्व्रीहिभेदाश्च

वर्षो वत्सरः । अर्चिर्मयूखः ॥

चन्द्रान्यर्कौ विरोचनाः ।

अर्को रविः ॥

केशेऽपि वृजिनः

"वृजिनं कल्मषे क्लीबं के(शो?शे)नो कु(न्त ? टि)ले त्रिषु"

इति रभसः ॥

विश्वकर्मार्कसुरशिल्पिनोः ॥ १०६ ॥

अर्को रविः ॥

आत्मा यत्नो धृतिर्बुद्धिः स्वभावो ब्रह्म वर्ष्म च ।

ब्रह्म परमात्मा । वर्ष्म कायः ॥

शक्रो घातुकमत्तेभो वर्षुकाब्दो घनाघनः ॥ १०७ ॥

घातुकश्चासौ मत्तेभश्चेति कर्मधारयः । एवं वर्षुकाब्दः ॥

अभिमानोऽर्थादिदर्पेऽज्ञाने प्रणयहिंसयोः ।

अर्थादीत्यादिना कु(लदर्पा?)लादिदर्पे ॥

घनो मेघे मूर्तिगुणे त्रिषु मूर्ते निरन्तरे ॥१०८॥

मूर्तिः काठिन्यं, स एव गुणः । यथा — अभ्रघनः । मूर्ते काठिन्ययुक्ते यथा — घनं दधि । निरन्तरे यथा—घनं वनम् । मुस्तकविस्तारलोहमुद्गरे(षु) घनो ना, कांस्यतालादिवाद्ये च क्लीबम् ॥

इनः सूर्ये

इनो ह्रस्वादिः । 'हेतुरह्नामिनो वः' इति मयूरः ॥

प्रभौ राजा मृगाङ्के क्षत्रिये नृपे ।

"प्रभौ भूमिपतौ राजा क्षत्रिये रजनीपतौ"

इति रभसः । अतः प्रभाविति राज्ञि सम्बध्यते ॥

वाणिन्यौ नर्त्तकीदूत्यौ

---

१. 'शानां तरलेऽपि च इति विश्वः ॥' इति ट. पाठः. २. 'नान्तरले' क. ख. ग. ङ. छ. ट. पाठः.

(मत्ता?) मत्तस्त्री विदग्धा च भामिनी ॥

[illegible]पि वाहिनी ॥ १०९ ॥

सेनाभेदे सेनामात्रे च वाहिनी ॥

ह्रादिन्यौ वज्रतडितौ

तडिद् विद्युत् ॥

वन्दायामपि कामिनी ।

वृक्षे विजातीयप्ररोहो वन्दा, विलासिनी च कामिनी ॥

त्वग्देहयोरपि तनुः

"त्वचि काये तनुः स्त्री स्यात् त्रिष्वल्पे विरले कृशे"
(इति रभसः) ॥

सूनाऽधोजिह्विकापि च ॥ ११० ॥

अधोजिह्विका गलशुण्डीति ख्याता । वधस्थानेऽपि सूना । वधालेप इत्यन्यः ॥

क्रतुविस्तारयोरस्त्री वितानं त्रिषु तुच्छके ।
मन्दे

तुच्छं शून्यम् । मन्दे वितानीभूतहृदये ॥

अथ केतनं कृत्ये केतावुपनिमन्त्रणे ॥ १११ ॥

कृत्यं कार्यम् । केतुर्ध्वजः । निमन्त्रणमेवोपनिमन्त्रणम् ॥

वेदस्तत्त्वं तपो ब्रह्म ब्रह्मा विप्रः प्रजापतिः ।

तत्त्वं परमात्मा । तपसि यथा—ब्रह्मचारी । विप्रो द्विजातिः ॥

उत्साहने च हिंसायां सूचने चापि गन्धनम् ॥ ११२ ॥

उत्साहनमुत्साहः । सूचनमभिनयः ॥

आतञ्चनं प्रतीवापजवनाप्यायनार्थकम् ।

---

१. 'लो' ख. ट. पाठः.

"अपायस्तु प्रतीवा(यो ? पो) मारिरीतिरुपद्रवः"

इति निघण्टुः। जवनं वेगः। आप्यायनं पीवनम्॥

व्यञ्जनं लाञ्छनश्मश्रुनिष्ठानावयवेष्वपि॥ ११३॥

लाञ्छनं चिह्नम्। निष्ठानं तेजनम्। स्त्रीपुंसयोर्गुह्यस्थोऽवयवः॥

स्यात् कौलीनं लोकवादे युद्धे पश्वहिपक्षिणाम्।

लोकापवादो लोकवादः। पशुयुद्धे, अहियुद्धेः पक्षियुद्धे॥

स्यादुद्यानं निस्सरणे वनभेदे प्रयोजने॥ ११४॥

निस्सरणे गृहादिनिर्गमे। कृत्रिमवनं वनभेदः॥

अवकाशे स्थितौ स्थानं

स्थितौ यथा— गवां स्थानेऽश्वो बध्यताम्॥

क्रीडादावपि देवनम्।

आदिना व्यवहारविजिगीषापरिदेवनेष्वपि। पाशके तु पुंसि॥

उत्थानं पौरुषे तन्त्रे सन्निविष्टोद्गमेऽपि च॥ ११५॥

पौरुषे यथा — उत्थानसम्पन्नो राजा। (त्रस्थेन ? तन्त्रे) सैन्ये॥

व्युत्थानं प्रतिरोधे च विरोधाचरणेऽपि च।

प्रतिरो(ह ? ध) आस्कन्दनम्॥

मारणे मृतसंस्कारे गतौ द्रव्येऽर्थदापने॥ ११६॥

निर्वर्तनोपकरणानुव्रज्यासु च साधनम्।

मारणे यथा — रससाधनम्। मृतस्य संस्कारोऽग्निदानम्। गतिर्गमनम्। द्रव्यं धनम्। अर्थस्य भूमिधनादेर्दापने। उपकरणमुपायो हस्त्यश्वादिः। अनुव्रज्या अनुगमनम्॥

---

१. 'वा' क. ख. ग. घ. ट. पाठः. २. 'त' क. पाठः.

निर्यातनं वैरशुद्धौ दाने न्यासार्पणेऽपि च ॥ ११७ ॥

दानं त्यागः ॥

व्यसनं विपदि भ्रंशे दोषे कामजकोपजे ।

विपद् दुःखम् । भ्रंशोऽपायेपतनम् । कामजे दोषे कोपजे च दोषे ॥

पक्ष्माक्षिलोम्नि किञ्जल्के तन्त्वाद्यंशेऽप्यणीयसि ॥

अणीयसीति तन्त्वाद्यंशस्य विशेषणम् ॥

तिथिभेदे क्षणे पर्व

तिथिभेदे पूर्णिमायाम् ।

"दर्शप्रतिपदोः सन्धौ ग्रन्थिप्रस्तावयोरपि ।
पर्व क्लीबं महे चैव विषुवत्प्रभृतिष्वपि ॥"

इति रभसः ॥

वर्त्म नेत्रच्छदेऽध्वनि ।

नेत्रच्छदे पिधानचर्मपुटे ॥

अकार्यगुह्ये कौपीनं

अकार्यमकर्तव्यम् । गुह्यमुपस्थः । तादर्थ्यात् तदावरणं चीराख्यं च वस्त्रं कौपीनम् ॥

मैथुनं सङ्गतौ रते ॥ ११९ ॥

संगतिः संयोगः । 'विवाहः सङ्गतिरि'ति कलिङ्गः ॥

प्रधानं परमात्मा धीः प्रज्ञानं बुद्धिचिह्नयोः ।
प्रसूनं पुष्पफलयोर्निधनं कुलनाशयोः ॥ १२० ॥

क्रन्दने रोदनाह्वाने वर्ष्म देहप्रमाणयोः ।
गृहदेहत्विट्प्रभावा धामान्यथ चतुष्पथे ॥ १२१ ॥
संनिवेशे च संस्थानं

---

१. 'यः प' क. ख. ङ. पाठः.

आकृति(सू?मृ)त्योरपि संस्थानम् ॥

लक्ष्म चिह्नप्रधानयोः।

चिह्नं प्रसिद्धम् ॥

आच्छादनं संपिधानमपवारणमित्युभे ॥ १२२ ॥

संपिधानं परिधानम्। अपवारणं तिरोधानम्। एते आच्छादनाख्ये ॥

आराधनं साधने स्यादवाप्तौ तोषणेऽपि च।

साधनं निष्पादनम्। अवाप्तिर्लाभः। तोषणं संतोषणम्[1] ॥

अधिष्ठानं चक्रपुरप्रभावाध्यासनेष्वपि ॥ १२३ ॥

चक्रं रथाङ्गम्। पुरं नगरम्। अध्यासनमाक्रमणम् ॥

रत्नं स्वजातिश्रेष्ठेऽपि

स्वजातिश्रेष्ठे—स्त्रीरत्नम् अश्वरत्नम्। मरतकादौ च रत्नम् ॥

वने सलिलकानने।

(नि)लयनिवासयोरपि वनम् ॥

तलिनं विरले स्तोके वाच्यलिङ्गं

'त्रिष्व(ष्टे? ल्पे) तलिनं ल(ये? वे)' इति रभसः ॥

तथोत्तरे ॥ १२४ ॥

यथा तलिनं वाच्यलिङ्गं, तथोत्तरे नान्तावधि वाच्यलिङ्गाः ॥

समानाः सत्समैके स्युः

सत् सज्जनः। समः सदृशः। एकस्मिन् यथा—समानोदरे शयितः ॥

पिशुनौ खलसूचकौ।

सूचकः कर्णेजपः ॥

1. 'षोत्पादनम् ॥' क. ख. ग. ङ. च. छ. ज. पाठः.

हीनन्यूनावूनगर्ह्यौ

हीनन्यूनौ द्वावनेकार्थौ । गर्ह्यः कुत्सितः ॥

वेगिशूरौ तरस्विनौ ॥ १२५ ॥

शूरो बली ॥

अभिपन्नोऽपराद्धोऽभिग्रस्तव्यापद्गतावपि ।

अपराद्धोऽपराधवान् । अभिग्रस्तः शत्रुणा आक्रान्तः ॥

नान्तः ।

कलापो भूषणे बर्हे तूणीरे संहतेऽपि च ॥ १२६ ॥

भूषणं काञ्च्यादि । बर्हं मयूरपिञ्छम् ॥

परिच्छदे परीवापः पर्याप्तौ सलिलस्थितौ ।

परिच्छदः पटकुटीपटवादिः । सर्वतो व्यापनं पर्याप्तिः । सलिलस्थितौ जलाधारे ॥

गोधुग् गोष्ठपतिर्गोपौ

गोधुग् गोपालः । गोष्ठपतिः गोष्ठाध्यक्षः । अग्नौ च ॥

हरो विष्णुर्वृषाकपिः ॥ १२७ ॥

वृषाकपिर्मूर्धन्यषः ॥

बाष्पमूष्माश्रु

ऊष्मणि — बाष्पायते स्थाली । अश्रुणि — बाष्पाम्भसां बिन्दवः । समाहारद्वन्द्वे ऊष्माश्रु ॥

कशिपुस्त्वन्नमाच्छादनं द्वयम् ।

अन्नमाहारः । आच्छादनं वस्त्रम् ।

"एकोक्त्या कशिपू भक्ताच्छादने द्वे पृथक्कृते"

इति रभसः । कशिपुस्तालव्यमध्यः पुमांश्च । क्लीबमिति त्रिकाण्डशेषः ॥

तल्पं शय्याट्टदारेषु

अट्टोऽट्टालिका । वक्ष्यमाणोऽस्त्रियामिति तल्पेनापि संबध्यते । तथा च भट्टिः—'ययुः सुषुप्सवस्तल्पान्' (स० ८. श्लो० १०१) इति ॥

स्तम्बेऽपि विटपोऽस्त्रियाम् ॥ १२८ ॥

पल्लवे शाखायां च विटपम् ॥

प्राप्तरूपस्वरूपाभिरूपा बुधमनोज्ञयोः ।
भेद्यलिङ्गा अमी

प्राप्तरूपादित्रयं भेद्यलिङ्गं बुधमनोज्ञयोः ॥

कूर्मी वीणाभेदश्च कच्छपी ॥ १२९ ॥

कमठीसारस्वतवीणयोः कच्छपी ॥

पान्तः ।

रवर्णे पुंसि रेफः स्यात् कुत्सिते वाच्यलिङ्गकः ।

फान्तः ।

अन्तराभवसत्त्वेऽश्वे गन्धर्वो दिव्यगायने ॥ १३० ॥

यो मृतो नैव कायान्तरं लभते, कि(ञ्च?न्त्व)शरीरी, स मरणजन्मनो-र्मध्यभवत्वादन्तराभवसत्त्वम् ॥

कम्बुर्ना वलये शङ्खे

वलयो बाहुभूषणम् ॥

द्विजिह्वौ सर्पसूचकौ ।

सूचकः कर्णेजपः ॥

पूर्वोऽन्यलिङ्गः प्रागाह पुंबहुत्वेऽपि पूर्वजान् ॥ १३१ ॥

पूर्वोऽन्यलिङ्गः वाच्यलिङ्गः सन् प्रागाह पूर्वदिग्देशकालसम्बन्धि वस्तु आह। यथा—पूर्वो ग्रामः, पूर्वं धनं, पूर्वा नदी । यदा च पूर्वजान् पितामहादीनाह, तदा पुंबहुत्वे वर्तते । यथा—पूर्वे वदन्ति । पूर्वैः कृतम् ॥

वान्तः ।

---

१. 'ल्पामिति' ङ. छ. पाठः.

कुम्भौ घटेभमूर्धांशौ

इभमूर्धांशो मस्तकपिण्डद्वयम् ॥

डिम्भौ तु शिशुबालिशौ ।

बालिशो मूर्खः ॥

स्तम्भौ स्थूणाजडीभावौ

जडीभावो निष्पन्दता ॥

शम्भू ब्रह्मत्रिलोचनौ ॥ १३२॥

विष्णौ च शम्भुः ।

कुक्षिभ्रूणार्भका गर्भाः

गर्भस्थसत्त्वेऽपि भ्रूणः ॥

विस्रम्भः प्रणयेऽपि च ।

"विस्रम्भः स्यात् परिचये विश्वासे विप्रलम्भयोः"

इत्यजयः ॥

स्याद् भेर्यां दुन्दुभिः पुंसि स्यादक्षे दुन्दुभिः स्त्रियाम् ॥

अक्षः पाशकः ॥

स्यान्महारजने क्लीवं कुसुम्भं करके पुमान् ।

महारजने पुष्पे कौसुम्ब इत्येवाख्याते । करके कमण्डलौ ॥

क्षत्रियेऽपि च नाभिर्ना

"सुसदृक्षत्रिययोर्नाभिः पुंसि प्राण्यङ्गके द्वयोः ।
चक्रमध्ये प्रधानेऽपि स्त्रियां कस्तूरिकामदे ॥"

इति रभसः ॥

सुरभिर्गवि च स्त्रियाम् ॥ १३४ ।

वसन्तजातीफलचम्पकेऽपि सुरभिर्ना, सुगन्धिमनोज्ञयोस्त्रिषु ॥

सभा संसदि सभ्ये च

संसद् गोष्ठी। सभ्यः सभासत् ॥

त्रिष्वध्यक्षेऽपि वल्लभः।

दयिते च वल्लभः ॥

भान्तः।

किरणप्रग्रहौ रश्मी

अश्वादिसंयमनी रज्जुः प्रग्रहः ॥

कपिभेकौ प्लवङ्गमौ ॥ १३५॥

प्रवङ्गमोऽप्यत्र ॥

इच्छामनोभवौ कामौ

निकाम(रेतः)का(मेऽ्ये)षु च कामं क्लीवम् ॥

शौर्योद्योगौ पराक्रमौ।

प्राणमात्रेऽपि पराक्रमः ॥

धर्माः पुण्ययमन्यायस्वभावाचारसोमपाः ॥ १३६ ॥

षट्सु धर्मः ॥

उपायपूर्व आरम्भ उपधा चाप्युपक्रमः।

उपायज्ञानपूर्वको यः कार्यारम्भः स उपायपूर्वः। अमात्यशीलपरीक्षोपाय उपधा ॥

वणिक्पथः पुरं वेदो निगमाः

वणिक्पथो वाणिज्यम् ॥

नागरो वणिक् ॥ १३७॥

नैगमौ द्वौ

नगरे भवो नागरः ॥

बले रामो नीलचारुसिते त्रिषु।

बले रामो ना, नीलादित्रये त्रिषु ॥

शब्दादिपूर्वो बृन्देऽपि ग्रामः

शब्दादिपूर्वो ग्रामो बृन्दे । यथा — शब्दग्रामः । विषयग्रामः । अपिना संवसथेऽपि ग्रामः ॥

क्रान्तौ च विक्रमः ॥१३८॥

क्रान्तिः क्रमणम् । पराक्रमो विक्रमः ॥

स्तोमः स्तोत्रेऽध्वरे बृन्दे जिह्मस्तु कुटिलेऽलसे ।

गुल्मा रुक्सभ्यसेनाश्च

रुक्सभ्यो गुल्मपतिरिति केचित् । सभ्योऽपपाठः, स्तम्ब इत्येव पाठ इत्यन्यः । सेनाभेदः सेना । गुल्मकेऽपि गुल्मः ॥

जामिः स्वसृकुलस्त्रियोः ॥१३९॥

"प्रहरे संयमे यामो यामिः स्वसृकुलस्त्रियोः"

इति रभसः ।

"जिह्मस्तु कुटिले मन्दे जामिः स्वसृकुलस्त्रियोः"

इति चवर्गादावजयः ॥

क्षितिक्षान्त्योः क्षमा युक्ते क्षमं शक्ते हिते त्रिषु ।

क्षितिर्भूमिः । युक्ते न्याय्ये ॥

त्रिषु श्यामौ हरित्कृष्णौ श्यामा स्याच्छारिवा निशा ॥

हरिति यथा — शुकः श्यामः । शारिवा श्यामलता । (अनन्तापन?) [1]यस्या मूलम् अनन्तमूलमिति ख्यातम् । निशा रात्रिः ॥

ललामं पुच्छपुण्ड्राश्वभूषाप्राधान्यकेतुषु ।

१. 'यनास्या' ञ. पाठः.

"ललाम च ललामं च भूषावालधिवाजिषु ।
चिह्नप्रभावपुण्ड्रेषु प्रधाने ध्वजशृङ्गयोः ॥"

इत्यजयः । अतोऽदन्तमपि ललामम् । पुच्छं लाङ्गूलम् । पुण्ड्रं गवादीनां ललाटे चित्रम् ॥

सूक्ष्ममध्यात्ममपि

आत्मन्यधि अध्यात्मम् । परमात्मनीत्यर्थः । स्वल्पेऽपि सूक्ष्मम् ॥

आदौ प्रधाने प्रथमः

प्रधाने श्रेष्ठे ॥

त्रिषु ॥ १४१ ॥

वामौ वल्गुप्रतीपौ द्वौ

मान्तं यावत् त्रिष्वित्यधिकारः । वामो मनोहरः । यथा — वामलोचना । प्रतीपो विपरीतः ॥

अधमौ न्यूनकुत्सितौ ।

न्यूनः ऊनः ॥

जीर्णं च परिभुक्तं च यातयाममिदं द्वयम् ॥ १४२ ॥

परिभुक्तं भुक्तोज्झितम् । यातयामे यद्द्वयमन्तःस्थम् ॥

मान्तः ।

तुरङ्गगरुडौ तार्क्ष्यौ

तुरङ्गोऽश्वः ॥

निलयापचयौ क्षयौ ।

निलयो गृहम् । अपचयो ह्रासः ॥

श्वशुर्यौ देवरश्यालौ

'राजश्वशुराद् यत्' (४. १. १३७) इति यत् । श्वशुर्यः ॥

भ्रातृव्यौ भ्रातृजद्विषौ ॥ १४३ ॥

'भ्रातुर्व्यच्च' (४. १. १४४) इति व्यत् । भ्रातृव्यः ॥

पर्जन्यौ रसदब्देन्द्रौ

'पृषु सेचने' । 'पर्जन्यः' (उ० ३. १०३) इत्यनेन अन्यप्रत्ययः षकारस्य चवर्गीयो जकारश्च निपात्यते । पर्जन्यः । अर्जेर्वान्यप्रत्ययः पुडागमश्च धातोः । रसदब्दः सशब्दो मेघः ॥

स्यादर्यः स्वामिवैश्ययोः ।

स्वामी प्रभुः ॥

तिष्यः पुष्ये कलियुगे

पुष्यो नक्षत्रभेदः ॥

पर्यायोऽवसरे क्रमे ॥ १४४ ॥

प्रकारेऽपि पर्यायः ॥

प्रत्ययोऽधीनशपथज्ञानविश्वासहेतुषु ।
रन्ध्रे शब्दे

अधीने यथा — 'स्वप्रत्यया वृत्तिरभीतवासः'[1] । हेतौ यथा — 'अपेक्षते प्रत्ययमुत्तमं त्वाम्' । (स ?) शब्दः स(न्ध्य ? न्क्य)जादिः ॥

अथानुशयो दीर्घद्वेषानुतापयोः ॥ १४५ ॥

दीर्घद्वेषश्चिरद्वेषः ॥

स्थूलोच्चयस्त्वसाकल्ये नागानां मध्यमे गते ।

असाकल्यमकात्स्न्र्यम् । नागानां गजानां मध्यमं गतं गमनं नातित्वरया नातिमन्दं सेवितम् ॥

समयाः शपथाचारकालसिद्धान्तसंविदः ॥ १४६ ॥

क्रियाकारो निश्चय इति यावत् (?) ॥

---

१. 'धी' अ. पाठः.

व्यसनान्यशुभं दैवं विपदित्यनयास्त्रयः

व्यसनं भ्रंशादिदोषः । अशुभं दैवविशेषणम् ॥

अत्ययोऽतिक्रमे कृच्छ्रे दोषे दण्डेऽपि

नाशेऽप्यत्ययः ॥

अथापदि ॥ १४७ ॥

युद्धायत्योः संपरायः

आयतिरागामिकालः ॥

पूज्यस्तु श्वशुरेऽपि च ।

पूजार्हेऽपि पूज्यः ॥

पश्चादवस्थायि बलं समवायश्च संनयौ ॥ १४८ ॥

सेनायाः पृष्ठस्थायि[1] बलम् । समवायः समूहः ।

"समुन्नयः समुदये पृष्ठस्थायिबलेऽपि च"

इति त्वजयः ॥

सङ्घाते सन्निवेशे च संस्त्यायः

सन्निवेशो निकर्षणम् ॥

प्रणयास्त्वमी ।

विस्रम्भयाच्ञाप्रेमाणः

विस्रम्भः परिचयः ॥

विरोधेऽपि समुच्छ्रयः ॥ १४९ ॥

विरोधो वैरम् । उन्नतावपि समुच्छ्रयः ॥

विषयो यस्य यो ज्ञातस्तत्र शब्दादिकेष्वपि ।

यस्य यो ज्ञात इति येन य एकान्तं परिशीलितो निषेवित इति यावत् । शब्दादिकाः शब्दस्पर्शरूपरसगन्धाः ॥

---

१. 'यि दन्वब' क. ख. ङ. च. छ., यिमुदन्वब' घ. पाठः.

निर्यासेऽपि कषायोऽस्त्री

निर्यासः काथरसः ।

"रसभेदेऽङ्गरागे[2] च निर्यासे च विलेपने ।
कषायोऽस्त्री त्रिलिङ्गस्तु सुरभौ रुधिरेऽपि च ॥"

इति रभसः ॥

सभायां च प्रतिश्रयः ॥ १५० ॥

आश्रयमन्दिरयोरपि प्रतिश्रयः ॥

प्रायो भूम्न्यन्तगमने

भूम्नि बाहुल्ये । अन्तं गम्यतेऽनेनेत्यन्तगमनम् । संन्यासपूर्वकमनशनम् ॥

मन्युर्दैन्ये क्रतौ क्रुधि ।

'मन्युर्दैन्ये क्रतौ क्रुधी'त्यमरमालायां पुंस्काण्डम् ॥

रहस्योपस्थयोर्गुह्यं

कमठेऽपि गुह्यः पुमान् ॥

सत्यं शपथतथ्ययोः ॥ १५१ ॥

युगभेदेऽपि सत्यम् ॥

वीर्यं बले प्रभावे च

बलं रेतः ॥

द्रव्यं भव्ये गुणाश्रये ।

भव्यो भाग्यसंपन्नः ॥

धिष्ण्यं स्थाने गृहे भेऽग्नौ

भे नक्षत्रे । 'गृहे धिष्ण्यः पुमानि'ति शाश्वतः ॥

---

१. 'लेपे च' घ. पाठः. २. 'गे नि' क. ख. ग. ङ. छ. ञ. ट. ठ. पाठः.

भाग्यं कर्म शुभाशुभम् ॥१८२॥

शुभाशुभमिति सङ्घातविगृहीतम् । तेन न केवलमशुभं शुभं च ॥

कशेरुहेम्नोर्गाङ्गेयं

कशेरु स्वनामप्रसिद्धम् ॥

विशल्या दन्तिकापि च ।

दन्तिका दन्तीमूलम् । ओषधिभेदे च विशल्या ॥

वृषाकपायी श्रीगौर्योः

वृषाकपेर्भार्या वृषाकपायी । 'वृषाकप्यग्नि—' (४. १. ३७) इत्यादिना ङीबैकारादेशौ ॥

अभिख्या नामशोभयोः ॥ १८३ ॥

कीर्त्तावप्यभिख्या ॥

आरम्भो निष्कृतिः शिक्षा पूजनं संप्रधारणम् ।
उपायः कर्म चेष्टा च चिकित्सा च नव क्रियाः ॥ १८४ ॥

आरम्भादिषु नवसु क्रियाशब्दः ॥

छाया सूर्यप्रिया कान्तिः प्रतिबिम्बमनातपः ।

अनातप आतपाभावः ॥

कक्ष्या प्रकोष्ठे हर्म्यादेः काञ्च्यां मध्येभबन्धने ॥ १८५ ॥

मध्येभबन्धनं करिकक्षरज्जुः । त्रिकाण्डशेषे तु कक्षा मूर्धन्यान्ते पठ्यते ॥

कृत्या क्रियादेवतयोस्त्रिषु भेद्ये धनादिभिः ।

देवता यज्ञदेवताविशेषः । धनस्त्रीभूम्यादिभिर्निर्भेदनीयो यः परराष्ट्रे पुरुषः, तत्र वर्तमानः कृत्याशब्दो वाच्यलिङ्गः । इतः परं यान्तावधि त्रिष्वित्यनुवर्तते ॥

जन्यः स्याज्जनवादेऽपि

जामातृस्निग्धेऽपि जन्यः ॥

जघन्योऽन्त्येऽधमेऽपि च ॥ १५६ ॥

अन्त्ये पश्चाद्भवे ॥

गर्ह्याधीनौ च वक्तव्यौ

गर्ह्यः कुत्सितः । अधीनो वचनग्राही ॥

कल्यौ सज्जनिरामयौ ।

सज्जं संभृतम् । निरामयो नीरुक् ॥

आत्मवाननपेतोऽर्थादर्थ्यौ

आत्मवान् विज्ञः । 'अर्थ्यो विज्ञार्थशालिनोः' इत्यजयः । 'धर्मपथ्यर्थन्यायादनपेते' (४. ४. ९२) इति यत् । अर्थ्यः ॥

पुण्यं तु चार्वपि ॥ १५७ ॥

सुकृतेऽपि पुण्यम् ॥

रूप्यं प्रशस्ते रूपेऽपि

'रूपादाहतप्रशंसयोर्यप्' (५. २, १२०) इति यप् । रूप्यम् ॥

वदान्यो वल्गुवागपि ।

व(र्ण ? ल्गु)वाग् वाग्मी । दानशीलेऽपि वदान्यः ॥

न्याय्येऽपि मध्यं

न्याय्यमुचितम् । आद्यन्ताभ्यामन्यश्च मध्यः ॥

सौम्यं तु सुन्दरे सोमदैवते ॥ १५८ ॥

सोमदैवते यथा—सौम्यं हविः । 'सोमाट्ट्यण्' (४. २. ३०) इति ट्यण् ॥

यान्तः ।

निवहावसरौ वारौ

निवहः समूहः ॥

संस्तरौ प्रस्तराध्वरौ।

वल्कलदर्भादिशय्या प्रस्तरः ॥

गुरू गीर्पतिपित्राद्यौ

गीर्पतिः सुरमन्त्री ॥

द्वापरौ युगसंशयौ ॥ १५९ ॥

युगं तृतीयम् ॥

प्रकारौ भेदसादृश्ये

भेदे नानाविधे ॥

आकाराविङ्गिताकृती।

आकृतिः संस्थानम् ॥

किंशारू धान्यशूकेषू

इषुः शरः। धनुश्च किंशारुः, ना ॥

मरू धन्वधराधरौ ॥ १६० ॥

धन्वा निर्जलो देशः। धराधरो गिरिः ॥

अद्रयो द्रुमशैलार्काः

अर्को रविः ॥

स्त्रीस्तनाब्दौ पयोधरौ।

अब्दो मेघः ॥

ध्वान्तारिदानवा वृत्राः

स वृत्रो य इन्द्रेण हतः ॥

बलिहस्तांशवः कराः ॥ १६१ ॥

राजग्राह्यो भागो बलिः ॥

प्रदरा भङ्गनारीरुग्बाणाः

नारीरुग् रक्तप्रवाहः ॥

अस्राः कचा अपि ।

नेत्राम्बुरुधिरयोरप्यस्रः ॥

अजातशृङ्गो गौः कालेऽप्यश्मश्रुर्ना च तूवरौ ॥ १६२ ॥

प्राप्तकालेऽपि यस्य गोः शृङ्गं नोत्पद्यते, यस्य वा पुरुषस्य कालेऽपि न श्मश्रुसम्भवः, तौ तूवरौ ॥

स्वर्णेऽपि राः

* 'रादे[1]वीर्वि[2]हले (?) स्वर्ण' इति रुद्रः ॥

परिकरः पर्यङ्कपरिवारयोः ।

"भवेत् परिकरो बृन्दे परिवारविवेकयोः ।
आरम्भगात्रिकाबन्धपर्यङ्केषु परिच्छदे ॥"

इत्यजयः । परिवारः परिजनः ॥

मुक्ताशुद्धौ च तारः स्यात्

मुक्तायाः शुद्धिः धवलता । अत्युच्चस्वरोऽपि तारः ॥

शारो वायौ स तु त्रिषु ॥ १६३ ॥

कर्बुरे

कर्बुरे शबले त्रिषु । शारः तालव्यादिः ॥

---

१. 'मे' ङ. छ. ट. पाठः. २. 'वि' ज., 'वींतिह' ख., 'विंः ह' ट. पाठः.

---

* 'रा दाने विभ्रमे स्वर्णे' इति पाठः स्यात् ।

अथ प्रतिज्ञाजिसंविदापत्सु संगरः ।

आजिः युद्धम् । संवित् क्रियाकारः । आपद् विपत्तिः ॥

वेदभेदे गुप्तिवादे मन्त्रः

गुप्तिवादे सम्यगालोचने ॥

मित्रो रवावपि ॥ १६४ ॥

सुहृदि मित्रं क्लीबम् ॥

मखेषुयूपखण्डेऽपि स्वरुः

इषुः काण्डम् । दम्भोलौ स्वरुः ॥

गुह्येऽप्यवस्करः ।

गूढेऽप्यवस्करः ॥

आडम्बरस्तूर्यरवे गजेन्द्राणां च गर्जिते ॥ १६५ ॥

तूर्यरवे साङ्ग्रामिके ॥

अभिहारोऽभियोगे च चौर्ये संनहनेऽपि च ।

अपचिकीर्षयाभिक्रम्याक्रमणमभियोगः ॥

स्याज्जङ्गमे परीवारः खड्गकोशे परिच्छदे ॥ १६६ ॥

जङ्गमः परिजनः ।

"(परीवारः) परिजने खड्गकोषे परिच्छदे"

इति रुद्रः ॥

विष्टरो विटपी दर्भमुष्टिः पीठाद्यमासनम् ।

विटपी वृक्षः । 'वृक्षासनयोर्विष्टरः' (८. ३. ९३) इति षत्वम् ॥

द्वारि द्वाःस्थे प्रतीहारः प्रतीहार्यप्यनन्तरे ॥ १६७ ॥

निकटवाची अनन्तरशब्दः । अनन्तरे द्वाःस्थे प्रतीहारिशब्दा णिन्यन्त इत्यर्थः । अणन्त इत्यपरः ॥

विपुले नकुले विष्णौ बभ्रुः स्यात् पिङ्गले त्रिषु ।

विपुल इति नकुलविशेषणम् ॥

सारो बले स्थिरांशे च न्याय्ये क्लीबं वरे त्रिषु ॥ १६८ ॥

बलं सामर्थ्यम् । स्थिरांशः खदिरसारादिः । न्याय्ये युक्ते क्लीबम् । वरे श्रेष्ठे ॥

दुरोदरो द्यूतकरे पणे द्यूते दुरोदरम् ।

द्यूतकरोऽक्षदेवी, तत्र पुंसि । अन्यत्र क्लीबम् ।

"आश्रित्य दुर्गं गिरिकन्दरोदरं क्रीडन्नमुष्मिन् सततं दरोदरम्" इति निरुकारं गोवर्धनः पठति ॥

महारण्ये दुर्गपथे कान्तारः पुन्नपुंसकम् ॥ १६९ ॥

दुर्गपथे अनवगम्यवने ॥

मत्सरोऽन्यशुभद्वेषे तद्वत्कृपणयोस्त्रिषु ।

अन्यशुभद्वेषः परसंपत्त्यावसहमानता । तद्वति परसंपत्तिद्वेषिणि ॥

देवाद् वृते वरः श्रेष्ठे त्रिषु क्लीबं मनाक्प्रिये ॥ १७० ॥

देवात् सकाशाद् वृते वाञ्छिते । मनाक्प्रिये मनागिष्टे । जामातर्यां वरः ॥

वंशाङ्कुरे करीरोऽस्त्री तरुभेदे घटे च ना ।

घटे कलशे ॥

ना चमूजघने हस्तसूत्रे प्रतिसरोऽस्त्रियाम् ॥ १७१ ॥

चमूजघने सेनायाः पश्चाद्भागे ॥

यमानिलेन्द्रचन्द्रार्कविष्णुसिंहांशुवाजिषु ।
शुकाहिकपिभेकेषु हरिर्ना कपिले त्रिषु ॥ १७२ ॥

चतुर्दशसु हरिः ॥

शर्करा कर्परांशेऽपि

कर्परांशो झिकराख्यः[1] । शर्कराश्म(री?)रोगयोश्च ॥

यात्रा स्याद् यापने गतौ ।

यापनं स्नानभोजनादिना वर्तनम् ॥

इरा भूवाक्सुराप्सु स्यात्

सुरा मद्यम् ॥

तन्द्रा निद्राप्रमीलयोः ॥ १७३ ॥

प्रमीला मोहप्राया ॥

धात्री स्यादुपमातापि क्षितिरप्यामलक्यपि ।

मात्रा उपमिता उपमाता इति व्याख्याता ॥

क्षुद्रा व्यङ्गा नटी वेश्या सरघा [illegible]रिका[2] ॥ १७४ ॥

त्रिषु क्रूरेऽधनेऽल्पेऽपि क्षुद्रः

अङ्गविकला व्यङ्गा । सरघा मधुमक्षिका ॥

मात्रा परिच्छदे ।

अल्पे च परिमाणे स्यान्मात्रं कार्त्स्न्येऽवधारणे ॥ १७५ ॥

परिच्छदः परिकरः । यथा — कापालिकस्य मात्रा । अल्पे यथा— शाकस्य मात्रा । परिमाणे यथा — किं हस्तिमात्रोऽङ्कुशः । एषु मात्रा स्त्रियाम् । कार्त्स्न्ये — जीवमात्रं न हिंस्यात् । अवधारणे — पयोमात्रं भुङ्क्ते । अनयोः क्लीबम् ॥

आलेख्याश्चर्ययोश्चित्रं

आलेख्यं चित्रकरकर्म ॥

कलत्रं श्रोणिभार्ययोः ।

श्रोणिः कटीभागः ॥

---

१. 'सि' ख. पाठः. २. 'स्का' क. ख. ग. घ. ङ. च. छ. ट., 'का' ञ. पाठः

योग्यभाजनयोः पात्रं

योग्यः शक्तः । तीरद्वयान्तरे पात्रम् ॥

पत्रं वाहनपक्षयोः ॥ १७६ ॥

वाहनमश्वादि । पक्षो गरुत् । पर्णेऽपि पत्रम् ॥

निदेशग्रन्थयोः शास्त्रं

निदेश आज्ञा ॥

शस्त्रमायुधलोहयोः ।

आयुधं खड्गादि ॥

स्याज्जटांशुकयोर्नेत्रं

जटा वृक्षमूलम् । अंशुकं नेत्राख्यम् । लोचनमन्थकर्षणयोरपि नेत्रम् ॥

क्षेत्रं पत्नीशरीरयोः ॥ १७७ ॥

केदारसिद्धस्थानयोश्च क्षेत्रम् ॥

मुखाग्रे क्रोडहलयोः पोत्रं

सूकरमुखाग्रे हलमुखाग्रे च पोत्रम् ॥

गोत्रं च नाम्नि च ।

"गोत्रं कुले बले नाम्नि गोत्रस्तु धरणीधरे ।
गोत्रा भुवि गवां वृन्दे"

इत्यजयः ॥

सत्रमाच्छादने यज्ञे सदादाने वनेऽपि च ॥ १७८ ॥

आच्छादने छादने ॥

अजिरं विषये कायेऽपि

विषयो रूपादिः । अङ्गणेऽप्यजिरम् ॥

अम्बरं व्योम्नि वाससि।

सुगन्धिद्रव्यभेदेऽप्यम्बरम् ॥

चक्रं राष्ट्रेऽपि

"चक्रः कोके व्रजे पुंसि क्लीबे सैन्यरथाङ्गयोः।
ग्रामजाले कुम्भकारभाण्डे राष्ट्रे च दृश्यते ॥"

इति त्रिकाण्डशेषः ॥

अक्षरं तु मोक्षेऽपि

'अक्षरं ब्रह्मवर्णयोरि'ति रुद्रः ॥

क्षीरमप्सु च ॥ १७९ ॥

दुग्धेऽपि क्षीरम् ॥

स्वर्णेऽपि भूरिचन्द्रौ द्वौ

प्रचुरेऽपि भूरिस्त्रिषु। स्वर्णपर्याये त्वस्य रूपभेदाद् क्लीबत्वमुक्तम्।

"इन्दुकर्पूरकम्पिल्लाश्चन्द्राश्चन्द्रोऽपि हेमनि"

इति रुद्रः ॥

द्वारमात्रे तु गोपुरम्।

पूर्द्वारे कैवर्तीमुस्तके च गोपुरम् ॥

गुहादम्भौ गह्वरे द्वे

गुहा गुहा इति ख्याता। 'गह्वरी गुहे'ति तूणादिवृत्तिः ॥

रहोऽन्तिकमुपह्वरे ॥ १८० ॥

रहो विजनम्। अन्तिकं समीपम् ॥

पुरोऽधिकमुपर्यग्राणि

पुर इति पुरस्तात्। प्रलयविनाशेऽप्यग्रम् ॥

अगारे नगरे पुरम्।

मन्दिरं च

यथा पुरमगारे नगरे च तथा मन्दिरमप्येतयोः ॥

अथ राष्ट्रोऽस्त्री विषये स्यादुपद्रवे ॥ १८१॥

विषयो जनपदः । उपद्रवो नागरादिः ॥

दरोऽस्त्रियां भये श्वभ्रे

श्वभ्रो गर्तः ॥

वज्रोऽस्त्री हीरके पवौ ।

पविर्वज्रम् ॥

तन्त्रं प्रधाने सिद्धान्ते सूत्रवापे परिच्छदे ॥ १८२॥

प्रधाने यथा — स्वतन्त्रः । कुविन्दा येन तन्तुवापं कुर्वन्ति, स सूत्रवापः । परिच्छदे पांचकादौ(?) ॥

औशीरं चामरे दण्डेऽप्यौशीरं शयनासने ।

चमरस्यायं चामरो दण्डः । आसनं पीठादि ॥

पुष्करं करिहस्ताग्रे वाद्यभाण्डमुखे जले ॥ १८३ ॥
व्योम्नि खड्गफले पद्मे तीर्थौषधिविशेषयोः ।

करिहस्ताग्रेऽङ्गुलौ । वाद्यभाण्डमुखं मुरजादिमुखम् । खड्गस्य फलं मध्यम् ॥

अन्तरमवकाशावधिपरिधानान्तर्धिभेदतादर्थ्ये ॥ १८४॥
छिद्रात्मीयविनाबहिरवसरमध्येऽन्तरात्मनि च ।

अवकाशे — 'मृणालसूत्रान्तरमप्यलभ्यम्' । अन्तर्धौ — 'ज्योत्स्नान्तराणीव कलान्तराणि' । भेदे — 'यदन्तरं वायसवैनतेययोः' । तादर्थ्ये — तवान्तरे[२] ऋणं गृहीतम् । छिद्रं रन्ध्रम् ॥

---

१. 'वायका' ग. ङ. च. छ. ञ., 'वायिका' क. ख. ट., 'पायिका' घ. पाठः.
२. 'रेण ऋ' ट. पाठः.

मुस्तेऽपि पिठरं

"स्थाल्यां ना पिठरः क्लीबं मुस्तमन्थनदण्डयोः" ॥

राजकशेरुण्यपि नागरम् ॥ १८५ ॥

राजकशेरु विशिष्टं तृणम् । शुण्ठ्यां च क्लीबम् । विदग्धे तु नागरः ॥

शार्वरं त्वन्धतमसे घातुके भेद्यलिङ्गकम् ।

शार्वरं तालव्यादि । घातुको मारणशीलः । अतः परं वाच्यलिङ्गग्रहणं रान्तान्तमनुवर्तते ॥

गौरोऽरुणे सिते पीते

चन्द्रेऽपि गौरः ॥

व्रणकार्यप्यरुष्करः ॥ १८६ ॥

भल्लातक्यां चारुष्करः ॥

जठरः कठिनेऽपि स्याद्

"उदरे जठरो न स्त्री बद्धकक्खटयोस्त्रिषु"

इति रुद्रः ॥

अधस्तादपि चाधरः ।

हीने त्वधरस्त्रिषु । ओष्ठे तु ना ॥

अनाकुलेऽपि चैकाग्रः

अप्येकतानोऽप्येकाग्रः ॥

व्यग्रोऽन्यासक्त आकुले ॥ १८७ ॥

अन्यासक्तो दन्त्यवान् ॥

उपर्युदीच्यश्रेष्ठेष्वप्युत्तरः स्याद्

उदीच्यो देशादिः । प्रतिवाक्ये तु उत्तरं क्लीबम् ॥

अनुत्तरः ।

एषां विपर्यये श्रेष्ठे

उपर्यादीनां विपर्यये अनुत्तरः । नञ्समासः ॥

दूरानात्मोत्तमाः पराः ॥ १८८ ॥

अ(न्या?ना)त्मनि यथा — परस्य भोजनमिच्छति ग्लानः ॥

स्वादुप्रियौ च मधुरौ

रसेऽपि मधुरः पुंसि । रसवति त्रिषु । विषेऽपि क्लीबम् ॥

क्रूरौ कठिननिर्दयौ ।

भयङ्करेऽपि क्रूरः ॥

उदारो दातृमहतोः

दक्षिणेऽप्युदारः ॥

इतरस्त्वन्यनीचयोः ॥ १८९ ॥

नीचः पामरः ॥

मन्दस्वच्छन्दयोः स्वैरः

मन्दः मन्थरः ॥

शुभ्रमुद्दीप्तशुक्लयोः ।

दीप्तम् उद्दीप्तम् ॥

रान्तः ।

चूडा किरीटं केशाश्च संयता मौलयस्त्रयः ॥ १९० ॥

चूडा शिखा । किरीटं रत्नादिघटितम् । संयताः कचाः धम्मिल्लः ॥

द्रुमप्रभेदमातङ्गकाण्डपुष्पाणि पीलवः ।

मातङ्गो हस्ती ॥

---

१. 'द्द' क. ख. ग. ङ. छ. ट. ठ. पाठः.

कृतान्तानेहसोः कालः

अनेहा समयः ॥

चतुर्थेऽपि युगे कलिः ॥ १९१ ॥

युद्धेऽपि कलिः ॥

स्यात् कुरङ्गेऽपि कमलः

पद्मजलयोः कमलं क्लीबम् ॥

प्रावारेऽपि च कम्बलः ।

प्रावारे मेषलोमादिमये । उत्तरासङ्गसास्नानागविशेषाणामपि कम्बलः ॥

करोपहारयोः पुंसि बलिः प्राण्यङ्गजे स्त्रियाम् ॥ १९२ ॥

करो राजप्रत्यादेयः । उपहारः पूजोपहारः । प्राण्यङ्गजमिति जराश्लथं चर्म, यौवनादिकृतमुदरे जटिकाकारं[1] च चर्म ॥

स्थौल्यसामर्थ्यसैन्येषु बलं ना काकसीरिणोः ।

सीरी बलभद्रः ॥

वातूलः पुंसि वात्यायामपि वातासहे त्रिषु ॥ १९३ ॥

वातसमूहो-वात्या ।

"वातूलो वातसङ्घाते वातले मरुतोऽसहे"

इति व्याडिः ॥

भेद्यलिङ्गः शठे व्यालः पुंसि श्वापदसर्पयोः ।

शठः खलः । श्वापदो व्याघ्रः ।

मलोऽस्त्री पापविट्किट्टानि

---

१. 'रं चर्म' घ. छ. ट. पाठः.

पापम् अपुण्यम् । विट् गू(ढं[1]थम्) । किट्टानि स्वेदशिङ्घाणकादीनि ॥

अस्त्री शूलं रुगायुधम् ॥ १९४ ॥

रुक् शूलम् । आयुधं त्रिशूलादि । वेश्यायां तु शूला ॥

शङ्कावपि द्वयोः कीलः

शङ्कुः कीलकः । कफोणिघातज्वालयोस्तु कीलः ॥

पालिः स्त्र्यश्र्यङ्कपङ्क्तिषु ।

अश्रिः कोणः ॥

कला शिल्पे कालभेदेऽपि

चित्रं[2] गीतिचित्रादिनैपुण्यम् (?) । कालभेदो निमेषाणां चत्वारिंशदधिकपञ्चशतानि ॥

आली सख्यावली अपि ॥ १९५ ॥

आवलिः पङ्क्तिः । सेतौ चालिः ॥

अब्ध्यम्बुविकृतौ वेला कालमर्यादयोरपि ।

अब्धेरम्बुविकृतिर्जलवृद्धिः । कालो घटिकादिः । मर्यादा सीमा ॥

बहुलाः कृत्तिका गावो बहुलोऽग्नौ शितौ त्रिषु ॥ १९६

शितिः कृष्णः । गावः स्त्रीगव्यः ।

"कृत्तिकासु स्त्रियां भूम्नि बहुला बहुला गवि ।
एलायां च पुमानग्नौ कृष्णपक्षे शितौ त्रिषु ॥"

इति रभसः ॥

लीला विलासक्रिययोः

केलौ च लीला ॥

उपला शर्करापि च ।

---

१. 'धं' ठ. पाठः. २. 'त्रा' ख. ङ. च. पाठः.

शर्करा खण्डविकारः ॥

"उपलौ रत्नपाषाणावुपला शर्करापि च"

इति रुद्रः ॥

शोणितेऽम्भसि कीलालं

शोणितं रक्तम् ॥

मूलमाद्ये शिफाभयोः ॥१९७॥

आद्यं निजम् ॥

"मूलं निजे शिफायां स्यान्नक्षत्रान्तिकयोरपि"

इत्यजयः ॥

जालं समूह आनायो गवाक्षक्षारकावपि।

आनाये यथा—'जाले पुनर्निपतितः शफरो वराकः' इति। अव्यक्ता कलिका क्षारकः ॥

शीलं स्वभावे सद्वृत्ते

शोभनं वृत्तं सद्वृत्तम् ॥

सस्ये हेतुकृते फलम् ॥ १९८ ॥

सस्यं धान्यादि। हेतुकृते यथा—प्रमाणफलमनुभवः ॥

छदिर्नेत्ररुजोः क्लीबं समूहे पटलं न ना।

छदिः गृहच्छादनम् ॥

अधःस्वरूपयोरस्त्री तलं

अधोर्थे रसातलम्। स्वरूपे करतलम् ॥

स्याच्चामिषे पलम् ॥ १९९ ॥

'पलमुन्मानमांसयोरि'ति रुद्रः ॥

और्वानलेऽपि पातालं

रसातलेऽपि पातालम् ॥

चेलं वस्त्रेऽधमे त्रिषु ।

वस्त्रे क्लीबं चेलम् । अधमे यथा — ब्राह्मणचेली ॥

कुकूलं शङ्कुभिः कीर्णे श्वभ्रे ना तु तुषानले ॥ २०० ॥

शङ्कुकीर्णश्वभ्रं कीलकाकीर्णगर्तः ॥

निर्णीते केवलमिति त्रिलिङ्गं त्वेककृत्स्नयोः ।

निर्णीते केवलं क्लीबम् । यथा —

"केवलं दन्तभङ्गाय दन्तिनः शैलताडनम्" ।

एकस्मिन् यथा — केवलो व्रजति । कृत्स्ने सकले यथा — केवला भिक्षवः ॥

पर्याप्तिक्षेमपुण्येषु कुशलं शिक्षिते त्रिषु ॥ २०१ ॥

पर्याप्तिः सामर्थ्यम् । शिक्षितो निपुणः ॥

प्रवालमङ्कुरेऽप्यस्त्री

"वीणादण्डे प्रवालोऽस्त्री विद्रुमे नवपल्लवे'

इति रभसः ॥

त्रिषु स्थूलं जडेऽपि च ।

जडोऽबुद्धिः । पीवरेऽपि स्थूलम् ॥

करालो दन्तुरे तुङ्गे

दन्तुरमुन्नतावनतम् ॥

चारौ दक्षे च पेशलः ॥ २०२ ॥

चारुर्जन्ममनोहरः ॥

मूर्खेऽर्भकेऽपि बालः स्यात्

मूर्खार्भकावज्ञशिशू । हस्तिघोटकयोर्बालधौ कुन्तले च पुमान् । ह्रीबेरे क्लीबं बालम् ॥

लोलश्चलसतृष्णयोः।

सतृष्णः साकाङ्क्षः। जिह्वालक्ष्म्योस्तु लोला। (शाखी ?)॥

लान्तः।

दवदावौ वनारण्यवह्नी

वनारण्याग्न्योर्दवो दावश्च। बाहुलकात् पचाद्यचि दवः। दुनोतेः 'दुन्योरनुपसर्गे' (३. १. १४२) इति णः। दावः॥

जन्महरौ भवौ॥ २०३॥

जन्म उत्पत्तिः। संसारेऽपि भवः॥

मन्त्री सहायः सचिवौ

सहायः निजः॥

पतिशाखिनरा धवाः।

शाखी शाखिविशेषः॥

अवयः शैलमेषार्काः

अर्को रविः॥

आज्ञाह्वानाध्वरा हवाः॥ २०४॥

आह्वानमाहूतिः। 'हवतेश्चोपसंख्यानमि'ति णः। ह्वावः॥

भावः सत्त्वस्वभावाभिप्रायचेष्टात्मजन्मसु।

सत्त्वे पदार्थे। चेष्टा क्रिया। जन्मनि यथा — बीजादङ्कुरस्य भावः॥

स्यादुत्पादे फले पुष्पे प्रसवो गर्भमोचने॥ २०५॥

उत्पाद उत्पत्तिः। गर्भमोचनं प्रसूतिः॥

अविश्वासेऽपह्नवेऽपि निकृतावपि निह्नवः।

"अविश्वासेऽपलापेऽपि निकृतावपि निह्नवः"

इति रुद्रश्च॥

उत्सेकामर्षयोरिच्छाप्रसरे मह उत्सवः ॥ २०६ ॥

उत्सेकः उद्धतिः । अमर्षोऽक्षमा । इच्छाप्रसर इच्छाया अतिरोहः । मह आनन्दकालः ॥

अनुभावः प्रभावे च सतां च मतिनिश्चये ।

सतां मतेरभिप्रायस्य निश्चये निश्चायके । अनुभावो भावबोधकः । यथा — देवानुभावः । सतामिति किं, चौरस्य प्रभावः ॥

स्याज्जन्महेतुः प्रभवः स्थानं चाद्योपलब्धये ॥ २०७ ॥

जन्मनो हेतुः कारणम् । आद्योपलब्धये प्रथमज्ञानार्थे, स्थानम् । यथा — वाल्मीकिः संस्कृतप्रभवः । हिमालयो गङ्गाप्रभवः ॥

शूद्रायां विप्रतनये शस्त्रे पारशवो मतः ।

ध्रुवो भभेदे क्लीबे तु निश्चिते शाश्वते त्रिषु ॥ २०८ ॥

भभेदे नक्षत्रभेदे ॥

स्वो ज्ञातावात्मनि स्वं त्रिष्वात्मीये स्वोऽस्त्रियां धने ।

ज्ञातौ स्वः पुंसि ॥

स्त्रीकटीवस्त्रबन्धेऽपि नीवी परिपणेऽपि च ॥ २०९ ॥

स्त्रीकटीवस्त्रबन्धो ग्रन्थिः । 'नीवीं प्रति प्रणिहिते तु करे प्रियेण' । परिपणो वणिजां मूलधनम् ॥

शिवा गौरीफेरवयोः

फेरवः सृगालः ॥

द्वन्द्वं कलहयुग्मयोः ।

कलहे युद्धे ॥

द्रव्यासुव्यवसायेषु सत्त्वमस्त्री तु जन्तुषु ॥ २१० ॥

द्रव्ये वस्तुनि। असवः प्राणाः। तथा च निस्सत्त्वो मनुष्यः। सत्त्व-शब्दो द्वितकारवान् ॥

क्लीबं नपुंसके षण्डे वाच्यलिङ्गमविक्रमे।

षण्डः तृतीया प्रकृतिः। अत्र वर्तमानः क्लीबशब्दो नपुंसकलिङ्गः। अविक्रमोऽलसः।

"अस्त्री नपुंसके क्लीबं वाच्यलिङ्गमविक्रमे"

इति तु रुद्रः ॥

वान्तः।

द्वौ विशौ वैश्यमनुजौ

वैश्यो विट् ॥

द्वौ चराभिमरौ स्पशौ ॥ २११ ॥

चरो गूढपुरुषः। अभिमरः सङ्ग्रामः ॥

द्वौ राशी पुञ्जमेषाद्यौ

मेषाद्यो मेषवृषमिथुनप्रभृतिः ॥

द्वौ वंशौ कुलमस्करौ।

मस्करो वेणुः ॥

रहःप्रकाशौ वीकाशौ

प्रकाशः स्फुटः ॥

निर्वेशो भृतिभोगयोः ॥ २१२ ॥

कृतान्ते पुंसि कीनाशः क्षुद्रकर्षकयोस्त्रिषु।

क्षुद्रः कृपणः ॥

पदे लक्ष्ये निमित्तेऽपदेशः स्यात्

पदे व्याजे ॥

कुशमप्सु च ॥ २१३ ॥

दशावस्थानेकविधापि

अनेकविधावस्था बाल्यादिः ।

"दशावस्था(ववस्थायां? दीपवर्त्योः) वस्त्रांशे भूम्नि पुंस्त्रियोः"

इति रभसः ॥

आशा तृष्णापि चायता ।

आयता दीर्घा तृष्णा । दिगप्याशा ॥

वशा स्त्री करिणी च स्याद्

वशा आयत्ता ।

"वशा वन्ध्यगवीयूथ्योरायत्तायोषितोरपि"

इत्यजयः ॥

दृग् ज्ञाने ज्ञातरि त्रिषु ॥ २१४ ॥

ज्ञाने बुद्धौ ॥

स्यात् कर्कशः साहसिकः कठोरामसृणावपि ।

कठोरो दृढो निर्दयश्च । अमसृणो दुस्पर्शश्च ॥

प्रकाशोऽतिप्रसिद्धेऽपि

'प्रकाशः स्फुटरोचिषोः' इत्यजयः । आतपेऽपि प्रकाशः ॥

शिशावज्ञे च बालिशः ॥ २१५ ॥

अज्ञो मूर्खः ॥

शान्तः ।

सुरमत्स्यावनिमिषौ

सुरो देवः ॥

पुरुषावात्ममानवौ।

आत्मा क्षेत्रज्ञः॥

काकमत्स्यात्खगौ ध्वाङ्क्षौ

मत्स्यात्खगः बकः। 'ध्वाङ्क्षौ च (काकवासनौ ? बकवायसौ)' इत्यमरमाला॥

कक्षौ तु तृणवीरुधौ॥ २१६॥

वीरुत् लता॥

अभीषुः प्रग्रहे रश्मौ

प्रग्रहोऽश्वादीनां मुखरज्जुः। रश्मिः किरणः। हरिप्रबोधयमकात् तालव्यान्तोऽप्यभीशुः॥

प्रैषः प्रेषणमर्दने।

मर्दनं पीडा। 'प्रैषः प्रेषणपीडयोः' इत्यजयः॥

पक्षः सहायेऽपि

पञ्चदशदिनात्मकेऽपि काले पक्षः॥

उष्णीषं शिरोवेष्टकिरीटयोः॥ २१७॥

शिरोवेष्टो वस्त्रादिमयः॥

शुक्ले मूषिके श्रेष्ठे सुकृते वृषभे वृषः।

शुक्लो बहुलशुक्रः॥

कोषोऽस्त्री कुड्मले खड्गपिधानेऽर्थौघदिव्ययोः॥२१८॥

अर्थौघो धनसमूहः॥

द्यूतेऽक्षे शारिफलकेऽप्याकर्षः

अक्षः पाशकः॥

१. 'न्रा' अ. पाठः.

अथाक्षमिन्द्रिये ।

ना द्यूताङ्गे कर्षे चक्रे व्यवहारे कलिद्रुमे ॥ २१९ ॥

द्यूताङ्गे पाशकादौ । व्यवहारे यथा — प्राड्विवाकाक्षदर्शकौ । कलिद्रुमो विभीतकः ॥

कर्षूर्वार्ता करीषाग्निः कर्षूः कुल्याभिधायिनी ।

कुल्याभिधायिनी नद्यभिधायिनी ।

"करीषाग्नौ पुमान् कर्षूः कुल्यायामपि च स्त्रियाम्"

इति रभसः ॥

पुंभावे तत्क्रियायां च पौरुषं

पुरुषस्य भावे पुरुषस्य क्रियायां च ।

"उर्ध्वविस्तृतदोःपाणिनृमाने पौरुषं त्रिषु ।
भावे कर्मणि च क्लीबं पुरुषस्य च तेजसि" ॥

विषमप्सु च ॥ २२० ॥

"स्त्री विषातिविषायां स्यात् क्लीबे क्ष्वेडे जलेऽपि च" ॥

उपादानेऽप्यामिषं स्याद्

उत्कोचादिकेषूपादानम् । मत्स्येऽप्यामिषम् ॥

अपराधेऽपि किल्बिषम् ।

स्याद् वृष्टौ लोकधात्र्यंशे वत्सरे वर्षमस्त्रियाम् ॥ २२१ ॥

लोकधात्र्यंशो भारतवर्षादिः ।

"पुन्नपुंसकयोर्वर्षं जम्बूद्वीपाब्दवृष्टिषु"

इति रुद्रः ॥

प्रेक्षा नृत्येक्षणं प्रज्ञा

नृत्तस्येक्षणं वीक्षणम् । प्रज्ञा धीः ॥

भिक्षा सेवार्थना भृतिः।

अर्थना याच्ञा ॥

त्विट् शोभापि

'कान्तौ वाचि रुचौ त्विट् स्त्री' इति रभसः ॥

त्रिषु परे

परे षान्तास्त्रिषु ।

न्यक्षं कार्त्स्न्यनिकृष्टयोः ॥

कार्त्स्न्यं साकल्यम् । निकृष्टोऽधमः । 'न्यक्षौ कार्त्स्न्यनिकृष्टावि'त्यमरमाला ॥

प्रत्यक्षेऽधिकृतेऽध्यक्षः

अधिकृतो ग्रामादिष्वधिकृतः ॥

रूक्षस्त्वप्रेम्ण्यचिक्कणे।

अप्रेम्णि प्रेमशून्ये ॥

षान्तः।

रविश्वेतच्छदौ हंसौ

श्वेतच्छदो हंसः ॥

सूर्यवह्नी विभावसू ॥ २२३ ॥

वह्निः अग्निः ॥

वत्सौ तर्णकवर्षौ द्वौ

तर्णको गोपोतः । वर्षो वत्सरः ॥

सारङ्गाश्च दिवौकसः।

सारङ्गाश्चातकाः । देवाश्च दिवौकसः ॥

शृङ्गारादौ विषे वीर्ये गुणे रागे द्रवे रसः ॥ २२४ ॥

शृङ्गारादयो नव नाट्यरसाः । विषं क्ष्वेडं जलं च । वीर्यं पारतः । गुणे तिक्तादौ । रागो रक्तिः ॥

पुंस्युत्तंसावतंसौ द्वौ कर्णपूरे च शेखरे ।

"शेखरे कर्णपूरेऽस्त्री स्यादुत्तंसोऽवतंसवत्"

इति रुद्रः ॥

देवभेदेऽनले रश्मौ वसू रत्ने धने वसु ॥ २२५ ॥

रश्मिः प्रग्रहः किरणं च । रत्नधनयोः क्लीबं वसु ॥

विष्णौ च वेधाः

ब्रह्मणि पण्डिते च वेधाः ॥

स्त्री त्वाशीर्हिताशंसाहिदंष्ट्रयोः ।

हिताशंसा अभीष्टाशंसनम् ॥

लालसे प्रार्थनौत्सुक्ये

"तृष्णातिरेके वाञ्छायामौत्सुक्ये लालसा द्वयोः"

इति रुद्रः ॥

हिंसा चौर्यादिकर्म च ॥ २२६ ॥

आदिना त्रासनबन्धनादिविधेऽपि हिंसा ॥

प्रसूरश्वापि

अश्वा बडवा । माता च प्रसूः ॥

भूद्यावौ रोदस्यौ रोदसी च ते ।

भूद्यावौ सहिते विगृहीते च रोदसीरोदःशब्दयोर्वाच्ये । तथाचाजयः—

"रोदसी रोदसा सार्धं पृथ्वीस्वर्गे दिवि क्षिताविती"

ज्वालाभान्वोर्न पुंस्यर्चिः

मयूखो भानुः ॥

ज्योतिर्भद्योतदृष्टिषु ॥ २२७ ॥

"ज्योतिर्ना भास्करेऽग्नौ च क्लीबं भद्योतदृष्टिषु"

इति रुद्रः ॥

पापापराधयोरागः

आगः क्लीबम् ॥

खगबाल्यादिनोर्वयः ।

खगः पक्षी । बाल्यादि यौवनादि ॥

तेजःपुरीषयोर्वर्चः

वर्चः क्लीबम् ॥

महस्तूत्सवतेजसोः ॥ २२८ ॥

तेजो रश्मिः ॥

रजो गुणे च स्त्रीपुष्पे

गुणः रज इति ख्यातः आत्मगुणः । स्त्रीपुष्पम् आर्तवम् ॥

राहौ ध्वान्ते गुणे तमः

गुणे तमआख्ये आत्मगुणे ॥

छन्दः पद्येऽभिलाषे च

अभिलाष इच्छा । वेदेऽपि छन्दः ॥

तपः कृच्छ्रादिकर्म च ॥ २२९ ॥

सान्तपनादिकं कृच्छ्रं व्रतम् । धर्मेऽपि तपः । शिशिरर्तुमाघयोस्तु पुमान् ॥

सहो बलं सहा मार्गः

सहो बलम् । मार्गे सहाः पुमान् ॥

नभः खं श्रावणो नभाः ।

खमाकाशम् ॥

ओकः सद्माश्रयश्चौकाः

आश्रय इत्याश्रयमात्रम् ॥

पयः क्षीरं पयोऽम्बु च ॥२३०॥

क्षीरं दुग्धम् ॥

ओजो दीप्तौ बले

अवष्टम्भेऽप्योजः ॥

स्रोत इन्द्रिये निम्नगारये ।

*इन्द्रिये ॥

तेजः प्रभावे दीप्तौ च बले शुक्रेऽपि

बलं पराक्रमः ॥

अतस्त्रिषु ॥२३१॥

अतः परे सान्तास्त्रिषु ॥

विद्वान् विदंश्च

विदन् प्राज्ञः । आत्मवित्पण्डितयोरपि विद्वान् ॥

बीभत्सो हिंस्रोऽपि

हिंस्रो हिंसाशीलः ।

"बीभत्सो विकृते पार्थे क्रूरे पापिघृणात्मनोः"

इत्यजयः ॥

---

* 'इन्द्रि ... न्द्रिये' इति ग. च. ज. पुस्तकेषु सान्तरः पाठो दृश्यते । अत इन्द्रिये इन्द्रिये इति पाठः सम्भाव्यते ।

अतिशये त्वमी ।

अमी सान्तपर्यन्ता अतिशये वर्तन्ते । सर्वे स्त्रियां वच्यन्ताः ॥

वृद्धप्रशस्ययोर्ज्यायान्

अतिशयवृद्धेऽतिशयप्रशस्ते ज्यायान् ॥

कनीयांस्तु युवाल्पयोः ॥ २३२ ॥

अत्यर्थतरुणाल्पयोः कनीयान् ॥

वरीयांस्तूरुवरयोः

अतिमहति अतिश्रेष्ठे च वरीयान् ॥

साधीयान् साधुबाढयोः ।

अत्यर्थशोभने अत्यर्थगाढे च साधीयान्

सान्तः ।

दलेऽपि बर्हं

दलं पत्रम् । मयूरपिञ्छोऽपि बर्हम् ॥

निर्बन्धोपरागार्कादयो [illegible]

निर्बन्धो बालग्रहः । सूर्याचन्द्रमसो राहुग्रसनमुपरागः । आदिना चन्द्रादयोऽष्टौ ॥

द्वार्यापीडे क्वाथरसे निर्यूहो नागदन्तके ।

द्वारि द्वारे । आपीडः शेखरः । क्वाथरसे घने द्रव्यनिर्यासे । आलम्बनार्थं गेहादिभित्तिनिर्गतं काष्ठद्वयं नागदन्तकः ॥

तुलासूत्रेऽश्वादिरश्मौ प्रग्राहः प्रग्रहोऽपि च ॥ २३४ ॥

वणिजां तुलादण्डस्य सूत्रे । अश्ववृषादीनां रश्मौ योक्त्रे । प्रग्रहोऽप्येतयोः ॥

पत्नीपरिजनादानमूलशापाः परिग्रहाः ।

आदानं स्वीकारः । शापः शपथः ॥

दारेषु च गृहाः

गृहेऽपि गृहाः पुंसि ॥

श्रोण्यामप्यारोहो वरस्त्रियाः ॥ २३५ ॥

"हस्त्यारोहे द्रुमाङ्के च वरारोहाकटावपि ।
आरोहणेऽपि चारोहो दीर्घत्वेऽपि समुच्छ्रये" ॥

व्यूहो वृन्देऽपि

बलविन्यासे व्यूहः ॥

अहिर्वृत्रेऽपि

वृत्रे वृत्रासुरे । सर्पेऽप्यहिः ॥

अग्नीन्द्वर्कास्तमोपहाः ।

अर्को रविः ॥

परिच्छदे नृपार्हेऽर्थे परिबर्हः

नृपार्होऽर्थः सितच्छत्रादिः ॥

हान्तः ।

अव्ययाः परे ॥ २३६ ॥

परेऽनेकार्था अव्यया उच्यन्ते ॥

आङीषदर्थेऽभिव्याप्तौ सीमार्थे धातुयोगजे ।

आङित्यव्ययो ङकारानुबन्धवान् । ईषदर्थे— आपिङ्गलः । अभिव्याप्तौ—आजन्म ब्रह्मचारी । सीमार्थे — आ उदकान्तात् (न?) प्रोषन्तं प्रियमनु व्रजेत् । धातुयोजे क्रियायोगज इत्यर्थः । यथा — आहरति ॥

आ प्रगृह्यः स्मृतौ वाक्येऽपि

आ इत्यङित्। स च 'निपात एकाजनाङ्' (१. १. १४) इति प्रगृह्यसंज्ञकः। स्मृतौ — आ ज्ञातं स जटायुरेष इति। वाक्ये — आ एवं मन्यसे इति। एवं मन्यस इत्यर्थः॥

आस्तु स्यात् कोपपीडयोः॥ २३७॥

सविसर्ग आः कोपपीडयोः॥

पापकुत्सेषदर्थे कु

पापे — कुब्राह्मणः। कुत्सायां — कुदानमप्रीतिकरम्। कुशब्दस्येषदर्थस्य कादेशे कोष्णम्॥

धिङ् निर्भर्त्सननिन्दयोः।

अपकारैर्भयोत्पादनं निर्भर्त्सनम्॥

चान्वाचयसमाहारेतरेतरसमुच्चये॥ २३८॥

एकस्य यत्र प्राधान्येन विधानमपरस्य तदनुष्ठानाविरोधितया, सोऽन्वाचयः। यथा — भिक्षामट गाश्चानय। समाहारे — शुष्मिणीं हरीतकीं चाद्धि। इतरेतरे — माता पिता च जयतः। समुच्चये — योगिने रोगिणे च दद्यात्॥

स्वस्त्याशीःक्षेमपुण्यादौ

आशीः आशीर्वादः। स्वस्ति ते भूयात्। क्षेमे — 'नि(सृत्य? वर्त्य) मां स्वस्ति गताः स्वयूथ्याः'। पुण्यं पापक्षालनम्। आदिना मङ्गलादौ॥

प्रकर्षे लङ्घनेऽप्यति।

प्रकर्षो नितान्तम्। लङ्घनमतिक्रमणम्। अपिना प्रशंसायामपि॥

स्वित् प्रश्ने च वितर्के च

वितर्को विकल्पः॥

तु स्याद् भेदेऽवधारणे॥ २३९॥

भेदः पृथक्करणम्॥

---

१. 'चाभक्षम्।' क. ख. ग. घ. ङ. च. छ. ञ. ट. पाठः.

सकृत् सहैकवारे चापि

सकृद् दन्त्यादिः ॥

आराद् दूरसमीपयोः ।

आराद् ग्रामः, शनैर्गच्छ ॥

प्रतीच्यां चरमे पश्चाद्

प्रतीच्यां पश्चिमायां दिशि । यथा — पश्चादागतः । चरमे — 'आरोपितं यद् गिरिशेन पश्चात्' । कुमारोत्पत्तिकालादित्यर्थः ॥

उताप्यर्थविकल्पयोः ॥ २४० ॥

'उत बाढविकल्पयोरि'त्यजयः ॥

पुनःसहार्थयोः शश्वत्

शश्वत् तालव्यः ॥

साक्षात् प्रत्यक्षतुल्ययोः ।

साक्षाद् दन्त्यादिः ॥

खेदानुकम्पासन्तोषविस्मयामन्त्रणे बत ॥ २४१ ॥

आमन्त्रणे — एहि बत ॥

हन्त हर्षेऽनुकम्पायां वाक्यारम्भविषादयोः ।

वाक्यारम्भे — हन्त वदामि त्वाम् ॥

प्रति प्रतिनिधौ वीप्सालक्षणादौ प्रयोगतः ॥ २४२ ॥

मुख्यसदृशः प्रतिनिधिः । यथा — विष्णुरर्जुनतः प्रति । सदृश इत्यर्थः । (प्रा ? व्या)प्तुमिच्छा वीप्सा । वृक्षं वृक्षं प्रति । लक्षणे — वृक्षं प्रति विद्योतते विद्युत् । आदिना इत्थम्भूताख्यानभागप्रतिदानस्तोकेषु । कञ्चित् प्रकारमापन्न इत्थंभूतः, तस्याख्याने — साधुर्देवदत्तो मातरं प्रति । भागे — यदत्र मां प्रति स्यात् । गृहीतस्य प्रत्यर्पणं प्रतिदानम् । तिलेभ्यः प्रति माषान् प्रयच्छति । स्तोके — अन्नं प्रति । शाकं प्रति । प्रयोगत इति शिष्टप्रयोगानुसारतः ॥

इति हेतुप्रकरणप्रकाशादिसमाप्तिषु।

हेतौ — हस्तीति पलायते। प्रकरणं प्रक्रमः प्रस्ताव इति पर्यायाः। यथा — इति वृत्तान्तः। एषोऽयं प्रस्ताव इत्यर्थः। प्रकाशे — इति पाणिनेर्यशः। प्रकटमित्यर्थः। आदौ — 'शमित्यष्टाभ्यो घिनुण्' । (३.२.१४१) समाप्तौ — हलिति प्रत्याहारः॥

प्राच्यां पुरस्तात् प्रथमे पुरार्थेऽग्रत इत्यपि॥ २४३॥

चतुर्षु पुरस्तात्॥

यावत् तावच्च साकल्येऽवधौ मानेऽवधारणे।

यावत्तावच्छब्दौ चतुर्षु॥

मङ्गलानन्तरारम्भप्रश्नकात्स्न्येष्वथो अथ॥२४४॥

अथोअथशब्दौ पञ्चसु॥

वृथा निरर्थकाविध्योः

अविधौ यथा — 'वृथावाक्यं च वर्जयेत्'॥

नानानेकोभयार्थयोः।

अनेकार्थे बहुलप्रकारे॥

नु पृच्छायां विकल्पे च

पृच्छा प्रश्नः॥

पश्चात्सादृश्ययोरनु॥ २४५॥

पश्चादर्थे — अनु रथं गच्छ। सादृश्ये — मातरमनुकरोति॥

प्रश्नावधारणानुज्ञानुनयामन्त्रणे ननु।

अवधारणमेवार्थः। अनुनयः सान्त्वनम्॥

गर्हासमुच्चयप्रश्नशङ्कासंभावनास्वपि॥ २४६॥

पवर्गीयपकारवानयमपिशब्दः। गर्हा निन्दा॥

उपमायां विकल्पे वा

उपमायां — शुक्तौ वा रजताकारः॥

सामि त्वर्धे जुगुप्सिते ।

अर्धे — सामि भुक्तम् ॥

अमा सह समीपे च

समीपम् अन्तिकम् ॥

कं वारिणि च मूर्धनि ॥ २४७ ॥

'कं शिरस्सुखतोयेष्वि'त्यजयः ॥

इवेत्थमर्थयोरेवं

इवार्थ औपम्यम् । इत्थंशब्दार्थः प्रकारः । 'एवंप्रकार औपम्य' इत्यजयः ॥

नूनं तर्केऽर्थनिश्चये ।

तर्के ऊहे । अर्थनिश्चये — 'नूनं साहसिकेन चूतमुकुले दृष्टिः समारोपिता' ॥

तूष्णीमर्थे सुखे जोषं

तूष्णीमर्थो मौनम् । 'जोषं तूष्णीं सुखेऽव्ययमि'ति स्ववर्गादावजयः ॥

किं पृच्छायां जुगुप्सने ॥ २४८ ॥

जुगुप्सायां — स किंराजा, यो न रक्षति ॥

नाम प्राकाश्यसंभाव्यक्रोधोपगमकुत्सने ।

पञ्चसु नाम । प्राकाश्ये — 'राजाभूच्छूद्रको नाम' । सम्भाव्ये — अपीह भविष्यति सीता नाम । क्रोधे — किन्नाम शकुनः । उपगमः स्वीकारः । अस्तु नाम धनी, किञ्चिद् ददाति । कुत्सने — स्नानेऽपि नाम पुण्यम् ॥

अलं भूषणपर्याप्तिशक्तिवारणवाचकम् ॥ २४९ ॥

भूषणे — कन्यामलङ्करोति । पर्याप्तिः पूर्णता । यथा — अलं भुक्तवान् । शक्तौ — अलं मल्लो मल्लाय । वारणे — अलं बाले ! रुदित्वा । निरर्थकेऽप्यलम् ॥

हुं वितर्के परिप्रश्ने

अनुमतौ च हुम् ॥

समयान्तिकमध्ययोः।

अन्तिके निकटे ॥

पुनरप्रथमे भेदे

अप्रथमे — पुनर्ददाति । भेदे — भ्रातृषु पुनर्दीर्घो भवान् ॥

निर्निश्चयनिषेधयोः ॥ २५० ॥

निश्चये — निरुक्तम् ॥

स्यात् प्रबन्धे चिरातीते निकटागामिके पुरा।

प्रबन्धो वाक्यरचना पुराणादिः, चिरन्तन इति यावत् । अतीतं भूतम् । निकटः सन्निहितः । आगामिनि अनागते ॥

ऊरर्यूरी चोररी च विस्तारेऽङ्गीकृतौ त्रयम् ॥ २५१ ॥

ऊ(र)र्यादित्रयं विस्तारेऽङ्गीकारे च ॥

स्वर्गे परे च लोके स्वर्

परे चेति लोकविशेषणम् । व्योम्नि च स्वः ॥

वार्तासंभाव्ययोः किल।

वार्तायाम् — एवं किल राजाभवत् । संभाव्ये — स ते किल दास्यति ॥

निषेधवाक्यालङ्कारे जिज्ञासानुनये खलु ॥ २५२ ॥

निषेधे — किं खलु रुषित्वा । वाक्यालङ्कारे — अथ खलु स[1] भवान् विस्तीर्णां परिषदमामन्त्रयते स्म । जिज्ञासायां — किं खलु जानासि । सान्त्वने — देहि खलु प्रतिवचनम् ॥

समीपोभयतःशीघ्रसाकल्याभिमुखेऽभितः।

साकल्ये — अभितो वनं दग्धम् ॥

---

१. 'न' क. पाठः.

नामप्राकाश्ययोः प्रादुः

नामशब्दार्थे प्रादुः । अनादरणीयं केचिज्जन्म वर्णयन्ति । प्रादुर्भूतानि सौधे तृणानि । प्राकाश्ये — प्रादुर्भवन्ति निशि तारकाः ॥

मिथोऽन्योन्यं रहस्यपि ॥ २५३ ॥

रहसि विजने ॥

तिरोऽन्तर्धौ तिर्यगर्थे

तिर्यगर्थे — तिरः कृत्वा का(ण्डः?ण्डं) गतः ॥

हा विषादशुगार्तिषु ।

खेदशोकदुःखेषु हा ॥

अहहेत्यद्भुते खेदे

अद्भुते विस्मये — अहह कथं जानासि । खेदे — अहह विधेरपुण्यता ॥

हि हेताववधारणे ॥ २५४ ॥

हेतुः कारणम् । विशेषेऽपि हिः । दीर्घान्तस्तु ड़ःखहेतौ ॥

इति वन्द्यघटीयश्रीसर्वानन्दकृतौ टीकासर्वस्वे
अनेकार्थवर्गः ।

अथाव्ययवर्गः ।

चिरायचिररात्रायचिरस्याद्याश्चिरार्थकाः ।

चिरायेत्यादयस्त्रयो दीर्घकालवाचकाः । आदिना चिरं चिरेण चिरात्त्यादि ॥

मुहुः पुनःपुनः शश्वदभीक्ष्णमसकृत् समाः ॥ १ ॥

मुहुःपञ्चकमसकृदर्थे पौनःपुन्ये ॥

स्राग् झटित्यञ्जसाह्नाय द्राङ् मङ्क्षु सपदि द्रुते।

स्रागादयः (पञ्च? सप्त) द्रुते शीघ्रे। मङ्क्षुशब्द ओष्ठ्यादिरनुस्वारवानुकारान्तः। स्राग् दन्त्यसः॥

बलवत् सुष्ठु किमुत स्वत्यतीव च निर्भरे॥ २॥

बलवत्षट्कं निर्भरे अतिशये। किमुत समस्तम्॥

पृथग् विनान्तरेणर्ते हिरुङ् नाना च वर्जने।

पृथक्षट्कं वर्जने वियोगे। विनञ्भ्यां नानाञौ प्रत्ययौ। विना नाना। मध्यार्थवाच(कम?को)ऽप्यन्तरेणशब्दः। मध्यार्थे सामीप्ये च हिरुक्॥

यत् तद् यतस्ततो हेतौ

यदादिचतुष्टयं हेतौ॥

असाकल्ये तु चिच्चन॥ ३॥

चिदादिद्वयमसाकल्ये। यथा — किञ्चित् किञ्चन॥

कदाचिज्जातु

कदाचिद्द्वयं कदाचिदर्थे। जातु चवर्गीयतृतीयादि॥

सार्धं तु साकं सत्रा समं सह।

सार्धपञ्चकं सहार्थे। सजूश्शब्दोऽप्यत्र॥

आनुकूल्यार्थकं प्राध्वं

प्राध्वंशब्द आनुकूल्ये। नम्रेऽपि प्राध्वम्॥

व्यर्थके तु मुधा वृथा॥ ४॥

मुधाद्वयं व्यर्थके निष्फले॥

आहो उताहो किमुत विकल्पे किं किमूत च।

आहोषट्कं विकल्पे वितर्के॥

"दृष्ट आहो उताहो च विकल्पार्थे प्रयोक्तृभिः"

इति भागुरिः । एवं दीर्घादिः ॥

"ईश्वरेऽधिकृतेऽपि स्याद् विकल्पे विस्मयेऽप्यहो"

इति रुद्रो ह्रस्वं पठति । उताहो किमुतेति च समस्तम् । किं किमु उत इति शब्दत्रयम् । उत ह्रस्वादि ॥

तु हि च स्म ह वै पादपूरणे

तुषट्कं श्लोकपादपूरणे ॥

पूजने स्वती ॥ ५ ॥

सुशब्दोऽतिशब्दश्च पूजने ॥

दिवाह्नीति

दिवाशब्दोऽह्नि दिने ॥

अथ दोषा च नक्तं च रजनाविति ।

अह्नीति रजनावितीतिशब्दाभ्यां दिवादोषादीनामधिकरणप्रधानतां दर्शयति । रजनौ रात्रौ दोषाद्वयम् ॥

तिर्यगर्थे साचि तिरोऽपि

तिर्यगर्थे वक्रार्थे साचिद्वयम् । 'साचि स्त्रियामि'ति तु रत्नकोषः ॥

अथ सम्बोधनार्थकाः ॥ ६ ॥

स्युः प्याट् पाडङ्ग हे है भोः

प्याट्षट्कं संबोधने । प्याट् पाट् पवर्गीयादी । अङ्ग इतिच्छेदः ॥

समया निकषा हिरुक् ।

समयात्रयं मध्ये । तथाच विश्वप्रकाशः—'समयान्तिकमध्ययोरि'ति।

"निकषा त्वन्तिके मध्ये रक्षोवाची त्वनव्ययम्"

इति । निकटे त्रयमिदमिति केचित् । तदयुक्तम् । निकषान्तिक इति वक्ष्यमाणेन पुनरुक्तेः । समयान्तिकमध्ययोरिति पुनरुक्तिर्न दोषः ।

"भूरिप्रयोगा ये येषु पर्यायेष्वपि तेषु ते"

इत्यनेन परिहृतत्वात् ॥

अतर्किते तु सहसा

अतर्कितेऽनालोचिते सहसा ॥

स्यात् पुरः पुरतोऽग्रतः ॥ ७ ॥

पुरस्त्रयम् अग्रत इत्यर्थे । 'पूर्वाधरावराणामसि पुरधवश्चैषाम्' (५. **१.** ३९) इति असि पुरादेशश्च । पुरः । परतो निरुकारः शब्द इत्यन्यः ॥

स्वाहा देवहविर्दाने श्रौषट् वौषट् वषट् स्वधा ।

देवहविर्दाने स्वाहापञ्चकम् । पितृहविर्दानेऽपि स्वधा ॥

किञ्चिदीषन्मनागल्पे

किञ्चित्त्रयमल्पेऽणौ ॥

प्रेत्यामुत्र भवान्तरे ॥ ८ ॥

भवान्तरे जन्मान्तरे प्रेत्यद्वयम् । प्रेत्यशब्दोऽदन्तः(?) ॥

वद् वा यथा तथैवैवं साम्ये

वदादिषट्कं साम्ये सादृश्ये । अग्निवदयं वटुः ॥

अहो ही च विस्मये ।

अहोद्वयं विस्मये । अहो हस्वादि । प्रमादेऽपि ही ॥

मौने तु तूष्णीं तूष्णीकाम्

तूष्णीमादिद्वयं मौने । 'अकच्प्रकरणे तूष्णीमः काम्प्रत्ययो वक्तव्यः' (५. ३. ७२) इति काम्प्रत्ययः । मकारो 'मिदचोऽन्त्यात् परः' (**१. १.** ४७) इति विशेषणार्थः । तूष्णीकाम् ॥

---

१. 'वादि' क, ख. ठ. पाठः.

सद्यः सपदि तत्क्षणे ॥ ९ ॥

सद्योद्वयं (क्ष ? तत्क्ष)णे । 'सद्यःपरुद्—' (५. ३. २२) इत्यादिसूत्रे सद्यो निपातितः । अहन्यभिधेये द्यस्प्रत्ययः प्रकृतेश्च सभावः । समाने अहनि सद्यः ॥

दिष्ट्या शमुपजोषं चेत्यानन्दे

आनन्दे चित्तानन्दे दिष्ट्यात्रयम् । शं तालव्यादि । शुभसन्तोषशब्दावप्यत्र ॥

अथान्तरेऽन्तरा ।

अन्तरेण च मध्ये स्युः

अन्त(स्त्र ? रेत्र)यं मध्ये ॥

प्रसह्य तु हठार्थकम् ॥ १० ॥

हठार्थकं बलात्कारार्थकम् ॥

युक्ते द्वे साम्प्रतं स्थाने

युक्ते उचिते साम्प्रतद्वयम् ॥

अभीक्ष्णं शश्वदनारते ।

अभीक्ष्णमादिद्वयमनारते सतते ॥

अभावे नह्य नो नापि

नहिचतुष्टयमभावे । नहि समस्तम् । नहिशब्दात् परः अकारः । यथा — नहि स्थूलम् । अस्थूलः । नो जागर्ति । न जागर्ति ।

"नहि नोऽना न मा मास्म प्रतिषेधे प्रकीर्तिताः"

इति त्रिकाण्डम् । अपिशब्देन अनशब्दस्य ग्रहणम्[1] । तथाच शृङ्गारप्रकाशः — 'अनोपमा ते बुद्धिरि'[2]ति ॥

मास्मं मालं च वारणे ॥ ११ ॥

मास्मत्रयं वारणे निषेधे ॥

---

१. 'णम् । अ', २. 'ति शृङ्गारप्रकाशे ॥' ठ. पाठः.

पक्षान्तरे चेद् यदि च

चेदादिद्वयं पक्षान्तरे ॥

तत्त्वे त्वद्धाञ्जसा द्वयम् ।

अद्धाद्वयं तत्त्वे सत्ये । 'रवा बद्धा' इति कप्फिणाभ्युदये भाषासमावेशः । तत्र प्राकृतपक्षे रवाः शब्दाः बद्धाः संयताः । बन्ध बन्धने क्तः । संस्कृते तु रवौ सूर्ये अद्धा तत्त्वमिति प(रि ? द)च्छेदः । अञ्जसाशब्दो दन्त्यसकारवान् ॥

प्राकाश्ये प्रादुराविः स्याद्

प्राकाश्ये स्फुटत्वे प्रादुरादिद्वयम् ॥

ओमेवं परमं मते ॥ १२ ॥

मतेऽनुमते ओमादित्रयम् ।

"अव्ययं स्यादनुज्ञाने परमं परमः परे"

इति रुद्रः ॥

समन्ततस्तु परितः सर्वतो विष्वगित्यपि ।

समन्ततआदिचतुष्टयं सर्वत इत्यर्थे । समन्तादित्यप्यत्र ॥

अकामानुमतौ कामम्

अकामानुमतौ अनिच्छयानुमतौ कामम् । अथवा आकामानुमताविति दीर्घोऽयमाकारः, न नञ् । तेन निकामानुमतौ काममित्यर्थः । तथाच त्रिकाण्डे—'कामं कामाभ्यनुज्ञायामि'ति ॥

असूयोपगमेऽस्तु च ॥ १३ ॥

असूयापूर्वके उपगमे अस्तु । यथा—अस्तु नाम शूरः, तथापि जेष्यामि ।

"असूयायामनुज्ञाने पीडायामस्तु दृश्यते"

इति रुद्रः ॥

ननुच स्यात् विरोधोक्तौ

ननुचेति समस्तं विरोधोक्तौ ॥

कच्चित् कामप्रवेदने ।

कामप्रवेदने इच्छाया आख्याने कच्चित् ॥

निःषमं दुःषमं गर्ह्ये

निःषमद्वयं गर्ह्ये । 'सुविनिर्दुर्भ्यः—' (८. ३. ८८) इति मूर्धन्यषत्वम् ॥

यथास्वं तु यथायथम् ॥ १४ ॥

यो य आत्मा यश्चात्मीयः तत्र यथास्वमादिद्वयम् । यथास्वमिति वीप्सायामव्ययीभावः । स्वशब्दोऽत्रात्मीयवचनः आत्मवचनश्च । 'यथास्वे यथायथम्'(८. १. १४) इति यथायथं निपातितम् ॥

मृषा मिथ्या च वितथे

वितथेऽसत्ये मृषाद्वयम् ॥

यथार्थं तु यथातथम् ।

यथार्थद्वयं सत्ये ॥

स्युरेव तु पुनर्वै वेत्यवधारणवाचकाः ॥ १५ ॥

एवादयः पञ्चावधारणे । चकारोऽयमन्त इति रुद्रः । वाकार इत्यन्यः ॥

प्रागतीतार्थकं

अतीतार्थे प्राक् ॥

नूनमवश्यं निश्चये द्वयम् ।

---

१. 'व' ख. घ. ङ. च. छ. ठ. पाठः.

नूनमादिद्वयं निश्चये ॥

संवद् वर्षे

वर्षे वत्सरे उक्तः ॥

अवरे त्ववार्ग्

अर्वागवरे । यथा — अर्वाक् तीरम् ॥

आमेवं

आमित्येवंशब्दार्थे ज्ञानावधारणे । 'आं ज्ञाननिश्चये' इति हि वोपालितः ॥

स्वयमात्मना ॥ १६ ॥

आत्मनेत्यस्यार्थे स्वयम् ॥

अल्पे नीचैः

दैर्घ्येणाल्पे नीचैः ॥

महत्युच्चैः

दीर्घत्वेन महति उच्चैः ॥

प्रायो भूम्नि

भूम्नि बाहुल्ये प्रायः ॥

अद्रुते शनैः ।

अशीघ्रे शनैः ॥

सना नित्ये

सना नित्ये । सदाशब्दोऽप्यत्र ॥

बहिर्बाह्ये

बाह्ये बहिः ॥

स्मातीते

स्मशब्दोऽतीते ॥

अस्तमदर्शने ॥ १७ ॥

अदर्शनेऽस्तम् ॥

अस्ति सत्त्वे

सत्त्वे विद्यमाने अस्ति ॥

रुषोक्तावू

रुषोक्तौ रोषे । ऊ इति दीर्घादिः ॥

उं प्रश्ने

प्रश्ने पृच्छायाम् । उं ह्रस्वादिः ॥

अनुनये त्वयि ।

अनुनये सान्त्वने अयि । यरलवीययकारः ॥

हुं तर्के स्याद्

तर्के वितर्के हुम् ॥

उषा रात्रेरवसाने

रात्र्यन्ते उषा ॥

नमो नतौ ॥ १८ ॥

नतौ प्रणामे नमः ॥

पुनरर्थेऽङ्ग

अङ्ग पुनरर्थे ॥

निन्दायां दुष्ठु

दुष्ठु निन्दायाम् ॥

सुष्ठु प्रशंसने ।

सुष्ठु प्रशंसायाम् ॥

सायं साये

साये दिनान्ते सायम् ॥

प्रगे प्रातः प्रभाते

प्रगेप्रातःशब्दौ प्रभाते । प्रातःशब्दो रेफान्तः ॥

निकषान्तिके ॥ १९ ॥

अन्तिके समीपे निकषा ॥

परुत् परार्यैषमोऽब्दे पूर्वे पूर्वतरे यति ।

पूर्वे अब्दे वर्षे परुत् । पूर्वतरे अब्दे वर्षे परारि । यति गच्छति, वर्तमाने अब्दे वर्षे इति यावत् । ऐषमः मूर्धन्यषः । शब्दत्रयं 'सद्यः-परुद्—' (५. ३. २२) इत्यादिसूत्रेण निपातितम् । पूर्वपूर्वतरयोः परभावः उदारिच्प्रत्ययौ, इदम ऐभावः समसण्प्रत्ययश्च निपात्यन्ते ॥

अद्यात्राह्नि

अत्रास्मिन्नहानि अद्यशब्दः ॥

अथ पूर्वेऽह्नीत्यादौ पूर्वोत्तरापरात् ॥ २० ॥

तथाधरान्यान्यतरेतरात् पूर्वेद्युरादयः ।

पूर्वेऽह्नीत्यादिशब्देन उत्तरेऽह्नीत्यादीनां षण्णां ग्रहणम् । पूर्वेद्युरादय इत्यादिशब्देन उत्तरेद्युःप्रभृतीनां षण्णां ग्रहणम् । तद् यथा —पूर्वस्मिन्नहनि पूर्वेद्युः । उत्तरस्मिन्नहनि उत्तरेद्युः । अपरस्मिन्नहनि अपरेद्युः । अधरास्मिन्नहनि अधरेद्युः । अन्यस्मिन्नहनि अन्येद्युः । अन्यतरास्मिन्नहनि अन्यतरेद्युः । इतरास्मिन्नहनि इतरेद्युः । एते सद्यःपरुदादिना निपातिताः । तत्र पूर्वादिशब्देभ्य एद्युस्प्रत्ययः ॥

उभयद्युश्चोभयेद्युः

उभयस्मिन्नहनि उभयद्युद्वयम् । 'द्युश्चोभयाद् वक्तव्यः' (वा० ५. ३. २२) इति द्युः । उभयद्युः । सद्यःपरुदादिसूत्रेणैव उभयेद्युर्निपातितः । उभयशब्दादेद्युस् निपात्यते ॥

परे त्वह्नि परेद्यवि ॥ २१ ॥

परस्मिन्नहनि परेद्यवि ॥

ह्योऽतीते

गतेऽह्नि ह्यश्शब्दः ॥

अनागतेऽह्नि श्वः

अनागते **भविष्यत्यह्नि** श्वः । तालव्यशः ॥

परश्वश्च परेऽहनि ।

अनन्तरागामिदिवसात् परस्मिन्नहनि **परश्व** इति ख्याते परश्वः अतिक्रान्ते तु परतरे दिने परश्वो जात इति गौणः प्रयोगः ॥

तदा तदानीं

तस्मिन् काले तदाद्वयम् । 'सर्वैकान्यकिंयत्तदः काले दा' (५. ३. १५) इति दा । तदा ॥

युगपदेकदा

तुल्यकाले युगपदादिद्वयम् । युगपच्छब्दो निर्विकारः, किन्तु **पकारवान्** ॥

सर्वदा सदा ॥ २२ ॥

सर्वकाले सर्वदाद्वयम् । 'सर्वस्य सोऽन्यतरस्यां दि' (५. ३. ६) इति सभावविकल्पः ॥

एतर्हि सम्प्रतीदानीमधुना साम्प्रतं तथा ।

एतर्ह्यादिपञ्चकम् एतस्मिन् काले ॥

दिग्देशकाले पूर्वादौ प्रागुदक्प्रत्यगादयः ॥ २३ ॥

पूर्वादिषु दिग्देशकालेषु प्राक्त्रयम्। यथा—पूर्वे प्राक्। उत्तरे उदक्। पश्चिमे प्रत्यक्। आदिना अपागवागादयः। प्राच्युदीचीप्रतीच्यवाचीशब्देभ्यः 'पञ्चमीसप्तमीप्रथमाभ्यो दिग्देशकालेष्वस्तातिः' (५. ३. २७) इति अस्तातिप्रत्ययः। तस्य 'अञ्चेर्लुक्' (५. ३. ३०) इति लुक्। 'लुक् तद्धितलुकि' (१. २. ४९) इति ङीपो लुक्। 'तद्धितश्चासर्वविभक्तिः' (१. १. ३८) इत्यव्ययत्वम् ॥

इत्यव्ययवर्गः।

अथ लिङ्गादिसंग्रहवर्गः।

सलिङ्गशास्त्रैः सन्नादिकृत्तद्धितसमासजैः।
अनुक्तैः संग्रहे लिङ्गं संकीर्णवदिहोन्नयेत् ॥ १ ॥

सलिङ्गशास्त्रैरित्यादि। सलिङ्गशास्त्रैः लिङ्गलक्षणसहितैरित्यर्थः। लिङ्गलक्षणं च 'स्त्रियामीदूद्विरामैकाजि'ति वक्ष्यति। जकारस्य प्रत्येकमभिसंबन्धः। सन्नादिजैश्चिकीर्षादिभिः। कृज्जसंगृहीतस्यापि गोबलीवर्दन्यायात् पृथगुपादानम्। यतः सन्नन्ताद् 'अ प्रत्ययात्' (२. ३. १०२) इति अकारादिभिरेव कृद्भिश्चिकीर्षादयः शब्दा निष्पाद्यन्ते। अनुक्तैः बाहुल्येन पूर्ववर्गेष्वनाभिहितैः। अयं वक्ष्यमाणः सङ्ग्रहः। लिङ्गं सङ्कीर्णवदिहोन्नयेत्। यथा सङ्कीर्णवर्गे प्रकृतिप्रत्ययाद्यर्थैः लिङ्गोन्नयनं, तथात्रापि पूर्ववर्गानुक्तानां नाम्नां लिङ्गोन्नयनम्। तत्र 'अर्धर्चाः पुंसि च' (२. ४. ३१) इति वचनात् प्रकृत्यर्थेनार्धर्चादीनां 'स्त्रियां क्तिन्' (३. ३. ९४) इत्यादेर्वचनात् प्रत्ययार्थेन क्तिन्नन्तादीनां मातृष्वस्रादीनामभिधेयद्वारेण क्रियाव्ययविशेषणानां न्यायतो वक्ष्यमाणादिति ॥

लिङ्गशेषविधिर्व्यापी विशेषैर्यद्यबाधितः।

लिङ्गशेषविधिरित्यादि। पूर्वमनुक्तस्य लिङ्गस्यायं विधिरिति लिङ्गशेषविधिः। स च व्यापकस्तदा स्याद्, यदि प्रागुक्तैरिहोक्तैश्च विशेषैरबा-

धितो भवति । तथाहि — स्वर्गपर्याय इह पुंसि वक्ष्यते । तस्य 'द्योदिवौ द्वे स्त्रियौ', 'क्लीबे त्रिविष्टपमि'त्यपवादः ॥

स्त्रियामीदूद्विरामैकाच् सयोनिप्राणिनाम च ॥ २ ॥

स्त्रियाम् । स्त्रियामित्ययमधिकारः पुंस्त्वविधेः प्राक् । ईद् ऊद् विरामौ अन्तौ यस्य तद् ईदूद्विरामं, तच्च तदेकाच् चेति ईदूद्विरामैकाज् नाम स्त्रियां स्यात् । यथा — श्रीः ह्रीः भीरित्यादयः । ऊकारान्तो यथा — (श्रूः ? स्रूः) भ्रूः । सयोनिप्राणिनाम च । योनिर्भगम् । तत्सहितानां प्राणिनां नाम स्त्रियां स्यात् । यथा — माता दुहिता याता ॥

नाम विद्युन्निशावीणावल्लीदिग्भूनदीह्रियाम् ।

नामेत्यादि । विद्युदादीनां यावद् नाम स्त्रियां स्यात् । विद्युत् तडित् । रात्रीनिशारजनीवीणाविपञ्च्यादीनां ङ्याबूङन्तमित्येव सिद्धे झटिति स्त्रीत्वावगमार्थम् । अन्ये तु वाणीति पठन्ति वाग् गौः(धी ? गी)रित्याद्यर्थम् । ह्रिय एकाच्त्वात् त्रपादेश्चाबन्तत्वात् सिद्धे स्त्रीत्वे स्पष्टार्थं वचनम् । शेषं तु ज्ञेयं शिष्टप्रयोगत इति वचनाद् व्रीडा द्वयोः । तथाच कालिदासः — 'व्रीडादमुं देवमुदीक्ष्य मन्ये' (कुमा० स० ७. श्लो० ६७) इति । केषाञ्चिद् धियामिति पाठः । तेन चित्संविदादीनां स्त्रीत्वमुक्तं स्यात् ॥

अदन्तैर्द्विगुरेकार्थः

अदन्तैर्द्विगुरेकार्थः अकारान्तैः पूलादिभिः सह यो द्विगुसमासः सः, एकार्थः, एकोऽर्थोऽस्येत्येकार्थः, समाहारद्विगुरित्यर्थः । स स्त्रियाम् । पञ्चपूली त्रिलोकी ॥

न स पात्रयुगादिभिः ॥ ३ ॥

स द्विगुरेकार्थः पात्रयुगादिभिरदन्तैः कृतो न स्त्रियाम् । द्विपात्रं चतुर्युगमित्यादि, । तद्धितार्थोत्तरपदसमाहारे च'(२. १. ५१) इति समासः ॥

तल् वृन्दे येनिकट्यत्रा वैरमैथुनिकादिवुन् ।
स्त्रीभावादावनिक्तिण्ण्वुणच्क्यपोऽयुजङिञ्शाः ॥

उणादिषु निरूरीश्च ङ्याबूङन्तं चलं स्थिरम् ।

तल् । एतदन्तं स्त्रियाम् । 'तस्य भावस्त्वतलौ' (५. १. ११९) । धार्मिकता पटुता । वृन्दे येनिकट्यत्राः समूहे ये ग्रादयः प्रत्ययास्तदन्ताः स्त्रियां स्युः । 'पाशादिभ्यो यः' (४. २. ४९) । पाश्या । 'इनित्रकट्यचश्च' (४. २. ५१) । यथाक्रमं खलिनी गोत्रा रथकट्या । वैरमैथुनिकादिवुन् । वैरं विरोधः मैथुनिको विवाहः । अनयोरर्थयोर्यो वुः, तदन्तः स्त्रियाम् । 'द्वन्द्वाद् वुन् वैरमैथुनिकयोः' (४. ३. १२५) इति वुन् । अश्वमहिषिका । अत्रिभरद्वाजिका । आदिना 'पादशतस्य संख्यादेर्वीप्सायां वुन् लोपश्च' (५. ४. १) इत्यादेर्ग्रहणम् । द्वौ द्वौ पादौ, द्विपदिकादयः । 'स्त्रीभावादावनिक्तिण्वुणच्क्यपोऽयुजङिञ्शाः । स्त्रीत्वविशिष्टे भावे कारकेऽपि ये अनिप्रभृतयः प्रत्ययाः तदन्ताः स्त्रियां स्युः । 'आक्रोशे नञ्यनिः' (३. ३. ११२) । अकरणिरित्यादयः । 'स्त्रियां क्तिन्' (३. ३. ९४) । कृतिः स्तुतिः । 'रोगाख्यायां ण्वुल् बहुलम्' (३. ३. १०८) । प्रच्छर्दिकाविपादिकादयः । 'पर्यायार्हर्णोत्पत्तिषु ण्वुच्' (३. ३. १११) । भवतः शायिकादयः । ण्वु इति ण्वुल्ण्वुचोरुभयोर्ग्रहणम् । 'कर्मव्यतिहारे णच् स्त्रियाम्' (३. ३. ४३) । व्यावहासीत्यादयः । 'संज्ञायां समज—' (३. ३. ९९) इत्यादिना क्यप् । समज्येत्यादयः । स्त्रीभावादेरन्यत्र 'वदः सुपि क्यप् च' (३. १. १०६) इत्यादिना क्यप् । मृषोद्यम् । ब्रह्मभूयम् । स्त्रीभावेऽविधानाच्छिष्टप्रयोगादेव ब्रह्महत्यादौ स्त्रीत्वम् । 'अ प्रत्ययात्' (३. ३. १०२) इत्यः । चिकीर्षादयः । 'ण्यासश्रन्थो युच्' (३. ३. १०७) । कारणा हारणा । 'षिद्भिदादिभ्योऽङ्' (३. ३. १०४) । पचा भिदा । 'विभाषाख्यानपरिप्रश्नयोरिञ् च' (३. ३. ११०) । कां कारिमकार्षीः । इमां कारिमकार्षम् । 'ग्लाम्लाज्याहाभ्यो निः' (वा० ३. ३. ९५) । ग्लान्यादयः । नकारस्य चुत्वेन ञद्वयवान् पाठः । 'कृञः श च' (३. ३. १००) । क्रिया । उणादिषु निरूरीश्च । औणादिका न्यादयः स्त्रियाम् । 'कृबीज्यात्वरिभ्यो निः' (उ० ४. ४९) । कर्ण्यादयः । क्वचिद् 'उणादिष्वनिरूरीश्चे'ति पाठः । 'अर्तिसृधृधम्यश्यमितरिभ्योऽनिः' (उ० २. १०२) । धमन्यादयः । 'कृषिचमि —' (उ० १. ८४) इत्यादिना ऊः । कर्षूः चमूः । 'अवितृस्तृतन्त्रिभ्य ईः' (उ० ३. १५९) । अवीः तरीः स्तरीः तन्त्रीः । ङ्याबूङन्तं चलं स्थिरम् । ङ्याद्यन्तं जङ्गमवाचि स्थावरवाचि च स्त्रियाम् ।

जङ्गमं — कदली कन्दली च। अनयोर्मृगजातिमात्रवाचित्वात् 'सयोनिप्राणिनाम चे'त्यनेन न सिध्यति । शिवाशब्दः सृगालीं सृगालं चाह । खरकुटीव खरकुटी। मनुष्यः चञ्चेव चञ्चामनुष्यः खरकुटी नापितशाला। चञ्चा तृणमयः पुरुषो यः क्षेत्ररक्षणाय क्रियते । 'ऊङुतः' (४. १. ६६) । ब्रह्मबन्धूः धवबन्धूः । एतौ निन्दायां कस्याञ्चिद् ब्राह्मणजातौ वर्तेते । स्थावरं ङ्यावूङन्तं यथा — ताडी केतकी खट्वा माला अलाबूः । चलस्थिरग्रहणम् अ(टा ? पा)र्थम् । (अ ? य)तो ङ्यावूङन्तं चलं स्थिरं च न व्यभिचरति ॥

तत् क्रीडायां प्रहरणं चेन्मौष्टा पाल्लवा णदिक् ॥ ५ ॥

तत् क्रीडायां प्रहरणं चेद् मौष्टा पाल्लवा णदिक् । तन्मुष्ट्यादिकं यदि क्रीडायां प्रहरणं, तदा तस्मिन्नर्थे विहितस्य णस्य इयं दिग् उदाहरणोद्देशः — मौष्टा पाल्लवेति । 'तदस्यां प्रहरणमिति क्रीडायां णः' (४. २. ५७) । मुष्टिः प्रहरणमस्याम् इति मौष्टा क्रीडा । एवं पाल्लवा । दिग्ग्रहणं दाण्डाद्यर्थम् ॥

घञो ञः सा क्रियास्यां चेद् दाण्डपाता हि फाल्गुनी ।
श्यैनम्पाता च मृगया तैलम्पाता स्वधेति दिक् ॥ ६ ॥

घञो ञ इत्यादिः श्लोकः । घञ इति घञन्तात् सा घञ्वाच्या क्रिया अस्यां फाल्गुनिकादिकायामित्यत्रार्थे यो ञो विहितः स स्त्रियाम् । तस्य च अस्य दाण्डपाता फाल्गुनीत्यादि दिक् उदाहरणोद्देशः । दण्डपातोऽस्यां फाल्गुन्यामिति दाण्डपाता फाल्गुनी । 'घञः सास्यां क्रियेति ञः' (४. २. ५८) । फाल्गुनपौर्णमास्यां हि क्वापि देशे राजदण्डः पतति । श्येनपातोऽस्यामिति श्यैनम्पाता मृगया । तिलपातोऽस्यामिति तैलम्पाता स्वधा । 'श्येनतिलस्य पाते ञे' (६. ३. ७१) इति मुम् । इतिशब्दः प्रकारार्थः । तेन मुसलपातोऽस्यामिति मौसलपाता भूरित्यादि च ॥

स्त्री स्यात् काचिन्मृणाल्यादिर्विवक्षापचये यदि ।

स्त्री स्यादित्यादि । अपचितस्वभावा स्त्री । निदर्शनान्तरेण यदा अपचयविवक्षा (प्रो ? प्रयो) क्तुस्तदा काचिद् मृणाल्यादिः स्त्रीलिङ्गा स्यात् । काचिदेति किम् । अल्पो वृक्षो वृक्षकः ॥

---

१. 'चारि ॥' ञ. पाठः. २. 'ञ' ग. ञ. पाठः. ३. 'नादिकाया' क. ठ., निकाया' छ. पाठः.

पाणिन्यादिभिरनुशिष्टलिङ्गमभिधाय तदवशिष्टानि कानिचिन्नामानि कान्तक्रमेणाह —

लङ्का शेफालिका टीका धातकी पञ्जिकाढकी ॥ ७ ॥

लङ्केत्यादि। तत्र लङ्कादीनां 'ङ्याप्ङन्तमि'ति सिद्धे पुनः पाठो नामार्थः। नगरीशाखयोर्लङ्का। शेफालिका सेफालीति ख्याता। अस्यास्तु लिङ्गप्रपञ्चार्थः पाठः। टीकृधातोरच्। टीका सकलपदव्याख्यात्री। धातकी धातृपुष्पिका। पञ्जिका विषमपदभञ्जिका आयव्ययार्था च। आढकी तुवरिका ॥

सिध्रका शारिका हिक्का प्राचिकोल्का पिपीलिका।
तिन्दुकी कणिका भङ्गिः सुरुङ्गासूचिमाढयः ॥ ८ ॥

सिद्धाख्यस्तरुः सिध्रका, दन्त्यादिः। पक्षिविशेषः शारिका, तालव्यादिः। हेक्केटीति ख्याता हिक्का। प्राचिका वनमक्षिका। उल्का शुका इत्येव ख्याता। पिपीलिका पिंपडीति ख्याता। तिन्दुकी काकेन्दुवृक्षः। कणिका परमाणुः व्रीहिश्च। भङ्गिः गात्रभङ्गिः। भाङ्गिः प्रकार इत्यन्यः। सुरुङ्गा विवरभेदः। सूचिः दन्त्यसा स्वनामप्रसिद्धा। माढिः पत्रशिरा। 'माढिः पत्रशिरे'ति रत्नकोषः। अनुच्छेलितत्वं वस्त्रार्तं च माढि(?) ॥

पिच्छावितण्डाकाकिण्यश्चूर्णिः शाणी द्रुणी दरत्।
सातिः कन्था तथासन्दी नाभी राजसभापि च ॥ ९ ॥

पिच्छा भक्तमण्डः शाल्मलनिर्यासश्च। अनङ्गीकृतसिद्धान्तो वादो वितण्डा।

"काकिणी मानदण्डस्य तुरीयांशे *प(ल? ण)स्य च"

इति टवर्गान्ते धरणिः।

†"पणोनमानदण्डानां तुरीयांशे च काकिनी"

---

१. 'क' ङ. छ. पाठः. २. 'च' ठ, 'र्च्छा' घ. ट. पाठः. ३. 'सू' घ. पाठः. ४. 'न्तं' ठ. पाठः. ५. 'धिः' ट., 'ढिः' ठ. पाठः. ६. 'फ' ग. ङ. च. छ. पाठः ७. 'कनिः' ग. ञ. पाठः.

---

* 'काकिनी पणपादेऽपि मानपादे' इति मेदिनी। † 'पणोदमानगण्डागाम्' इति रसः' इति भानुजिदीक्षितः।

इति तवर्गान्ते रभसः। अशेषप्रतिपक्षचूर्णनाच्चूर्णिः महाभाष्यम्। प्रचुरकपर्दिका च चूर्णा। ङीषि चूर्णी च। 'शण श्रण दाने'[1]। तालव्यादिः। पचादिः। 'तस्य विकारः' (४. ३. १३४) इत्यणि शाणीति वर्णदेशना। द्रुणी कच्छपी वृश्चिकी च। दरत् कूलदराणिः प्रपातश्च। सातिः तीव्रवेदना दानावसा(नौ ? ने) च। 'ऊतियूतिजूति—' (३. ३. ९७) इत्यादिना निपातिता। कन्था कन्थडिका[2]। आसन्दी स्वल्पखट्वा वेत्रासनं च। 'आतपः क्षत्रिये नाभिरि'ति परतः पुंस्त्वेऽपि वक्ष्यति। किराते तु नाभिशब्दः पुमानुक्तः[3]—

"समुच्छ्वसत्पङ्कजकोषकोमलैरुपाहितश्रीण्युपनीवि नाभिभिः" (स० ८. श्लो० २४)

इति[4]। लिङ्गशास्त्रकृतां स्त्रियामेव नाभिरिति सम्मतम्। तथाच चन्द्रगोमी—

"ईदूदन्ता य एकाच इदन्ताङ्गानि देहिनः"

इति। राज्ञां सभा कुटी राजसभा। अपिचेति निपातसमुदायः समुच्चये। तेन भम्भादीनां ग्रहणम्॥

झल्लरी चर्चरी पारी होरा लट्वा च सिध्मला।
लाक्षा लिक्षा च गण्डूषा गृध्रसी चमसी मसी॥ १०॥

"झणरी झल्लरी च द्वौ हुडुक्के वालचक्रके"

इति रभसः। सदेवार्चनं गीतनृत्यं चर्चरी। पारी घटी। 'होरेति लग्नं भवनस्य चार्धमि'ति वराहमिहिरः। भवनं च[5] तत्र राशिः परिभाषितः। लटिधातोः विल्ववत् कन्। लट्वा ग्रामचटकः करञ्ज[6]बीजमध्यं[7] च। सिध्मला[8] सिध्म इति ख्यातः, यत्र (वङ्गलवच्चाराणां ?) प्रीतिः। किलासीति च। लाक्षा जतु। लिक्षा केशकृमिः। गण्डूषा जलादिना मुखपूरणम्। एतदपि लिङ्गानुशासनकृत एवामनन्ति। 'गण्डूषमुज्झितवता पयसः सरोषम्'

१. 'ने। प' ठ. पाठः. २. 'न्थधिका' ङ. छ, 'न्धधिका' ञ. पाठः. ३. 'क्तः। लि', ४. 'ति। स्त्रियामेवेति लिङ्गशास्त्रकृतः। रा', ५. 'च राशिः। ल' ठ. पाठः. ६. 'कञ्जखज' च. पाठः. ७. 'ध्यं' क. ख. पाठः. ८. 'ध्म कि' ज्ञ. पाठः.

इत्यादिप्रयोगस्तु काव्यसमयतो ह्यनाम्नातमपि लिङ्गं प्रयुज्यत इत्येतत्परः। बोपालितस्तु काव्यप्रयोगानुग्रहार्थं गण्डूषा कापि मुखपूर्तिरित्युक्तवान्। गृध्रसी दन्त्यसा कटिरोगः। चमसी दन्त्यसा मुद्गादिपिष्टके। मसी लिपिप्रयोजना प्रसिद्धैव। 'स्त्रीपुंसयोर्मषी'ति व्याडिराह ॥

इति स्त्रीलिङ्गप्रकरणम्।

पुंस्त्वे सभेदानुचराः सपर्यायाः सुरासुराः।
स्वर्गयागाद्रिमेघाब्धिद्रुकालासिशरारयः॥ ११ ॥

पुंस्त्वे, अधिकारोऽयं प्राङ् नपुंसकाविधेः। सभेदानुचराः सपर्यायाः सुरासुराः। स्वरूपप्राधान्येऽप्यर्थबहुत्वाद् बहुवचनम्। सुरशब्दोऽसुरशब्दश्च पर्यायसहितो विशेषवाचिना अनुचरवाचिना च सहितः पुंस्त्वे स्यात्। तद् यथा—मरुतो द्युषदो लेखा इत्यादि। विशेषबाधितत्वाद् दैवतानि देवताश्चेत्यादि। तद्भेदा आदित्यविश्वादयः। तदनुचराः हाहा हूहूरित्यादयः। एवमसुरा अपि। स्वर्गेत्यादि। स्वर्गादय ऊनविंशतिर्यथासंभवं सभेदाः सपर्यायाश्च पुंस्त्वे। स्वर्गो नाक इत्यादि। विशेषबाधितत्वाद् द्योशब्दादीनां स्त्रीत्वाद्युन्नेयम्। यागः क्रतुः तद्विशेषः कुण्डपाय्यादिः। अद्रिः शैलः। मेघो जलदः। अब्धिः समुद्रः। लवणोदादयो भेदाः। द्रुर्वृक्षः। कालः समयः। मासादयो भेदाः। असिः खड्गः। चन्द्रहासादयो भेदाः। शरो बाणः। भल्लादयो भेदाः। अरिः शत्रुः ॥

करगण्डौष्ठदोर्दन्तकण्ठकेशनखस्तनाः।
अह्नाहान्ताः क्ष्वेडभेदा रात्रान्ताः प्रागसंख्यकाः॥१२॥

करो राजग्राह्यार्थः रश्मिपाणी च। गण्डः कपोलः। ओष्ठोऽधरः। दोर्बाहुः। दन्तो द्विजः। कण्ठो गलः। केशः कचः। नखः करजः। स्तनः कुचः। अह्नाहान्ताः एतदन्ताः पुंस्त्वे स्युः। पूर्वाह्णः सायाह्नः मध्याह्नः। उत्तराहः द्व्यहः त्र्यहः। क्ष्वेडभेदाः। क्ष्वेलो विषम्। तद्विशेषाः पुंस्त्वे। सौराष्ट्रिकः शौल्किकेयः। रात्रान्ताः प्रागसंख्यकाः। रात्रशब्दोऽयम् 'अहः-

---

१. 'ता विमुक्तं पू॰' ख. च. पाठः.

सर्व—' (५. ४. ८७) इत्यादिना समासान्ताच्प्रत्ययान्तः । एतदन्ताः पुंस्त्वे, यदि संख्यापूर्वपदा न स्युः । पूर्वरात्रः अर्धरात्रः । प्रागसंख्यका इति किम् । पञ्चरात्रम् ॥

श्रीवेष्टाद्याश्च निर्यासा असन्नन्ता अबाधिताः ।
कशेरुजतुवस्तूनि हित्वा तुरुविरामकाः ॥ १३ ॥

श्रीवेष्टाद्याश्च निर्यासाः श्रीविष्टप्रभृतयस्तरुद्रवाः पुंस्त्वे स्युः । आदिना श्रीवासाः सर्जरसाः । असन्नन्ता अबाधिताः । असन्नन्ताश्च पुंसि स्युः । अङ्गिराः पुरोधाः । अन्नन्तो यथा — प्रतिदिवा दिवसः । अबाधिता इति किम् । सुमनसोऽप्सरसः ललाम । विशेषैर्यद्यबाधित इत्युक्तत्वात् पुनरबाधिता इति पाठस्तत्स्मरणार्थः । कशेरुजतुवस्तूनि हित्वा तुरुविरामकाः । तुकाररुकारान्ताः कशेरुत्रिकवर्जिताः पुंसि स्युः । केतुः सेतुः चरुरित्यादिः । कशेरु प्रसिद्धं तालव्यवत् । जतु लाक्षा । वस्तु पदार्थः । उपलक्षणत्वादेतेषां दारुप्रभृतीन्यपि हित्वा ॥

कषणभमरोपान्ता यद्यदन्ता अमी अथ ।
पथनयसटोपान्ता गोत्राख्याश्चरणाह्वयाः ॥ १४ ॥

कषणभमरोपान्ताः यद्यदन्ता अमी । कादिवर्णषट्कोपान्ताः पुंसि स्युः अदन्ताश्चेत् । कुहकः पुलकः । कल्माषः अम्बरीषः । पाषाणः पणः । कौस्तुभः गर्दभः । व्यामः[3] ग्रामः[3] । प्राग्भारः मसारः । अयं च दन्त्यवान् स्फटिकवाची च । तथाच कप्फिणाभ्युदये—

"प्रभारसप्रक्रमसारसालां मसारसालां दधती धिनोति ।
आक्रीडभूरच्छिदुरा परागे दुरापरागेऽपि रतिं दधाना ॥"

इति । अथ पथनयनसटोपान्ताः । अथादित्वाददन्ता इति नाभिसंबध्यते । पादिवर्णषट्कोपान्ताः पुंसि स्युः । सूपः पूपः । आवसथः निशीथः । इनः फेनः । कुलायः हयः । वेतसः पनसः । कटः कुटः । गोत्राख्या वंशसंज्ञाः पूंस्त्वे स्युः । कुत्सः गौतमः । चरणाह्वयाः वेदशाखासंज्ञाः पुंस्त्वे स्युः । कठः कलापः ॥

---

१. २. ३., 'ख' न. ठ. पाठः.

नाम्न्यकर्तरि भावे च घञजन्नङ्णघाथुचः ।
ल्युः कर्तरीमनिज् भावे को घोः किः प्रादितोऽन्यतः ॥

संज्ञायां कर्तृवर्जिते कारके भावे च ये घञादयस्तदन्ताः पुंसि स्युः । नाम्न्यकर्तरि घञ् यथा — प्रास्यति तमिति प्रासः कुन्तः । 'अकर्तरि च कारके संज्ञायाम्' (३. ३. १९) इति घञ् । चकारादसंज्ञायां च । लाभो लब्धः । दायो दत्तः । भावे घञ् यथा — पाकः त्यागः रागः । 'भावे च' (४. ४. १४४) इति घञ् । 'एरच्' (३. ३. ५६) । नयः जयः । 'ॠदोरप्' (३. ३. ५७) । करः हरः । 'यजयाचयतविच्छप्रच्छरक्षो नङ्' (३. ३. ९०) । यज्ञः यत्नः । 'नौ ण च' (३. ३. ६०) । न्यादः । 'पुंसि संज्ञायां घः —' (३. ३. ११८) । प्रच्छदः । 'ट्वितोऽथुच्' (३. ३. ८९) । श्वयथुः । ल्युः कर्तरि । नन्द्यादिल्युप्रत्ययान्ताः पुंस्त्वे स्युः । 'नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः' (३. १. १३४) । सङ्कर्षणो मधुसूदनः । इमनिज् भावे कः । एतौ भावे पुंस्त्वे भवतः । 'पृथ्वादिभ्य इमनिज् वा' (५. १. १२२) । प्रथिमा महिमा । 'घञर्थे कविधानं कर्तव्यम्' (वा० ३. ३. ५८) इति कः । प्रस्थः विघ्नः । 'सुपि स्थः' (३. २. ४) इत्यत्र योगविभागाद् भावे कः । आखूत्थः शलभोत्थः । एतयोश्च मतान्तरेण क्लीबत्वमपि शिष्टप्रयोगतः । तथाच शब्दार्णवः —

"आखूत्थशलभोत्थादितत्तदुत्थानमद्वयोः"

इति । अतोऽनपुंसकपाठो वृत्तौ प्रमादज इति रक्षितोक्तं युक्तमेव । घोः किः प्रादितोऽन्यतः । घुशब्देन दाब्दैब्वर्जितदाधाग्रहणम् । ततः प्रादिपरात् तदन्यपराच्च यः किप्रत्ययः तदन्तः पुंसि । 'उपसर्गे घोः किः' (३. ३. ९२) । आदिः आधिः । 'कर्मण्यधिकरणे च' (३. ३. ९३) इति किः । बालधिः शेवधिः ॥

द्वन्द्वेऽश्वबडवावश्वबडवा न समाहृते ।
कान्तः सूर्येन्दुपर्यायपूर्वोऽयःपूर्वकोऽपि च ॥ १६ ॥

द्वन्द्वे समासे अश्वबडवशब्दस्य पुंस्त्वम् । तद् यथा — अश्वबडवौ । नरश्वबडवा इति बहुवचननिर्देशः 'पूर्ववदश्वबडवौ' (२. ४. २७) इत्यस्मिन्

सूत्रे द्विवचनस्यातन्त्रत्वाद् बहुवचनान्तत्वेऽपि पुंस्त्वदर्शनार्थः। न समाहृते न समाहारे इत्यर्थः। तत्र तु अश्वबडवमिति नपुंसकत्वमेव। 'विभाषा वृक्षमृग—' (२. ४. १२) इत्यादिना इतरेतरयोगे समाहारे च समासः। 'कान्तः सूर्येन्दुपर्यायपूर्वोऽयःपूर्वकोऽपि च'। कान्तशब्दः सूर्येन्दुपर्यायपूर्वः अयःशब्दपूर्वश्च पुंस्त्वे स्यात्। सूर्यकान्तः अर्ककान्तः चन्द्रकान्तः इन्दुकान्तः अयस्कान्तः ॥

वटकश्चानुवाकश्च रल्लकश्च कुडङ्गकः।
पुङ्खो न्यूङ्खः समुद्गश्च विटपट्टघटाः खटः ॥ १७ ॥

लक्षणेऽनुक्तांश्च स्पष्टार्थं कान्तक्रमेणाह। वटकः पिष्टकभेदः। अनुवाकः वेदभेदः। रल्लकः कम्बलविशेषो मृगभेदश्च। कुडङ्गकः छदिः, चल इति ख्यातः। 'कुटुङ्को[1] ना छदिः पिटमि'ति वोपालितः[2]। पुङ्खः काण्डस्य मूलम् उखणखेत्यादौ इगुपधलक्षणः कः। पृषोदरादित्वाद् धातोः पुडागमो नुगागमश्च। पुङ्खः। पृषोदरादित्वादेवोपधादीर्घनुमागमौ। एवं न्यूङ्खो दीर्घोपधः सामवेदनिरन्तराः षडोङ्कारा न्यूङ्खः। समुद्गः संपुटकः परुकादिः। विटो नगरः। पट्टः पेषणशिला, आधानादि च। घटः तुला। खटः करस्य प्रहारविशेषः। श्लेष्मान्धकूपयोश्च खटः ॥

कोट्टारघट्टहट्टाश्च पिण्डगोण्डपिचण्डवत्।
गडुः करण्डो लगुडो वरण्डश्च किणो घुणः ॥ १८ ॥

कोट्टो दुर्गपुरम्। अरघट्टः कूपभेदः। कोट्टारः समस्त इति कस्यचिन्मतम्।

'कोट्टारो नागरे कूपे पुष्करिण्याश्च पाटके"

इति रभसः। घट्टः शुल्कः। हट्टः क्रयविक्रयस्थानम्।

"सिल्हे गन्धरसे सान्द्रे देहा(का?गा)रैकदेशयोः।
(वे? बो)ले गोले च पिण्डः स्यात्" ॥

---

१. 'ङ्को ना' ट. पाठः. २. 'तोऽपि। पु' क. ख. ग. घ. ङ. ज. पाठः.

"गोण्डः पामरजातौ च वृद्धनाभौ च सम्मतः"।
'पिचण्डौ पक्षपश्वङ्गे'

इति रुद्रः। पिचण्डवत् कोट्टादयोऽपि पुंसीति वत्यर्थः। 'कुब्जे पृष्ठगडे गडु-रि'ति रुद्रः। करण्डो वंशादिरचितो भाण्डभेदः। लगुडो लोहमयः प्रहरण-विशेषः। 'वरण्डो यौवने गण्डे स्यादि'ति विश्वप्रकाशः। पत्रादिमूलके व-रण्डः। किणो व्रणाह्वयः। घुणः काष्ठकीटः॥

दृतिसीमन्तहरितो रोमन्थोद्गीथबुद्बुदाः।
कासमर्दोऽर्दतिः कुन्दः फेनस्तूपौ सपूपकौ॥ १९॥

दृतिः चर्मपुटकः। सीमन्तः केशविन्यासः। हरिद् वर्णविशेषः। त-द्वति ते त्रिषु। रोमन्थः पागुल इति ख्यातः। उद्गीथः प्रणवः सामवेदध्वनि-श्चेत्यरुणदत्तः। बुद्बुदो जलादिविकारः। कासमर्दो वृक्षभेदो गुल्मभेदश्च। अर्दतिः अग्निः। याचनेत्यन्यः। कुन्दः कुन्दकारशिल्पिनः शिल्पोपकरणम्। माध्यं कुन्दम्। बाधितत्वान्मतान्तरेण तत्रापि पुंस्त्वम्। फेनो जलपरिणामः। स्तूपो मृदादिकृतोन्नतप्रदेशः। पूपः पिष्टकः॥

आतपः क्षत्रिये नाभिः कणयक्षुरकेदराः।
पूरखुरप्रचुक्राश्च गोलहिङ्गुलपुद्गलाः॥ २०॥

आतपः सूर्यालोकः। क्षत्रिये वर्तमानो नाभिः पुमान्। प्राण्यङ्गवाची स्त्रीप्रकरणेऽभिहितः। कणयः शरभेदेन इत्यन्यः। क्षुरो लोमशातनः।

"स्थितं सबाष्पं त्वयि चक्षुरस्य समं पृषत्का मयि च क्षुरस्य"[4]

इति कीचकवधयमकम्। केदरः संव्यवहारपदार्थ इत्यन्यः। तरुभेद इत्यपरः। पूरो नदीकूलद्वयपूरणम्। खुरप्रो बाणभेदः। 'दशाननक्षिप्तखुरप्रखण्डित' इति राजशेखरः।

"भजेथाः पश्चान्मां वरतनु! पुरस्तान्मृगखुर-
क्षुरप्रव्यालेख्यस्थपुटितविभागा वनभुवः"

---

1. 'कु' क. ख. ट. पाठः. 2. 'पः' घ. ङ. च. छ. ज. पाठः. 3. 'द इ' क. ख. ग. ङ. च. छ. ज. ढ. ठ. पाठः. 4. 'भा' ग. घ. ङ. छ. ञ. ट. ठ.' 'हा' ख. पाठः.

इत्यन्यः। चुक्रः सन्धानकृतोऽत्यम्लश्चुक इति ख्यातः।

"जारजे विधवापुत्रे गोलको मणिके गुले"

इति रभसः। हिङ्गुलो रागद्रव्यम्। 'देहेऽध्यात्मनि पुद्गलः' इति रुद्रः॥

वेतालभल्लमल्लाश्च पुरोडाशोऽपि पट्टिसः।
कुल्मासो रभसश्चैव सकटाहः पतद्ग्रहः॥ २१॥

वेतालः सत्त्वविशेषः। भल्लः काण्डभेदः। मल्लो बाहुयोधः। पुरोडाशस्तालव्यश इति वर्णदेशनाकृतोक्तम्। स च यागोपयुक्तः पिष्टभेदः।

"परशुः पट्टिसो रामः स एव च परश्वधः"

इति निगमाख्यमभिधानम्। अयं च दन्त्यसः। 'असितोमरकुन्दमहापट्टिसम्'[1] (स० १३. श्लो० ४७) इत्यादिभट्टिभाषासमावेशोऽपि।

"कुल्माषो यवके पुंसि काञ्जिके[2] स्यान्नपुंसकम्"

इति मूर्धन्यान्ते रभसः। बोरधान्यम्। माषमिश्रभक्तमित्यन्यः। प्रागस्य सकारो निरूपितः। रभसो वेगहर्षयोः[3]।

"उत्कण्ठसटवराटकरभसाः स्त्रीत्वे तु डाबन्ताः"

इति त्रिकाण्डशेषः।

"[4]स्तूपे च पाकपात्रे च कटाहो महिषीशिशौ"

इति त्रिकाण्डशेषः। पतद्ग्रहः पतिग्रहेति ख्यातः॥

इति पुल्लिँङ्गप्रकरणम्।

छिद्दीनेऽन्यच्च खारण्यपर्णश्वभ्राहिमोदकम्।
शीतोष्णमांसरुधिरमुखाक्षिद्रविणं बलम्॥ २२॥

---

१. 'छकविशेषः। पट्टसः परशुः स', २. 'ञ्जि', ३. 'यो:। रभसा डाबन्तापीति' ठ. पाठः. ४. 'ब्रू' क. घ. इ. च. छ. ज. ट. ठ. पाठः.

हलहेमशुल्बलोहं सुखदुःखशुभाशुभम् ।
जलपुष्पाणि लवणं व्यञ्जनाद्यनुलेपनम् ॥ २३ ॥

द्विहीन इत्यादिश्लोकद्वयम् । खादिषड्विंशतिवाचकं बाधरहितं नपुंसके । अन्यच्चेति बाधितादन्यत् । चकाराद् द्वारान्तिकाङ्गणरणादयः । खशब्देनेन्द्रियाकाशयोर्ग्रहणम् । हृषीकं करणम् । अरण्यं वनम् । पर्णं पत्रम् । श्वभ्रं छिद्रम् । हिमं तुहिनम् । उदकं जलम् । शीतं हिमम् । उष्णं तिग्मम् । मांसं पिशितम् । रुधिरं रक्तम् । मुखं आस्यम् । अक्षि चक्षुः । द्रविणं द्रव्यम् । बलं[1] शक्तिः सेना च । हलं लाङ्गलम् । हेम स्वर्णम् । शुल्बं ताम्रम् । लोहम् अयः । सुखं[2] शर्म । दुःखं प्रसिद्धम् । शुभं शिवम् । अशुभं अकल्याणम् । जलपुष्पाणि कमलोत्पलादीनि । लवणं सामुद्रम् । व्यञ्जनं तेमनम् । आदिना दधितक्रादिविशेषग्रहणम् । अनुलेपनं समालम्भनम् ॥

कोट्याः शतादिसंख्यान्या वा लक्षा नियुतं च तत् ।
द्व्यचकमासिसुसन्नन्तं यदनान्तमकर्तरि ॥ २४ ॥

कोट्याः शतादिसंख्यान्या । कोट्या अन्या शतादिसंख्या क्लीबे । असन्तं यशः पयः । इसन्तं सर्पिः हविः । उसन्तं वपुः आयुः । अन्नन्तं कर्म । यदनान्तमकर्तरि । कर्तुरन्यद् यद् अनप्रत्ययान्तं तत् क्लीबे । गमनं दानम् । अकर्तरीति किम् । पवमानो दहनः ॥

त्रान्तं सलोपधं शिष्टं रात्रं प्राक्संख्ययान्वितम् ।
पात्राद्यदन्तैरेकार्थो द्विगुर्लक्ष्यानुसारतः ॥ २५ ॥

त्रान्तं सलोपधं शिष्टम् । लोपधसहितं त्रान्तं क्लीबे । त्रान्तं यथा — कलत्रं गात्रम् । लोपधं यथा — तुमुलं लाङ्गूलम् । सोपधं चेति केषाञ्चिद् बोधः । तदा यवसं बिसमित्यादि । शिष्टम्, अबाधितमित्यर्थः । एतेन गलवलच-

---

१. 'बलशब्देन शक्तिसेनयोर्ग्रहणम् । बलं स्थाम तेमन. बल सैन्यम् ।' क. ख. ग. घ. ङ. च. छ. ज. ट. पाठः. २. 'खदुःखं प्र' ठ. पाठः.

लादीनां न भवति । रात्रं प्राक्संख्ययान्वितम् । संख्यापूर्वपदं रात्रशब्दान्तं क्लीबे । त्रिरात्रं पञ्चरात्रम् । पात्राद्यदन्तैरेकार्थो द्विगुर्लक्ष्यानुसारतः । पात्रादिभिरदन्तैर्यो द्विगुसमास एकार्थः स पात्रादेराकृतिगणत्वाल्लक्ष्यानुसारतः शिष्टप्रयोगानुसारतो द्विहीने । द्विरात्रं चतुर्युगम् । अन्यस्त्वाह — शिष्टमित्यनुवर्तमानादेव लक्ष्यानुसारतः इति पृथक् सूत्रम् । द्विगुरेकार्थ इत्यप्यनुवर्तते एकार्थो द्विगुः शिष्टः लक्ष्यानुसारेण द्विहीने स्यात् । सप्तकुमारि त्रिजगत् । लक्ष्यानुसारवचनात् क्वचिदप्रवृत्तिः । 'त्रिवली तरङ्गतरला' 'त्रिजगतीजीवा(न्त?तु)रेणेक्षणा' ॥

द्वन्द्वैकत्वाव्ययीभावौ पथः संख्याव्ययात् परः ।
षष्ठ्याश्छाया बहूनां चेद् विच्छायं संहतौ सभा ॥

द्वन्द्वैकत्वाव्ययीभावौ । द्वन्द्वस्यैकत्वं द्वन्द्वैकत्वम् अव्ययीभावश्च नपुंसके स्यात् । अश्वबलीवर्दं धवखदिरपलाशम् । अव्ययीभावो यथा — अधिस्त्रि अधिकुमारि । पथः संख्याव्ययात् परः । संख्याव्ययाभ्यां परो यः कृतसमासान्त पथशब्दः, क्लीबे । द्विपथं चतुष्पथम् । अव्ययपरो यथा — विपथम् उत्पथम् षष्ठ्याश्छाया बहूनां चेद् । विच्छायम् । षष्ठ्यन्ताद् या छाया, क्लीबे सा यदि बहूनां सम्बन्धिनी । उदाहरणदिशमाह — वीनां पक्षिणां बहूनां छाया विच्छायम् । अनया दिशा शलभच्छायम् । बहूनामिति किम् । एकस्य तरोः छाया तरुच्छाया । संहतौ सभा । समूहार्था सभा षष्ठ्यन्तात् परा क्लीबे दाससभम् ॥

शालार्थापि परा राजामनुष्यार्थादराजकात् ।
दासीसभं नृपसभं रक्षःसभमिमा दिशः ॥ २७ ॥

शालार्थापि परा राजामनुष्यार्थादराजकात् । राजवर्जिताद् राजपर्याया अमनुष्यार्थाच्च षष्ठ्यन्तात् परा शालार्था गृहवाचिनी या सभा अपिशब्दा संहत्यर्था च, क्लीबे स्यात् । उभयोरुक्तयोरुदाहरणदिशमाह — दासीस नृपसभं रक्षःसभमिमा दिशः । दिग्ग्रहणाद् गोपालसभं मनुष्यसभम् ईश्वरस पिशाचसभम् ॥

---

१. 'गम् । शि', २ 'दु इति कश्चित् । लन स' ठ. पाठः.

उपज्ञोपक्रमान्तश्च तदादित्वप्रकाशने ।
कोपज्ञकोपक्रमादि कन्थोशीनरनामसु ॥ २८ ॥

उपज्ञोमक्रमान्तश्च तदादित्वप्रकाशने । कोपज्ञकोपक्रमादि । उपज्ञान्त उपक्रमान्तश्च षष्ठीसमासः तयोरेवोपज्ञोपक्रमयोः प्राथम्यप्रतिपादने गम्यमाने क्लीबे स्यात् । उदाहरणमाह — उपज्ञायते परिज्ञायत इत्युपज्ञा । 'आतश्चोपसर्गे' (३. ३. १०६) इत्यङ् । कस्य ब्रह्मण उपज्ञा प्रथमज्ञेया कोपज्ञं प्रजा, तेनादौ सृष्टत्वात् । उपक्रम्यत इत्युपक्रमः । कस्य प्रजापतेरुपक्रमः कोपक्रमं प्रजा, प्रथमतस्तेन कृतेत्यर्थः । आदिना विप्रोपज्ञं प्रतिग्रहः । आढ्योपक्रमं दानम् । कन्थोशीनरनामसु । उशीनराख्यजनपदप्रतिबद्धग्रामाणां नामसु विषयभूतेषु षष्ठ्यन्तात् परा कन्था क्लीबे । सौपमीणां कन्था सौपमिकन्थम् आह्व(र)कन्थम् । उशीनरादन्यत्र दाक्षिकन्था वाहीकग्रामस्याख्या । नाम्नोऽन्यत्र वीरणानां कन्था वीरणकन्था । उशीनरेष्वपि नायं कन्थान्तः संज्ञा ॥

भावे नणकचिद्भ्योऽन्ये समूहे भावकर्मणोः ।
अदन्तप्रत्ययाः पुण्यसुदिनाभ्यां त्वहः परः ॥ २९ ॥

'भावे नणकचिद्भ्योऽन्ये समूहे भावकर्मणोः । अदन्तप्रत्ययाः' । नश्च णश्च कश्च चिच्च तेभ्योऽन्ये भावे ये अदन्ता धातुविहिताः प्रत्ययाः, समूहभावकर्मसु अदन्तास्तद्धिताः, ते क्लीबे । तत्र धातुविहिता यथा — वस्तव्यं चेयं ब्रह्मभूयं सांराविणम् । नणकचिद्भ्योऽन्ये इति किम् । 'यजयाच—' (३.३.९०) इत्यादिना नङ् । प्रश्नः । 'नौ ण च' (३. ३. ६०) । न्यादः । 'सुपि स्थः' (३. २. ४) इति योगविभागात् कः । आखूत्थः । चकार इत्संज्ञको यस्य स चित् । यथा — 'एरच्' (३. ३. ५६) । चयः । 'ट्वितोऽथुच्' (३. ३. ८९) । वेपथुः । समूहे अदन्तप्रत्यया यथा — चाषाणां समूहः चाषम् । एवं भैक्षम् । 'तस्य समूहः' (४. २. ३७) इत्यण् । भावेऽदन्तप्रत्यया यथा — 'तस्य भावस्त्वतलौ' (५. १. ११९) । गोत्वं शुक्लत्वम् । कर्मणि यथा — 'गुणवचनब्राह्मणादिभ्यः—' (५. १. १२४) इति ष्यङ् । ब्राह्मण्यं

राज्यम् । पुण्यसुदिनाभ्यां त्वहः परः । एताभ्यां परः कृतसमासान्तो योऽहश्शब्दः, क्लीबे । पुण्याहम् । 'राजाहःसखिभ्यष्टच्' (५. ४. ९०१)। सुदिनशब्दः प्रशस्तवाची ॥

क्रियाव्ययानां भेदकान्येकत्वेऽप्युक्थतोटके ।
चोचं पिञ्छं गृहस्थूणं तिरीटं मर्मयोजने ॥ ३० ॥

क्रियाव्ययानां भेदकान्येकत्वेऽपि । क्रियाणामव्ययानां च भेदकानि विशेषकानि क्लीबे भवन्ति । एकत्वेऽपि, एकवचनान्तानि च भवन्तीत्यर्थः । मन्दं पचति मृदु पचति । अव्ययविशेषणं यथा — रम्यं स्वः । इदानीं नामान्युक्तादन्यानि कानिचिदाह — उक्थं (मासः?साम)विशेषः । तोटकं रूपभेदो वृत्तभेदश्च । 'अथ तोटकमब्धिसकारकृतमि'तिच्छन्दःसूत्रम् । चोचं तालफलं कदलीफलादीनां त्वक् च । पिञ्छं मयूरशिखण्डम् । गृहस्य स्थूणा स्तम्भो गृहस्थूणम् । तिरीटं वेष्टनम् । शिरोभूषणमित्यन्यः । मर्म प्राणस्थानम् । योजनं चतुःक्रोशात्मकम् ॥

राजसूयं वाजपेयं गद्यपद्ये कृते कवेः ।
माणिक्यभाष्यसिन्दूरचीरचीवरपञ्जरम् ॥ ३१ ॥

राजसूयवाजपे(यौ?ये) यागविशेषौ । कवेः कृते ये गद्यपद्ये, क्लीबे ।

"अपादः पदसन्तानो गद्यं पद्यं चतुष्पदी" ।

कविकृतादन्यत्र गद्या वाग् गद्योऽयमर्थो गद्यं वचः । पद्यः पङ्कः पद्या धूलिः पद्यं रजः । माणिक्यं रत्नविशेषः । भाष्य[1]लक्षणं तु

"सूत्रार्थो वर्ण्यते यत्र पदैः सूत्रानुसारिभिः ।
स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदुः ॥"

सिन्दूरं दन्त्यस सीमन्तप्रसाधकम् । चीरं जीर्णवस्त्रखण्डम् । कुचीरमित्यपि दृश्यते । चीवरं भिक्षूणां प्रावरणविशेषः । पञ्जरं कायास्थि पक्षिस्थापनकं च ॥

---

१. 'ष्यं तल्लक्ष' ठ. पाठः.

लोकायतं हरीतालं विदलं स्थालबाह्वम् ।

लोकायतं चार्वाकशास्त्रम् । हरीतालं धातुविशेषः । विदलं द्विधा कृतं कलायादिकं वंशादिफालिश्च । स्थालं भोजनपात्रविशेषः । बाह्वं कुङ्कुमम् ॥

इति नपुंसकप्रकरणम् ।

पुन्नपुंसकयोः शेषोऽर्धर्चपिण्याककण्टकाः ॥ ३२ ॥

पुन्नपुंसकयोः, अयमधिकारः । शेषः प्रकृतेभ्यः स्त्रीपुन्नपुंसकेभ्यो यः शेषः स पुन्नपुंसकयोः । स च विहारमण्डपादिः । अथवा शेषशब्द एव पुन्नपुंसकयोर्बोद्धव्यः । अर्धर्चादिरेव वा शेषः । नामानि कानिचिदाह—ऋचोऽर्धमर्धर्चः । 'ऋक्पूरब्धूःपथामानक्षे' (५. ४. ७४) इत्यः ।

"पिण्याकोऽस्त्री तिलकल्के हिङ्गुबाह्लिक(सिह्ल)के ।
रोमाञ्चे क्षुद्रशत्रौ च द्रुमाङ्गे कण्टकोऽस्त्रियाम् ॥"

मोदकस्तण्डकस्तङ्कः शाटकः खर्वटोऽर्बुदः ।
पातकोद्योगचरकतमाला मालको नडः ॥ ३३ ॥

मोदको भक्षभेदः । तण्टकः श्लोकच्छन्दोभेदः । खञ्जन इत्यन्यः । तङ्कः प्रियविरहजस्तापः । शाटको वस्त्रभेदः । ग्रामशतमध्यस्थो ग्रामशतवास्तव्यजनोपजीव्यो ग्रामः खर्वटः ।

"अर्बुदो मांसपरु(षि ? ष)दशकोटिषु न स्त्रियाम्" ।

पातको ब्रह्महत्यादिः । उद्योगोऽभियोग उद्यमश्च । चरकं चिकित्साशास्त्रम् । वरकं वा पाठः, स्यूतवस्त्रयुगाख्यम् । तथाच वृत्तो रूपम् । तमालो वृक्षभेदो वंशत्वक् च । मालकः पर्वतभूमिक्षेत्रम् । नडः नड इति ख्यातः ॥

कुष्ठं मुण्डं शीधु बुस्तं क्ष्वेलितं क्षेमकुट्टिमम् ।
सङ्गमं शतमानार्मशम्बलाव्ययताण्डवम् ॥ ३४ ॥

कुष्ठा [illegible]न्धद्रव्यं व्याधिभेदश्च । मुण्डो मस्तकः । मुण्डितवचनश्च वाच्यलिङ्गः । शीधु मद्यम् । बुस्तं स्थालीभ्रष्टं मांसम् । पनसादिफलस्य सार-

भागस्य वोप्र इति ख्यातस्य। क्ष्वेलितं सिंहनादः। क्षेमं लब्धार्थरक्षणम्। कुट्टिमं स्थण्डिलम्। सङ्गमं सङ्गतिः। प्रस्थैश्च तुर्भिराढकः, स एव शतमानम्। अर्म अक्षिरोगः अन्धा इति ख्यातः। शम्बलं पाथेयम्। तालव्यादि दन्त्यादि च। अव्ययं चवाहहादिकम्। ताण्डवं नृत्तम॥

कवियं कर्म कर्पासि पारं वारो युगन्धरः।
यूपं प्रग्रीवपात्रीवे यूषं चमसचिक्कसौ॥ ३५॥

'कवियं वा ना तुरङ्गमुखभाण्डमि'ति वोपालितः। कर्म व्याप्ये क्रियायां च। कर्पासि कर्पासीफलम्। पारं नद्यादिपरतीरम्। वारः समूहोऽवसरो राजादिद्वारं परिपाटिश्च। युगन्धरः कूबरः। पर्वतविशेष इत्यन्यः। यूपं यागे पशुबन्धनदारु। प्रग्रीवं मुखशालेति चाणक्यटीकाकृत्। मत्तवारणाख्यं दार्वित्यरुणदत्तः। गृहादौ वीथ्याद्याकर्षणं प्रग्रीवमित्यन्यः। यज्ञोपकरणपात्रविशेषः पात्रीवम्। मुद्गादिविकारो यूषम्। चवर्गीयादिरव्ययमिति वर्णदेशनाकृत्। चमसं सोमपानपात्रं दन्त्यसम्। चिक्कसो यवचूर्णम्॥

अर्धर्चादिगणे घृतक्षीरादयः पठ्यन्ते, चान्द्रलिङ्गानुशासने च तृणरेणचरणादयः[1]। ते च कथमिह नोक्ता इत्यत आह —

अर्धर्चादौ घृतादीनां पुंस्त्वाद्यं वैदिकं ध्रुवम्।
तन्नोक्तमिह लोकेऽपि तच्चेदस्त्यस्तु शेषवत्॥ ३६॥

अर्धर्चादौ घृतादीनां पुंस्त्वाद्यं पुन्नपुंसकत्वमुक्तम्। तद् वैदिकं छान्दसं ध्रुवं निश्चितम्। तत् तस्माद् इह लौकिके नामलिङ्गानुशासने अनुपयुक्तत्वान्नोक्तम्। ननु चात्यन्तविदुषोऽपि पुरुषस्याशेषलौकिक(प्र)योगपारगत्वासंभवात् सन्दिग्धमेतत्। किमस्ति लोकानां प्रयोगो न वेत्याह — लोकेऽपि तच्चेदस्ति घृतादीनां पुंस्त्वादि, (वि ?) शेषवद्। अनुक्तलिङ्गसङ्ग्रहार्थमिह वक्ष्यते — 'शेषं तु ज्ञेयं शिष्टप्रयोगत' इति। यथा ग्रन्थविस्तरभयादनुक्तमपीह शेषं शिष्टप्रयोगतो ज्ञेयं, तथा तदपि शिष्टप्रयोगतो ज्ञेयम्॥

पुन्नपुंसकविशेषणम्।

---

१. 'कणचणा' क. ग. पाठः.

भागस्य वोप्र इति ख्यातस्य । क्ष्वेलितं सिंहनादः । क्षेमं लब्धार्थरक्षणम् । कुट्टिमं स्थण्डिलम् । सङ्गमं सङ्गतिः । प्रस्थैश्चतुर्भिराढकः, स एव शतमानम् । अर्म अक्षिरोगः अन्धा इति ख्यातः । शम्बलं पाथेयम् । तालव्यादि दन्त्यादि च । अव्ययं चवाहहादिकम् । ताण्डवं नृतम् ॥

कविर्यं कर्म कर्पासि पारं वारो युगन्धरम् ।
यूपं प्रग्रीवपात्रीवे यूषं चमसचिक्कसौ ॥ ३५ ॥

'कवियं वा ना तुरङ्गमुखभाण्डमि'ति वोपालितः । कर्म व्याप्ये क्रियायां च । कर्पासि कर्पासीफलम् । पारं नद्यादिपरतीरम् । वारः समूहोऽवसरो राजादिद्वारं परिपाटिश्च । युगन्धरः कूबरः । पर्वतविशेष इत्यन्यः । यूपं यागे पशुबन्धनदारु । प्रग्रीवं मुखशालेति चाणक्यटीकाकृत् । मत्तवारणाख्यं दार्वित्यरुणदत्तः । गृहादौ वीथ्याद्याकर्षणं प्रग्रीवमित्यन्यः । यज्ञोपकरणपात्रविशेषः पात्रीवम् । मुद्गादिविकारो यूषम् । चवर्गीयादिरव्ययमिति वर्णदेशनाकृत् । चमसं सोमपानपात्रं दन्त्यसम् । चिक्कसो यवचूर्णम् ॥

अर्धर्चादिगणे घृतक्षीरादयः पठ्यन्ते, चान्द्रलिङ्गानुशासने च तृणरं[1]णचरणादयः । ते च कथमिह नोक्ता इत्यत आह —

अर्धर्चादौ घृतादीनां पुंस्त्वाद्यं वैदिकं ध्रुवम् ।
तन्नोक्तमिह लोकेऽपि तच्चेदस्त्यस्तु शेषवत् ॥ ३६ ॥

अर्धर्चादौ घृतादीनां पुंस्त्वाद्यं पुन्नपुंसकत्वमुक्तम् । तद् वैदिकं छान्दसं ध्रुवं निश्चितम् । तत् तस्माद् इह लौकिके नामलिङ्गानुशासने अनुपयुक्तत्वान्नोक्तम् । ननु चात्यन्तविदुषोऽपि पुरुषस्याशेषलौकिक(प्र)योगपारगत्वासंभवात् सन्दिग्धमेतत् । किमस्ति लोकानां प्रयोगो न वेत्याह — लोकेऽपि तच्चेदस्ति घृतादीनां पुंस्त्वादि, (वि?) शेषवद् । अनुक्तलिङ्गसङ्ग्रहार्थमिह वक्ष्यते — 'शेषं तु ज्ञेयं शिष्टप्रयोगत' इति । यथा ग्रन्थविस्तरभयादनुक्तमपीह शेषं शिष्टप्रयोगतो ज्ञेयं, तथा तदपि शिष्टप्रयोगतो ज्ञेयम् ॥

पुन्नपुंसकविशेषणम् ।

---

१. 'कणचणा' क. ग. पाठः.

**स्त्रीपुंसयोरपत्यान्ता द्विचतुःषट्पदोरगाः ।
जातिभेदाः**

स्त्रीपुंसयोः, अधिकारोऽयम् । अपत्यान्ताः अपत्यप्रत्ययान्ताः सर्वे स्त्रीपुंसयोः स्युः । 'तस्यापत्यम्' (४. १. ९२) इत्यण् । औपगवः । 'टिड्ढाणञ्—' (४. १. १५) इत्यादिना ङीप् । औपगवी । गार्ग्यः गार्गी । द्विचतुःषट्पदोरगाः द्विपदचतुष्पदषट्पदवाचिनः उरगवाचिनश्च स्त्रीपुंसयोः । मानुषः मानुषी । सिंहः सिंही । द्विरेफः द्विरेफी । उरगः उरगीत्यादि । जातिभेदविशिष्टा एव जातिवाचिनः स्त्रीपुंसयोः । द्रुणी द्रुणः । मत्सी मत्स्यः । पूर्वयोगोऽस्यैव प्रपञ्चः । केचिदेकयोगमामनन्ति । तेषामयमर्थः— द्विपदादयो जातिभेदविशिष्टा एव जातिवाचिनः स्त्रीपुंसयोः, न सर्वे । तथाहि— पुरुषादयः पुंस्येव, स्त्रीप्रभृतयः स्त्रियामेवेष्यन्ते । द्विपदादिग्रहणं च जातिभेदोपलक्षणार्थम् । तेन द्विपदादिजातियोगेऽपि द्रुणमत्स्यादयः स्त्रीपुंसयोरिति ॥

**पुमाख्याश्च स्त्रीयोगैः सह मल्लकः ॥ ३७ ॥
मुनिर्वराटकः स्वातिर्वर्णको जाटलिर्मनुः ।
मूषा सुपाटी कर्कन्धूर्यष्टिः शाटी कटिः कुटिः ॥ ३८ ॥**

पुमाख्याश्च स्त्रीयोगैः सह मल्लकः ।

"मुनिर्वराटकः स्वातिर्वर्णको जाटलिर्मनुः ।
मूषा सुपाटी कर्कन्धूर्यष्टिः शाटी कटिः कुटिः ॥ "

इति पाठः । तत्र पुमाख्याः स्त्रीयोगैः सहेति सूत्रभेदः । तस्यार्थः— पुमाख्याः स्त्रीयोगैः सह स्त्रीपुंसयोः स्युः । यथा— प्रष्ठोऽग्रगामी पुरुषविशेषः । स यदा तात्स्थ्यात् स्त्रियां वर्तते तदा प्रष्ठी स्त्री । 'पुंयोगादाख्यायाम्'(४. १. ४८) इति ङीष् । नामान्यनुक्तान्याह— मल्लको मल्लिका भाजनभेदः । मुनिरयं मुनिरियं वा, तपस्वी । वराटको वराटिका कपर्दिः । स्वातिरयं स्वातिरियं, नक्षत्रभेदः । वर्णको वर्णिका, नीलिकादिः । जाटलिरयं जाटलिरियं वृक्षभेदः । अयं मनुः प्रजापतिः इयं मनुस्तद्भार्येति चन्द्रलिङ्गवृत्तिः । मूषा मूषः स्वर्णादिविलयनभाण्डम् । सुपाटः सुपाटी परिमाणविशेषः । रुधिरधारेति तु गोवर्धनः ।

इयमयं वा कर्कन्धूः, बदरी । इयमयं वा यष्टिः, दण्डः । शाटी शाटो वस्त्रभेदः । कट आसनविशेषः ओषधिविशेषश्च । कटिः श्रोणिः । अयं कुटिरियं कुटिः, स्वल्पावासः । कुटी इति पाठः प्रथमाद्विवचनान्तः । 'जातिभेदा यष्टिमुष्टिस्वातयः कीटवृश्चिकाः' इति पाठान्तरम् । ह्रस्वेकारोऽपि कीटशब्दोऽस्ति ॥

स्त्रीपुंसविवरणम् ।

स्त्रीनपुंसकयोर्भावक्रिययोः ष्यञ् क्वचिच्च वुञ् ।
औचित्यमौचिती मैत्र्यं मैत्री वुञ् प्रागुदाहृतः ॥ ३९ ॥

स्त्रीनपुंसकयोः, अधिकारोऽयम् । भावक्रिययोः ष्यञ् क्वचिच्च । क्वचिदिति भावक्रिययोर्विशेषणमसाकल्यार्थम् । चकार एवार्थे । भावकर्मणोर्विहितः ष्यञ् स्त्रीनपुंसकयोः स्यात् । उदाहरणमग्रसूत्रे । वुञ् । क्वचिच्चेत्यनुवर्तते । क्वचिदेव भावकर्मणोर्विहितो वुञ् स्त्रीनपुंसकयोः स्यात् । पूर्वसूत्रस्योदाहरणमाह — उचितस्य भावः कर्म वा औचित्यम् औचिती । एवं मैत्र्यं मैत्री । उदाहरणस्य दिङ्मात्रत्वाद् वैदग्ध्यं वैदग्धीत्यादि । वुञ् प्रागुदाहृत इति । मनुष्यवर्गादावुदाहृतम् । वार्धकं चौरिका । मनोज्ञादित्वाद् वुञ् ॥

षष्ठ्यन्तप्राक्पदाः सेनाच्छायाशालासुरानिशाः ।
स्याद् वा नृसेनं श्वनिशं गोशालमितर च दिक् ॥ ४० ॥

षष्ठ्यन्तेत्यादि । षष्ठ्यन्तपूर्वपदाः सेनादयोऽपुंसि स्त्रीक्लीबयोः स्युः । उदाहरणान्याह — वा नृसेनमित्यादिना । वावचनाद् नृसेना श्वनिशा गोशाला यवसुरं यवसुरा । तरुच्छायं तरुच्छाया । दिगिति उदाहरणदिगियमित्यर्थः । अपराणि च पाण्डवसेनं पाण्डवसेनेत्यादीनि द्रष्टव्यानि ॥

आबन्नन्तोत्तरपदो द्विगुश्चापुंसि नश्च लुप् ।
त्रिखट्वं च त्रिखट्वी च त्रितक्षं च त्रितक्ष्यपि ॥ ४१ ॥

आबन्नन्तोत्तरपदो द्विगुश्चापुंसि नश्च लुप् । आबन्तोत्तरपदोऽन्नन्तोत्तरपदश्च द्विगुरपुंसि स्यात । नकारस्य चोत्तरपदसंबन्धिनो लुप । दिगित्युदा-

हरणादिक् । तामाह — त्रिखट्वमित्यादिना । तक्षन्शब्दस्यान्नन्तत्वाद् नकारलोपः ॥

स्त्रीनपुंसकविवरणम् ।

त्रिषु पात्री पुटी वाटी पेटी कुवलदाडिमौ ।

त्रिष्वित्यधिकारोऽयम् । नामान्याह । पात्रीषट्कं त्रिषु । पात्री पात्रं पात्रः, भाजनविशेषः । पत्रादिरचिता पुटी । वेष्टितः स्थलभागो वाटी । पेटी वेत्रादिरचिता । कुवलो बदरीतरुः । स्त्रियां कुवली । दाडिमः प्रसिद्धः । स्त्रियां दाडिमी ॥

त्रिलिङ्गविवरणम् ।

परलिङ्गं स्वप्रधाने द्वन्द्वे तत्पुरुषेऽपि तत् ॥ ४२ ॥

इदानीमुच्चावचेन लिङ्गमाह — परलिङ्गं स्वप्रधाने द्वन्द्वे । द्वन्द्वसमासे स्वप्रधाने उभयपदार्थप्रधाने, इतरेतरद्वन्द्व इत्यर्थः, परं परस्थस्य शब्दस्य यल्लिङ्गं तत् स्यादित्यर्थः । उदाहरणं तु कुक्कुटमयूर्यौ मयूरीकुक्कुटौ । स्वप्रधान इति किम् । वाक्त्वचम् । श्रीस्रजम् । तत्पुरुषेऽपि तत् । तत् परस्थलिङ्गं तत्पुरुषेऽपि समासे स्यात् । करकिसलयं भुजलता ॥

अर्थान्ताः प्राद्यलंप्राप्तापन्नपूर्वाः परोपगाः ।
तद्धितार्थे द्विगुः संख्यासर्वनामतदन्तकाः ॥ ४३ ॥

अर्थान्ताः प्राचलंप्राप्तापन्नपूर्वाः परोपगाः । अर्थान्ताः, प्राद्यलमादिशब्दाः पूर्वाः पूर्वपदभूताश्च यत्र तेऽपि समासाः परोपगाः परकीयलिङ्गोपगाः, वाच्यलिङ्गा इत्यर्थः । अर्थान्ता यथा — विप्रार्थः सूपः । विप्रार्था यवागूः । विप्रार्थं पयः । प्रादिना प्रपरादयो गृह्यन्ते । अतिक्रान्तः खट्वामतिखट्वः पुरुषः, अतिखट्वा स्त्री, अतिखट्वं ब्राह्मणकुलमित्यादि । एवम् अलञ्जीविकः प्राप्तजीविकः आपन्नजीविकः । तद्धितार्थे द्विगुः । तद्धितार्थे यो द्विगुः सोऽपि परकीयलिङ्गोपगः । पञ्चसु कपालेषु संस्कृतः पञ्चकपालः पुरोडाशः । पञ्चकपाला यवागूः । पञ्चकपालं हविः । संख्यासर्वनामतदन्तकाः । संख्याशब्दाः सर्वनामानि तदन्तकाश्च अन्यलिङ्गाः स्युः । बहवो नराः बह्व्यः स्त्रियः बहूनि ब्राह्मणकुलानि । विंशत्यादौ बाध(मुन्नेयम्? उन्नेयः) । सर्वनामानि

यथा — सर्वः सर्वा सर्वम् । विश्वः विश्वा विश्वम् । तदन्तका यथा — परमसर्वः परमसर्वा परमसर्वम् ॥

बहुव्रीहिरदिङ्नाम्नामुन्नेयं तदुदाहृतम् ।
गुणद्रव्यक्रियायोगोपाधिभिः परगामिनः ॥ ४४ ॥

बहुव्रीहिरदिङ्नाम्नाम् । दिग्वाचिव्यतिरिक्तानां बहुव्रीहिरन्यलिङ्गः । तस्योदाहरणं किमित्याह — उन्नेयं तदुदाहृतम् । तस्योदाहृतमुदाहरणमुन्नेयम् ऊहनीयम् । उपहृतपशू रुद्रः । उद्धृतौदना स्थाली । प्राप्तोदकं नगरम् । अदिङ्नाम्नामिति किम् । उत्तरपूर्वा दिक् । गुणद्रव्यक्रियायोगोपाधिभिः परगामिनः । गुणयोगेन द्रव्ययोगेन क्रियायोगेन चोपाधिना विशेषणेन परगामिनः धर्मिणि ये प्रवृत्ताः ते परोपगाः अन्यलिङ्गाः । गुणशब्दो यथा — शुक्लः शुक्ला शुक्लम् । द्रव्यशब्दो यथा — दण्डी दण्डिनी दण्डि । क्रियाशब्दो यथा — कृतः कृता कृतम् ॥

कृतः कर्तर्यसंज्ञायां कृत्याः कर्तरि कर्मणि ।
अणाद्यन्तास्तेन रक्ताद्यर्थे नानार्थभेदकाः ॥ ४५ ॥

कृतः कर्तर्यसंज्ञायाम् । कर्तरि वर्तमानाः कृत्संज्ञकप्रत्यया अन्यलिङ्गाः स्युः । पाचकः पाचिका पाचकम् । असंज्ञायामिति किम् । दुनोतीति दावः वनाग्नेरियं संज्ञा । कृत्याः कर्तरि कर्मणि । कर्तरि कर्मणि च ये कृत्यप्रत्ययाः तदन्ता अन्यलिङ्गाः स्युः । हव्यस्तरुः हव्या लता हव्यं फलम् । कर्मणि — वाच्यः वाच्या वाच्यम् । अणाद्यन्तास्तेन रक्ताद्यर्थे नानार्थभेदकाः । तेन रक्ताद्यर्थे ये अणादयः प्रत्यया विहिताः तदन्ता नानार्थभेदकाः नानार्थविशेषकाः सन्तः अन्यलिङ्गा भवन्ति । कुसुम्भेन रक्तः कौसुम्भः पटः । कौसुम्भा शाटी । कौसुम्भं वस्त्रम् ॥

षट्संज्ञकास्त्रिषु समा युष्मदस्मत्तिङव्ययम् ।
परं विरोधे शेषं तु ज्ञेयं शिष्टप्रयोगतः ॥ ४६ ॥

षट्संज्ञकास्त्रिषु समाः । षकारनकारान्ताः संख्याः षट्संज्ञका इति स्त्ययान्ताश्च । ते त्रिषु लिङ्गेषु समाः तुल्याः । षट् स्त्रियः षड् जनाः ।

कुलानि। एवं पञ्च स्त्रियः पञ्च जनाः पञ्च कुलानि। कति स्त्रियः कति जनाः कति कुलानि। षट्संज्ञकस्यापि संख्यान्तर्गतत्वादेव त्रिलिङ्गत्वे लब्धे संख्या-सर्वनामतदन्तका इत्यस्यैवायं प्रपञ्चः। युष्मदस्मत्तिङव्ययम्। युष्मदस्मदी तिङन्तमव्ययं च त्रिषु लिङ्गेषु तुल्यरूपम्। यथा — त्वं प्रिया त्वं नाथः त्वं मित्रम्। एवम् अहं प्रिया अहं नाथः अहं मित्रं च। तिङन्तं यथा — अयं पचति इयं पचति इदं पचति। अव्ययं यथा — उच्चैर्गिरिः उच्चैः शाला उच्चैर्गृहम्। परं विरोधे। लिङ्गलक्षणयोर्विरोधे सति परं लक्षणं प्रवर्तते। यथा — मानुषो मानुषी भ्रमरो भ्रमरी इत्यत्र 'कषणभमरोपान्ता यद्यदन्ता अमी' इति पुंस्त्वे प्राप्ते 'द्विचतुःषट्पदोरगाः' इति स्त्रीपुंलिङ्गाः। शेषं तु ज्ञेयं शिष्टप्रयोगतः। यदत्र ग्रन्थविस्तरभयाद् लिङ्गं नाम च नोक्तं तत् शिष्टानां पूर्वाचार्याणां महाकवीनां च प्रयोगादवसेयम्। यथा —

"अ(न?)न्तोत्कृत्यन्तं गायत्र्याद्यं तथा छन्दः"

इति स्त्रीत्वानुशासनमरुगस्येरयन्यद् बोद्धव्यम्। नामानुशासनं यथा — 'निलिम्पा द्युषदो देवा' इत्यादि गङ्गाधरादीनाम्।

त्रीणि व्याकरणान्यधीत्य सकलं साहित्यमालोक्य च
प्राज्ञाध्यापकभाषितानि हृदये न्यस्याकृतेदं स हि।
प्राज्ञेनानु सनातनेन बहुशः प्रत्यक्षरं शोधितं
जिज्ञासा यदि शब्दवर्त्मनि तदा चैतत् समालोक्यताम्॥

इति वन्द्यघटीयश्रीसर्वानन्दकृतौ टीकासर्वस्वे लिङ्गादिसंग्रहवर्गः।
समाप्तं च टीकासर्वस्वम्।

शुभं भूयात्।